141
15 (A-C)

१४१
१५

अथ

(A) स्फोटचन्द्रिका । Spotachandrika

(B) सिध्दान्तकौमुदी । Siddhanth Koumudi

(C) सिध्दान्तकौमुदी । Siddhanth Koumudi

141
14(A)

तच्छक्तिकस्यपञ्चतिघ्रस्त्यादिकस्यवाचकत्वेवर्णस्फोटः तेचत्रयोगसमवायिनोविसर्गेतिवादयः नतुस्थानित्वेनकल्पि
तसकारलकारादयः तेषामनियतत्वात् तथाहि विसर्गेणपरोः स्मरणंतेनसोरेवंबालातिपः स्मरणंतेनलकारस्य एवंचयो
रवंस्पष्ठंमेव किंचस्थान्यादेशोज्ञानस्यस्यावैयाकरणस्यादेशमात्राद्बोधानापत्तेः एवंचस्थान्येचवाचकोलाघवात्न
त्वादेशाःगोरवात् तार्किकोक्तमपास्तंविपरीतगोरवापत्तेः अयंतार्किकाणांपदस्फोटत्वेनाभिमतः शक्तंपदमितितैःस्वी
कृतत्वात् तच्चमानाभावात्फलाभावात्स्वग्रंथविरोधाच्चायुक्तमितिशाब्दिकाः तथाहिशक्तंपदमितिचतुर्धा रूढयोगिकं
योगरूढं योगिकरूढंचेति गोः पाचकः पंकजं अश्वकर्णइतिक्रमेणोदाहरणानि तत्रपाचकइतियोगिकोदाहरणेयच्छ
क्तंपदंपचअकन योगिकं समुदायस्तुयद्यपियोगिकः तथापिनतच्छक्तः एवंचशक्तंपदंयोगिकमितिअविचारिताभि
धानं विशिष्टशक्त्यभावेसतिव्याकरणबोधितार्थप्रकृतिप्रत्ययसमुदायरूपस्यप्रतिङंतपदत्वंयोगिकत्वं सत्यंतंयो
गरूढावतिव्याप्तिवारणाय तत्रविशिष्टशक्तिग्रहात् एवंगोरितिरूढ्युदाहरणमप्यसंगतं व्याकरणकल्पितप्रकृ
तिप्रत्ययार्थप्रत्ययाभावेसमुदायस्यबलार्थबोधकत्वंरूढपदत्वं यथामणिनूपुरादिरूढलक्षणाक्रांतत्वात् शास्त्रक
ल्पितवर्णानुसंधानपूर्वकसमुदायशक्त्या अर्थबोधकपदत्वंयोगरूढपदत्वं यथापंकजादीनि तदाक्रांतत्वाद्योगरूढत्वंतु १

कं योगिकरूढोपितार्किकभेदोनयुक्तः सकृदुच्चारितःशब्दः सकृदर्थंगमयतिइतिन्यायात् मंडपपदंग्रहविशेषेरूढंभिन्नं
मंडपानकर्त्तरिभिन्नमितितदतिरिक्तभेदस्वीकारेमानाभावात् एवंरूढलक्षणयाः कर्मणिकुशलइतिउदाहरणमप्यसंगतं॥
उक्तरीत्याकुशलेरूढत्वेस्यकुशादानकर्त्तरियोगित्वस्यसंभवात् द्विरेफपदंभ्रमरेरूढमेव अतएवकोशेषुभ्रमरपर्यायेषु
उपादानं नाहिलाक्षणिकोपादानंपर्यायेऽस्ति एवंचस्ववाच्यपदवाच्यत्वसंबंधेनद्विरेफपदंभ्रमरेलक्षणेतितार्किकोक्त
मपास्तं अक्रूरेप्युक्तसंबंधसत्त्वेनतत्रातिव्याप्तेश्च यद्वा एकाक्षरकोशात्तत्तच्छक्तिकानांसर्वेषांवर्णानामेवस्फोट
त्वं अर्थवंतोवर्णाइतिभाष्येप्रतिपादनात् नचैवंधनमित्यादौप्रातिपदिकसंज्ञापत्तिः समुदायशक्तेःस्वाश्रयशक्त
ताव छेदकानुपूर्वीभंगजनकार्थकार्यप्रतिबंधत्वात् यत्तुभूषणेस्फुरत्यर्थोयस्मादितिस्फोटोवाचकइतियावत्इतिके
वलयोगिकस्फोटशब्दउक्तः तदसत् सम्यक्साधुशब्दानामिवासाधुशब्दानामपिशक्तिसत्त्वेनवाचकत्वाविशेषात्स्फोट
त्वापत्तेः नचेष्टापत्तिः।शाब्दिकैस्तथानंगीकारात् लाक्षणिकव्यंजकयोरसंग्रहापत्तेश्च नचशक्तोत्रव्यंजकस्त्रिधेत्यत्रात्रग्रहणात्
काव्येएकव्यंजकनव्याकरणइतिभ्रमितव्यं पदेनस्फोटोऽखंडोऽभ्यज्यतेइतिवदद्भिःस्त्रीतत्त्वीकारात्वात् ननुतार्किकमतेऽस्य
रेच्छाशक्तिः मीमांसकमतेऽतिरिक्ताशक्तिः पदार्थांतरंत्वविनतार्किकैश्चेश्वरेच्छानंकर्तृत्वात्तत्रानिनिगमनाविरहेणमीमांस

क्रमतैमेवांगीकृतं उभयथापि साधुष्वेव सत्त्वात् असाधुषु अन्यथा शक्तिमत्त्वं साधुत्वं इति साधुलक्षणाक्रांतेन असाधूनामपि सा
धुत्वापत्तेः शक्तिग्राहकव्याकरणकोशादेरभावान्नेति चेन्न तत्र शक्त्यभावे तेभ्यो बोधानापत्तेः। न च शक्तिभ्रमात् साधुशब्द
स्मरणाद्वा बोध इति तार्किकोक्तं युक्तं साधुशब्दस्मरणं विनाप्यसत्त्वानां बोधस्यानुभवसिद्धत्वाद्गौरवाच्च भ्रमाद्बोध इत्यपि न रज
तभ्रमात् गृहीतायाः शुक्तेः रजतव्यवहारानाधायकत्ववत् शक्तिभ्रमाज्जातबोधस्यापि व्यवहारानाधायकत्वापत्तेः सन्मात्रविष
यिण्याः ईश्वरेच्छायास्तत्राभावस्य वक्तुमशक्यत्वात् किंच शक्तिभ्रमः कस्य व्यवहारकर्तुरीश्वरस्य उतान्यस्य नाद्यः ईश्वरस्य
भ्रमत्वानुपपत्तेः नांत्यः स्वर्गादौ प्रयोजकस्वरूपसाध्वसाधुशब्दव्यवहारकर्तुरीश्वरादन्यस्याभावात् पुण्यपाप
जनकार्थस्य सृष्टिरीश्वरकर्तृका तथैव साध्वसाधूभयविधशब्दस्यापि सृष्टिरपीश्वरकर्तृका तथा च भ्रम इत्यशक्यमेव नचु
तदस्य बालस्यानुमितिभ्रमः साधुशब्देष्विवासाधुशब्देष्वपि शक्ति अनुमापकसामग्रीसत्त्वेन बाधकाभावेन च भ्रमत्वायोगात्।
साधुशब्देष्विवासाधुशब्देष्वपि शक्तिस्वीकारे शक्तिमत्त्वमिति साधुलक्षणाक्रांतत्वादसाधुत्वापत्तिः तथा च म्लेच्छितवै नापभाषि
तवै इति निषेधानवकाश इति चेन्न लाक्षणिकानां असाधुतापत्तेः न च वृत्तिमत्त्वं तत्र शक्तिलक्षणान्यतरनिवेशे गौरवात् तस्मा
त्पुण्यजनकतावच्छेदकजातिविशेषस्य साधुत्वं प्रत्यवायजनकतावच्छेदकस्यासाधुत्वं यद्वा व्याकरणबोध्यत्वं तत्त्वं तद्भिन्न
त्वमसाधुत्वं तथा च एकः शब्दः सम्यक्ज्ञातः व्याकरणतार्थविशेषे प्रकृतिप्रत्ययेन व्युत्पादितः सम्प्रयुक्तः स्यादित्यर्थ

श्रीवेदव्यासाय नमः॥ पित्रोः पादयुगं नत्वा जानकीरघुनाथयोः मौनिश्रीकृष्णभट्टेन तन्यते स्फोटचंद्रिका वाचकानां वा
च्यलक्ष्यव्यंग्यार्थप्रतिपादकानां वाचनिकलाक्षणिकव्यंजकानां शब्दानां तन्निष्ठजातेर्वा स्फोट इति व्यवहारः स्फुटति अ
र्थोऽयस्मादिति व्युत्पत्त्या पंकजपदवत् योगरूढः स्फोटशब्दः केवलयौगिकस्वीकारे वाच्यलक्ष्यव्यंग्यानां चेष्टायाः व्यं
ग्यार्थप्रतिपादकत्वेनातिव्याप्तेः न च वाचकादिपर्यायः स्फोटशब्दः प्रसिद्धः अक्षराणामकारत्वं स्फोटत्वं वर्ण
संश्रय इति हरिवंशे दृष्टत्वात् ते च वर्णपदवाक्याखंडपदाखंडवाक्येति भेदेन पंचव्यक्तिस्फोटाः शक्यतावच्छेदका
ल याः जातेर्वाच्यत्ववत् शक्यतावच्छेदिकाया जातेर्वाच्यत्वमिति मत्ते वर्णपदवाक्यभेदेन त्रिविधो जातिस्फोटः एवं चाष्टौ
स्फोटाः अथ यथा नरस्य शुद्धब्रह्मज्ञानार्थं अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयेति पंचसु कोशे
षु अपारमार्थिकपरब्रह्मत्वस्य प्रतिपादनमुपायः यथा वा अरुंधतीज्ञानार्थं स्थूलनक्षत्रे अपारमार्थिकारुंध
तीत्वबोधनं तथा पारमार्थिकाखंडवाक्य---बोधनार्थं एते वर्णपदवाक्याखंडपदस्फोटाः उपायाः तदुक्तं
उपायाः शिक्षमाणानां बालानामुपलालनाः असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते इति स्फुटद्वंतमिति एकतिङ्
तार्थमुख्यविशेष्यकं वाक्यमिति पदवाक्यलक्षणानाक्रांतवर्णसमूहस्य वर्णस्य प्रकृतिप्रत्ययरूपस्य व्याकरणेन गृही

वाच्यं भवन्मतेपितुल्यत्वात् ॥ एतावान्परंभेदः त्वन्मतेवृत्तिभेदेन मन्मतेएकयावृत्त्या नचलक्षणोच्छेदापत्तिः इष्टत्वात् यथाभवद्भिः
सर्वानुभवसिद्धापिव्यंजनालाघवान्नस्वीक्रियते तत्रव्यंजनोच्छेदापत्तेरदूषकत्वात् तथामन्मतेलाघवाच्छक्त्यैवनिर्वाहेलक्ष
णोच्छेदापत्तेरदूषकत्वात् वस्तुतएकवृत्त्यैवनिर्वाहेऽनेकवृत्तिकल्पनमन्याय्यमिति एवंतदर्थः अर्थपदस्यवृत्तिपरत्वात् अ
न्यायश्चैतस्यलाघवमूलकत्वात् नचानन्यलभ्यश्शब्दार्थइतिवाच्यं तस्यलक्षणयालभ्येशक्तिकल्पनमन्याय्यमितिनार्थः किंतु
संसर्गमर्यादयासिद्धेशक्तिकल्पनमयुक्तमितितदर्थात् एवंशाब्दिकानांशब्दवत्तद्वन्हौ अतिरिक्तशक्तिः स्वीकारः तार्किकाणांतुशब्देशक्तिः
स्वीकारोवन्हौतुनेत्यर्धजरतीयस्वीकारोनुचितः नचोत्तेजकाभावविशिष्टमण्यभाववत्त्वेनोपपत्तौतत्स्वीकारोव्यर्थइतिवाच्यं गुरुभू
तवैशिष्ट्यस्यकरणतावच्छेदकत्वस्वीकारापेक्षयालघुभूतस्वीकृतातिरिक्तशक्तिसंबंधस्यौचित्यात् किंचशाब्दिकमतेभेदसहिष्णुरभेदस्ता
दात्म्यं गुणद्रव्यत्वादीनांभेदेपिगुणंविनाद्रव्यानुपलंभात्तत्तयोस्तादात्म्यं एवंचसमवायोयत्रतत्रतादात्म्यमितिव्यवहारः तथाचतेगुणं
प्रतिघटस्यपूर्ववृत्तित्वासंभवेनकारणत्वान्यथानुपपत्त्याविशिष्टस्यकारणताभंगीकृत्यगुणविशिष्टघटंप्रतिगुणविशिष्टकपा
लस्यकारणत्वमितिस्वीकृतं तार्किकैस्तुविशिष्टस्यकरणतावच्छेदकत्वेविशिष्टस्यकारणत्वासंभवान्निर्गुणघटोत्पत्तिः स्वीकृता त
न्नचगुणाश्रयत्वरूपद्रव्यत्वलक्षणानाक्रांतत्वात्गुणसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वमितिनिष्कर्षः कृतः सोप्ययुक्तइतिभाति तथा
हिप्रतिबंधकोत्तेजकाभ्यांवन्हौजाताशक्तिः उत्तेजकाभावविशिष्टमण्यभावस्यकारणत्वस्वीकृत्यातिरिक्तशक्तिः खंडिता शब्देत्वसाधा

क्तिः स्वीकृता एवंविशिष्टस्यतत्रावच्छेदकत्वंस्वीकुर्वद्भिरनेकत्र खपुष्पवत्निर्गुणघटोत्पत्तिः स्वीकृता सर्वानारूढत्वात् एतत्सर्वमयोग्यत्वमि
तिदिक् शाब्दिकैस्तुशब्दवत्वन्हौकारणत्वेनभासिचातिरिक्तशक्तिः स्वीकृता सैवश्रोत्रंशक्तिविशिष्टंनभोवा एवंचदूरस्थभेरीशब्दस्यस्थानस्थि
तस्यश्रोत्रस्यदीपवत्प्रकाशमानसामर्थ्यं एवंचवीचीतरंगन्यायेनभेरीशब्दस्यश्रवणदेशागमनमितिनमनोरमं साक्षाद्भेरीशब्दश्रवणाभासत्वानु
भवापलापापत्तेः अनेकशब्दकल्पनेगौरवाच्च नश्रोत्रंभवत्तत्रगच्छतीतियुक्तं अकाशस्यगमनासंभवात् कर्णविवरस्याकाशाभावप्रसंगाच्च
श्रोत्रेंद्रियंगुणमात्रसाक्षात्कारजनकं केचित्तुश्रोत्रेंद्रियवद्रसनेंद्रियघ्राणेंद्रिययोरपिगुणमात्रसाक्षात्कारजनकत्वमितिवदंति तदयुक्तमि
त्यपरे तथाहि शब्दस्याकाशगुणत्वात्संभवामनसासाक्षात्संबंधेनकेवलप्रत्यक्षसंभवेपिरसगंधयोः संयुक्तसमवायःसन्निकर्षः सचद्रव्यसंबंधेनघ
टितइतिपरंपरासंबंधः तत्रद्रव्यस्यसाक्षात्कारसन्निकर्षसत्वेनद्रव्यंविनाकेवलस्यगुणस्यासत्वेनचकेवलगुणसाक्षात्काराभावः तस्माद्द्रव्यवि
शिष्टगुणसाक्षात्कारजनकत्वंतयोर्नगुणविशिष्टद्रव्यसाक्षात्कारजनकत्वं अनुभवेनतथैवज्ञातत्वान्नयात् चक्षुरिंद्रियत्वगिंद्रिययोस्तुगुणविशिष्ट
द्रव्यंद्रव्यविशिष्टोवागुणइतिउभयविधसाक्षात्कारजनकत्वं विस्तरस्तुमत्कृतशब्दार्थतर्कामृतेद्रष्टव्यः गौरवभियानेहतन्यतइतिदिक् प्रकृ
तमनुसरामः असाधुशब्दस्यवाचकत्वेपिव्याकरणप्रतिपाद्यत्वाभावात्स्फोटत्वाभावः तदंतर्गतवर्णानामेकाक्षरकोशाबद्धत्वेनशक्तिकानामर्था
नरस्फारकत्वेपदस्फोटइतिपदस्फोटविवेचेष्यते अनुकरणशब्दानामनुकार्यानुकरणयोर्भेदविवक्षयानुकार्यस्वरूपार्थप्रतिपाद्यत्वात्स्फो
टत्वं ननुसाध्वनुकरणस्यसाधुत्वेनस्फोटत्वेपिअसाध्वनुकरणस्यासाधुत्वात्कथंस्फोटत्वमितिव्यवहारइतिचेन्न असाध्वनुकरणस्यापिसाधुत्व
स्वीकारात् देवाहरररयइतिप्रयोक्तव्येहेअलयइतिप्रयोक्तव्यं तदनुकरणेहेलयोहेलयइतिकुर्वतः पराबभूवुरितिवाक्येपितस्यासाधुत्वं

कस्यापिसंमतंन तस्मादसाधोरेवानुकरणस्यसाधुत्वंसर्वसंमतं तत्रयदातयोरभेदविवक्षातदाऽर्थप्रकाशकत्वाभावात्नस्फोटत्वं शक्यज्ञानसंज्ञा
नायसर्वबहिर्भूतान्नमयकोशवदखंडवाक्याबोधनायवर्णस्फोटइतिदिक् इतिवर्णस्फोटः अथपदस्फोटोवर्णस्फोटापेक्षयाऽन्नमयकोशापेक्षया
तरंगप्राणमयकोशवत् अंतरंगोनिरूप्यते अंतरंगत्वंतु साक्षाद्बोधकत्वेन वर्णस्यबहिरंगत्वंतु पदनिष्पत्तिद्वाराद्बोधकत्वेन पदस्फोटोद्विविधः सखं
डोऽखंडश्च व्यवहारादिनापदएवशक्तिग्रहात्तत्रयोऽस्मार्कुसखंडपदस्फोटः पचतिरामइत्यादिस्वंतंतिङंतरूपः शक्तंपदमितिमतेसएववा
च्यस्फोटइतितार्किकाणां अथाखंडपदस्फोटोनिरूप्यते यश्चसर्वैरुपस्थितवर्णैर्व्यज्यते सचार्थप्रत्यायकइतिसिद्धांतः नचप्रतीतस्यप्रत्याय
कत्वंनास्ति अन्यथाऽनुच्चंचेत्यनेनार्थवेतिप्रसयापत्तेरिति अणुदित्सूत्रभाष्यविरोधः तस्यसामान्यतः प्रतीतस्यप्रत्यायकत्वंनास्तीतिनार्थः
किंतुशब्दस्वरूपमात्रप्रतीतस्यशब्दस्येतिप्रकरणानुरोधेनसंकोचात् एवंचरहसिपुस्तकमीक्षमाणस्यार्थप्रत्ययनापत्तिमाशंक्य तत्रसूक्ष्मोच्चारण
मस्त्येवेतिनव्योक्तिमपास्तं अनुभवविरोधाच्च यत्तुतार्किकचेदांतिनः यावद्वर्णव्यंग्योवायत्किंचिद्वर्णव्यंग्योवाचरमवर्णव्यंग्योवानत्ताव
दाद्यः आशुविनाशिनांमेलनासंभवात् नद्वितीयः पशब्देनैवव्यज्यतेस्फोटेइतरवर्णवैयर्थ्यं नतृतीयः पूर्वपूर्वानुभवजन्यसंस्कारसहितचरमवर्णे
नैवार्थप्रतीतिसिद्धौकिंस्फोटेनेति तदसत् वर्णानामाशुविनाशकत्वेमानाभावात् नचोत्पन्नोगकारोनष्टोगकारइतिप्रतीतिर्मानं तस्यास्त्वा
कारासंभूतइतिवदाविर्भावतिरोभावत्वेनाप्युपपत्तेः अनंतप्रागभावध्वंसकल्पनेगौरवाच्च अनित्यत्वेपिवर्णानुभवसंस्कारजन्यस्मृतौ
मेलनसंभवात् द्वितीयोपि नद्वितीयादिवर्णवैयर्थ्यं पशब्दोच्चारणेपदस्फोटउतपूर्वस्फोटउतपयस्फोटइति संदेहनिवर्तकत्वेनसार्थक्यात्
तृतीयपटशब्दयोर्विजातीयतंतुसंयोगविशिष्टचरमसंयोगस्येवपटपदका[illegible]त्वेनयकारित्वेपि आनिरिक्तोऽवयवीस्वीक्रियते नत्वेनतथात्वं

विशेषयुक्तः गोणीशब्दस्यावपनेएवसाधुत्वं नगवि विनिगमनाविरह इत्यापन्नयुक्तं अन्यत्रपक्षपातिनीयुक्तिर्हिविनि
गमना साचज्ञानस्यपूर्वाभिव्यक्तिरूपात्रस्तेऽस्ति अतएवईश्वरज्ञानंशक्तिरितिवर्धमानोपाध्यायः शाब्दिकास्तुबोध
जनकत्वंशक्तिः तच्चज्ञानादिबोधजनकतावच्छेदकधर्मवत्त्वं तदुक्तंहरिणा इंद्रियाणांस्वविषयेष्वनादिर्योग्यतायथा अना
दिरर्थैःसंबंधः शब्दानांयोग्यतातथेति तज्जनकतावच्छेदकधर्मवत्त्वरूपायोग्यता नचागृहीतशक्तिकस्यशाब्दबोधानुद
यात् शाब्दबोधेशक्तिग्रहस्यहेतुत्वात् बोधोत्तरंशक्तिग्रहः शक्तिग्रहोत्तरंबोधइति अन्योन्याश्रयः व्याकरणकोशादिनाशक्ति
ग्रहात् अन्यथेश्वरज्ञानंशक्तिरितिपक्षेपिशक्तिग्रहोत्तरंबोधः बोधोत्तरंशक्तिग्रह इत्यन्योन्याश्रयस्यतुल्यत्वात् मद्गाशब्दा
र्थयोरनादिःसंबंधोममप्रतिभातिशक्तिःसामर्थ्यं यथादीपादौतेजसियाह्यग्राहकत्वसामर्थ्यं वन्ह्यादौदाहकत्वसामर्थ्यं
इंद्रियादौविषयप्रकाशकत्वं तत्स्वरूपंसदेवोपयुज्यतेनतुज्ञातं एवंशब्देपिग्राह्यग्राहकत्वसामर्थ्यंस्वरूपसदेवोपयुक्त
मेवनतुज्ञातं नचागृहीतशक्तिकस्यापिशाब्दबोधापत्तिः सन्निकर्षादिवत्तद्बोधाभावप्रयोजकीभूताभावप्रतियो
गितात्पर्यग्रहाभावाभावात् नचनानार्थेष्वेकतात्पर्यस्यकारणत्वमितिचेत्सत्यं शाब्दिकमतेसर्वेषांनानार्थकत्वात् अ
तएवएकार्थदारादेरितिसूत्रभाष्येऽनेकशक्तेः शब्दस्येत्युक्तं अनेके अनेकावाशक्तिरितिअस्यविग्रहः अवच्छे
दकभेदशक्तिभेदइतितार्किकाणांसिद्धः लाघवाच्छक्तेरैक्यमेवेतिशाब्दिकसिद्धांतः नचान्याचष्यानेकार्थत्वंइति

भवात्तदतिरिक्तपदस्फोटेपितुल्यत्वाद्गौरवाच्च स्फोटेतुल्लाघवंकथमितिचे श्रृणु ध्वनिभिरेवस्फोटोभिव्यज्यते एवंचानंतवर्णतत्प्रागभा
वध्वंसकल्पनात् नदीदीनसरोरस: राजाजरा इत्यादौभिन्नार्थप्रतीत्यर्थानुपूर्व्या: पूर्ववर्णानुभवजन्यसंस्कारसहितचरमवर्ण
स्यकारणतानवाच्येत्यतिलाघवं तथातुसावाच्येत्यतिगौरवं एतावत्सघट्टके नवर्णातिरिक्तोवर्णव्यंग्य: चेतन्यंसर्वभूतानांमित्यत्रशब्दब्र
ह्मेतिममतिरितिशब्दब्रह्मरूपातिरिक्तोस्फोटस्तार्किकादिदूषणाभासनिरसनपूर्वकोव्याख्यात: प्रकारांतरेणाप्युच्यते सखंडपदस्फोटो
नातिरिक्तोयत्रतार्किकादिभिर्यौगिकं रूढं योगरूढंपद मित्युच्यते पाचक: गौ: पंकजमित्यादितदेवास्माभि: सखंडपदस्फोटत्वेनव्य
वह्रीयते सखंडशक्त्यनुसंधानैपूर्वककोशादिनासमुदायग्रहात् यस्यतुव्याकरणज्ञानरहितस्यकेवलव्यवहारेणसमुदायेशक्ति
ग्रह: तस्यसएवअखंडपदस्फोट: यद्रूढपदंमणिनूपुरादिकं तत्सर्वेषामपि अखंडपदस्फोटत्वेनाभिमतस्तत्रसर्वेषामपिअवय
र्थ वज्ञानाभावविशिष्टव्यवहारेणसमुदायेशक्तिग्रहात् एवंपंचयोगिकरूढयो: सखंडाखंडयोश्चपर्यायत्वंसिद्धं नाममात्रेविवाद इ
तिदिक् एवंचतार्किकादीनांदूषणाभासागर्भस्त्रावेणैवपराहताइतिदिक् नाहितार्किकादितर्कोएवसत्तर्कोइतिनियम: तत्रापिबहूनां
अनुभवाविषयासत्तर्कदर्शनात् तथाहि विशिष्टस्यकार्यत्वकारणत्वेनैवसिद्धोनिर्गुणघटोत्पत्तिर्युक्तेतिपूर्वमुक्तं तथारूपस्य
व्याप्यवृत्तित्वनियमात् घटस्यप्रत्यक्षान्यथानुपपत्त्यास्वीक्रियमाणातिरिक्तंचित्ररूपमितिकल्पनाप्युक्तैवतादृशनियमे

प्रमाणाभावात् अस्तुवानियमः तथापि तत्तद्रूपावच्छिन्नतदवयवसन्निकर्षसहितचरमरूपावच्छिन्नचरमावयवसंनिकर्षेणैव घटसाक्षात्का
रसिद्धौ तदतिरिक्तचित्ररूपस्वीकारे गौरवात् एवंविशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्तस्याचायंघट इत्यादौ असंभवात् घटघटत्वयोः सं
बंधानवगाहि निर्विकल्पकज्ञानकल्पना च अयोग्यत्वादयुक्तैव नित्यसंबंधातिरिक्तसंयोगसंबंधादौ एतत्कल्पनाद् दंडीपुरुष इत्यादौ नत्वयं
घट इत्यादौ तत्र विशिष्टज्ञानस्यैव जायमानत्वात् एवं च निर्विकल्पकज्ञानं न स्वीकार्यमिति महल्लाघवं एवमखंडसखंडभेदेन कालद्वैविध्यक
ल्पनमप्ययुक्तमेव अखंडस्य व्यवहारानाधायकत्वात् नचखंजन्मनांजनकः कालो जगतामाश्रयो मत इति जगदाधारत्वेन जनकत्वेन तत्स्वी
कारः ईश्वरस्यैव प्रसिद्धत्वात् न च पदार्थखंडने दिक्कालौ नेश्वरादतिरिच्येते इत्यादिना अस्माभिस्तदुक्तमिति चान्यं तत्र दिक्कालयोरेव वि
शिष्येश्वराभेदः उक्तः स च सर्वं खल्विदं ब्रह्मेति श्रुतिविरोधः यतो वा इमानि जायंते तस्मिन्सर्वं प्रतिष्ठितं इत्यादिश्रुतिभिर्जगत्कर्तृत्वं नैवेश्वरस्य न
तु कालस्य तेन जन्यानां जनकः काल इत्यस्य पृथिव्यादिसप्तपदार्थानामपि ईश्वराभेनाविशेष्योभयोरेव तदभेदप्रतिपादनस्य चायुक्तत्वात् एवं
खंडकालोप्ययुक्तः सूर्यरूपोपाधिभेदेन हि खंडकालः एवं च सूर्यगतिविशेषस्यैव खंडकालत्वं किं तदतिरिक्तेन तथा च खंडकालस्य क्रियात्वं
एवं पीलुपाकवादिभिः परमाणौ पाकं स्वीकृत्य श्यामघटनाशोत्तरं रक्तघटोत्पत्तिः स्वीकृता तत्र चक्रदंडादिकारणाभावात्कथमुत्पत्तिः निमित्त
कारणं विनापि तत्स्वीकारे दंडादीनां निमित्तकारणत्वं विच्छिद्यते एवं विधानेकानुभवानारूढगुरुभूततत्काश्रयणं लाघवमूलकं अतिरिक्ताखंडा
स्फोटखंडनं दूषणाभासैरनुचितमिति दिक् वाक्यार्थज्ञानं प्रति पदार्थज्ञानस्य कारणत्वात् पदस्फोटं निरूप्य वाक्यस्फोटो निरूप्यते स चाखंडसखंडं

कवाक्यता उत वाक्यैकवाक्यता उतग्रंथैकवाक्यता नाद्यः क्रियाकारकाणामेव तत्संभवात् तयोरेव परस्परं साकांक्षासंभ
वात् उभयाकांक्षायामेव तत्संभवेनान्यतराकांक्षायां तदसंभवाच्च नद्वितीयः इतरानपेक्षया सिद्धेनैकवाक्येन सापेक्षे
तरवाक्यस्यान्वयेसा प्रकृते च वाक्यसंदर्भरूपग्रंथयोरेव सा न तु वाक्ययोः असमानस्थितवाक्यानां परामर्शजन्यं ज्ञा
नमनुमितिरिति आदिवाक्यानां प्रत्यक्षवाक्याकांक्षाभावात् आसत्त्यभावाच्च किंच वाक्यैकवाक्यता हि प्रकरणमन्यत
राकांक्षा प्रकरणमिति तल्लक्षणात् तस्याप्येकवाक्यत्वस्वीकारे च क्यात्प्रकरणस्य दुर्बलत्वप्रतिपादनश्रुतिलिंगवाक्यप्र
करणेत्यादि बलाबलविरोधः नतृतीयः प्रत्यक्षानुमानयोराकांक्षार्थिकी न तु शाब्दिकी तस्मादत्र स्वल्लेखनं यत्किंचिद
र्थकत्वं न मनुचितं शिरोमणिग्रंथस्तु प्रथमसंगतिमत् तदेकं वाक्यमित्यनेनैव प्रसिद्धत्वादितिदिक् प्रकृतमनुसरामः
व्यवहारेण वाक्य एव शक्तिग्रहाद्वाक्यस्यैव वाचकत्वात् वाक्यस्फोटः न च पूर्वं ग्रहीतापि वाक्ये शक्तिरावापोद्वापाभ्यां भ
ङ्क्त्वा पदे गृह्यत इति न च वाच्यं एवं सति पदार्थज्ञानं प्रति वाक्यार्थज्ञाने हेतुतापत्तौ वाक्यार्थज्ञानं प्रति पदार्थज्ञानस्य
हेतुत्वमिति सर्वसिद्धांतभंगापत्तेः वाक्यस्फोटो द्विधा सखंडोऽखंडश्चेति अखंडो द्विधा वर्णातिरिक्तोऽनतिरिक्तश्च

पदवर्णेन स्वीक्रियंते गौरवात् लाघवाद्ध्वनिरेवाखंडो वाक्यस्फोटो व्यज्यत इति मतं तदातिरिक्तः अस्मिन्पक्षे वर्णाभावे
न यावद्वर्णव्यंग्यत्वादिदूषणाभासा गर्भस्राव एव पराहताः यदा तु ध्वनिर्वर्णव्यज्यत इति मतं तदा घटमानयेतिस
खंड वाक्यस्फोटः क्रियाकारकयोर्विभागस्य कर्तुमशक्यत्वात् हरेव विष्णो वेत्यादावेकादेशे कृते प्रातिपदिकाख्या
तपदयोर्विभागाशक्यतया अनतिरिक्त वाक्यस्फोटः क्रियाकारकज्ञानशून्यस्याव्युत्पन्नस्य घटमानयेत्यपि अ
नतिरिक्ताखंडवाक्यस्फोट इव पदेन वर्णा विद्यंते न वर्णेष्ववयवा न च वाक्यात्पदानामत्यंतमविवेको न कश्चिन्नेत्ययमखं
डातिरिक्तोऽनतिरिक्तत्वं वाक्यस्फोटप्रकारः यथावर्णेष्ववयवा न संतस्तथेत्यर्थः पश्य मृगो धावति पचति भवतीत्यादा
वप्यखंडसखंडातिरिक्तानतिरिक्तत्वं पूर्ववदेव बोध्यं मृगकर्तृकवर्तमानधावनक्रियायाः दृशिक्रियायां कर्मतासंबं
धेनान्वयः देवदत्तकर्तृकपचिक्रियायाः वर्तमानभवनक्रियायां नान्वयः तदुक्तं सुबंतं हि यथानेकं तिङंतस्य विशेषणं त
थातिङंतमप्याहुस्तिङंतस्य विशेषणमिति यत्तु धावनानुकूलकृतिमान् मृग इति प्रथमांतविशेष्यकशाब्दबोध इति पक्षे
मृगदृशिधात्वर्थनिरूपितकर्मत्वाद्द्वितीयापत्तिः तमित्यध्याहारे च वाक्यभेदापत्तिशंकायां पश्यत्वलक्षणपर्यायां वकः परम

धार्मिकः इत्यादाविव वाक्यार्थस्य कर्मत्वान्न वाक्यभेद इति केचित्तन्माहितं तन्मुधैव अंतरंगधावनक्रियानिरूपितकर्तृत्वात्तस्य चा
७ ख्यातेनोक्तत्वात्प्रथमोपस्थितो बहिर्भूतदृशिधात्वर्थनिरूपितकर्मत्वेपि अंतरंगसंस्कारबाधेमानाभावेनैव वाक्यं स्वमांसादिभिः स्तु
दुपहंतुमितिचदुपपत्तेः एवंचात्रप्रथमांतविशेष्यकपक्षेपिक्त्वाद्विकदूषणाभावेप्येकदेवदत्तकर्तृकपचिक्रियाकर्तृकंभवनमित्य
र्थे पचति भवतीत्येकवाक्यतापत्तेः नच पाकानुकूलकृतिमान्देवदत्तो भवतीत्यर्थे निष्पन्ने सविशेषणे विधिनिषेधौ विशेषण
मुपसंक्रमितः सति विशेष्ये बाधमिति न्यायेन क्रियाया एककर्तृकत्वं भविष्यतीत्येकवाक्यतायां फलाभावाच्च ननु समानवाक्ये
निघातयुष्मदस्मदादेशा वक्तव्या इति निघातः फलं तिङ्ङतिङः इत्यत्तिङ्ग्रहणेन तदभावात् सत्यं तत्संबंधिनी देवदत्तकर्तृका पचिक्रि
या भवतीत्यर्थे देवदत्तः पचति भवति इति प्रयोगे समानवाक्यत्वाभावेनादेशापत्तेः अनेकदेवदत्तकर्तृका एका पचिक्रिया इ
त्यर्थे देवदत्ताः पचंति भवंतीति प्रयोगो न स्यात् अनेककर्तृकत्वेन भवतिशब्दे बहुवचनापत्तेः पश्य मृगो धावतीत्यत्र निघातप्रयो
जनसत्त्वाच्च किंचात्र वाक्यार्थस्य कर्मत्वं तार्किकोक्तं न युक्तिमत् तथाहि वाक्यार्थोतिरिक्तो नातिरिक्तो वा नाद्यः तस्य दृश्यनुपस्था
पितत्वेन दृशिक्रियायामन्वयानुपपत्तेः शब्दोपस्थापितस्यैव शाब्दबोधविषयत्वनियमात् अन्यथा घटपदार्थत्वेनोपस्थिताका ७

८

उभेदेनाद्विधा तत्राखंडपदातिरिक्तो खंडपदव्यंग्यत्वाल्लाघवात्स्वीक्रियते तत्राखंडपदस्फोटे निरूपितं अन्यत्राकांक्षायोग्यतासत्तानां कारतानवाच्ये
तिमहल्लाघवं सखंडस्फोटस्तु प्रसिद्ध एव यद्वा हरेर्वेत्याद्येकादेशे कृते पदविभागेऽज्ञाने तत्राखंडवाक्यस्फोटः अन्यत्र सखंडस्फोट इति
विवेकः एवं च दूषणाभासा गर्भस्रावा एव तत्र वाक्यं नाम एकतिङंतार्थकमुख्यविशेष्यकं यथा पचति भवतीति तत्रापि पचतीत्यस्य
विधेयांशे त्वेपि मुख्यविशेष्यत्वाभावान्नाव्याप्तिः तार्किकास्तु पूर्वपरार्थयैकवाक्यताप्रतिपत्तये ऽर्थैक्यत्वापादकं वाक्यं साकांक्षं
चेद्विभागे स्यादिति मीमांसकसूत्रमुपन्यस्य विशेष्यभूतभावनैकत्वादित्यर्थैकत्वस्य तेषामर्थैस्त्वा तात्पर्यविषयैक्यमिति स्वयमं
र्थं व्याख्याय प्रत्यक्षानुमानयोरेकवाक्यत्वमुक्तं स्वातंत्र्येण यद्यसंगतिमत् तदेकवाक्यत्वमिति वक्तव्यं ननु यत्किंचिदर्थक
त्यनमनुचितं दोषदुष्टं च तथाहि पठनतात्पर्ये यथैव देवदत्तः पठति तथैव चनवपुत्रः पठतीत्यत्रैकवाक्यतापत्तेः नचेष्टापत्तिः
समानवाक्यत्वापत्तेरादेशापत्तेः तथा स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि इत्यासादनप्रतिपादको मंत्रः
प्रत्यक्षग्रंथवत् तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति सादनप्रतिपादको मंत्रः सदनप्रतिपादकापेक्षत्वेपि
सदनप्रतिपादकस्य न तदपेक्षा एवं चानयोरेकवाक्यतापत्तिः अर्थैकत्वादित्यस्य भवदुक्तप्रस्तुदाहरणविरोधात् किंचैवं पदे

शस्यापिशाब्दबोधविषयत्वापत्तेः नद्वितीयः विशिष्टस्यार्थेह्रीकृत्यनामार्थस्यधात्वर्थत्वेनसमंभेदसंबंधेनान्वयोव्युत्पन्नः अन्यथाओ
दनः पचतीत्यापत्तेः नचतत्रवाक्यार्थकर्मत्वंननामार्थस्येतिवाच्यं रमणीयओदनः पचतीत्यापत्तेः पश्यलक्ष्मणपंपायामि
त्यादौतमित्यध्याहारेणवाक्यभेदएव एवंचवाक्यार्थस्यकर्मत्वमित्यविचारिताभिधानं एवंचनीलोघटोभवतीतिवाक्येनी
लकर्तृकोभवनाश्रयोघटइतिव्युत्पत्तिवादोक्तमपिनयुक्तं नामार्थस्येत्यादिव्युत्पत्तिबाधेमानाभावात् नीलोघटोभवनाश्रयोइतिबोधसं
भवाच्च सविशेषणेहिविधिनिषेधौविशेषणमुपसंक्रामितः सतिविशेष्येबाधइतिविशेषणेनीलेभवनस्यान्वयोपिभविष्यतीतिदिक् ए
सोयं वंतत्त्वमसिदेवदत्तइत्यादौसखंडाखंडत्वंपूर्ववदेवबोध्यं तत्वमसीत्यत्रतत्पदवाच्यसर्वज्ञत्वविशेषचैतन्यस्यत्वंपदवाच्येनांतःकरण
विशेषचैतन्येनैक्यार्थसंभवात् ऐक्यसिध्यर्थंस्वरूपेजहदजहल्लक्षणेतिसांप्रदायिकाः नन्वयोरैक्येकिंमानं नचनानार्थेतिव्युत्प
त्तिः तस्याः किंनामार्थयोरेवाभेदान्वयः उतनामार्थयोरभेदएवेति नाद्यः स्तोकंपचतिवैश्वदेव्यामीक्षेत्यादौव्यभिचारात् नांत्यः घ
टपटावित्यादौव्यभिचारात् तस्मात्संप्रधानिसामानाधिकरण्येवैयधिकरण्यमन्याय्यमितिलाघवमूलकोहिसः सत्यं मृत्योः समृत्यु
माप्नोतिइहनानेवपश्यतिइतिभेदनिंदापूर्वकभेदप्रतिपादकश्रुतिर्मानं नचतत्रापियः नानाइवपश्यतिसमृत्योर्मृत्युमाप्नोतिय

स्कवस्कतोनानात्वंपश्यतिसनेतिइति यच्छब्दात्प्रतीयमानार्थेभेदस्यैवप्रतीतेः किंचराजपुरुषइत्यत्रेपतस्यत्वमितिषष्ठीसमासेना
विभेदस्यैवप्रतीतेरितिवाच्यं छांदोग्येसदेवसोम्येदमग्रआसीत्इत्यारभ्यतत्सत्यंसआत्मातत्त्वमसिश्वेतकेतोइत्युपसंहारेणोप
क्रमोपसंहारयोरेकरूप्येणवेदतात्पर्यनिर्णायकेनैवयस्यनिर्णीतत्वात् ब्रह्मतत्वंपरादाधोन्यत्रात्मनोब्रह्मवेदेपिश्रुत्यादिरैक्याद्यु
वधारणात् अस्मिन्पक्षेलाक्षणिकस्फोटः वस्तुतस्तु अयंवाचकस्फोटएव तथाहि विशिष्टशक्त्युपस्थापितयोस्तत्वंपदार्थयो
रभेदान्वयानुपपत्तावपिविशेष्ययोः शक्त्युपस्थापितयोरभेदान्वयेबाधकाभावः यथाघटोनित्यइत्यत्रघटपदवाच्यैकदेशघ
टत्वस्यायोग्यत्वेपियोग्यघटव्यक्त्यासहानित्यान्वयः यद्वा विशेष्येएवशक्तिः विशेषणंतूपलक्षणं अस्मिन्पक्षेनकोपिदोषः
यद्वा यथानानार्थस्थलेसंयोगादिनाभिधानियमनंतथाभेदान्वयान्वयानुरोधात्विशेष्येएवाभिधानियमनं अस्तुवालक्षणा
साचजहल्लक्षणयातयाविशेषणांशत्यागमात्रंनतुविशेष्येपितस्याउपयोगः शक्त्यैवतदुपस्थितिसंभवात् एवंसोयंदेवदत्तेत्यत्रा
पि तथाचजहदजहदुदाहरणंमसंगतमितिदिक् एवमेकोवृक्षः पंचनौकाभवंतीतिवाक्येसखंडाखंडत्वेपूर्ववदेवबोध्यं अत्र
तार्किकाः गृण्हातिवाचकसंख्याप्रकृतैर्विहितेनहीतिवचनात् प्रकृत्यर्थशब्दलक्षितमेकवचनमेवस्वार्थात्तरंभवतीत्याहुः॥तदयु

क्तं गृण्हातीत्यस्यतविषयत्वात् यथासंधौभवंतिब्राह्मणाः त्वद्भवाम्यहंमद्भवसित्वमित्यादौवचनपुरुषयोः प्रवृत्तिगत
योरेवदर्शनात् ननुसंकोचेकिंमानं स्वचर्णापिंडः एवद्विरांगारसदृशेकुलेभवतइतिभाष्यप्रयोगएव उद्देश्यविधेयभावस्थ
लेतुउद्देश्यगतसंख्याख्यातप्रत्ययेशास्त्राणिचेत्प्रमाणंस्फरित्यादिषुपुनरपिवाक्यंद्विधा काव्यात्मकमकाव्यात्मकंचे
ति द्वितीयंतूक्तं आद्यंतुतददोषौशब्दार्थौसगुणावनलंकृतीपुनः क्वापीत्यनेनलक्षितं अत्रयावद्दोषाभावोवक्तुमशक्यः
असंभवात् यत्किंचिद्दोषाभावेअदोषपदवैयर्थ्यं तस्मान्नत्रोऽल्पत्वमर्थः अनुदाराकन्येतियावत् अल्पत्वंचस्फुट
प्रतीमानदोषराहित्यं इदंकाव्यलक्षणंरसगंगाधरेदूषितं शब्दार्थयोर्व्यासज्यवृत्तिकाव्यत्वेकाव्यंश्रुतमर्थोनज्ञातइति
व्यवहारासंभवात् तदसमंजसं यदेकदेशेदग्धेपिपटोदग्धइतिवदेकदेशेपिप्रयोगसंभवात् समुदायवृत्ताः शब्दाः क्वचिदे
कदेशेपिवर्ततइतिभाष्यात् तल्लक्षणमेवनतुसमंजसं रमणीयार्थप्रतिपादकः शब्दः काव्यंरमणीयत्वंचलोकोत्तराल्हा
दजनकज्ञानविषयत्वं इतितल्लक्षणं इदंचतत्वमसीत्यादावतिव्याप्तं नचाल्हादेचेजात्यंकिंततः लोकोत्तराल्हादज
नकज्ञानविषयत्वस्योभयत्रतुल्यत्वात् ब्रह्मानंदत्वेनसर्वैर्वर्णितत्वात् किंचरमणीयपदस्यरमणीयार्थप्रतिपादकत्वमस्ति

नना नाद्यं रमणीयशब्दस्यापिरमणीयार्थप्रतिपादकशब्दत्वेन काव्यत्वापत्तेः इदंचभाष्येअपशब्दार्थकः शब्दोऽपशब्दइतिचेन्न
अपशब्दस्यापिअपशब्दत्वापत्तेरित्यनेनध्वनितं नांत्यः रमणीयार्थप्रतिपादकत्वाभावेलक्षणत्वानुपपत्तेः तस्मात्प्रका
शोक्तमेवलक्षणंसम्यक् वह्निनासिंचतीतिवाक्यस्फोटएव ननुवाक्यार्थबोधेऽयोग्यतानिश्चयस्यप्रतिबंधकत्वंयोग्यता
ज्ञानस्यकारणत्वंतार्किकादिसिद्धांतसिद्धं प्रकृतेचवह्निः सेककरणंनेतिविषयबाधरूपयोग्यतानिश्चयरूपबाधकसत्वात्वि
षयाबाधरूपयोग्यताज्ञानासत्वात्कथमेतस्यवाक्यस्फोटत्वमितिचेत्सत्यं तात्पर्यविषयाबाधोहियोग्यता तदभावो
योग्यता प्रकृतेचात्युष्णजलेनसिंचतीतितात्पर्यविषयः यथास्यक्षोणीपतेः परार्धपरयालक्ष्मीलतासंख्ययाप्रज्ञाच
क्षुरैर्वेक्ष्यमाणबधिरप्ररव्याः कीलाकीर्तयः गीयंतेस्वरमष्टमंकलयताजातेनवंध्योदरान्मूककानांप्रकरणेकूर्मरमणी
दुग्धोदधेरोधसि गगनंगगनाकारं सागरःसागरोपमः रामरावणयोर्युद्धंरामरावणयोरिव कैलासस्यप्रथमशिखरेवे
णुसंमूर्छनाभिः श्रुत्वाकीर्तिविबुधरमणगीयमानांयदीयां स्रस्तापांगासरसबिसिनीकांडसंजातशंकाद्दिङ्मातंगाःश्रव
णपुलिनेहस्तमावर्तयंति ॥ पश्यनीलोत्पलद्वंद्वान्निःसरंतिशिताः शराइति आद्यालंकारिकवाक्येषुगंगायांघोषइत्यादे

तत्वमसीत्यादेश्चतात्पर्याबाधोयोग्यत्वमितिसर्वसिद्धांतः तथात्रापि यद्वाशाब्दबोधेयोग्यतानिश्चयस्यनप्रतिबंधकत्वं तत्सत्वे
पित्वंबृहस्पतिरितिप्रस्तावकवाक्यात्संतोषोपलब्धेः नाहंरंडापुत्रइतिबाधनिश्चयेसत्यपित्वंरंडापुत्रइतिवाक्यात्क्रोधोपल
ब्धेश्च शाब्दबोधाभावेएतदनुपपत्तेः किंचपश्यनीलोत्पलद्वंद्वादित्यादिसाध्यवसानादिलक्षणास्थलेशरानीलोत्पलद्वंद्वापा
दनकालेंत्ययोग्यतानिश्चयेसतितद्वाक्यश्रवणानंतरंकाव्यबोधोत्तरमयोग्यतानिश्चयः पूर्वंवा नाद्यः बाधनिश्चयेसतिबो
धाभावात् नांत्यः बोधाभावेन्वयानुपपत्तेरभावात् नहिस्वरूपसतिअन्वयानुपपत्तिर्लक्षणाबीजं किंतुज्ञातान्वयपूर्वमयो
ग्यतानिश्चयसत्वेनसजामप्येस्त्येवेतिवाच्यं वाक्यार्थबोधजन्यान्वयानुपपत्तिज्ञानस्यपूर्वमभावात् गंगाघोषाधिकरणं
नेतिलौकिकज्ञानसत्वेगंगायांघोषइतिवाक्याद्गंगाधिकरणकोघोषइतिबोधोत्तरंमन्वयानुपपत्तिर्हिअनुभवसिद्धानचतस्याःपूर्वं
ज्ञानंसंभवति नचभ्रमात्मकोबोधः इतितार्किकोक्तंयुक्तिमत् अयोग्यतानिश्चयस्यप्रतिबंधकत्वंयोग्यताज्ञानस्यकारणत्वंप्रक
ल्पनीयंभ्रमात्मकोबोधश्चकल्पनीयइतिमहद्गौरवं स्फोटवादिनात्रितयमपिनकल्प्यमितिलाघवं वाक्यार्थबोधजन्य
प्रवृत्त्याचेचतत्स्वीकारात् किंचनाहंपरमेश्वरइतिबाधनिश्चयेसतितत्वमसीतिवाक्याद्बोधाभावेभ्रमात्मकोबोधेवानप्रमात्व

कंज्ञानंसंभवतिभ्रमात्मकबोधस्यप्रमात्मकबोधजननायोग्यत्वात् एवंचदशमस्त्वमसीत्यत्रापि ननुअनेकवर्णातिरिक्तंअनेकध्व
निर्व्यंग्योऽखंडवाक्यस्फोटः कः पदार्थइतिचेत् शृणु यथातार्किकैः पूर्वोक्तंमडीत्यागत्यतरसंभवेपिचित्ररूपमतिरिक्तंस्वीक्रिय
ते यथाशाब्दिकैः रेफद्वयभागविशिष्टएकोवर्णः ऋतिऋवाऌतिऌवेत्यत्रवार्तिकेस्वीयते यथावासिद्धमेउः सस्थानत्वाद्दीर्घोप्योत्तर
भूयस्त्वत्वादितिवार्तिकेनैकाचामेकवर्णात्मकत्वमुक्तं तथामयापिअनेकध्वनिर्व्यंग्यः वाक्यात्मकएकोवर्णइतिस्वीक्रियते सच
शब्दब्रह्मरूपः तत्रमतत्रयंशब्दब्रह्मेतिशब्दार्थशब्दमित्युपरेजगुः चैतन्यंसर्वभूतानांशब्दब्रह्मेतिमेमतिरिति शब्दब्रह्मेतिनिर्वचने
नापितस्यैववर्णत्वंसिद्धं अनुमानादपि तथाहि अखंडवाक्यस्फोटः एकवर्णरूपः श्रावणत्वात् ध्वनिर्व्यंग्यत्वाद्वा यन्नैवंतन्नै
वं यथापृथिव्यादि अन्वयदृष्टांतस्तुमतांतरेसिद्धवर्णादि यस्तुतस्तु अन्वयव्यतिरेक्यनुमानंव्यर्थंउपनीतभानेनैवगतत्वा
र्थत्वात् तथाहि यथाहिचंदनखंडस्यलौकिकंप्रत्यक्षंसौरभ्यस्यालौकिकं तथाधूमस्यलौकिकंवह्नेरलौकिकं इतिअस्मिन्प
क्षेउपनीतभावेनेतिविवेकः यद्वालाघवाद्दोषाभावात् ध्वनिर्व्यंग्यस्यान्यस्याभावाच्च वर्णत्वस्वीकारः नच ध्वनिर्व्यंग्यस्य
गुणीभूतव्यंग्यप्रभेदेकाक्षिप्तस्यार्थस्यापिअन्यस्यसंभवइतिवाच्यं तस्य ध्वनिविकारकाकुव्यंग्यत्वेपिध्वनिर्व्यंग्यत्वाभावात् किं
चकामःसंकल्पः विचिकित्साश्रद्धाश्रद्धाभीर्ह्रीरित्येवंसर्वंमनएवेतिश्रुत्याकामादीनांमनोधर्मत्वेप्रतिपादितेपितार्किकैरात्मधर्मत्व ११

मुक्तं तच्चसर्वैरप्यंगीकृतं तत्तुभ्रमात्मकं यथाजपाकुसुमसन्निधानेस्फटिकोलोहितइतिज्ञानं प्रकृतेतुमनःसान्निध्यंआत्मधर्मबीजं।
श्रुतिबाधश्च स्फोटेतुनतथा तस्मादेकवर्णात्मकोऽखंडवाक्यस्फोटोवाचनिकः इतिसिद्धं॥ ॥इतिश्रीरघुनाथसद्यात्मज
श्रीकृष्णकृतस्फोटचंद्रिकासमाप्ता ॥ ॥श्रीसदाशिवार्पणमस्तु

१२

स्फोटचंद्रिकासमाप्ता

१२



सिद्धांतकौमुदीप्रारंभोयम्

एकस्मान्ङः ञणवटाद्वाभ्यां षः स्मिभ्य एव कणमाः स्युः ॥ ज्ञेयो चयो चतुर्भ्यो रः पंचभ्यः शलौ षड्भ्यः ॥ इत्येकचत्वारिंशत्प्रत्याहाराः २

।सिधांतकौ ॥१॥ श्रीगणेशायनमः ॥ पाणिनीयकात्यायनपतंजलिभ्यो नमो गुरुभ्यः ॥ श्रीगुरुचरणाभ्यां नमः ॥ श्रीसरस्वत्यैनमः ॥ ॥ सु॰ १०
निर्विघ्नमस्तु ॥ मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ॥ वैय्याकरणसिधांतकौमुदीयं विरच्यते ॥ १ ॥ अइउण् ॥ ऋऌ
क् ॥ एओङ् ॥ ऐऔच् ॥ हयवरट् ॥ लण् ॥ ञमङणनम् ॥ झभञ् ॥ घढधष् ॥ जबगडदश् ॥ खफछठथचटतव् ॥
कपय् ॥ शषसर् ॥ हल् ॥ इति माहेश्वराणि सूत्राण्यनादि संज्ञार्थानि ॥ एषामंत्या इतः ॥ लण्सूत्रे अकारश्च ॥ हका
रादिष्वकार उच्चारणार्थः ॥ हलंत्यं ॥ हल् इति सूत्रेंत्यमित्स्यात् ॥ आदिरंत्येन सहेता ॥ अंत्येनेतासहित आदिर्मध्यगा
नां स्वस्य च संज्ञा स्यात् ॥ इति हल् संज्ञायां ॥ हलंत्यं ॥ उपदेशेंत्यं हलित्स्यात् ॥ उपदेश आद्योच्चारणं ॥ ततो अण् अ
च् इत्यादि संज्ञा सिधौ ॥ उपदेशेजनुनासिक इत् ॥ उपदेशेनुनासिको जित्संज्ञः स्यात् ॥ प्रतिज्ञानुनासिक्याः पाणिनीयाः शिव
लण्सूत्रस्थ वर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा ॥ प्रत्याहारेष्वितां न ग्रहणं ॥ अनुनासिक इत्यादि निर्देशात् ॥ ॥
न ह्यत्र ककारे परे अच्कार्यं दृश्यते ॥ आदिरंत्येनेत्येतत्सूत्रेण कृता संज्ञा प्रत्याहारशब्देन व्यवह्रीयंते ॥ ऊकालोज्झ्रस्वदीर्घप्लुतः ॥
उश्च ऊश्च ऊ३श्च वः ॥ वां कालइव कालो यस्य सोच् क्रमाद्ध्रस्वदीर्घप्लुत संज्ञः स्यात् ॥ स प्रत्येकमुदात्तादि भेदेन त्रिधा ॥ उच्चैरु
दात्तः ॥ ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नो ऽजुदात्त संज्ञः स्यात् ॥ आये ॥ नीचैरनुदात्तः ॥ स्पष्टं ॥ अर्वाङ् ॥ समो ॥१॥

प्रत्याहारेष्वितां कथं न ग्रहणं पुनः ॥ आचारादप्रधानत्वाल्लोपश्च बलवत्तरः ॥ ४

141/15 (B)

सिद्धांतकौमुदी प्रारंभोयम्

 तमेव॥एतच्च सूत्रकारेणज्ञापितं॥तथाहि॥अअ इति विवृतमनूद्य संवृतोनेनविधीयते॥अस्यचाष्टाध्यायींसंपूर्णांप्रत्य
सिधत्वात्शास्त्रदृष्ट्याविवृतत्वमस्त्येव॥तथाचसूत्रं॥पूर्वत्रासिधं॥अधिकारोयं॥तेनसपादसप्ताध्यायींप्रति त्रिपाद्य
प्रयत्न सिधा॥त्रिपाद्यामपिपूर्वंप्रतिपरंशास्त्रमसिधं॥बाह्यप्रयत्नस्त्वेकादशधा॥विवारः संवारः श्वासो नादो घोषो ऽघोषो ऽल्पप्राणो
महाप्राणउदात्तोनुदात्तः स्वरितश्चेति॥खयांयमाः खयः ᳲकपौ विसर्गः शरएवच॥एतेश्वासानुप्रदानाअघोषाश्च
विवृण्वते॥१॥कंठमन्येतुघोषाःस्युः संवृतानादभागिनः॥अयुग्मावर्गयमगा यणश्चाल्पासवः स्मृताः॥२॥ ॥
वर्गेष्वाद्यानांचतुर्णांपंचमेपरे मध्येयमोनाम पूर्वसदृशोवर्णः प्रातिशाख्येप्रसिद्धः॥पलिक्क्नीः॥चख्ख्नतुः॥अग्ग्निः॥
तत्र घ्घ्नंतिइत्यत्र क्रमेण कखगघेभ्यः परेतत्सदृशाःयमाः॥ वर्गाणांप्रथमद्वितीयाः खयः तथातेषामेवयमाः॥ जिह्वामूलीयोप
ध्मानीयौविसर्गः शषसाश्चेत्येतेषां विवारः श्वासोघोषश्च॥अन्येषांतु संवारोनादो घोषश्च॥वर्गाणांप्रथमतृती
यपंचमाः प्रथमतृतीययमौ यरलवाश्चाल्पप्राणाः॥अन्येमहाप्राणाइत्यर्थः॥बाह्यप्रयत्नाश्चयद्यपिसवर्णसंज्ञायाम
नुपयुक्तास्तथापिआंतरतम्यपरीक्षायामुपयोक्ष्यंतइतिबोध्यं॥कादयोमावसानास्पर्शाः॥यरलवाअंतस्थाः॥श
षसहाऊष्माणः॥अचः स्वराः॥ᳵकᳶपइतिकपाभ्यांप्रागर्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ॥अंअः ॥२॥
यंनने

इत्यचःपरा ववनुस्वारविसर्गौ॥इतिस्थानप्रयत्नविवेकः॥ ॥ऋलृवर्णयोर्मिथः सावर्ण्यंवाच्यं॥ ॥अकारहक
रयोरिकारशाकारयोरृकारषकारयोर्लृकारसकारयोश्चसावर्ण्येप्राप्ते॥ नाज्झलौ॥ ॥आकारसहितोचू आ
चू॥सचहल्चेत्येतौमिथःसवर्णौनस्तः॥तेनदधीत्यस्यहरतिशीतलंषष्ठंसांद्रं मित्येतेषुपरेषुयणादिकंन॥
अन्यथादीर्घादीनामिवहकारादीनामपिग्रहणकशास्त्रबलादचूत्वंस्यात्॥तथाहि॥अणुदित्सवर्णस्या
ऽचाप्रत्ययः॥ ॥प्रतीयतेविधीयतेइति प्रत्ययः॥अविधीमानोणुदिच्चसवर्णस्यसंज्ञा स्यात्॥अत्रा
णुपरेणणकारेण॥कुचुटुतुपुएतेउदितः॥तदेवमइत्यष्टादशानांसंज्ञा॥तथकाराकारौ॥ऋकारस्त्रिंशतः॥
एवंलृकारोपि॥एचोद्वादशानां॥एदैतोरोदौतोश्चनमिथःसावर्ण्यं॥ऐऔजितिसूत्रारंभसामर्थ्यात्॥तेनैचश्च
तुर्विंशतेःसंज्ञास्युरितिनापादनीयं॥नाज्झलावितिनिषेधोयद्यप्याक्षरसमाम्नायिकानामेवतथापिह
पि३ कारस्यआकारोनसवर्णः॥तत्राकारस्यापिप्रश्लिष्टत्वात्॥तेनविश्वपाभिरित्यत्रहोढइतिढत्वंनभवति॥अ
नुनासिकाननुनासिकभेदेनयवलाद्विधा॥तेनाननुनासिकास्तेद्वयोर्द्वयोःसंज्ञा॥तपरस्तत्कालस्य॥[illegible]तः
परोयस्मात्सचतात्परश्चउच्चार्यमाणसमकालस्यैवसंज्ञास्यात्॥तेनअत्इत्उत्इत्यादयःषण्णांषण्णांसंज्ञा॥ऋत्

इतिद्वादशानां ॥ वृद्धिरादैच् ॥ आदैच्च वृद्धिसंज्ञः स्यात् ॥ अदेङ्गुणः ॥ अदेङ्च गुणसंज्ञः स्यात् ॥ भूवादयो धातवः ॥ क्रिया
वाचिनो भ्वादयो धातुसंज्ञास्युः ॥ प्राग्रीश्वरान्निपाताः ॥ इत्यधिकृत्य ॥ चादयोऽसत्वे ॥ अद्रव्यार्थाश्चादयो निपातसंज्ञास्युः ॥
प्रादयः ॥ एतेऽपि तथा ॥ अद्रव्यार्थाः प्रादयस्तथा ॥ उपसर्गाः क्रियायोगे ॥ गतिश्च ॥ प्रादयः क्रियायोगे उपसर्गसंज्ञा
गतिसंज्ञाश्च स्युः ॥ प्र । परा । अप । सम् । अनु । अव । निस् । निर् । दुस् । [illegible] । दुर् ॥ वि । आङ् ॥ नि । अधि । अपि । अति । सु ।
उत् । अभि । प्रति । परि । उप । एते प्रादयः ॥ नवेति विभाषा ॥ निषेधविकल्पयोर्विभाषासंज्ञा स्यात् ॥ स्वं रूपं शब्दस्या
शब्दसंज्ञा ॥ शब्दस्य स्वरूपं संज्ञि शब्दशास्त्रे या संज्ञा तां विना ॥ येन विधिस्तदन्तस्य ॥ विशेषणं तदन्तस्य संज्ञस्या
त्स्वस्य च रूपस्य ॥ समासप्रत्ययविधौ प्रतिषेधः ॥ उगिद्वर्णग्रहणवर्जं ॥ विरामोऽवसानं ॥ वर्णानामभावोऽवसानसंज्ञः स्या
त् ॥ परः सन्निकर्षः संहिता ॥ वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् ॥ सुप्तिङन्तं पदं ॥ सुबन्तं तिङन्तं च पदसंज्ञं स्या
त् ॥ हलोऽनन्तराः संयोगः ॥ अज्भिरव्यवहिता हलः संयोगसंज्ञास्युः ॥ ह्रस्वं लघु ॥ संयोगे गुरु ॥ संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात् ॥ दीर्घं संज्ञं
मसरंउसंज्ञे च ॥ दीर्घं स्यात् ॥ इति संज्ञाप्रकरणं ॥ ॥ इको गुणवृद्धी ॥ गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्रेक इति षष्ठ्यं ॥३॥
तं पदमुपतिष्ठते ॥ अचश्च ॥ ह्रस्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्राच इति षष्ठ्यन्तं पदमुपतिष्ठते ॥ आद्यन्तौ टकितौ ॥ टित्कितौ
यस्योक्तौ तमाद्यन्तावयवौ स्तः ॥ मिदचोऽन्त्यात्परः ॥ अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित्स्यात् ॥ षष्ठी
॥ अच इति निर्धारणे षष्ठी ॥ १
तस्य

हारः स्वरितः ॥ उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरित[illegible]संज्ञः स्यात् ॥ तस्यादित उदात्तमर्धह्र
स्वं ॥ ह्रस्वग्रहणमतंत्रं ॥ स्वरितस्यादितोऽर्धमुदात्तं बोध्यं ॥ उत्तरार्धं तु परिशेषादनुदात्तं ॥ तस्य चोदात्तस्वरितपरत्वे श्र
वणं स्पष्टं ॥ अन्यत्र तूदात्तश्रुतिः प्रातिशाख्ये प्रसिद्धा ॥ क ३ वोऽश्वाः ॥ रथानां न ये ३ राः ॥ इत्यादिष्वनुदात्तः ॥ अग्निमीळे इत्या
दावुदात्तश्रुतिः ॥ स नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा ॥ मुखनासिकावचनोऽनुनासिकः ॥
वर्णे मुखसहितनासिकयोच्चार्यमाणोऽनुनासिकसंज्ञः स्यात् ॥ तदित्थं ॥ अइउऋएषां वर्णानां प्रत्येकमष्टादश भेदाः ॥ लृवर्ण
स्य द्वादश ॥ तस्य दीर्घाभावात् ॥ एचामपि द्वादश ॥ तेषां ह्रस्वाभावात् ॥ तुल्यास्यप्रयत्नं सवर्णं ॥ ताल्वादिस्थानमा
भ्यंतरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णं स्यात् ॥ अकुहविसर्जनीयानां कण्ठः ॥ इचुयशानां तालु ॥ ऋ
टुरषाणां मूर्धा ॥ लृतुलसानां दन्ताः ॥ उपूपध्मानीयानामोष्ठौ ॥ ञमङणनानां नासिका च ॥ एदैतोः कण्ठतालु ॥
ओदौतोः कण्ठोष्ठं ॥ वकारस्य दन्तोष्ठं ॥ जिह्वामूलीयस्य जिह्वामूलं ॥ नासिकानुस्वारस्य ॥ ॥ इति स्थानानि ॥ ॥
यत्नो द्विधा ॥ ॥ आभ्यन्तरो बाह्यश्च ॥ आद्यश्चतुर्धा ॥ स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात् ॥ तत्र स्पृष्टं प्रयतनं स्पर्शा
नां ॥ ईषत्स्पृष्टमन्तस्थानां ॥ विवृतमूष्मणां स्वराणां च ॥ ह्रस्वस्यावर्णस्य प्रयोगे संवृतं ॥ प्रक्रियादशायां तु विवृ

सिद्धांतकौमु इति यणः स्थानिवद्भावे प्राप्ते ॥ न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु ॥ पदस्य चरमावय सव०
॥४॥ वे द्विर्वचनादौ च कर्त्तव्ये परनिमित्तोऽजादेशो न स्थानिवत्स्यात् ॥ इति स्थानिवद्भावनिषेधः ॥ झलां जश् झशि ॥ स्पष्टं इति
धकारस्य दकारः ॥ अदर्शनं लोपः ॥ प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् ॥ संयोगान्तस्य लोपः १ संयोगांतं यत्पदं तस्य लोपः तदं ३
स्यात् ॥ इति यलोपे प्राप्ते ॥ यणः प्रतिषेधो वाच्यः ॥ यणो मयो द्वे वाच्ये ॥ मय इति पंचमी यण इति षष्ठी पक्षे यकारस्यापि द्वित्वं
॥ तदिह धकारयकारयोर्द्वित्वविकल्पाच्चत्वारि रूपाणि ॥ एकधमेकयं ॥ द्विधमेकयं ॥ एकधं द्वियं ॥ द्विधं द्वियं ॥ सुद्ध्युपास्यः
॥ मद्ध्वरिः ॥ धात्त्रंशः ॥ लाकृतिः ॥ नादिन्याक्रोशे पुत्रस्य ॥ पुत्रशब्दस्य न द्वे स्तः आदिनीशब्दे परे आक्रोशगम्ये ॥ पुत्रादि
पुत्रादिनीत्वा नीत्वमसि पापे ॥ आक्रोशे किम् ॥ तत्त्वकथने द्वित्वं भवत्येव ॥ तत्परे च ॥ पुत्रपुत्रादिनी त्वमसि पापे ॥ वा हतजग्धयोः ॥ पुत्रहती
ग्रीः पुत्रहती ॥ पुत्रजग्धी ॥ पुत्त्रजग्धी ॥ त्रिप्रभृतिषु शाकटायनस्य ॥ त्र्यादिषु वर्णेषु संयुक्तेषु वा द्वित्वं ॥ इन्द्रः ॥ इन्द्द्रः ॥ राष्ट्रं ॥ राष्ट्रं ॥ न
सर्वत्र शाकल्यस्य ॥ द्वित्वं न ॥ अर्कः ॥ ब्रह्मा ॥ दीर्घादाचार्याणां ॥ द्वित्वं न ॥ दात्रं ॥ पात्रं ॥ अचो रहाभ्यां द्वे ॥ अचः पराभ्यां रेफहका
राभ्यां परस्य यरो द्वे वा स्तः ॥ हर्य्यनुभवः ॥ नह्यस्ति ॥ हलो यमां यमि लोपः ॥ हलः परस्य यमो लोपः स्याद्वा यमि ॥ इति य
लोपपक्षे द्वित्वाभावपक्षे चैकयं रूपं तुल्यं ॥ लोपारंभफलं तु ॥ आदित्यो देवतास्यास दित्यं ॥ यमां यमीति यथासंख्यावि ॥४॥
ज्ञानान्नेह ॥ माहात्म्यं ॥ हलः किं ॥ यण्यो ॥ शाशय्यते ॥ एचोऽयवायावः ॥ एचः क्रमादय् अव् आय् आव् एते स्युरचि ॥ तस्य लो

३ अनचि चेति प्राप्तौ रेफस्य द्वित्वं तत्र क्रोञ्जिन्यन्यायेन वा धाते ३ आदेशाः

ऊँ अध्वपरिमाणे वाच्ये ओदन्तस्य गोशब्दस्य यूतिपरे अवादेशः स्यात् +३
प्रयोजनाभावात् १

लोपः ॥ तस्येत्तो लोपः स्यात् ॥ इति यवयोर्लोपो न ॥ उच्चारणसामर्थ्यात् ॥ एवं चेत्संज्ञापीह न प्रवर्तते ॥ हरये ॥ विष्णवे ॥ नायकः ॥
कारा पावकः ॥ वांतो यि प्रत्यये ॥ यादौ प्रत्यये परे ओदौतोरवावौ स्तः ॥ गोर्विकारो गव्यं ॥ गोपयसोर्यत् ॥ नावा तार्यं ॥ नाव्यं ॥ नौवयोध आव्+२
र्म्यादिना यत्प्रत्ययः ॥ २ गोर्यूतौ छंदस्युपसंख्यानं ॥ अध्वपरिमाणे च ॥ गव्यूतिः ॥ गुतियुतीत्यादिना यूतिशब्दो निपातितः
वांतइत्यत्र वकारात्परं गोर्यूतावित्यत्र छकाराद्वा पूर्वभागे लोपो व्योर्वलीति लोपनवकारः प्रश्लिष्यते ॥ तेन श्रूयमाणवका
प्रत्ययनिमित्तस्ये रांतादेशः स्यात् ॥ वकारो न लुप्य इल इति यावत् ॥ धातोस्तन्निमित्तस्यैव ॥ यादौ प्रत्यये परे धातोश्चेद्वांतादेशः स्तर्हि त
वेध न्निमित्तस्यैव नान्यस्य ॥ लव्यं ॥ अवश्यलाव्यं ॥ तन्निमित्तस्यैव किं ॥ ओयते ॥ औयत ॥ क्षय्यजय्यौ शक्यार्थे ॥ वांतादेशो नि
पातनार्थमिदं सूत्रं ॥ क्षेतुं शक्यं क्षय्यं ॥ जेतुं शक्यं जय्यं ॥ शक्यार्थे किं ॥ क्षेयं जेयं योग्यं पापं जेयं मनः ॥ क्रय्यस्तदर्थे ॥ क्षेयं ६
प्रकृत्यर्थो इत्यवि तस्मै प्रकृत्यर्थाय इदं तदर्थं ॥ क्रेतारः क्रीणीयुरिति बुध्या आपणे प्रसारितं क्रय्यं ॥ क्रेयमन्यत् ॥ क्रयणार्हमित्यर्थः ॥ लोपः
निमयः ५ ८ शाकल्यस्य ॥ अवर्णपूर्वयोः पदान्तयोर्यकारवकारयोर्वा लोपोऽशि परे ॥ पूर्वत्रासिद्धमिति लोपशास्त्रस्यासि
द्धत्वान्न स्वरसंधिः ॥ हर एहि ॥ हरयेहि ॥ विष्ण इह ॥ विष्णविह ॥ श्रिय उद्यतः ॥ श्रियायुद्यतः ॥ गुरा उत्कः ॥ गुरावुत्कः ॥
कानि संति कोस्त इत्यत्रास्तेरल्लोपस्य स्थानिवत्त्वेन यणावादेशौ प्राप्तौ ॥ न पदान्तेति सूत्रेण पदान्तविधौ तन्निषेधान्न भवतः
एकः पूर्वपरयोरित्यधिकृत्य ॥ आद्गुणः ॥ अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्संहितायां ॥ उपेन्द्रः ॥ रमेशः ॥ गंगोदकं ॥
पर

॥सिद्धांतकौ उरण्रपरः॥ ऋइतित्रिंशतः संज्ञेत्यकेनतस्थानेयोण्स रपरः सन्नेवप्रवर्त्तते॥ तत्रांतरतम्यात् कृष्ण र्द्धिरित्यत्रार् त्तवर्त्यात् र स्य
॥५॥ यत्राल्॥ अचोरहाभ्यामितिप क्षेद्वित्वं॥ झरोझरिसवर्णे॥ हलःपरस्यझरोलोपोवास्यात्सवर्णेझरि॥ द्वित्वाभावेलोपेचसति
एकधं॥ असतिलोपेद्वित्वलोपयोर्वा द्विधं॥ सतिद्वित्वे लोपेचासतित्रिधं॥ रूपाणिधिः॥ कृष्णर्धिः॥ कृष्णर्द्धिः॥ कृष्णर्द्धिः॥ यणइति
पंचमीमयइतिषष्ठीतिपक्षेककारस्यापि द्वित्वं॥ लस्येत्वनचिचेति॥ तेनतवल्कारइत्यत्रस्पचतुष्टयं बोध्यं॥ द्विवलं
स्येवकस्येवनोभयत्रस्मयोरपि॥ नवल्कारादिषुबुधेर्बोध्यरूपचतुष्टयं॥ एधधेरेचि॥ आदेचिपरेवृधिरेकादेशःस्या
त्॥ गुणापवादः॥ कृष्णैकत्वं॥ गंगौघः॥ देवैश्वर्यं॥ कृष्णौत्कंठ्यं॥ एत्येधत्यूठ्सु॥ अवर्णादेजाद्योरेत्येधत्योरूठिचपरेपूर्वपर
गद्धंउद् योर्वृधिरेकादेशःस्यात्‌पररूपगुणापवादः॥ उपैति॥ उपैधते॥ प्रष्ठौहः॥ एजाद्योःकिं॥ उपेतः॥ माभवान्प्रेदिधत्॥ पुरस्तादपवादाः अनंतरान्विधीन्बाधंतेनोत्तरानितिन्यायेनइयंवृधिरेङिपररूपस्येवबाधिकानत्वोमाङोश्चेत्यस्य॥ तेनावैहीवाधिरेस्या प्राचस्त्यवसू तुस्वरूपं
धुरव॥ अक्षादूहिण्यामुपसंख्यान॥ अक्षौहिणीसेना॥ स्वादीरेरिणोः॥ स्वैरः॥ स्वेनईरितुंशीलमस्येतिस्वैरी॥ स्वैरि
णी॥ प्रादूहोढोढ्येषैष्येषु॥ प्रौहः॥ प्रौढः॥ प्रौढिः॥ अर्थवद्ग्रहणेनानर्थकस्य॥ प्रश्नेतिसूत्रेराजेःपृग्भ्राजिग्रहणात् श्र
तेनउध्वग्रहणेक्तांतमेवगृह्यते॥ ननुक्तवत्वंतस्यैकादेशः॥ प्रौढवान्॥ इषइच्छायांतुदादिः॥ इषगतौदिवादिः॥ इष
आभीक्ष्ण्येक्र्यादिः॥ एषाघञ्णिण्यतिच एषः॥ एष्यः॥ इतिरूपे॥ तत्रपररूपेप्राप्तेअनेनवृधिः॥ प्रैष्यः॥ प्रैषः॥ यस्त ॥५॥
नेद
ङीपः प्राग्ववर्तोऊरिनशात्‌माङ्मायद्धिः॥ प्रौढिः २

प्रतिज्ञारूनाःपाणिनीयाः६

स्थानेयोगा॥ अनिर्धारितसंबंधविशेषाषष्ठीस्थानेयोगाबोध्या॥ स्थानंचप्रसंगः॥ स्थानेंतरतमः॥ प्रसंगेसतिसदृशतम शा
आदेशःस्यात्॥ यत्रैतेकविधिमांतर्यंतत्रस्थानतआंतर्यंबलीयः॥ तस्मिन्नितिनिर्दिष्टेपूर्वस्य॥ सप्तमीनिर्देशेनविधीयमानंका शी २
बोध्ये र्यवर्णांतरेणाव्यवहितस्यपूर्वस्यज्ञेयं॥ तस्मादित्युत्तरस्य॥ पंचमीनिर्देशेनविधीमानंकार्यंवर्णांतरेणाव्यवहितस्यपरस्यज्ञेयं
स्यां अलोंत्यस्य॥ षष्ठीनिर्दिष्टोयस्यादेशःस्यात्॥ ङिच्च॥ अयमप्यंत्यस्यैवस्यात्॥ सर्वस्येत्यस्यापवादः॥ आदेःपरस्य॥ परस्ययद्वि
त्यसये हितंतत्तस्यादेर्बोध्यं॥ अलोंत्यस्यापवादः॥ अनेकाल्शित्सर्वस्य॥ स्पष्टं॥ अलोंत्यसूत्रापवादः॥ अष्टाभ्यओशइत्याद्
यपवादःपरस्येत्यस्यपिसदपिपरत्वादनेनबाध्यते॥ स्वरितेनाधिकारः॥ स्वरितत्वयुक्तेशब्दरूपंअधिकृतंबोध्यं॥ परनित्यांत स्व६
रंगापवादानामुत्तरोत्तरंबलीयः असिद्धंबहिरंगमंतरंगे॥ अकृतव्यूहाःपाणिनीयाः॥ निमित्तविनाशोन्मुखंदृष्ट्वात
त्प्रयुक्तंकार्यंनकुर्वन्तीत्यर्थः॥ ॥इतिपरिभाषाप्रकरणं॥ ॥इकोयणचि॥ इकःस्थानेयण्स्यादचिसंहितायांविषये॥ सु
धीउपास्यइतिस्थिते॥ स्थानतआंतर्यादीकारस्ययकारः॥ सुध्यउपास्यइतिस्थिते॥ अनचिच॥ अचःपरस्ययरोद्वे
वास्तोनत्वचि॥ इतिधकारस्यद्वित्वं॥ स्थानिवदादेशोनल्विधौ॥ आदेशःस्थानिवत्स्यान्नतुस्थान्यलाश्रयविधौ॥ अनेनेहय
स्य कारस्थानिवद्भावेनायमाश्रित्यअनचिचेतिद्वित्वनिषेधनशक्यःनल्विधाविति॥ तन्निषेधात्॥ अचःपरस्मिन्पूर्व
विधौ॥ अल्विध्यर्थमिदं॥ परनिमित्तोजादेशःस्थानिवत्स्यात्स्थानिभूतादचःपूर्वत्वेनदृष्टस्यविधौकर्त्तव्ये॥
यो न धो अ
५उद्देश्यविधेययोर्भिन्नलिंगकृतदोषानवकाशः५

सि·कौ· पररूपंवाच्यं॥ तच्छुटेः॥शकंधुः॥कर्कंधुः॥कुलटा॥ सीमंतः केशवेशेसीमांतोन्यः॥मनीषा॥हलीषा॥लांगलीषा॥ पतंजलिः॥सारंगः रू·न्धरी·
पशुपक्षिणोः॥सारंगोन्यः॥आकृतिगणोयं॥मार्तंडः॥ओत्वोष्ठयोः समासेवा॥स्थूलोतुः॥स्थूलौतुः॥बिंबोष्ठः॥बिंबौष्ठः॥ समासे
॥द्वि॥ किं॥तवौष्ठः॥ओमाङोश्च॥ओमि आङि चात्परे पररूपमेकादेशः स्यात्॥शिवायोन्नमः॥शिवएहि॥शिवेहि॥अव्यक्तानुकरणस्या शिवआइहि
तइतौ॥ध्वनेरनुकरणस्ययोत्शब्दस्तस्मादितौपरे पररूपमेकादेशः स्यात्॥पटत् इति॥पटिति॥एकाचोन॥श्रदिति॥
नाम्रेडितस्यांत्यस्यतुवा॥आम्रेडितस्यप्रागुक्तं नस्यादंत्यस्यतु तकारमात्रस्यवास्यात्॥डाचिविवक्षितं द्वे भवतः इति द्विर्वच
रूप· चनाद्वित्वं॥ तस्यपरमाम्रेडितं॥द्विरुक्तस्यपरंमाम्रेडितंस्यात्॥पटत्पटेति॥झलां जशोंते॥पदांते झलांजशः स्युः
पटत्पटदिति॥अकः सवर्णेदीर्घः॥अकः सवर्णेअचिपरे दीर्घ एकादेशः॥दैत्यारिः॥श्रीशः॥विष्णूदयः॥ सज्ञं ६
॥अचिकिं॥कुमारीशेते॥नाज्झलाविति सावर्ण्य निषेधस्तु नदीर्घशकारयोः॥ग्रहणकशास्त्रस्यसावर्ण्यविधिनि
षेधाभ्यां प्रागनिष्पत्तेः॥अकःकिं॥हरये॥अकोकिंदीर्घइत्येवसुवचं॥॥ऋति सवर्णे ऋ वा॥होतृकारः॥होतृकारः॥लृ
तिसवर्णेलृवा॥होत्लृकारः॥ पक्षे ऋकारः सावर्ण्यात्॥होतृकारः॥ऋतिऋतिवा॥ लृतिलृवेत्युभयत्रा
तु पिविधेयं वर्णद्वयंद्विमात्रं॥आद्यस्यमध्येद्वौरेफौ तयोरेकामात्रा॥भितोऽभक्तिरपरा॥द्वितीयस्यतुमध्ये द्वौलकारौ
शेषंप्राग्वत्॥इहोभयत्रापि ऋत्यकइति पाक्षिकः प्रकृतिभाववक्ष्यते॥एङः पदांतादति॥पदांतादेङोतिपरे पूर्वरूपमेकादे
॥द्वि॥

एङं॰तस्य २ वा २ स्या एङ॰नस्यकिं विग्रवयं॥१
शः॥ स्याद्धरेव॥विष्णोव॥ सर्वत्रविभाषागोः॥लोकेवेदेचैङंतस्य गोरतिवा प्रकृतिभावः पदांते॥गोअग्रं॥गोग्रं॥पदांतेकिं॥गोः॥अवङ्
स्फोटायनस्य॥अतीति निवृत्तं॥अचिपरे पदांन्तेगोरवङ्स्यात्॥ गवाग्रं॥पदांतेकिं॥गवि॥व्यवस्थितविभाषयागवाक्षः॥इं
द्रेच॥गोरवङ् स्यादिंद्रे॥गवेंद्रः॥अथप्रकृतिभावः॥ प्लुतप्रगृह्या अचिनित्यं॥प्लुताः प्रगृह्याश्चवक्ष्यंतेअचिप्रकृत्यास्युः॥एहि निरन्यं
कृष्ण ३ अत्रगौश्चरति॥हरीएतौ॥नित्यमितिकिं॥हरीएतौ विषयदावयमेवप्रकृतिभावो यथास्यादिकोसवर्ण इतिहस्वसमु
च्चितोमाभूत्॥इकोसवर्णेशाकल्यस्यहस्वश्च॥पदांताइकोसवर्णेचिपरे प्रकृत्यास्युर्हस्वश्चवा॥अत्रहस्वविधिसामर्थ्यादे
वप्रकृतिभावे सिद्धेतदनुकर्षणार्थश्चकारोनकर्त्तव्य इति भाष्येस्थितं॥चक्रिअत्र॥चक्र्यत्र॥पदांताइतिकिं॥ गोर्यौ॥
नसमासे॥वाप्यश्वः॥सितिच॥पार्श्वं॥ऋत्यकः॥ऋतिपरे पदांते अकः प्राग्वत्॥ब्रह्मऋषिः॥ब्रह्मर्षिः॥पदांतेकिं॥आर्छत्॥स
सप्तर्ण्णा॥ ५ मासेपिअयंप्रकृतिभावः॥सप्तऋषीणां॥वाक्यस्यटेः प्लुतउदात्तः॥इत्यधिकृत्य॥ ॥प्रत्यभिवादेशूद्रे॥अशूद्रविषये प्रत्यभिवाद
यद्वाक्यंतस्यटेः प्लुतस्यात्॥अभिवादये देवदत्तोहं॥भो आयुष्मानेधि देवदत्त३॥स्त्रियांन॥अभिवादयेगार्ग्यहं॥भो आयुष्मती
भवगार्गि॥नाम गोत्रंवायत्रप्रत्यभिवादवाक्यांतेप्रयुज्यते तत्र प्लुतइष्यते॥नेह॥आयुष्मानेधि॥भोराजन्यविशांवेतिवाच्यं॥आ
युष्मानेधिभोः३॥आयुष्मानेधीद्रवर्म्मन् ३॥आयुष्मानि धीद्रपालित ३॥ दूराद्धूतेच॥ दूरात्संबोधनेयद्वाक्यंतस्यटेः प्लु
तः स्यात्॥सक्तून् पिब देवदत्त ३॥ हैहेप्रयोगेहैहयोः॥एतयोः प्रयोगे दूराद्धूतेचयद्वाक्यं तत्र हैहयोरेव प्लुतः स्यात्॥रा॑म
ते ५२ हैइराम

त्यस्या

सिधांकौ० हे ३ हे ३ राम ।। रामहे ३ ।। गुरोरनृतोनंत्यस्याप्येकैकस्यप्राचां ।। दूराद्धूतेयद्वाक्यंतस्यऋट्ङि न्त स्यानंत्यस्यापिगुरोर्वाप्लुतः स्यात् ।। स्तःप्र
।।७।। देवद त्ता देवदा३त्त ।। देवदत्त्ता३ ।। गुरोः किं ।। वकारादकारस्यमाभूत् ।। अनृतः ।। कृष्ण ३ ।। एकैकग्रहणंपर्यायार्थं ।। इदं प्राचामितियो क्लिं २
गोविभज्यतेतेनसर्वप्लुतेविकल्प्यते ।। अप्लुतवदुपस्थिते ।। उपस्थितोअनार्षइतिशब्दस्तस्मिन्परे प्लुतोप्लुतवद्भवति ।। अप्लुतकार्य
क्र यणादिकंकरोति ।। सुश्लोकाइतिसुश्लोकेतिवकिं ।। असुइत्यत्र प्लुत एव निषिध्येत ।। तथाचप्रगृह्याश्रयप्रकृतिभावे प्लुतस्य
न श्रवणंस्यात् ।। आग्नीउइति ।। ई चाक्रवर्मणस्य ।। ई प्लुतोचिपरेप्लुतवद्वा ।। चिनुहीइदं ।। चि नुहीदं ।। उभयत्रविभाषेयं ।। इ
उदूदेदंतद्विवचनं प्रगृह्यसंज्ञः+६ दूदेद्विवचनंप्रगृह्यंस्यात् ।। हरीएतौ ।। विष्णूइमौ ।। गंगेअमू ।। मणीवोष्ट्रस्यतितुइवार्थवशब्दोवाशब्दोवाबोध्यः ।। अदसोमात् ।। अस्मा पचेतेइमौ ६
त्परावीदूतोप्रगृह्यौस्तः ।। अमीईशाः ।। रामकृष्णावमूआसाते ।। मात्किं ।। अमुकेत्र ।। असतिमाद्ग्रहणेएकारोप्यनुवर्त्तेत ।। शे ।। अयंप्रग
ह्यःस्यात् ।। अस्मे इन्द्राबृहस्पती ।। निपातएकाजनाङ् ।। एकोज्निपातआङ्वर्जःप्रगृह्यःस्यात् ।। इविस्मये इइंद्रः ।। उउमेशः ।। अना संज्ञः
ङ्किं स्युकेराङ्ङ्याकारःप्रगृह्यएव ।। आएवंनुमन्यसे ।। आएवंकिलतत् ।। ङ्कित्तुनप्रगृह्यः ।। ईषदुष्णं ।। ओष्णं ।। वाक्यस्मरण
योरङित् ।। अन्यत्रङिदितिविवेकः ।। ओत् ।। ओदंतोनिपातःप्रगृह्यःस्यात् ।। अहोईशाः ।। संबुद्धौशाकल्यस्येतावनार्षेसंबुद्धि
परे २ निमित्तकओकारोवाप्रगृह्योवैदिकइतौ ।। विष्णोइति ।। विष्णविति ।। उञः ।। उ सइतीवाप्रागुक्तं ।। उइति विति ।। ऊँ ।। उञइति
दीर्घोनुनासिकःप्रगृह्यश्च ।। ऊँइत्ययमादेशोवास्यात् ।। ऊँ इति ।। मयउञोवोवा ।। मयःपरस्यउञोवोवास्यान्नअचि ।। किमु ।।८।७।।

अनार्षेकिं ।। ब्रह्मबधविस्रब्रवीत्त २ वो

+ समासेकिं ।। स्रुवेणस्रुतं २ नीय+५

ईषंउ ढ्वे ।। यश्चईषगतीहिंसादर्शनेषुतयोर्दीर्घोपिघत्वात् ।। ईषः ईष्यः ।। तत्राद्भुणे ।। प्रेषः प्रेष्यः ।। स्लेचतृतीयासमासे ।। सुखे
नऋतः सुखार्त्तः ।। तृतीयेतिकिं ।। परमर्त्तः ।। प्रवत्सतरकंबलवसनार्णदशानामृणे ।। प्रार्णं ।। वसनतरार्णमित्यादि ।। ऋणस्यापनयनाय
यदन्यदृणंक्रियतेतदृणार्णं ।। दशार्णोदेशः ।। नदीचदशार्णा ।। ऋणशब्दोदुर्गभूमौजलेच ।। उपसर्गादृतिधातौ ।। अवर्णांताद्
पसर्गादृकारादौधातौपरेवृद्धिरेकादेशःस्यात् ।। प्रार्छति ।। उपार्छति ।। अंतादिवच्च ।। योयमेकादेशःसपूर्वस्यांतवत्परस्य
स्यादिवत्स्यादितिरेफस्यपदांतत्वे ।। खरवसानयोर्विसर्जनीयः ।। खरिअवसानेचरेफस्यविसर्गःस्यात्पदांतेइतिविसर्गप्राप्ते ।। परे+
अंतवद्भावेनपदांतस्यापिरेफस्यनविसर्गः ।। उभयथर्क्षु ।। कर्तरिचर्षिदेवतयोः ।। इत्यादिनिर्देशात् ।। उपसर्गेणेवधा
तोराक्षेपेसिद्धेधातावितियोगविभागेनपुनर्विधानार्थं ।। तेनऋत्यकइतिप्रकृतिभावोनप्रवर्तते ।। वासुप्यापि विद्
शलेः ।। अवर्णांतादुपसर्गादृकारादौसुबंतधातौपरेवृद्धिर्वास्यात् ।। आपिशलिग्रहणंपूजार्थं ।। प्रार्षभीयति ।। प्रर्षभी
यति ।। सावर्ण्याल्लृवर्णस्यग्रहणं ।। प्राल्कारीयति ।। प्रल्कारीयति ।। तपरत्वाद्दीर्घेन ।। उपॠकारीयति ।। उपकॄरीय
ति ।। एङिपररूपं ।। आदुपसर्गादेङादौधातौपररूपमेकादेशःस्यात् ।। प्रेजति ।। उपोषति ।। इहवासुपीत्यनुवर्त्यवाक्यभेदेन
व्याख्येयं ।। तेनएङादौसुब्धातौपरेच ।। उपेडकीयति ।। उपेडकीयति ।। एवेचानियोगे ।। नियोगोवधारणंक्वभोक्ष्यसे ।।
अनवक्लृप्तोएवशब्दः ।। अनियोगेकिं ।। तवैव ।। अचोंत्यादिटि ।। अचांमध्येयोंत्यःसआदिर्यस्यतट्टिसंज्ञंस्यात् ।। शकंध्वादिषु

प्रोघीयति ।। प्रौघीयति ।। २

सिद्धां० कौ थकारस्यैव श्रवणं ॥ न लुखरिस्येति चर्त्वं ॥ चर्त्वं प्रति थकारस्यासिद्धत्वात् ॥ झयो होऽन्यतरस्यां ॥ झयः परस्य हस्य पूर्वसवर्णो वा स्याद्वर्गे ०५०
त् ॥ घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य तादृश एव वर्गचतुर्थः सवर्णः ॥ वाग्घरिः ॥ वाग्हरिः ॥ शश्छोऽटि ॥ झयः परस्य पदांतात्
॥८॥ शस्य छो वा स्यादटि ॥ स्तोः श्चुरिति दस्य श्चुत्वेन जकारे कृते ॥ खरि च ॥ खरि झलां चरः स्युः इति जस्य चः ॥ तच्छिवः ॥ तच्शिवः ॥ छत्व परे ३
ममीति वाच्यं ॥ तच्छ्लोकेन ॥ तच्श्लोकेन ॥ अमीति किं ॥ वाक्श्चोतति ॥ मोऽनुस्वारः ॥ मान्तस्य पदस्यानुस्वारः हलि ॥ अलोऽन्त्यस्य ॥ हरिं स्यात्
वंदे ॥ पदस्येति किं ॥ गम्यते ॥ नश्चापदान्तस्य झलि ॥ नस्य मस्य चापदान्तस्य झल्यनुस्वारः स्यात् ॥ यशांसि ॥ आक्रंस्यते ॥ झलि
किं ॥ मन्यते ॥ अनुस्वारस्य ययि परसवर्णः ॥ स्पष्टं ॥ अङ्कितः ॥ अञ्चितः ॥ कुण्ठितः ॥ गुम्फितः ॥ शान्तः ॥ कुर्वन्तीत्यत्र णत्वे प्राप्ते तस्या
चक्षते सिद्धत्वादनुस्वारे परसवर्णे तस्यासिद्धत्वान्न णत्वं ॥ वा पदान्तस्य ॥ पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा ॥ त्वङ्करोषि ॥ स्यात् ७
त्वं करोषि ॥ संय्यँन्ता ॥ संयन्ता ॥ सव्ँवत्सरः ॥ संवत्सरः ॥ यल्ँलोकं ॥ यं लोकं ॥ अनुस्वारस्य पक्षे नुनासिका यवलाः ॥ मो राजि समः क्वौ ॥ समः अत्र ६
क्विबन्ते राजतौ परे समो मस्य म एव स्यात् ॥ सम्राट् ॥ हे मपरे वा ॥ मपरे हकारे मस्य म एव वा स्यात् ॥ ह्मल ह्मल चलने ॥ किम्ह्मलयति ॥
किं ह्मलयति ॥ यवलपरे यवला वेति वक्तव्यं ॥ यथासंख्यमनुदेशः समानां ॥ समसंबंधी विधिर्यथासंख्यं स्यात् ॥ किय्ँह्यः ॥ किं ह्यः ॥
नपरे नः किंव्ँह्वलयति ॥ किं ह्वलयति ॥ किल्ँह्लादयति ॥ किं ह्लादयति ॥ नपरे हकारे मस्य नः स्यात् ॥ किन्ह्नुते ॥ किं ह्नुते ॥ ङ्णोः कुक्टुक् शरि ॥ ॥८॥
वा ङकारणकारयोः कुक्टुकावागमौ स्तः शरि ॥ कुक्टुकोरसिद्धत्वान्न जश्त्वं ॥ चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यं ॥ पौष्करसादि
राचार्यः ॥ प्राङ् खषष्ठः ॥ प्राङ्क्षष्ठः ॥ प्राङ्ख्षष्ठः ॥ सुगण्षष्ठः ॥ सुगण्ट्षष्ठः ॥ सुगण्ठ्षष्ठः ॥ डः सि धुट् ॥ डात्परस्य सस्य धुड्वा स्या

का

यवलपरे हकारे परे मस्य यवला वा स्युः ॥ ८

ता

त् ॥ षट्संतः ॥ षट्सन्तः ॥ नश्च ॥ नकारान्तस्य धुड्वा स्यात् ॥ सन्त्सः ॥ सन्सः ॥ शि तुक् ॥ नस्य पदान्तस्य शे परे तुग्वा स्यात् ॥ शश्छोऽटि ॥
छत्वविकल्पः ॥ पक्षे झरो झरीति चकारलोपः ॥ सञ्छंभुः ॥ सञ्च्छंभुः ॥ सञ्च्शंभुः ॥ सञ्शंभुः ॥ ञ छौ ञचछाः ञ शाविति यत्र चश
चतुष्टयं ॥ रूपाणामिह तुक्छत्वचलोपानां विकल्पनात् ॥ ङमो ह्रस्वादचि ङमुण्नित्यं ॥ ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्या
चो नित्यं ङमुडागमः ॥ प्रत्यङ्ङात्मा ॥ सुगण्णीशः ॥ सन्नच्युतः ॥ समः सुटि ॥ समो रुः स्यात्सुटि ॥ अलोऽन्त्यस्य ॥ अत्रानुनासिकः पूर्वस्य तु संपरिभ्यामि
वा ॥ अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात् ॥ अनुनासिकात्परोऽनुस्वारः ॥ अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः स्यात् ॥ ग तिसुट्
खरि खरवसानयोर्विसर्जनीयः ॥ विसर्जनीयस्य सः ॥ खरि विसर्जनीयस्य सः स्यात् ॥ एतदपवादे वा शरीति पाक्षिके विसर्गे प्राप्ते ॥ सं
संस्कर्ता ६ पुंकानां सो वक्तव्यः ॥ सँस्स्कर्ता ॥ समो वा लोपमेके इति भाष्यं ॥ लोपस्यापि [illegible] रुप्रकरणस्थत्वादनुस्वारानुनासिकाभ्यामेकसका
रस्य रूपद्वयं ॥ द्विती[illegible] यसकारं तत्त्वमेव तत्रानचि चेति सकारद्वित्वपक्षे त्रिसकारमपि रूपद्वयं ॥ अनुस्वारविसर्गजिह्वामूली
योपध्मानीययमानामकारोपरि शर्षु च पाठस्योपसंख्यानत्वेनानुस्वारस्याप्यच्त्वात् ॥ अनुनासिकवतां त्रयाणां द्वारः ॥ खय इति
अनचि चेति क द्वित्वे षट् ॥ अनुस्वारवतामनुस्वारस्यापि द्वित्वे द्वादश ॥ एवमष्टादशानां तकारद्वित्वे वचनात्त्रैरपुनर्द्वित्वे चरकत द्वित्वे त्रिंशन्मिति चक्रु ण ३
पंचाशव ॥ अणोऽनुनासिकत्वे अष्टोत्तरशतं ॥ पुमः खय्यम्परे ॥ अम्परे खयि पुम्शब्दस्य रुः स्यात् ॥ व्युत्पत्तिपक्षे अप्रत्ययस्ये
ति षत्वपर्युदासात् ॥ ४ कः ४ पयोः ॥ [illegible] ॥ अत्र रु इति पक्षे न षत्वप्राप्तौ ॥ संपुंकानामिति सः ॥ पुंस्कोकिलः ॥ पुंस्कोकिलः ॥

अचो रहाभ्यामिति द्वित्वं २ यणो मयो द्वे वाच्ये

शार्ङ्गिंश्छिंधि २ यस्यासिद्धत्वात् १ येननाप्राप्तेयोविधिरारभ्यतेसतस्यबाधकोभवति ४

सिधांतकौ॰ पुंस्कुत्रः॥पुंस्पुत्रः॥अम्परेकिं॥पुंक्षीरं॥खयिकिं॥पुंदासः॥ख्याजादेशेन॥पुंख्यानं॥नक्षव्यप्रशान्॥अम्परेछविनकारांत रू॰पू॰
॥५॥ स्यपदस्यरुःस्यात् नतुप्रशान्॥ग्रास्य॥विसर्गः॥सत्व॥श्चुत्वं॥शार्ङ्गिंश्छिंधि॥चक्रिंस्त्रायस्व॥चक्रिंस्त्रायस्व॥पदस्यकिं॥हं श
ति॥अम्परेकिं॥सस्सरुः॥खड्गमुष्टिः॥अप्रशान्किं॥प्रशान्तनोति॥नृन्पे॥नृनित्यस्यरुःस्याद्वापकारपरे॥कुप्वोःकपौच
कवर्गपवर्गेचपरे विसर्जनीयस्यक्रमाज्जिह्वामूलीयोपध्मानीयौस्तः॥चाद्विसर्गः॥येननाप्राप्तिन्यायेन विसर्जनीयस्य सइ
त्यस्यापवादोयंनतुशर्परे विसर्जनीयइत्यस्य॥तेनवासःक्षौममित्यादौविसर्गएव॥नॄँ पाहि॥नृंः पाहि॥नॄँःपाहि॥नृंःपाहि
नृन्पाहि॥कानाम्रेडिते॥कान्नकारस्यरुःस्यादाम्रेडितपरे॥संपुंकानामितिसः॥यत्व॥द्वा॥कस्कादिषुच।एष्विणउत्तरस्य
विसर्गस्यषस्यात्‌अन्यस्यतुसः॥ःकःपयोरपवादः इतिसः॥काँस्कान्॥कांस्कान्॥कस्कः॥कौतस्कुतः॥सर्पिष्कुंडि
का॥धनुष्कपालं॥आकृतिगणोयं॥संहितायामित्यधिकृत्य॥छेच॥ह्रस्वस्यछेपरेतुगागमःस्यात्संहितायां॥चुत्वस्यसिद्धत्वाज्
स्त्वेनदः॥नतश्चुत्वस्यसिद्धत्वात्सर्वेचुत्वेनजः॥तस्यचर्त्वेनचः॥चुत्वस्यासिद्धत्वाच्चुःकुरितिकुत्वंन॥स्वच्छाया॥शिवच्छाया॥
सास्यात् आङ्माङोश्च॥एतयोश्छेतुक्‌पदांतेतिविकल्पापवादः॥आच्छादयति॥माच्छिदत्॥दीर्घात्॥दीर्घाच्छेतुक्स्यात्॥ परे॰
दीर्घस्यायंतुक्नतुछस्यसेनासुराछायेतिज्ञापकात्॥चेच्छिद्यते॥पदान्ताद्वा॥दीर्घात्पदांतात्छेपरेतुग्वा॥लक्ष्मीच्छाया॥ स्यात् ३
लक्ष्मीछाया॥इतिहल्संधिः॥ ॥ ।विसर्जनीयस्यसः॥विष्णुस्त्राता॥शर्परेविसर्जनीयः॥शर्परेखरिविसर्जनीय
स्यविसर्जनीयोनत्वन्यत्॥कःसरुः॥घनःघनैःक्षोभणः॥इहयथायथंसत्वंजिह्वामूलीयश्चन॥वाशरि॥शर्परेविस ॥९॥

ता

कं॥किमुक्तं॥वस्यासिद्धत्वान्नानुस्वारः॥ईदूतौचसप्तम्यर्थे॥सप्तम्यर्थेपर्यवसन्नमीदूदंतंप्रगृह्यंस्यात्॥सोमोगौरीअधिश्रितः
इति। मामकीतनूइ॥सुपांसुलुगितिसप्तम्यालुक्॥अर्थग्रहणंकिं॥वृत्तावर्थान्तरोपसंक्रान्तेमाभूत्॥वाप्यामश्वोवाप्यश्वः॥अणोप्रगृह्य
स्यानुनासिकः॥अप्रगृह्यस्याणोवसानेनुनासिकोवास्यात्॥दधिँ॥दधि॥अप्रगृह्यस्यकिं॥अग्नीइत्यचसंधिः॥ ॥श्री॥ ॥स्तोःश्चुनाश्चुः॥
सकारतवर्गयोःशकारचवर्गाभ्यांयोगेशकारचवर्गौस्तः॥हरिश्शेते॥रामश्चिनोति॥सच्चित्॥शार्ङ्गिञ्जय॥शात्॥शात्परस्यतवर्ग
स्यचुत्वंनस्यात्॥विश्नः॥प्रश्नः॥ष्टुनाष्टुः॥स्तोःष्टुनायोगेष्टुःस्यात्॥रामष्षष्ठः॥रामष्टीकते॥पेष्टा॥तट्टीका॥चक्रिण्ढौकसे॥नप
दांताट्टोरनाम्॥अनामितिलुप्तषष्ठीकंपदं॥पदान्तात्टवर्गात्परस्यानामस्तोःष्टुर्नस्यात्॥षट्सन्तः॥षट्ते॥पदांतात्किं॥ईट्टे॥
टोःकिं॥सर्पिष्टमं॥अनाम्नवतिनगरीणामितिवाच्यं॥षण्णां॥षण्णवतिः॥षण्णगर्यः॥तोःषि॥तवर्गस्यषकारेपरेनष्टुत्वं॥सस
न्षष्ठः॥ झलांजशोन्ते॥वागीशः॥चिद्रूपः॥यरोनुनासिकेनुनासिकोवा॥यरःपदांतस्यानुनासिकेपरेनुनासिकोवास्यात्॥ए
तन्मुरारिः॥एतद्मुरारिः॥स्थानप्रयत्नाभ्यामंतरतमेस्पर्शेचरितार्थोविधिरयंरेफेनप्रवर्तते॥चतुर्मुखः॥प्रत्ययेभाषायां
नित्यं॥तन्मात्रं॥चिन्मयं॥कथंतर्हिमदोदग्राःककुद्मंतइतिवादिगणेदकारनिपातात्॥तोर्लि॥तवर्गस्यलकारेपरेपरसवर्णःस्यात्॥
कार२ तल्लयः॥विद्वाँल्लिखति॥नस्यानुनासिकोलः॥उदःस्थास्तंभोःपूर्वस्य॥उदःपरयोःस्थास्तंभोःपूर्वसवर्णःस्यात्॥आदेःपरस्य॥
उत्थानं॥उत्तंभनं॥अत्राघोषस्यमहाप्राणस्यसस्यतादृशएवथकारः॥तस्यझरोझरीतिपाक्षिकोलोपः॥लोपाभावपक्षेतु

कारः२

प्रयोजनाभावात्। अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावात् द्विबहुविषये निर्धारणे वर्तेते। तत्रान्यतमशब्दस्य गणे पाठाभावान्न संज्ञा। त्वत्
१२ इति द्वावप्यदन्तावन्यपर्यायौ। एक उदात्तोऽपरोनुदात्त इत्येके। एकस्त्वांत इत्यपरे। नेम इत्यर्धे। समः सर्वपर्यायः। तुल्यपर्यायस्तु नेह गृह्यते।
यथासंख्यमनुदेशः समानामिति ज्ञापकात्। अंतरं बहिर्योगेति गणसूत्रे अपुरीति वक्तव्यं। अंतरायां पुरि। पूर्वपरावरदक्षिणोत्तरापराध
राणि व्यवस्थायामसंज्ञायां। एषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात्सर्वत्र या प्राप्ता सा जसि वा स्यात्। पूर्वे। पूर्वाः। स्वाभिधेयापे
क्षावधिनियमो व्यवस्था। व्यवस्थायां किं। दक्षिणा गाथकाः कुशला इत्यर्थः। असंज्ञायां किं। उत्तराः कुरवः। स्वमज्ञातिधनाख्यायां। ज्ञातिधना
न्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा स्यात्। स्वे। स्वाः। आत्मीया इत्यर्थः। आत्मान इति वा। ज्ञातिधनवाचिनस्तु स्वाः। ज्ञातयोर्था वा।
अंतरं बहिर्योगोपसंव्यानयोः। बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य प्राप्ता संज्ञा जसि वा स्यात्। अंतरे। अंतरा वा। गृहाः बाह्या इत्यर्थः।
अंतरे। अंतरा वा। शाटकाः परिधानीया इत्यर्थः। पूर्वादिभ्यो नवभ्यो वा। एभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः। पूर्वस्मात्। पूर्वात्। पूर्वस्मि
न्। पूर्वे। एवं परादीनामपि। शेषं सर्ववत्। एकशब्दः संख्यायां नित्यैकवचनांतः। न बहुव्रीहौ। बहुव्रीहौ चिकीर्षिते सर्वादेः सर्वनामसं
ज्ञा न स्यात्। त्वकं पिता यस्य त्वत्कपितृकः। अहकं पिता यस्य मत्कपितृकः। इह समासात्प्रागेव प्रक्रियावाक्ये सर्वनामसंज्ञा निषिध्यते। अन्यथा १२
लौकिके विग्रहवाक्ये इव तत्राप्यकच्प्रवर्तेत। सच समासेपि श्रूयेत। अतिक्रांतो भवकंतमतिभवकानिति वत्। भाष्यकारस्तु त्वकत्पित

कोहमि कस्यित्वक इति रूपे इष्टापत्तिं कृत्वेतत्सूत्रं प्रत्याचख्यौ। यथोत्तरं मुनीनां प्रामाण्यं। संज्ञोपसर्जनीभूतास्तु न सर्वादयः। महासंज्ञाकर
णेन तदनुगुणानामेव गणे सन्निवेशात्। अतः संज्ञाकार्यमंतर्गणकार्यं च तेषां न भवति। सर्वो नाम कश्चित्तस्मै सर्वाय देहि। अतिक्रांतः स
र्वमतिसर्वस्तस्मै अतिसर्वाय देहि। अतिकतरं कुलं। अतितत्। तृतीयासमासे। अत्र सर्वनामता न स्यात्। मासपूर्वाय। तृतीयासमा
सार्थवाक्येपि न। मासेन पूर्वाय। द्वंद्वे च। द्वंद्वे उक्ता संज्ञा न। वर्णाश्रमेतराणां। समुदायस्यायं निषेधो न त्ववयवानां। नचैवं तदंतविधिना त
द्प्रसंगः। सर्वनाम्नो विहितस्यामः स्तु इति व्याख्यातत्वात्। विभाषा जसि॥ जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वंद्वे उक्ता संज्ञा वा स्यात्।
वर्णाश्रमेतरे। वर्णाश्रमेतराः। शीभावं प्रत्येव विभाषेत्युक्तं। अतो नाकच्। किंतु कप्रत्यय एव। वर्णाश्रमेतरकाः। प्रथमचरमतयाल्पार्धकतिप
यनेमाश्च। एते जसः कार्यं प्रत्युक्तसंज्ञा वा स्युः। प्रथमे। प्रथमा इत्यादि। शेषं रामवत्। तयः प्रत्ययस्ततस्तदंता ग्राह्याः। द्वितये। द्वितयाः। नेमे।
नेमाः। शेषं सर्ववत्। विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानं। द्वितीयस्मै। द्वितीयायेत्यादि। एवं तृतीयः। अर्थवद्ग्रहणान्नेह। पटुजातीयाय।
जराया जरसन्यतरस्यां। जराशब्दस्य जरस् वा स्यादजादौ विभक्तौ। पदांगाधिकारे तस्य च तदंतस्य च। अनेकाल्त्वात्सर्वादेशे प्राप्ते। निर्दिश्य
मानस्यादेशा भवंति। एकदेशविकृतस्यानन्यत्वात् जरशब्दस्य जरस्। निर्जरसौ। निर्जरसः। इनादीन्बाधित्वा परत्वाज्जरस्। निर्जरसा।
निर्जरसे। निर्जरसः। पक्षे हलादौ च रामवत्। वृत्तिकृतास्तु पूर्वविप्रतिषेधेनेनातोः कृतयोः सन्निपातपरिभाषया अनित्यत्वमाश्रित्य

प्रयोजनाभावात्। अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावात् द्विबहुविषये निर्धारणे वर्त्तेते। तत्रान्यतमशब्दस्य गणे पाठाभावान्न संज्ञा। त्वत्
१२ इति द्वावप्यदन्तावन्यपर्यायौ। एक उदात्तोऽपरोऽनुदात्त इत्येके। एकस्तान्त इत्यपरे। नेम इत्यर्धे। समः सर्वपर्यायः। तुल्यपर्यायस्तु नेह गृह्यते।
यथासंख्यमनुदेशः समानामिति ज्ञापकात्। अन्तरं बहिर्योगेति गणसूत्रे अपुरीति वक्तव्यं। अन्तरायां पुरि। पूर्वपरावरदक्षिणोत्तरापराध
राणि व्यवस्थायामसंज्ञायां। एषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात्सर्वत्र या प्राप्ता सा जसि वा स्यात्। पूर्वे पूर्वाः। स्वाभिधेयापे
क्षावधिनियमो व्यवस्था। व्यवस्थायां किं। दक्षिणा गाथकाः कुशला इत्यर्थः। असंज्ञायां किं। उत्तराः कुरवः। स्वमज्ञातिधनाख्यायां। ज्ञातिधना
न्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा स्यात्। स्वे। स्वाः। आत्मीया इत्यर्थः। आत्मान इति वा। ज्ञातिधनवाचिनस्तु स्वाः। ज्ञातयोर्था वा।
अन्तरं बहिर्योगोपसंव्यानयोः। बाह्ये परिधानीये चार्थे अन्तरशब्दस्य प्राप्ता संज्ञा जसि वा स्यात्। अन्तरे। अन्तरा वा। गृहाः बाह्या इत्यर्थः।
अन्तरे। अन्तरा वा। शाटकाः परिधानीया इत्यर्थः। पूर्वादिभ्यो नवभ्यो वा। एभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः। पूर्वस्मात्। पूर्वात्। पूर्वस्मि
न्। पूर्वे। एवं परादीनामपि। शेषं सर्ववत्। एकशब्दः संख्यायां नित्यैकवचनान्तः। न बहुव्रीहौ। बहुव्रीहौ चिकीर्षिते सर्वादेः सर्वनामसं
ज्ञा न स्यात्। त्वकं पिता यस्य त्वत्कपितृकः। अहकं पिता यस्य मत्कपितृकः। इह समासात्प्रागेव प्रक्रियावाक्ये सर्वनामसंज्ञा निषिध्यते। अन्यथा १२
लौकिके विग्रहे वाक्ये इव तत्राप्यकच् प्रवर्तेत। स च समासेऽपि श्रूयेत। अतिक्रान्तो भवकन्तमतिभवकानिति वत्। भाष्यकारस्तु त्वकत्पितृ

कोऽहमकत्पितृक इति रूपे इष्टापत्तिं कृत्वैतत्सूत्रं प्रत्याचख्यौ। यथोत्तरं मुनीनां प्रामाण्यं। संज्ञोपसर्जनीभूतास्तु न सर्वादयः। महासंज्ञाकर
णेन तदनुगुणानामेव गणे सन्निवेशात्। अतः संज्ञाकार्यमन्तर्गणकार्यं च तेषां न भवति। सर्वो नाम कश्चित्तस्मै सर्वाय देहि। अतिक्रान्तः स
र्वमतिसर्वस्तस्मै अतिसर्वाय देहि। अतिकतरं कुलं। अतितत्। तृतीयासमासे। अत्र सर्वनामता न स्यात्। मासपूर्वाय। तृतीयासमा
सार्थवाक्येऽपि न। मासेन पूर्वाय। द्वंद्वे च। द्वंद्वे उक्ता संज्ञा न। वर्णाश्रमेतराणां। समुदायस्यायं निषेधो न त्ववयवानां। नचैवं तदन्तविधिना सु
ट्प्रसंगः। सर्वनाम्नो विहितस्यामः सुडिति व्याख्यातत्वात्। विभाषा जसि॥ जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वंद्वे उक्ता संज्ञा वा स्यात्।
वर्णाश्रमेतरे। वर्णाश्रमेतराः। शीभावं प्रत्येव विभाषेत्युक्तं। अतो नाकच्। किंतु कप्रत्यय एव। वर्णाश्रमेतरकाः। प्रथमचरमतयाल्पार्धकतिप
यनेमाश्च। एते जसः कार्यं प्रत्युक्तसंज्ञा वा स्युः। प्रथमे। प्रथमा इत्यादि। शेषं रामवत्। तयः प्रत्ययस्ततस्तदन्ता ग्राह्याः। द्वितये। द्वितयाः। नेमे।
नेमाः। शेषं सर्ववत्। विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानं। द्वितीयस्मै। द्वितीयायेत्यादि। एवं तृतीयः। अर्थवद्ग्रहणान्नेह। पटुजातीयाय।
जराया जरसन्यतरस्यां। जराशब्दस्य जरस् वा स्यादजादौ विभक्तौ। पदांगाधिकारे तस्य च तदन्तस्य च। अनेकाल्त्वात्सर्वादेशे प्राप्ते। निर्दिश्य
मानस्यादेशा भवन्ति। एकदेशविकृतस्यानन्यत्वात् जरशब्दस्य जरस्। निर्जरसौ। निर्जरसः। इनादीन्बाधित्वा परत्वाज्जरस्। निर्जरसा।
निर्जरसे। निर्जरसः। पक्षे हलादौ च रामवत्। वृत्तिकारास्तु पूर्वविप्रतिषेधेनेनातोः कृतयोः सन्निपातपरिभाषाया अनित्यत्वमाश्रित्य

जरसिकृतेनिर्जरसिनानिर्जरसादिरूपंनतुनिर्जरसानिर्जरसइतिकेचिदित्युक्तं। तथाभिसिनिर्जरसैरितिरूपांतरमुक्तं। तदनुसारिभिश्च
षष्ठ्येकवचनेनिर्जरस्येत्येवरूपमितिस्वीकृतं। एतच्चभाष्यविरुद्धं। पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्र
भृतिषु। पाददंतनासिकामासहृदयनिशाअसृज्यूषदोषयकृत्शकृत्उदकआस्यएषांपदादयआदेशाःस्युःशसादौवा। यत्तुआसनश
ब्दस्यआसन्नादेशइतिकाशिकायामुक्तंतत्प्रामादिकं। पादः। पादौ। पादाः। पादं। पादौ। पदः। पादान्। पदा। पादेनेत्यादि। सुडनपुंसकस्य।
सुट्प्रत्याहारः। स्वादिपंचवचनानिसर्वनामस्थानसंज्ञानिस्युरक्लीबस्य। स्वादिष्वसर्वनामस्थाने। कप्रत्ययावधिषुस्वादिष्वसर्वना
मस्थानेषुपरतःपूर्वंपदसंज्ञंस्यात्। यचिभं। यकारादिष्वजादिषुचस्वादिष्वसर्वनामस्थानेषुपरतःपूर्वंभसंज्ञंस्यात्। आकडारादेकासंज्ञा।
इतऊर्ध्वंकडाराःकर्मधारयइत्यतःप्रागेकस्यैकैवसंज्ञाज्ञेया। यापरानवकाशाच। तेनशसादावचिभसंज्ञैवनपदत्वं। अतोजश्त्वंन। दतः। दता।
जश्त्वं। दद्भ्यामित्यादि। मासः। मासा। माभ्यामित्यत्ररुत्वेयत्वेचयलोपः। माभ्यां। माभिरित्यादि। भस्य। अधिकारोयं। अल्लोपोनः। अं
गावयवोसर्वनामस्थानयजादिस्वादिप्रत्ययपरोयोन्तस्याकारस्यलोपःस्यात्। रषाभ्यांनोणःसमानपदे। एकपदस्थाभ्यांरेफषकाराभ्यांपरस्यनस्य
णःस्यात्। पूष्णः। पूष्णा। पूर्वस्मादपिविधौस्थानिवद्भावइतिपक्षेतुअङ्व्यवायइत्येवात्रणत्वं। पूर्वत्रासिद्धीयेस्थानिवदितितुइहनास्ति। तस्य १४
दोषःसंयोगादिलोपलत्वणत्वेष्वितिनिषेधात्। नलोपःप्रातिपदिकान्तस्य। नेतिप्रातिपदिकेतिचलुप्तषष्ठीकेपदे। प्रातिपदिकसंज्ञ

संज्ञा। द्वंद्वेचेतिज्ञापकात्। तेनपरमसर्वत्रेतित्रल्। परमभवकानित्यकच्चसिध्यति। जसःशी। अदंतात्सर्वनाम्नःपरस्यजसःशीस्यात्।
अनेकाल्त्वात्सर्वादेशः। नचावर्णस्येत्यादाविवननुबंधकृतमनेकाल्त्वमितिवाच्यं। सर्वादेशत्वात्प्रागित्संज्ञायाएवाभावात्। आ
देशप्रत्ययस्थानिवत्त्वेलब्धेइत्संज्ञाप्रवृत्तेः। सर्वे। सर्वनाम्नःस्मै। अतःसर्वनाम्नोङेइत्यस्यस्मैस्यात्। सर्वस्मै। ङसिङ्योःस्मात्स्मि
नौ। अतःसर्वनाम्नोङसिङ्योरेतयोरेतौस्तः। सर्वस्मात्। आमिसर्वनाम्नःसुट्। अवर्णान्तात्सर्वनाम्नोविहितस्यामःसुडागमःस्या
त्। एत्वषत्वेसर्वेषां। सर्वस्मिन्। शेषंरामवत्। एवंविश्वादयोप्यदंताः। सर्वादयश्चपंचत्रिंशत्। सर्व। विश्व। उभ। उभय। डतर। डतम। अन्य। अन्य
तर। इतर। त्वत्। त्व। नेम। सम। सिम। पूर्वपरावरदक्षिणोत्तरापराधराणिव्यवस्थायामसंज्ञायां। स्वमज्ञातिधनाख्यायां। अंतरंबहिर्यो
गोपसंव्यानयोः। त्यद्। तद्। यद्। एतद्। इदम्। अदस्। एक। द्वि। युष्मद्। अस्मद्। भवतु। किम्। इति। उभशब्दोद्वित्वविशिष्टस्यवाच
कः। अतएवनित्यंद्विवचनान्तः। तस्येहपाठस्तुअकाविकजर्थः। नचकप्रत्ययेनइष्टसिद्धिः। द्विवचनपरत्वाभावेनोभयतउभयत्रेत्यादा
विवायच्प्रसंगात्। तदुक्तं। उभयोन्यत्रेति। अन्यत्रेतिद्विवचनपरत्वाभावे। उभयशब्दस्यद्विवचनंनास्तीतिकैयटः। अस्तीतिहरदत्तः। तस्माज्ज
स्ययजादेशस्यस्थानिवद्भावेनतयप्प्रत्ययान्ततयाप्रथमचरमेतिविकल्पेप्राप्तेविभक्तिनिरपेक्षत्वेनान्तरंगत्वान्नित्यैवसंज्ञाभवति। उभये।
डतरडतमौप्रत्ययौ। यद्यपिसंज्ञाविधौप्रत्ययग्रहणेतदंतग्रहणंनास्ति। सुप्तिङन्तज्ञापकात्। तथापीहतदंतग्रहणं। केवलयोःसंज्ञायाः

प्रथमयोः पूर्वसवर्णः। हरी। जसि च। ह्रस्वांतस्यांगस्य गुणः स्याज्जसि परे। हरयः। ह्रस्वस्य गुणः। ह्रस्वस्य गुणः स्यात्संबुद्धौ। एङ्ह्रस्वादिति संबुद्धि
१५ लोपः। हे हरे। हरिं। हरी। हरीन्। शेषो घ्यसखि। अनदीसंज्ञौ ह्रस्वौ याविदुतौ तदंतं सखिवर्जं घिसंज्ञं स्यात्। शेषः किं। मत्यै। एकसंज्ञाधिका
रात्सिद्धे शेषग्रहणं स्पष्टार्थं। ह्रस्वौ किं। वातप्रम्ये। इदुतौ किं। मात्रे। आङो नास्त्रियां। घेः परस्याङो नास्यादस्त्रियां। आङिति टासंज्ञा प्राचां।
हरिणा। अस्त्रियां किं। मत्या। घेर्ङिति। घिसंज्ञकस्य ङिति सुपि गुणः स्यात्। हरये। घेः किं। सख्ये। ङिति किं। हरिभ्यां। सुपि किं। पट्वी। घेर्ङि
तीति गुणे कृते। ङसिङसोश्च। एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात्। हरेः २। हर्योः। हरीणां। अच्च घेः। इदुद्भ्यामुत्तरस्य ङेरौत्स्याद्घेरंता
देशश्चाकारः। हरौ। हर्योः। हरिषु। एवं श्रीपत्यग्निकविरव्यादयः। अनङ् सौ। सख्युरंगस्यानङादेशः स्यादसंबुद्धौ सौ परे। ङिच्चेत्यंतादेशः। अलो
ऽन्त्यात्पूर्व उपधा। अंत्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात्। सर्वनामस्थाने चासंबुद्धौ। नांतस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे। अपृक्त
एकाल्प्रत्ययः। एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात्। हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्। हलंतात्परं दीर्घौ यौ ङ्यापौ तदंताच्च परं सुति
सीत्येतदपृक्तं हल्लुप्यते। हल्ङ्याब्भ्यः किं। ग्रामणीः। दीर्घात्किं। निष्कौशांबिः। अतिखट्वः। सुतिसीति किं। अभैत्सीत्। तिपा सहचरितस्य
ग्रहणात्सिचो ग्रहणं नास्ति। अपृक्तस्य किं। बिभर्ति। हल्किं। बिभेद। प्रथमं हल्किं। राजा। नलोपो नस्यात्। संयोगांतलोपस्यासिद्धत्वात्। १५
सखा। हे सखे। सख्युरसंबुद्धौ। सख्युरंगात्परं संबुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात्। अचो ञ्णिति। ञिति णिति च प्रत्यये परे अजंतांगस्य वृद्धिः स्यात्

सखायौ। सखायः। सखायं। सखायौ। सखीन्। घिसंज्ञाभावान्न तत्कार्यं। सख्या। सख्ये। ख्यत्यात्परस्य। खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयण
देशाभ्यां परस्य ङसिङसोरत उः स्यात्। सख्युः। औत्। इदुद्भ्यां परस्य ङेरौत्स्यात्। उकारानुवृत्तिरुत्तरार्था। सख्यौ। शेषं हरिवत्। शोभनः सखा
सुसखा। सुसखायौ। सुसखायः। अनङ्णित्त्वे ङ्यावयोरंगत्वात्तदंतेऽपि प्रवृत्तिः। समुदायस्य सखित्वरूपत्वाभावादसखीति निषेधाप्रवृत्तेर्घि
संज्ञा। सुसखिना। सुसखये। ङसिङसोर्गुणे कृते कृतयणादेशत्वाभावात् ख्यत्यादित्युत्वं न। सुसखेः। सुसखावित्यादि। एवमतिशायितः स
खातिसखा। परमः सखा यस्येति विग्रहे परमसखा। परमसखायावित्यादि गौणत्वेऽप्यनङ्णित्वे प्रवर्तते। सखायमतिक्रांतोऽतिसखिः। लिंगवि
शिष्टपरिभाषया अनित्यत्वान्नेह। हरिवत्। इहानङ्णित्वे न भवतः। गोस्त्रियोरिति ह्रस्वेन सखिशब्दस्य लाक्षणिकत्वात्। लक्षणप्रतिपदोक्तयोः
प्रतिपदोक्तस्यैव ग्रहणात्। पतिः समास एव। पतिशब्दः समास एव घिसंज्ञः स्यात्। पत्या। पत्ये। पत्युः २। पत्यौ। शेषं हरिवत्। समासे तु भूपतये। क
तिशब्दो नित्यं बहुवचनांतः। बहुगणवतुडति संख्या। एते संख्यासंज्ञाः स्युः। डति च। डत्यंता संख्या षट्संज्ञा स्यात्। प्रत्ययस्य लुक्श्लुलुपः।
लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात्। षड्भ्यो लुक्। षड्भ्यः परयोर्जस्शसोर्लुक्स्यात्। प्रत्ययलोपे प्रत्ययलक्षणं। प्रत्यये लुप्तेऽपि
तदाश्रितं कार्यं स्यात्। इति जसि चेति गुणे प्राप्ते। न लुमतांगस्य। लुक्श्लुलुप एते लुमंतः। लुमता शब्देन लुप्ते तन्निमित्तमंगकार्यं न स्यात्। क
ति। कति। कतिभिः। कतिभ्यः २। कतीनां। कतिषु। अस्मद्युष्मद्षट्संज्ञकास्त्रिषु सरूपाः। त्रिशब्दो नित्यं बहुवचनांतः। त्रयः। त्रीन्। त्रिभिः। त्रिभ्यः २।

त्रेस्त्रयः। त्रिशब्दस्य त्रयादेशः स्यादामि। त्रयाणां। परमत्रयाणां। गौणत्वे तु नेति केचित्। प्रियत्रीणां। वस्तुतस्तु प्रियत्रयाणां। त्रिषु। द्व्यादीनि त्यं
द्विवचनांतः। त्यदादीनामः। एषामकारोंतादेशः स्याद्विभक्तौ। द्विपर्यंतानामेवेष्टिः। द्वौ २ द्वाभ्यां ३ द्वयोः २। द्विपर्यंतानां किं। भवान्। भवंतौ। सं
ज्ञायामुपसर्जनत्वे च नात्वं। सर्वाद्यंतर्गणकार्यत्वात् द्विर्नाम कश्चित्। द्विः। द्वौ। द्वयः। द्वावतिक्रांतो ऽतिद्विः। हरिवत्। प्राधान्ये तु परमद्वौ। इत्यादि
औडुलोमिः। औडुलौमी। उडुलोमाः। लोम्नोपत्येषु बहुष्वकारो वक्तव्यः। बाह्वादेरिञोपवादः। औडुलोमिं। औडुलोमी। उडुलोमान्। इत्यादि।
इतिइदंताः॥ वातप्रमीरित्युणादिसूत्रेण माङ ईप्रत्ययः। स च कित्। वातं प्रमिमीतेवातप्रमीः। दीर्घाज्जसिच। वातप्रम्यौ। वातप्रम्यः। हे वात
प्रमीः। अमिपूर्वः। वातप्रमीं। वातप्रम्यौ। वातप्रमीन्। वातप्रम्या। वातप्रम्ये। वातप्रम्यः २ वातप्रम्योः। वातप्रम्यां। दीर्घत्वान्न नुट्। ङौ तु सवर्ण
दीर्घः। वातप्रमी। वातप्रम्योः। वातप्रमीषु। एवं ययीपप्यादयः। यात्यनेनेति ययी। मार्गः। पाति लोकमिति पपीः। सूर्यः। यायोः किद्द्विश्चेति ईप्रत्य
यः। क्विबंतस्य वातप्रमीशब्दस्य तु अमिशसि ङौ च विशेषः। वातप्रम्यं। वातप्रम्यः। वातप्रम्यि। एरनेकाच इति वक्ष्यमाणो यण्। प्रधीवत्॥
बहव्यः श्रेयस्यो यस्य सः बहुश्रेयसी। दीर्घङ्यंतत्वाद्धल्ङ्याब्भ्य इति लोपः। यूस्त्र्याख्यौ नदी॥ ईदूदंतौ नित्यस्त्रीलिंगौ नदीसंज्ञौ स्तः। प्रथमालिं
गग्रहणं च। पूर्वस्याख्यस्योपसर्जनत्वेपि नदीत्वं वक्तव्यमित्यर्थः। अंबार्थनद्योर्ह्रस्वः। अंबार्थानां नद्यंतानां च ह्रस्वः स्यात्संबुद्धौ। हे बहुश्रेयसि। १६
शसि बहुश्रेयसीन्। आण्नद्याः। नद्यंतात्परेषां ङितामाडागमः स्यात्। आटश्च। आटोचि परे वृद्धिरेकादेशः स्यात्। बहुश्रेयस्यै। बहुश्रेयस्याः २।

कंयत्पदं तदंतस्य नकारस्य लोपः स्यात्। नलोपस्यासिद्धत्वाद् दीर्घत्वमेत्वमैस्त्वं च न। यूषभ्यां। यूषभिः। यूषभ्य इत्यादि। विभाषा ङिश्योः। अंगावय
वो ऽसर्वनामस्थानयजादिस्वादिपरो यो ऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः परतः। यूष्णि। यूषणि। पक्षे रामवत्। पद्दन्न इति सूत्रे प्रभृति
ग्रहणं प्रकारार्थं। तथा च औङः श्यामपि दोषन्नादेशो भाष्ये ककुद्दोषणी। इत्युदाहृतः। दोस्शब्दस्य नपुंसकत्वमप्यत एव भाष्यात्। तेन मुंबेषा
इव बुध्यम्यदक्षिणं दोर्निशाचरइति संगच्छते। तेन पदं घ्रिश्चरणो ऽस्त्रियां। स्वांतं हृन्मानसं मन इति संगच्छते। आसन्यं प्राणमूचुरिति च। आस्ये
भवः आसन्यः। भुजबाहू प्रवेष्टो दोरिति साहचर्यात्पुंस्त्वमपि। दोषं तस्य तथाविधस्य भजत इति। द्व्येकयोर्भवो द्व्यह्नः। संख्याविसायपूर्व
स्याह्नस्याहन्नन्यतरस्यां ङौ। संख्यादिपूर्वस्याह्नस्याहनादेशो वा स्यात् ङौ। द्व्यह्नि। द्व्यहनि। द्व्यह्ने। विगतमहः व्यह्नः। व्यह्नि। व्यहनि। व्यह्ने। अ
ह्नः सायं सायाह्नः। सायाह्नि। सायाहनि। सायाह्ने। इत्यदंताः॥ विश्वपाः। दीर्घाज्जसि च। दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न
स्यात्। वृद्धिः। विश्वपौ। सवर्णदीर्घः। विश्वपाः। यद्यपीह औङि नादिचीत्यैव सिद्धे जसि तु सत्यपि पूर्वसवर्णदीर्घे क्षतिर्नास्ति तथापि गौर्यौ
गौर्य इत्याद्यर्थं सूत्रं। इहापि न्याय्यत्वादुपन्यस्तं। आतो धातोः। आकारांतो यो धातुस्तदंतस्य भस्यांगस्य लोपः स्यात्। अलोंत्यस्य। विश्वपः।
विश्वपा। विश्वपाभ्यामित्यादि। एवं शंखध्मादयः। धातोः किं। हाहान्। टा। सवर्णदीर्घः। हाहा। ङे। वृद्धिः। हाहै। ङसि। ङस्। दीर्घः। हाहाः।
ओसि। वृद्धिः। हाहौः। ङौ। आद्गुणः। हाहे। शेषं विश्वपावत्। आत इति योगविभागादधातोरप्याल्लोपः क्वचित्। क्त्वः। श्नः। इत्यादंताः॥ हरिः।

ङ्योपरत्वानिवत्ताद्यणिप्राप्ते। ङेलुत्संनस्थानिवत्। एकदेशविकृतस्यानन्यतया। नङ्णित्वे। सखा। सखायौ। सखायः। हे सखीः। अमिपूर्वेन
पात्परत्वाद्यणि प्राप्ते ततोपि परत्वात्सख्युरसंबुद्धौ विति प्रवर्त्तते। सखायं। सखायौ। शसियण्। सख्यः। सह खेन प्रवर्ततइति सखः। तमि
च्छतीति सखीः। सुखमिच्छतीति सुखीः। सुतमिच्छतीति सुतीः। सख्यौ। सुख्यौ। सुत्यौ। ख्यत्यादिति दीर्घस्यापि ग्रहणादुकारः। सख्युः। सुख्युः। सुत्युः
। लूनमिच्छतीति लूनीः। क्षाममिच्छतीति क्षामीः। प्रस्तीमं इच्छतीति प्रस्तीमीः। एषां ङसिङसोर्यण्मत्वमत्वयोरसिद्धत्वात्ख्यत्यादित्युत्वं। लून्युः। क्षाम्युः॥
प्रस्तीम्युः। शुष्कीयतेः क्विप्। शुष्कीः। पक्कीयतेः क्विप्। पक्कीः। इयङ्। शुष्कियौ। शुष्कियः। ङसिङसोस्तु शुष्कियः इत्यादि। इतिईदंताः। शंभुर्हरि
वत्। एवं विष्णुवायुभान्वादयः। तृज्वत्क्रोष्टुः। क्रोष्टुशब्दस्तृजंतेन तुल्यं वर्त्तते असंबुद्धौ सर्वनामस्थाने परे। क्रोष्टुः हस्थाने क्रोष्टृशब्दः प्रयो
क्तव्य इत्यर्थः। ऋतो ङिसर्वनामस्थानयोः। ङौ सर्वनामस्थाने परे ऋदंतांगस्य गुणः स्यादिति प्राप्ते। ऋदुशनस्पुरुदंसोनेहसां च। ऋदंतानामु
शनसादीनां चानङ् स्यादसंबुद्धौ सौ परे। अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणां। अबादीनामुपधाया दीर्घः स्यादसं
बुद्धौ सर्वनामस्थाने परे। नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थं। उणादिनिष्पन्नानां तृन्तृजंतानां चेद्भवति तर्हि नप्त्रादीनामेव। तेन पितृभ्रातृप्र
भृतीनां न। अव्युत्पत्तिपक्षे विध्यर्थं। उद्गातृशब्दस्य प्रवृत्तेव। समर्थसूत्रे उद्गातार इति भाष्यप्रयोगात्। क्रोष्टा। क्रोष्टारौ। क्रोष्टारः। क्रोष्टारं। १७
क्रोष्टारौ। क्रोष्टून्। विभाषा तृतीयादिष्वचि। अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्। क्रोष्ट्रा। क्रोष्ट्रे। ऋत उत्। ऋदंतात् ङसिङसोरति परे

उकार एकादेशः स्यात्। रपरत्वं। रात्सस्य। रेफात्संयोगांतस्य सस्यैव लोपो नान्यस्य रेफस्य विसर्गः। क्रोष्टुः। सस्यैवेति किं। ऊर्क्। आमि पर
त्वात्तृज्वद्भावे प्राप्ते। नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन। क्रोष्टूनां। क्रोष्टरि। क्रोष्ट्रोः। पक्षे हलादौ च शंभुवत्॥ इत्युदंताः। हूहूः
हूहौ। हूहः। हूहूं। हूहौ। हूहून्। इत्यादि। अतिचमूशब्दे तु नदीकार्यं विशेषः। हे अतिचमु। अतिचम्वै। अतिचम्वाः२। अतिचमूनां।
अतिचम्वां॥ खलपूः॥ ओः सुपि। धात्ववयवसंयोगपूर्वो न भवति य उवर्णः तदंतो यो धातुस्तदंतस्यानेकाचोंगस्य यण् स्यादजादौ सुपि।
गतिकारकेतरपूर्वपदस्य नेष्यते। खलप्वौ। खलप्वः। इत्यादि। एवं सुल्वादयः। अनेकाचः किं। लूः। लुवौ। लुवः। धात्ववयवेति किं। उल्लूः। उल्वौ
पूर्व उल्वः। असंयोगस्येति किं। कटप्रुवौ। कटप्रुवः। गतीत्यादि किं। परमलुवौ। सुपि किं। लुलुवतुः। स्वभूः॥ नभूसुधियोः। स्वभुवौ। स्वभुवः॥
वर्षाभ्वश्च। अस्योवर्णस्य यण् स्यादचि सुपि। वर्षाभ्वौ। वर्षाभ्वः। दृंभूतीति किं॥ अन्दृंभूजंबूकफेलूकर्कंधूदिधिषूरित्युणादिसूत्रेण व्यु
करभूः त्पादितः। दृंभ्वौ। दृंभ्वः॥ खलपूवत्। करभ्वं। करभ्वः। दीर्घपाठे करएव कारः। स्वार्थिकः प्रज्ञाद्यण्। करभ्वौ। पुनर्भूर्यौगिकः पुंसि। पुनर्भ्वा
वित्यादि। दृन्भूकाराभूशब्दो स्वयंभूवत्। इत्यूदंताः। धाता। हे धातः। धातारौ। धातारः। धातारं। धातारौ। धातॄन्। ऋवर्णान्नस्य णत्वं वा
च्यं। धातॄणां। इत्यादि। एवं नप्त्रादयः। उद्गातारौ। पिता। व्युत्पत्तिपक्षे नप्त्रादिग्रहणस्य नियमार्थत्वान्न दीर्घः। पितरौ। पितरः। पितरं। पितरौ। शेषं
धातृवत्। एवं जामातृभ्रात्रादयः। ना। नरौ। नरः। हे नः॥ नृ च। नुरस्य नामि वा दीर्घः स्यात्। नृणां। नॄणां। इत्यृदंताः। क्रुङ् अनयोस्तुक्

× दृंभूं। दृंभ्वौ। दृंभ्वः। दृन्निति निनां तो हिंसार्थे। तस्य येस्तुवः क्विप्। दृन्भूः॥ दृन्करपुनः पूर्वस्य भुवो यण् वक्तव्यः। दृंभ्वं। दृंभ्वः ४

रणेप्रकृतिवदनुकरणमितिवैकल्पिकातिदेशादित्वेरपरत्वं। कीः। किरौ। किरः। तीः। तिरौ। तिरः। इत्यादि। गीर्वत्। इत्वाभावपक्षे ऋदुपधानेतिऋ
तो ङीतिचतपरकरणादनङ् गुणेन। क्रः। क्रौ। क्रः। तृः। त्रौ। त्रः। कृं। कौ। कृन्। क्रा। क्रे। इत्यादि॥ इत्यृदंताः॥ गम्लृ शक्लृ अनयोरनुकरणे अनङ्
गमा। शका। गुणविषयेतु लपरत्वं। गमल्लौ। गमलः। गमलं। गमल्लौ। गमॄन्। गम्ला। गम्लि। ङसिङसोश्चऋतउदित्यत्वेलपरत्वेसंयोगांतलोपः॥
गमुल्। शकुलइत्यादि। इतिॡदंताः। सेः। सयौ। सयः। स्मृतेः। स्मृतयौ। स्मृतयः। इत्येदंताः॥ गोतोणित्। गोशब्दात्परंसर्वनामस्थानंणि
त्कार्यकृत्स्यात्। गोः। गावौ। गावः॥ औतोम्शसोः। आ ओत इतिच्छेदः। ओकारादम्शसोरचिपरेआकारएकादेशः स्यात्। शसासाहचर्या
त्सबेवअम्गृह्यते। नेह। अचिनवं। अस्कुनवं। गां। गावौ। गाः। गवा। गवे। गोः२इत्यादि। अतोणिदितियाम्यं। विहितविशेषणंच। तेन
स्त्रद्योः। स्त्रद्यावावित्यादि। ओकारांतात्द्विहितंसर्वनामस्थानमितिव्याख्यानान्नेह। हेभानवः। उः। शंभुः। स्मृतोयेनसः स्मृतोः। स्मृतावौ। स्मृतावः। स्मृ
तां। स्मृतावौ। स्मृताः। इत्यादि। इत्योदंताः॥ रायोहलि। रैशब्दस्यआकारांतादेशः स्याद्धलिविभक्तौपरे। अचि। आयादेशः। राः। रायौ। रायः।
रायं। रायौ। रायः। राया। राभ्यामित्यादि। इत्यैदंताः। ग्लौः। ग्लावौ। ग्लावः। ग्लावं। ग्लावौ। ग्लावः। ग्लावाइत्यादि। औतोम्शसोरितीहनप्रव
र्तते। एऔच्सूत्रेण ओदौतोः सावर्ण्याभावज्ञापनात्। इत्यौदंताः॥ इत्यजंताः पुल्लिंगाः॥ रमा॥ औङआपः। आबंतादंगात्परस्यौङः १९
शीः स्यात्। औङित्यौकारविभक्तेः संज्ञा। रमे। रमाः॥ संबुद्धौच। आपएकारः स्यात्संबुद्धौ। एङ्ह्रस्वादितिसंबुद्धिलोपः। हेरमे। हेरमाः। रमां।

नेद्यंतात्परस्यान्नुट्। बहुश्रेयसीनां। ङेराम्नद्याम्नीभ्यः। नद्यंतादाबंतान्नीशब्दाच्चङेरामस्यात्। इहपरत्वादाटानुट्बाध्यते। बहुश्रेयस्यां। शे
षंईप्रत्ययांतवातप्रमीवत्। अङ्यतत्वान्नसुलोपः। अतिलक्ष्मीः। शेषबहुश्रेयसीवत्। कुमारीमिच्छन्कुमारीवाचरन्ब्राह्मणः कुमारी। क्यजंतादा
चारक्विबंताद्वाकर्त्तरिक्विप्। हल्ङ्याब्भ्यादिलोपः। अचिश्नुधातुभ्रुवांय्वोरियङुवङौ। श्नुप्रत्ययांतस्येवर्णोवर्णांतस्य धातोर्भ्रूइत्यस्यचांगस्य
इयङुवङौस्तोऽजादौप्रत्ययेपरे। ङिच्चेत्यंतादेशः। आंतरतम्यादेरिङ् ओरुवङ् इतीयङिप्राप्ते। एरनेकाचोसंयोगपूर्वस्य। धात्ववयवसंयो
गपूर्वोनभवतियइवर्णस्तदंतोयोधातुस्तदंतस्यानेकाचोंगस्ययण्स्यादजादौप्रत्ययेपरे। इतियण्। कुमार्यौ। कुमार्यः। हेकुमारि। अमिशसिचकुमा
र्यं। कुमार्यः। कुमार्यै। कुमार्याः। कुमारीणां। कुमार्यां। प्रधीः। प्रध्यायंतीतिप्रधीर्भिवियहोत्र। प्रध्यौ। प्रध्यं। प्रध्यः। प्रध्यां। प्राध्ये। उन्नीयतीत्युन्नीः।
धातुनासंयोगस्यविशेषणादिहयण्स्यादेव। उन्न्यौ। उन्न्यः। हेउन्नीः। उन्न्यं। ङेराम्। उन्न्यां। एवंग्रामणीः। ङौतुग्रामण्यं। अनेकाचः किं। नीः। नियौ।
नियः। अमिशशिचपरत्वादियङ्। नियं। नियः। ङेराम्। नियां। असंयोगपूर्वस्येतिकिं। सुश्रियौ। यवक्रियौ। गतिकारकेतरपूर्वपदस्ययण्नेष्य
ते। शुद्धधियौ। परमधियौ। कथंतर्हि दुर्धियः। वृश्चिकभियइत्यादिउच्यते। दुष्ठिताधीर्येषामितिविग्रहे। दुरित्यस्यधीशब्दंप्रतिगतित्वमेवना
स्ति। यत्क्रियायुक्ताः प्रादयस्तंप्रत्येवगत्युपसर्गसंज्ञाः। वृश्चिकशब्दस्यबुद्धिकृतमपादानत्वंनेहविवक्षितं। वृश्चिकसंबंधिनीभीर्वृश्चिकभीरित्युत्तरप
दलोपोवा। नन्वेसुधियोः एतयोर्यण्स्यादचिस्सुपि। सुधियौ। सुधियइत्यादि। सखायमिच्छतिसखीयति। ततः क्विप्। अल्लोपयलोपौ। अ

पक्षेवाप:सवत्रग्रहणात्। एवंहल्ङ्याब्भ्यादिसूत्रेपिआआप्ङी:ईइति प्रश्लेषादतिखट्वः।।निष्कौशांबी:स्त्र्यादिसिद्धेदीर्घग्रहणंप्रसाख्येयं।नचैव
१९ मप्यतिखट्वायेत्यत्रस्वाश्रयमाकारत्वंस्थानिवद्भावेनात्वंचाश्रित्ययट्स्यादितिवाच्यं।आबंतंयदंगंततःपरस्ययाड्विधानात्।उपसर्जनस्त्रीप्रत्य
येतदादिनियमात्।षट्चतुर्भ्यश्चइतिनासिकायानस्।नसः।नसा।नोभ्यामित्यादि।पक्षेरूपंशरमावत्।निशायानिश्।निशः।निशा।।व्रश्च
भ्रस्जसृजमृजयजराजभ्राजच्छशांषः।व्रश्चादीनांसप्तानांछशांतयोश्चषकारोंतादेशःस्यात्झलिपदांतेच।षस्यजश्त्वेनडः।निड्भ्यां।नि
ड्भिः।रूपमिड:सीतिपक्षेधुट्।वर्त्वे।तस्यासिद्धत्वाच्चयोद्वितीयाइतिटतयोष्टुत्वेन।नपदांताट्टोरितिष्टुत्वंन।निड्त्सु।निट्सु।षढोःकःसि।
षस्यढस्यचकःस्यात्सकारपरेइतितुनभवति।जश्त्वंप्रत्यसिद्धत्वात्।केचित्तुव्रश्चेतिसूत्रेदादेर्धातोरितिसूत्राद्धातोरित्यनुवर्तयंति।तन्म
तेजश्त्वेनजकारे।निज्भ्यां।निज्भिः।श्चुत्वं।निचूश्।निचूछु।चोःकुरितिकुत्वंनभवतिजश्त्वस्यासिद्धत्वात्।मांसपृतनासानूनांमांस्पृत्
स्नवोवाच्यः।शसादौवा।पृतः।पृता।पद्भ्यामित्यादि।पक्षेरूपंटिचरमावत्।गोपाविश्वपावत्।मतिःप्रायेणहरिवत्।स्त्रीत्वान्नत्वाभावः।
मतीः।नात्वंन।मत्या।।ङितिह्रस्वश्च।इयङुवङुस्थानौस्त्रीशब्दभिन्नौनित्यस्त्रीलिंगावीदूतौह्रस्वौचइउवर्णौस्त्रियांवानदीसंज्ञौस्तोङितिपरे।आ
ण्नद्याः।मत्यै।मतये।मत्याः।मतेः।नदीत्वपक्षेओदितिडेरौत्वेप्राप्ते।।इदुद्भ्यां।नदीसंज्ञकाभ्यामिदुद्भ्यांपरस्यडेःआम्स्यात्।पक्षे।।अच्चघेः। १९
मत्यां।मतौ।एवंश्रुतिस्मृत्यादयः।।त्रिचतुरोःस्त्रियांतिसृचतसृ।स्त्रीलिंगयोरेतयोरेतावादेशौस्तोविभक्तौपरतः।।अचिरऋतः।तिसृच

तसृएतयोःऋकारस्यरेफादेशःस्यादचि।गुणदीर्घोत्वानामपवादः।तिस्रः२तिसृभिः।तिसृभ्यः२आमिनुमचिरेतिनुट्।।नतिसृचतसृ।
एतयोर्नामिदीर्घोनस्यात्।तिसृणां।तिसृषु।त्रियामितित्रिचतुरोर्विशेषणान्नेह।प्रियास्त्रयस्त्रीणिवायस्याःसाप्रियत्रिः।इत्या
दि।मतिवत्।आमिप्रियत्रयाणामितिविशेषः।प्रियास्तिस्रोयस्यसइतिविग्रहेतुप्रियतिसा।प्रियतिस्रौ।प्रियतिस्रः।प्रियतिस्रंइत्या
दि।प्रियतिस्रोयस्यतत्कुलंप्रियत्रि।स्वमोर्लुका लुप्तत्वेनप्रत्ययलक्षणाभावान्नतिस्रादेशः।नलुमतेतिनिषेधस्यानित्यत्वात्पक्षेप्रिय
तिसृ।रादेशात्पूर्वविप्रतिषेधेननुम्।प्रियतिसृणी।प्रियतिसृणि।तृतीयादिषुवक्ष्यमाणपुंवद्भावविकल्पात्पर्यायेणनुम्रभावौ।
प्रियतिस्रा।प्रियतिसृणाइत्यादि।द्वेरत्वेसत्याप्।द्वे२द्वाभ्यां३द्वयोः२गौरी।गौर्यौ।गौर्यः।नदीकार्यं।हेगौरि।हेगौर्यै।इत्यादि।एवंवा
णीनद्यादयः।प्रातिपदिकग्रहणेलिंगविशिष्टस्यग्रहणादनङिणित्वद्भावेचप्राप्ते।विभक्तौलिंगविशिष्टाग्रहणं।सखी।सख्यौ।सख्यः।इ
त्यादिगौरीवत्।अङूयंतत्वान्नसुलोपः।लक्ष्मीः।शेषंगौरीवत्।एवंतरीतंत्र्यादयः।स्त्री।हेस्त्रि।।स्त्रियाः।स्त्रीशब्दस्येयङ्स्यादजादौ
प्रत्ययेपरे।स्त्रियौ।स्त्रियः।।वाम्शसोः।अमिशसिचस्त्रियाइयङ्वास्यात्।स्त्रियं।स्त्रीं।स्त्रियः।स्त्रीः।स्त्रिया।स्त्रियै।स्त्रियाः२।स्त्रियो।।
परत्वान्नुट्।स्त्रीणां।स्त्रियां।स्त्रियोः।स्त्रीषु।स्त्रियमतिक्रांतोऽतिस्त्रिः।अतिस्त्रियौ।गुणाभावेत्वनुङ्ःपरत्वात्पुंसिबाध्यते।स्त्रीवित्तुमा
चस्त्रीशब्दस्येयङित्यचधार्यतां।।जसिच।अतिस्त्रयः।हेअतिस्त्रे।अतिस्त्रियौ।अतिस्त्रयः।।वाम्शसोः।अतिस्त्रिं।अतिस्त्रियं।अति

स्त्रियः। अतिस्त्रीन्। अतिस्त्रिणा॥ घेर्ङिति। अतिस्त्रये। अतिस्त्रेः २। अतिस्त्रियोः। अतिस्त्रीणां॥ अच्च घेः। अतिस्त्रौ। अस्योकारे नित्यं स्या
दमूर्शसोस्तु विभाषया। इयादेशोपि विनान्यत्र स्त्रियाः पुंस्युपसर्जने। क्लीबे तु नुम्। अतिस्त्रि। अतिस्त्रिणी। अतिस्त्रीणि। अतिस्त्रिणे।
ऊप्रभृतावजादौ वक्ष्यमाणपुंवद्भावपक्षे प्राग्वद्रूपं। अतिस्त्रये। अतिस्त्रिणः। अतिस्त्रेः २। अतिस्त्रिणोः। अतिस्त्रियोरित्यादि। स्त्रि
यां तु प्रायेण पुंवत्। शसि। अतिस्त्रीः। अतिस्त्रियां। ङिति ह्रस्वश्चेति ह्रस्वांतत्वप्रयुक्तो विकल्पः। अस्त्रीति तु इयङुवङ्स्थानावित्यस्यैव
पर्युदासः तत्संबंधस्यैवानुवृत्तेः। दीर्घस्यायं निषेधो न तु ह्रस्वस्य। अतिस्त्रियै। अतिस्त्रये। अतिस्त्रियाः। अतिस्त्रेः २। अतिस्त्रियां। अति
स्त्रौ। श्रीः। श्रियौ। श्रियः॥ नेयङुवङ्स्थानावस्त्री। इयङुवङोः स्थितिर्ययोः स्त्रावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री। हे श्रीः। श्रियै। श्रिये। श्रियाः।
श्रियः २। वामि। इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री। श्रीणां। श्रियां। श्रियि। श्रियां। प्रधीशब्दस्य तु वृत्तिकारादीनां
मते लक्ष्मीवद्रूपं। पदांतरं विनापि स्त्रियां वर्त्तमानत्वेन नित्यस्त्रीत्वमिति स्त्रीकारात्। लिंगांतरानभिधायकत्वं नादितिकैयटमते तु पुंवद्रू
पं। प्रकृष्टा धीरिति विग्रहे तु लक्ष्मीवत्। आमि शसि च प्रध्यं प्रध्य इति विशेषः। सुष्ठु धीर्यस्याः सुष्ठु ध्यायति वेति विग्रहे वृत्तिमते सुधीः।
श्रीवत्। मतांतरे पुंवत्। सुष्ठु धीरिति विग्रहे तु श्रीवदेव। ग्रामणीः। पुंवत्। ग्रामनयनस्योत्सर्गतः पुंधर्मतया पदांतरं विना स्त्रियाम २०
प्रवृत्तेः। एवं खलपवनादेरपि पुंधर्मत्वमौत्सर्गिकं बोध्यं। धेनुर्मतिवत्॥ स्त्रियां च। स्त्रीवाची क्रोष्टुशब्दस्तृजंतवद्रूपं लभते॥ ऋन्नेभ्यो

रमे। स्त्रीत्वान्नत्वाभावः। रमाः॥ आङि चापः। आङि ओसि च परे आबंतांगस्य एकारः स्यात्। रमया। रमाभ्यां। रमाभिः॥ याडापः। आपः परस्य
ङिद्वचनस्य याडागमः स्यात्॥ वृद्धिरेचि। रमायै॥ सवर्णदीर्घः। रमायाः। रमयोः। रमाणां। रमायां। रमयोः। रमासु। एवं दुर्गादयः॥ सर्वनाम्नः
स्याड्ढ्रस्वश्च। आबंतात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः। याटोपवादः। सर्वस्यै। सर्वस्याः २। एकादेशस्य पूर्वांतत्वेन ग्रहणादामि सर्वना
म्न इति सुट्। सर्वासां। सर्वस्यां। सर्वयोः। सर्वासु। एवं विश्वादय आबंताः॥ विभाषा दिक्समासे बहुव्रीहौ। अत्र सर्वनामता वा स्यात्। उत्तरपूर्व
स्यै। उत्तरपूर्वायै। दिङ्नामान्यंतराले इति प्रतिपदोक्तस्य दिक्समासस्य ग्रहणान्नेह। योत्तरा सा पूर्वा यस्या उन्मुग्धायाः तस्यै उत्तरपूर्वायै। बहु
व्रीहिग्रहणं स्पष्टार्थं। अंतरस्यै। शालायै। बाह्यायै इत्यर्थः। अपुरीत्युक्तेर्नेह। अंतरायै। नगर्यै॥ विभाषा द्वितीयातृतीयाभ्यां। द्वितीयातृतीयाभ्यां
ङितः स्याट् आपश्च ह्रस्वः। इदं सूत्रं त्यक्तुं शक्यं। तीयस्य ङित्सूपसंख्यानात्। द्वितीयस्यै। द्वितीयायै। द्वितीयस्याः २। द्वितीयायाः २। द्वितीयस्यां। द्वितीयायां।
शेषं रामवत्। एवं तृतीया॥ अंबार्थनद्योर्ह्रस्वः। हे अंब। हे अक्क। हे अल्ल। ड्लसंयुक्ता ये डलकास्तद्वतां ह्रस्वो न। हे अंबाडे। हे अंबाले। हे अंबिके। ज
रा। जरसौ। शीभावात्परत्वाज्जरस्। आमि नुट्परत्वाज्जरस्। जरसामित्यादि। पक्षे रामवत्। इह पूर्वविप्रतिषेधेन शीभावं कृत्वा सन्निपातपरिभाषा
या अनित्यतां चाश्रित्य जरसी इति केचिदाहुस्तन्निर्मूलं। यद्यपि जरसादेशस्य स्थानिवद्भावेनाबंततामाश्रित्य औङ आपः॥ आङि चापः। याडापः।
ह्रस्वनद्यापः। ङेराम्नीति पंचापि विधयः प्राप्ताः। एवं नसु भिस्पूर्वसूत्रे तथापि अनल्विधाविधावित्युक्तेर्न भवंति। आ आपू इति प्रश्लेषेण आकारस्

दिभ्यः स्वमोरद्ड्डादेशः स्यात् ॥ टेः ॥ इति परे भस्य टेर्लोपः स्यात् ॥ वावसाने । कतरत् । कतरद् । कतरे । कतराणि । भस्येति किं । पंचमः । टेर्लुप्तत्वा
त्प्रथमयोरिति न पूर्वसवर्णदीर्घः । एङ्ह्रस्वादिति संबुद्धिलोपश्च न भवति । हे कतरत् । पुनस्तद्वत् । शेषं पुंवत् । कतमत् । अन्यत् । अन्यतरत् । इतरत् ।
अन्यतमस्य तु अन्यतममित्येव । एकतरात्प्रतिषेधो वक्तव्यः । एकतरं । सोरमादेशे कृते सन्निपातपरिभाषया न जरस् । अजरं । अजरसी । अजरे ।
परत्वाज्जरसादेशे कृते शल्वंतत्वान्नुम् ॥ सान्तमहतः संयोगस्य ॥ सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यात् असंबुद्धौ सर्व
नामस्थाने परे । अजरांसि । अजराणि । अमि लुकोपवादममूसावं बाधित्वा परत्वाज्जरस् । ततः सन्निपातपरिभाषया न लुक् । अजरसं । अजरं ।
अजरसी । अजरे । अजरांसि । अजराणि । शेषं पुंवत् । पद्दन्न् इति हृदयोदकास्यानां हृद् । उदन् । आसन् । हृदि । हृदा । हृद्भ्यामित्यादि । उदानि । उ
द्ना । उद्भ्यामित्यादि । आसानि । आस्ना । आसभ्यामित्यादि । मांसि । मांसा । मान्भ्यामित्यादि । वस्तुतस्तु प्रभृतिग्रहणं प्रकारार्थमित्युक्तं । अतए
व भाष्ये मांस पच्या उखाया इत्युदाहृतं । अयस्मयादित्वेन भत्वात्संयोगांतस्य लोपो न । यद्यपि पद्दन्न् इत्यत्र हि छंदसीत्यनुवर्तितं तद्वृत्तौ तथापि
अपो भीत्यत्र मासश्छंदसीति वार्तिके छंदोग्रहणसामर्थ्यात् लोके पि क्वचिदिति कैयटोक्तरीत्या प्रयोगमनुसृत्य पदादयः प्रयोक्तव्या इति बो
ध्यं ॥ ह्रस्वो नपुंसके प्रातिपदिकस्य ॥ क्लीबे प्रातिपदिकस्याजंतस्य ह्रस्वः स्यात् । श्रीपं ज्ञानवत् । श्रीपाय । अत्र संनिपातपरिभाषया आतो धा
तोरित्यालोपो न ॥ स्वमोर्नपुंसकात् ॥ क्लीबादंगात्स्वमोर्लुक् स्यात् ॥ वारि ॥ इकोऽचि विभक्तौ ॥ इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ । वा

रिणी । वारीणि । न लुमतेति निषेधस्यानित्यत्वात्पक्षे संबुद्धिनिमित्तो गुणः । हे वारे । हे वारि । आङो ना । वारिणा । घेर्ङितीति गुणे प्राप्ते । वृद्ध्यौत्व
तृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन । वारिणे । वारिणः । वारिणोः । नुमचिरेति नुट् । नामीति दीर्घत्वं । वारीणां । वारिणि । वारिणोः ।
हलादौ हरिवत् ॥ तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ॥ प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगंतं क्लीबं पुंवद्वा स्यात् टादावचि । अनादये ।
अनादिने इत्यादि । शेषं वारिवत् । पीलुर्वृक्षः । तत्फलं पीलु तस्मै पीलुने । अत्र न पुंवत् । वृत्तिनिमित्तभेदात् ॥ अस्थिदधिसक्थ्यक्ष्णाम
नङुदात्तः ॥ एषामनङ् स्याट्टादावचि स चोदात्तः ॥ अल्लोपोऽनः ॥ दध्ना । दध्ने । दध्नः २ । दध्नोः । दध्नि । दधनि । शेषं वारिवत् । एवमस्थिसक्थ्य
क्षि । तदंतस्याप्यनङ् । अतिदध्ना । सुधि । सुधिनी । सुधीनि । हे सुधे । हे सुधि । सुधिया । सुधिना । प्रध्या । प्रधिना । मधु । मधुनी । मधूनि ।
हे मधो । हे मधु । एवमंश्वादयः । सानुशब्दस्य स्नुर्वा । स्नूनि । सानूनि । सानुना । स्नुना । सानुभ्यां । स्नुभ्यां । सानुभिः । स्नुभिः । प्रियक्रोष्टु । प्रि
यक्रोष्टुनी । तृज्वद्भावात्पूर्वविप्रतिषेधेन नुम् । प्रियक्रोष्टूनि । टादौ । पुंवत्पक्षे । प्रियक्रोष्ट्रा । प्रियक्रोष्टुना । प्रियक्रोष्ट्रे । प्रियक्रोष्टवे । अन्यत्र
तृज्वद्भावात्पूर्वविप्रतिषेधेन नुमेव प्रियक्रोष्टुना । प्रियक्रोष्टुने । नुमचिरेति नुट् । प्रियक्रोष्टूनां । सुलु । सुलुनी । सुलूनि । सुल्वा । सुलुना । धातृ । धा
तृणी । धातॄणि । हे धातः । हे धातृ । धात्रा । धातृणा । एवं ज्ञातृकर्त्रादयः ॥ एच इग्घ्रस्वादेशे ॥ आदिश्यमानेषु ह्रस्वेषु मध्ये एच इगेव स्यात् । प्रद्यु । प्रद्यु
नी । प्रद्यूनि । प्रद्युनेत्यादि । इह न पुंवत् ॥ प्रदियं तं प्रद्यु इति तस्य भाषितपुंस्कत्वाभावात् । एवमग्रेपि । प्ररि । प्ररिणी । प्ररीणि । प्ररिणा । एकदे

शाविकृतस्यानन्यत्वाच्छायोर्हस्वीस्यात्। प्रशाभ्यां। प्रशाभिः। नुमचिरेतितृज्वाले प्रशाणामित्यत्रविमाधवः। वस्तुतस्तुसन्निपातपरिभाषयानुड्न्या
य्यंन। नामीतिदीर्घस्त्वारंभसामर्थ्यात्परिभाषांबाधतइत्युक्तं प्रशीणां। क्रतु। क्रतुनी। क्रतूनि। क्रतुनेत्यादि॥ इत्यजंतानपुंसकलिंगाः॥
होढः। हस्यढःस्याज्झलिपदांतेच। हल्ङ्याविति सुलोपः। पदांतत्वाड्ढस्यढः। जश्त्वचर्त्वे। लिट्। लिड्। लिहौ। लिहः। लिहा। लिड्भ्यामित्या
दि। लिट्सु। लिट्त्सु॥ दादेर्धातोर्घः। उपदेशेदादेर्धातोर्हस्यघः स्याज्झलिपदांतेच। उपदेशोक्तिः। अधोगित्यत्रयथास्यात्। दामलिहमात्मनइच्छति
दामलिह्यति। ततःक्विप्। दामलिट्। अत्रमाभूत्॥ एकाचोबशोभष्झषंतस्यस्ध्वोः। धातोरवयवोयएकाच्झषंतस्तदवयवस्यबशःस्थानेभ
ष्स्यात्सकारेध्वशब्देपरेपदांतेच। एकाचोधातोरितिसामानाधिकरण्येनान्वयेतुइहनस्यात्। गर्दभमाचष्टे। गर्दभयति। ततःक्विप्। णिलोपः
। गर्धप्। झलीतिनिवृत्तं। स्ध्वोर्ग्रहणसामर्थ्यात्। तेनेहन। दुग्धं। दोग्धा। व्यपदेशिवद्भावेनधात्ववयवत्वाद्भभावः। जश्त्वचर्त्वे। धुक्। धुग्। दुहौ। दुहः
षत्वचर्त्वे। धुक्षु॥ वादुहमुहष्णुहष्णिहां। एषांहस्यवाघःस्याज्झलिपदांतेच। ध्रुक्। ध्रुग्। ध्रुट्। ध्रुड्। द्रुहौ। द्रुहः। ध्रुग्भ्यां। ध्रुड्भ्यां। ध्रुक्षु
ध्रुट्सु। ध्रुट्त्सु। एवंमुहष्णुहष्णिहां॥ इग्यणःसंप्रसारणं। यणस्थानेप्रयुज्यमानोयइक्ससंप्रसारणसंज्ञःस्यात्॥ वाहऊठ्। भस्यवाहः
संप्रसारणमूठ्स्यात्॥ संप्रसारणाच्च। संप्रसारणादचिपूर्वरूपमेकादेशःस्यात्॥ एत्येधत्यूठ्सु। विश्वौहः। विश्वौहेत्यादि। छंदस्येवण्वि २२
रितिपक्षेणिजंताद्विज्॥ चतुरनडुहोरामुदात्तः। अनयोरामस्यात्सर्वनामस्थानेसचोदात्तः॥ सावनडुहः। अस्यनुम्स्यात्सौपरे। आदित्यधिकाराद्व

अम्। ऋदंतेभ्योनांतेभ्यश्चस्त्रियांङीप्स्यात्। क्रोष्ट्री। क्रोष्ट्र्यौ। क्रोष्ट्र्यः। वधूःगौरीवत्। भ्रूःश्रीवत्। हेसुभ्रूः। कथंतर्हिहापितःक्वासिहेसुभ्रुइति
भट्टिः। प्रमादएवायमितिबहवः। खलपूःपुंवत्। पुनर्भूः। दृन्करेतियणाउवङोबाधनान्नेयङुवङ्स्थानावितिनिषेधोन। हेपुनर्भु। पुनर्भ्वं। पुनर्भ्वौ। पुन
र्भ्वः॥ एकाजुत्तरपदेणः। एकाजुत्तरपदंयस्यतस्मिन्समासेपूर्वपदस्थान्निमित्तात्परस्यप्रातिपदिकांतनुम्विभक्तिस्थस्यनस्यनित्यंणत्वंस्यात्।
आरंभसामर्थ्यान्नित्यत्वेसिद्धेपुनर्ग्रहणंस्पष्टार्थं। यणंबाधित्वापरत्वान्नुट्। पुनर्भूणां। वर्षाभूर्भेकजातौनित्यस्त्रीत्वाभावात्। हेवर्षाभूः। केच
न्मते। मतांतरेतु हेवर्षाभु। पुनर्नवायांतु हेवर्षाभु। भेक्यांपुनर्नवायांस्त्रीवर्षाभूर्दर्दुरेपुमानितियादवः॥ वर्षाभ्वश्च। वर्षाभ्वौ। वर्षाभ्वः। स्व
यंभूःपुंवत्॥ नषट्स्वस्रादिभ्यः। षट्संज्ञकेभ्यःस्वस्रादिभ्यश्चङीप्टापौनस्तः। स्वसातिस्रश्चतस्रश्चननांदादुहितातथा। यातामातेति
सप्तैतेस्वस्रादयउदाहृताः। अप्तृन्नितिदीर्घः। स्वसा। स्वसारौ। स्वसारः। मातापितृवत्। शसिमातॄः। द्यौर्गोवत्। राःपुंवत्। नौर्ग्लौवत्। इत्यजंताः
स्त्रीलिंगाः॥ अतोम्। अतोंगात्क्लीबात्स्वमोरम्स्यात्॥ अमिपूर्वः। ज्ञानं। एङ्ह्रस्वादितिहल्मात्रलोपः। हेज्ञान॥ नपुंसकाच्च। क्लीबात्परस्यौ
ङःशीस्यात्। भसंज्ञायां॥ यस्येतिच। भस्येवर्णावर्णयोर्लोपःस्यादीकारेतद्धितेचपरे। इत्यकारस्यलोपेप्राप्ते। औङःश्यांप्रतिषेधोवाच्यः। ज्ञाने।
जश्शसोःशिः। क्लीबादनयोःशिःस्यात्॥ शिसर्वनामस्थानं। शिइत्येतदुक्तसंज्ञंस्यात्॥ नपुंसकस्यझलचः। झलंतस्याजंतस्यचक्लीबस्यनु
मागमःस्यात्सर्वनामस्थानेपरे। उपधायादीर्घः। ज्ञानानि। पुनस्तद्वत्। शेषंरामवत्। एवंधनवनफलादयः॥ अद्ड्डतरादिभ्यःपंचभ्यः। एभ्यः

णांस्वरोयंनुम्।अतोविशेषविहितेनापिनुमाआम्नबाध्यते।आमाचनुम्नबाध्यते।सोर्लोपः।नुम्विधिसामर्थ्याद्वस्यनदत्वंन॥
संयोगान्तस्यलोपस्यासिद्धत्वान्नलोपोन।अनड्वान्॥अम्संबुद्धौ।चतुरनडुहोरम्स्यात्संबुद्धौ।आमोपवादः।हेअनड्वन्।अनड्वाहौ।अ
नड्वाहः।अनड्वाहं।अनड्वाहौ।अनडुहः।अनडुहा॥वसुस्रंसुध्वंस्वनडुहांदः।सांतवस्वंतस्यस्रंसादेश्चदःस्यात्पदांते।अनडुद्भ्यामि
त्यादि।सांतेकिं।विद्वान्।पदांतेकिं।स्रस्तं।ध्वस्तं॥सहेःसाडःसः।साड्रूपस्यसहेःसस्यमूर्धन्यादेशःस्यात्।तुराषाट्।तुराषाड्।तुरा
साहौ।तुरासाहः।तुराषाड्भ्यामित्यादि।तुरंसहतइत्यर्थेछंदसिसहइतिण्विः।लोकेतुसाहयतेःक्विप्।अन्येषामपीतिपूर्वपदस्यदीर्घः॥
दिवऔत्।दिवितिप्रातिपदिकस्यौत्स्यात्सौपरे।अल्विधित्वेनस्थानिवद्भावाद्धल्ङ्याबितिलोपोन।सुद्यौः।सुदिवौ।सुदिवः।सुदिवं।
सुदिवः॥दिवउत्।दिवोंतादेशउकारःस्यात्पदांते।सुद्युभ्यां।सुद्युभिः।चत्वारः।चतुरः।चतुर्भिः।चतुर्भ्यः॥षट्चतुर्भ्यश्च।षट्संज्ञकेभ्यश्च
तुरश्चपरस्यामोनुडागमःस्यात्।णत्वंद्वित्वं।चतुर्ण्णां॥रोःसुपि।सप्तमीबहुवचनेपरेरोरेवविसर्जनीयोनान्यस्यरेफस्य।षत्वं।षस्यद्वि
त्वेप्राप्ते॥शरोचि।अचिपरेशरोनद्वेस्तः।चतुर्षु।प्रियचत्वाः।हेप्रियचत्वः।हेप्रियचत्वारौ।हेप्रियचत्वारः।गौणत्वेतुनुण्नेष्यते।प्रियचतु
रां।प्राधान्येतुस्यादेव।परमचतुर्ण्णां।कमलंकमलांवाआचक्षाणः।कमल्।कमलौ।कमलः।षत्वं।कमल्सु॥मोनोधातोः।धातोर्मस्यनः
स्यात्पदांते।नत्वस्यासिद्धत्वान्नलोपोन।प्रशाम्यतीतिप्रशान्।प्रशामौ।प्रशामः।प्रशान्भ्यामित्यादि॥किमःकः।किमःकःस्याद्विभक्तौ।

अकच्सहितस्याप्ययमादेशः।कः।कौ।के।इत्यादिसर्ववत्॥इदमोमः।इदमोमस्यमःस्यात्सौपरे।त्यदाद्यत्वापवादः॥इदोय्पुंसि।इदमश
ब्दस्य इदः स्थाने अय्स्यात्सौपुंसि।अयं।त्यदाद्यत्वं।पररूपत्वंच॥दश्च।इदमोदस्यमःस्याद्विभक्तौ।इमौ।इमे।त्यदादेःसंबोधननास्तीत्यु
त्सर्गः॥अनाप्यकः।अककारस्यइदमइदोनस्यादापिविभक्तौपरे।आप्इतिटाइत्यारभ्यसुपःपकारेणप्रत्याहारः।अनेन॥हलिलोपः।
अककारस्येदमइदोलोपःस्यादापिहलादौपरतः।नानर्थकेलोंत्यविधिरनभ्यासविकारे॥आद्यंतवदेकस्मिन्।एकस्मिन्क्रियमाणं
कार्यमादाविवांतइवस्यात्।आभ्यां॥नेदमदसोरकोः।अककारयोरिदमदसोर्भिसऐस्नस्यात्।एत्वं।एभिः।अत्वं।नित्यत्वान्ङेःस्मै।प
श्चाद्धलिलोपः।अस्मै।आभ्यां।एभ्यः।अस्मात्।अस्य।अनयोः।एषां।अस्मिन्।अनयोः।एषु।ककारयोगेतुअयकं।इमकौ।इमके।
इमकेन।इमकाभ्यां।इमकैः।इत्यादि॥इदमोन्वादेशेशनुदात्तस्तृतीयादौ।अन्वादेशविषयस्येदमोनुदात्तोश्आदेशःस्यात्तृतीया
दौ।अश्वचनंसाकच्कार्थं॥द्वितीयाटौस्स्वेनः।द्वितीयायांचटौसोश्चपरतइदमेतदोरेनादेशःस्यादन्वादेशे।किंचित्कार्यंविधातुमुपात्तस्य
कार्यांतरंविधातुंपुनरुपादानमन्वादेशः।यथाअनेनव्याकरणमधीतमेनंछंदोध्यापयेति।अनयोःपवित्रंकुलंएनयोःप्रभूतं
स्वमिति।एनं।एनौ।एनान्।एतेन।एनयोः।गण्यतेर्विच्।सुगण्।सुगणौ।सुगणः।सुगण्ड्सु।सुगण्सु।क्विप्।अनुनासिक २३
स्यक्विझलोरितिदीर्घः।सुगाण्।सुगाणौ।सुगाण्ड्सु।परत्वादुपधायादीर्घः।हल्ङ्यादिलोपस्तत्तोनलोपः।राजा॥नङिसं

विभागसामर्थ्यादनंतरस्य विधिर्वा प्रतिषेधो वेति न्यायं बाधित्वा एकाजुत्तरे णेति णत्वमपि निवर्त्यते। नकारे परे कुत्वविधिसामर्थ्याद्धन्तेरुपधालोपेन
स्थानिवत्त्व। वृत्रघ्नः। वृत्रघ्नेत्यादि। यत्तु वृत्रघ्न इत्यादौ वैकल्पिकं णत्वं माधवेनोक्तं तद्भाष्यवार्तिकविरुद्धं। एवं शार्ङ्गिन् यशस्विन् अर्यमन् पू
षन्। यशस्विंनिति विन्प्रत्ययस्येन्नोऽनर्थकत्वेपि इन्हन्निति सूत्रे ग्रहणं भवत्येव। अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदंतविधिं प्रयोजयंती
वचनात्। अर्यम्णि। अर्यमणि। पूष्णि। पूषणि॥ मघवा बहुलं। मघवन्शब्दस्य वा तृ इत्यंतादेशः स्यात्। ऋ इत्॥ उगिदचां सर्वनामस्थानेऽधातोः॥
अधातोरुगितो नलोपिनो ञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे। उपधायाद्दीर्घः। मघवान्। इह दीर्घे कर्तव्ये संयोगांतलोपस्यासिद्धत्वं न स्याद्बहुल
ग्रहणात्। तथा च श्वन्नुक्षन्निति निपातनान्मघशब्दान्मतुपा च भाषायामपि शब्दद्वयसिद्धिमाश्रित्य तत्सूत्रं प्रत्याख्यातमाकरे। हविर्जक्षिति निः
शंको मखेषु मघवान् सावितिभट्टिः। मघवंतौ। मघवंतः। हे मघवन्। मघवतः। मघवता। मघवद्भ्यामित्यादि। तृत्वाभावे। मघवा। छंदसी
वनिपौ चेति च निवर्तं मध्योदात्तं छंदस्येव। अंतोदात्तं तु लोकेपीति विशेषः। मघवानौ। मघवानः। रूपं च राजवत्॥ श्वयुवमघोनामत
द्धिते। अन्नंतानां भसंज्ञानामेषामतद्धिते परे संप्रसारणं स्यात्॥ संप्रसारणाच्च। आद्गुणः। मघोनः। अन्नंतानां किं। मघवतः। मघवता। स्त्री
यां मघवती। अतद्धिते किं। माघवनं। मघोना। मघवद्भ्यामित्यादि। शुनः। शुना। श्वभ्यामित्यादि। युवन्शब्दे वस्योत्वे कृते॥ न संप्रसार
णे संप्रसारणं। संप्रसारणे परतः पूर्वस्य यणः संप्रसारणं न स्यात्। इति यकारस्य नेत्वं। अत एव ज्ञापकादंत्यस्य यणः पूर्वं संप्रसारणं। यूनः।

यूना। युवभ्यामित्यादि। अर्वा। हे अर्वन्॥ अर्वणस्त्रसावनञः। नञा रहितस्यार्वन्नंतस्यांगस्य तृ इत्यंतादेशः स्यान्न तु सौ। उगित्वान्नुम्। अर्व
न्तौ। अर्वंतः। अर्वंतं। अर्वंतौ। अर्वतः। अर्वता। अर्वद्भ्यामित्यादि। अनञः किं। अनर्वा। अनर्वाणौ। यज्वबत्॥ पथिमथ्यृभुक्षामात्। एषामा
कारोंतादेशः स्यात्सौ परे। आ आदिति प्रश्लेषण शुद्धाया एव व्यक्तेर्विधानान्नानुनासिकः॥ इतोऽत्सर्वनामस्थाने। पथ्यादेरिकारस्याकारः
स्यात्सर्वनामस्थाने॥ थो न्थः। पथिमथोस्थस्य न्थादेशः स्यात्सर्वनामस्थाने। पंथाः। पंथानौ। भस्य टेर्लोपः। भसंज्ञकस्य पथ्यादेष्टेर्लोपः स्यात्।
पथः। पथा। पथिभ्यामित्यादि। एवं मंथाः। ऋभुक्षाः। स्त्रियां नांतलक्षणे ङीपि भत्वाट्टिलोपः। सुपथी नगरी। अनृभुक्षी सेना। आत्वं न पुंस
केन सवति। न लुमतेति प्रत्ययलक्षणनिषेधात्। सुपथि वनं। संबुद्धौ नपुंसकानां नलोपो वा वाच्यः। हे सुपथिन्। हे सुपथि। नलोपः सु
प्स्वरसेति नलोपस्यासिद्धत्वाद्ध्रस्वस्य गुणो न। द्विवचने भत्वाट्टिलोपः। सुपथी। शौ सर्वनामस्थानत्वात् सुपंथानि। पुनरपि सुपथि। सुपथी। सुपंथा
नि। सुपथा। सुपथे इत्यादि॥ ष्णांता षट्। षांता नांता च संख्या षट्संज्ञा स्यात्॥ षड्भ्यो लुक्। पंच २। संख्या किं। विप्रुषः। पामानः। शतानि
सहस्राणीत्यत्र सन्निपातपरिभाषया न लुक्। सर्वनामस्थानसन्निपातेन कृतस्य नुमस्तद्विघातकत्वात्। पंचभिः। पंचभ्यः। षट्चतुर्भ्यश्चे
ति नुट्॥ नोपधायाः। नांतस्योपधाया दीर्घः स्यान्नामि। नलोपः। पंचानां। पंचसु। परमपंच। परमपंचानां। गौणत्वे तु न लुक् नुटौ। प्रियपंचा
। प्रियपंचानौ। प्रियपंचानः। प्रियपंच्ना। एवं सप्तन् नवन् दशन्॥ अष्टन आ विभक्तौ। अष्टन आत्वं स्याद्धलादौ विभक्तौ॥ अष्टाभ्य औश्।

कृताकारादष्टनः परयोर्जश्शसोरौश् स्यात्। अष्टभ्य इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति। वैकल्पिकं चेदमष्टन आत्वं।
अष्टनो दीर्घादिति सूत्रे दीर्घग्रहणं ज्ञापकात्। अष्टौ २ परमाष्टौ। अष्टाभिः। अष्टाभ्यः २ अष्टानां। अष्टासु। आत्वाभावे अष्ट २ इत्यादि पंचवत्।
गौणत्वे त्वात्वाभावे राजवत्। शासि प्रियाष्टः॥ इह पूर्वस्मादपि विधावल्लोपस्य स्थानिवत्त्वाभावान्न ष्टुत्वं। कार्यकालपक्षे बहिरंगस्याल्लोपस्या
सिद्धत्वाद्वा। प्रियाष्टा इत्यादि। जश्शसोरनुमीयमानमात्वं प्राधान्य एव न तु गौणतायां। तेन प्रियाष्टनो हलादावेव वैकल्पिकमात्वं। प्रियाष्टा।
प्रियाष्टाभ्यां ३ प्रियाष्टाभिः। प्रियाष्टाभ्यः २ प्रियाष्टासु। प्रियाष्ट्नो राजवत्सर्वं हाहावच्चापरं हलि। भष्भावः। जश्त्वचर्त्वे। भुत्। भुद्। बुधौ।
बुधः। बुधा। भुद्भ्यां। भुत्सु॥ ऋत्विग्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंचां च॥ एभ्यः क्विन् स्यात्। अलाक्षणिकत्वमपि किंचित्कार्यं निपातनाल्ल
भ्यते। निरुपपदाद्युजेः क्विन्। कृतावितौ॥ कृदतिङ्॥ सन्निहिते धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात्॥ वेरपृक्तस्य। अपृक्त
स्य वेर्लोपः स्यात्। कृत्तद्धितेति प्रातिपदिकत्वात्स्वादयः॥ युजेरसमासे॥ युजेः सर्वनामस्थाने नुम्स्यादसमासे। सुलोपः॥ संयोगान्तस्य लोपः॥ क्विन्प्र
त्ययस्य कुः॥ क्विन्प्रत्ययो यस्मात्तस्य कवर्गोन्तादेशः स्यात्पदान्ते। नस्य कुत्वेन ङकारः। युङ्। नश्चापदान्तस्य झलि नुमो नुस्वारः। परसवर्णः। नस्यासि
द्धत्वाच्चोः कुरिति कुत्वं न। युंजौ। युंजः। युंजं। युंजौ। युजः। युजा इत्यादि। असमासे किं॥ चोः कुः। चवर्गस्य कवर्गः स्याज्झलि पदान्ते च। इति कु २५
त्वं। क्विन्प्रत्ययस्येति कुत्वस्यासिद्धत्वात्। सुयुक्। सुयुजौ। सुयुजः। युजेरिति धातुपाठपठितेकारविशिष्टस्यानुकरणं। न त्विकानिर्देशः। तेनेह न।

बुध्योः। नस्य लोपो न स्यान्ङौ संबुद्धौ च। हे राजन्। ङौ तु छंदस्युदाहरणं। सुपां सुलुगिति ङेर्लुक्। निषेधसामर्थ्यात्प्रत्ययलक्षणं। परमे व्योमन्। ङा
वुत्तरपदे प्रतिषेधो वक्तव्यः। चर्मणि तिला यस्य चर्मतिलाः। ब्रह्मणि निष्ठा यस्य ब्रह्मनिष्ठः। राजानौ। राजानः। राजानं। राजानौ॥ अल्लोपोनः॥
श्चुत्वं। न चाल्लोपः स्थानिवत्। पूर्वत्रासिद्धीये तन्निषेधात्। नापि बहिरंगतयासिद्धः। यथोद्देशपक्षे षाष्ठीं परिभाषां प्रति श्चुत्वस्यासिद्धतया
अंतरंगाभावे परिभाषाया अप्रवृत्तेः। जञोर्ज्ञः। राज्ञः॥ नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति। सुब्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च न
लोपो असिद्धो नान्यत्र राजाश्व इत्यादौ। इत्यसिद्धत्वादात्वमेत्वमैस्त्वं च न॥ राजभिः। राज्ञे। राजभ्यां। राजभ्यः। राज्ञः २। राज्ञोः। राज्ञां। राज्ञि। राजनि।
प्रतिदीव्यतीति प्रतिदिवा। प्रतिदिवानौ। प्रतिदिवानः। अस्य भविषये अल्लोपे कृते॥ हलि च। रेफवांतस्य धातोरुपधाया इको दीर्घः स्याद्ध
लि। न चाल्लोपस्य स्थानिवत्त्वं। दीर्घविधौ तन्निषेधात्। बहिरंगपरिभाषा तूक्तन्यायेन न प्रवर्तते। प्रतिदीव्नः। प्रतिदीव्ना। इत्यादि। यज्वा। यज्वा
नौ। यज्वानः॥ न संयोगाद्वमंतात्। वकारमकारांतसंयोगात्परस्यानोकारस्य लोपो न स्यात्। यज्वनः। यज्वना। यज्वभ्यामित्यादि। ब्रह्मणः। ब्र
ह्मेत्यादि॥ इन्हन्पूषार्यम्णां शौ। एषां शावेवोपधाया दीर्घो नान्यत्रेति निषेधे प्राप्ते॥ सौ च। इन्नादीनामुपधाया दीर्घः स्यादसंबुद्धौ सौ परे। वृत्र
हा। हे वृत्रहन्॥ एकाजुत्तरपदे णः। इति णत्वं। वृत्रहणौ। वृत्रहणः। वृत्रहणं। वृत्रहणौ॥ हो हंतेर्ञ्णिन्नेषु। ञिति णिति च प्रत्यये नकारे च परे हंतेर्हस्य कु
त्वं स्यात्॥ हंतेः। उपसर्गस्थान्निमित्तात्परस्य हंतेर्नस्य णत्वं स्यात्। प्रहण्यात्॥ अत्पूर्वस्य। हंतेरत्पूर्वस्यैव नस्य णत्वं स्यान्नान्यस्य। प्रघ्नंति। योग

युज्यते समाधत्त इति युक्। युज समाधौ। दैवादिक आत्मनेपदी॥ संयोगांतस्य लोपः। खन्। खञ्जौ। खञ्ज इत्यादि। व्रश्चेति षत्वं। जश्त्व
चर्त्वे। राट्। राड्। राजौ। राजः। राड्सु। राट्सु। एवं विभ्राट्। देवट्। देवेजौ। विश्वसृट्। इह यजिसृज्योः कुत्वं नेति क्विन्नि वक्ष्यते। परिमृट्।
षत्वविधौ राजिसाहचर्यात् भ्राज् दीप्ताविति फणादिरेव गृह्यते। यस्तु एज् भ्राज् दीप्ताविति तस्य कुत्वमेव। विभ्राग्। विभ्राक्। विभ्राग्भ्या
मित्यादि॥ परौ व्रजेः षः पदांते। परौ उपपदे व्रजेः क्विप् स्यात् दीर्घश्च। पदांत विषये षत्वं च। परित्यज्य सर्वं व्रजतीति परिव्राट्। परिव्राजौ। प
रिव्राजः॥ विश्वस्य वसुराटोः। विश्वशब्दस्य दीर्घः स्यात् वसौ राट् शब्दे च परे। विश्वं वसु यस्य स विश्वावसुः। राडिति पदांतोपलक्षणार्थं
चत्वमविवक्षितं। विश्वाराट्। विश्वाराड्। विश्वराजौ। विश्वराजः। विश्वाराड्भ्यामित्यादि॥ स्कोः संयोगाद्योरंते च। पदांते झलि च प
रे यः संयोगस्तदाद्योः सकारककारयोर्लोपः स्यात्। भ्राट्। भ्राड्। सस्य श्चुत्वेन शः तस्य जश्त्वेन जः। भृज्जौ। भृज्जः। ऋत्विगित्यादिना क्
तावुपपदे यजेः क्विन्। क्विन्नंतत्वात् कुत्वं। ऋत्विक्। ऋत्विजौ। ऋत्विजः। रात्सस्येति नियमात् न संयोगांतस्य लोपः। चोः कुः। ऊर्क्। ऊर्ग्। ऊर्जौ। ऊ
र्जः॥ त्यदाद्यत्वं पररूपत्वं। तदोः सः सावनंत्ययोः। त्यदादीनां तकारदकारयोरनंत्ययोः सः स्यात् सौ। स्यः। त्यौ। त्ये। सः। तौ। ते। परमसः। पर
मत्यौ। परमत्ये। द्विपर्यंतानामेवा नेह। त्वं। न च अकारोच्चारणसामर्थ्यादिति वाच्यं। अतित्यमिति गौणे चरितार्थत्वात्। संज्ञायां गौणत्वे चात्
सत्वेन। त्यद्। त्यदौ। त्यदः। अतित्यद्। अतित्यदौ। अतित्यदः। यः। यौ। ये। एषः। एतौ। एते। अन्वादेशे। एनं। एनौ। एनान्। एनेन। एनयोः।

सि·कौ·सु· ङे प्रथमयोरम् । युष्मदस्मद्भ्यां परस्य ङे इत्यस्य प्रथमाद्वितीययोश्चामादेशः स्यात् । मपर्यन्तस्येत्यधिकृत्य ॥ त्वाहौ सौ । युष्मदस्मदोर्मपर्यन्त
२६ स्य त्व अह एतावादेशौ स्तः सौ परे ॥ शेषे लोपः । आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात् ॥ अतो गुणे ॥ अ
मि पूर्वः । त्वं । अहं । ननु त्वं स्त्री अहं स्त्री इत्यत्र त्व अम् अह अम् इति स्थिते । अमि पूर्वत्वं परमपि बाधित्वा अंतरंगत्वाट्टाप् प्राप्नोति ।
सत्यं । अलिंगे युष्मदस्मदी । तेन स्त्रीत्वाभावान्न टाप् । यद्वा शेषे इति सप्तमी स्थानिनोधिकरणत्वविवक्षया तेन मपर्यन्ताच्छेषस्य अद्शब्दस्य
लोपः । स च परोप्यंतरंगे ऽतो गुणे इति प्रवर्त्तते । तेन अदंतत्वाभावान्न टाप् । परमत्वं । अतित्वं । परमाहं । अत्यहं ॥ युवावौ द्विवचने ॥ द्व
योरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ ॥ प्रथमायाश्च द्विवचने भाषायां । इह युष्मदस्मदोराकारो नादेशः स्यात् । औङि
त्येव सूत्रं । भाषायां किं । युवं वस्त्राणि । युवां । आवां । मपर्यन्तस्य किं । साकच्कस्य मा भूत् । युवकां । आवकां । त्वयामयेत्यत्र त्वत्याम्य
तिमा भूत् । युवकाभ्यां । आवकाभ्यामिति च न सिध्येत ॥ यूयवयौ जसि । स्पष्टं । यूयं । वयं । परमयूयं । परमवयं । अतियूयं । अति
वयं । इह शेषे लोपोन्त्यलोप इति पक्षे जसः शी प्राप्तः । अंगकार्ये कृते पुनर्नांगकार्यमिति न भवति । ङे प्रथमयोरित्यत्र मकारांत
रं प्रश्लिष्य अम् मांत एवावशिष्यते । न तु विकार्य इति व्याख्यानाद्वा ॥ त्वमावेकवचने । एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तः । २६
द्वितीयायां च । युष्मदस्मदोराकारः स्यात् । त्वां । मां । युवां । आवां ॥ शसो न । नेत्यविभक्तिकं । युष्मदस्मद्भ्यां परस्य शसो नकारः स्यादमो

१७ अतिमाभ्यां ३ अतित्वाभिः। अतिमाभिः। अतितुभ्यं। अतिमह्यं। अतित्वभ्यं। अतिमभ्यं॥ ङसिभ्यसोः। अतित्वत्। अतिमत्। भ्यामिप्रा
ग्वत्। ङसिजसिवत्। अतितव। अतिमम। अतित्वयोः २ अतिमयोः २ अतित्वाकं। अतिमाकं। अतित्वयि। अतिमयि। अतित्वासु।
अतिमासु। युवामावां वातिक्रांत इति विग्रहे सुजस्ङेङस्सु प्राग्वत्। औअम्। औट्शस्। अतियुवां ३ अत्यावां ३ अतियुवान्। अत्यावा
न्। अतियुवया। अत्यावया। अतियुवाभ्यां ३ अत्यावाभ्यां ३ अतियुवाभिः। अत्यावाभिः। भ्यसि। अतियुवभ्यं। अत्यावभ्यं॥ ङसिभ्य
सोः। अतियुवत्। अत्यावत्। ओसि। अतियुवयोः २ अत्यावयोः २ अतियुवाकं। अत्यावाकं। अतियुवयि। अत्यावयि। अतियुवा
सु। अत्यावासु। युष्मानस्मान्वातिक्रांत इति विग्रहे सुजस्ङेङस्सु प्राग्वत्। औअम्। औट्शस्। अतियुष्मां ३ अत्यस्मां ३ अतियुष्मा
न्। अत्यस्मान्। अतियुष्मया। अत्यस्मया। अतियुष्माभ्यां। अत्यस्माभ्यां। अतियुष्माभिः। अत्यस्माभिः। भ्यसि। अतियुष्मभ्यम्।
अत्यस्मभ्यं। ङसिभ्यसोः। अतियुष्मत्। अत्यस्मत्। ओसि। अतियुष्मयोः २ अत्यस्मयोः २। अतियुष्माकं। अत्यस्माकं। अतियुष्म
यि। अत्यस्मयि। अतियुष्मासु। अत्यस्मासु॥ पदस्य। पदात्। अनुदात्तं सर्वमपादादावधिकृत्य॥ युष्मदस्मदोः षष्ठीचतुर्थीद्वि
तीयास्थयोर्वांनावौ। पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वांनावित्यादेशौ स्तस्तौ नुदात्तौ॥ बहुवचनस्य वस्नसौ २७
सौ। उक्तविधयोरनयोः षष्ठ्यादिबहुवचनांतयोर्वस्नसौ स्तः। वांनावोरपवादः॥ तेमयावेकवचनस्य। उक्तविधयोरनयोः षष्ठी

चतुर्थ्येकवचनांतयोस्ते मे एतौ स्तः॥ त्वामौ द्वितीयायाः॥ द्वितीयैकवचनांतयोस्त्वा मा एतौ स्तः। श्रीशस्त्वावतु मापीह दत्तात्ते मेपि शर्म सः। स्वामी
ते मेपि स हरिः पातु वामपि नौ विभुः। सुखं वांनौ ददात्वीशः पतिर्वामपि नौ हरिः। सोव्याद्वो नः शिवं वो नो दद्यात्सेव्योत्र वः स नः॥ पदात्प
रयोः किं। वाक्यादौ मा भूत्। त्वां पातु। मां पातु। अपादादौ किं। वेदैरशेषैः संवेद्योऽस्मान्कृष्णः सर्वदावतु॥ स्थग्रहणाच्छ्रूयमाणविभक्तिक
योरेव। नेह। इति युष्मत्पुत्रो ब्रवीति। इत्यस्मत्पुत्रो ब्रवीति। समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः। एकतिङ् वाक्यं। तेनेह न। ओ
दनं पच तव भविष्यति। इह तु स्यादेव। शालीनां ते ओदनं दास्यामीति। एते वांनावादय आदेशा अनन्वादेशे वा वक्तव्याः। अन्वादेशे तु
नित्यं स्युः। धाता ते भक्तोऽस्ति धाता तव भक्तोऽस्तीति वा। तस्मै ते नम इत्येव॥ नचवाहाहैवयुक्ते॥ चादिपंचकयोगे नैते आदेशाः स्युः। हरि
स्त्वां मां च रक्षतु। कथं त्वां मां वा न रक्षेदित्यादि। युक्तग्रहणात्साक्षाद्योगे यं निषेधः। परंपरासंबंधे तु आदेशः स्यादेव। हरो हरिश्च मे स्वामी।
पश्यार्थैश्चानालोचने। अचाक्षुषज्ञानार्थैर्धातुभिर्योगे एते आदेशा न स्युः। चेतसा त्वां समीक्षते। परापरासंबंधेप्ययं निषेधः॥ भक्तस्त
व रूपं ध्यायति। आलोचने तु भक्तस्त्वा पश्यति चक्षुषा॥ सपूर्वायाः प्रथमाया विभाषा। विद्यमानपूर्वात्प्रथमांतात्परयोरन्वादेशेप्येते
आदेशा वा स्युः। भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम्। त्वा मेति वा॥ सामंत्रितं। संबोधने या प्रथमा तदंतमामंत्रितसंज्ञं स्यात्॥ आ
मंत्रितं पूर्वमविद्यमानवत्। स्पष्टं। अग्ने तव। देवास्मान्पाहि। अग्ने नय। अग्न इंद्र वरुण। इह युष्मदस्मदोरादेशास्तिङंतनिघातआ

मंत्रितनिघातश्च न। सर्वदारक्षदेव नइत्यत्रतु देवेत्यस्याविद्यमानवद्भावे पिततः प्राचीनं रक्षेत्येतदाश्रित्यादेशः। एवं इमंमेगंगेयमुनेसरस्वतीति
मंत्रेयमुनइत्यादिभ्यः प्राचीनामंत्रितविद्यमानवद्भावेपिमेशब्दमेवाश्रित्यसर्वेषांनिघातः। नामंत्रितेसमानाधिकरणेसामान्यवचनं॥
विशेष्यंसमानाधिकरणेविशेषणेआमंत्रितेपरेनाविद्यमानवत्स्यात्। हरेदयालोनःपाहि। अग्नेतेजस्विन्। विभाषितंविशेषवचने।
अत्रभाष्यं। बहुवचनमिति। वक्ष्यामीति। बहुवचनांतंविशेष्यंसमानाधिकरणेविशेषणेआमंत्रितेपरेअविद्यमानवद्वा स्यात्।
यूयंप्रभावोदेवाःशरण्यायुष्मान्भजे। देवाःशरण्यावोभजे। इहान्वादेशेपिवैकल्पिकाआदेशाः। सुपात्। सुपाद्। सुपादौ। सुपादः। सुपादं।
सुपादौ॥ पादःपत्॥ पाच्छब्दांतंयदंगंभंतदवयवस्यपाच्छब्दस्यपदादेशःस्यात्। सुपदः। सुपदा। सुपाद्भ्यामित्यादि। अग्निंमथ्नाती
त्यग्निमत्। अग्निमद्। अग्निमथौ। अग्निमद्भ्यामित्यादि। ऋत्विगादिनाअंचेःसुप्युपपदेःक्विन्॥ अनिदितांहलउपधायाःक्ङिति।
हलंतानामनिंदितामंगानामुपधायानस्यलोपःस्यात्किति ङिति च। उणिदचामितिनुम्॥ संयोगांतस्यलोपः। नुमोनकारस्यक्विन्प्र
त्ययस्येतिकुत्वेनङकारः। प्राङ्। अनुस्वारपरसवर्णौ। प्राञ्चौ। प्राञ्चः। प्राञ्चं। प्राञ्चौ॥ अचः। लुप्तनकारस्यांचतेर्भस्याकारस्यलोपःस्या
त्। चौ। लुप्ताकारनकारेंऽचतौपरेपूर्वस्याणोदीर्घःस्यात्। प्राचः। प्राचा। प्राग्भ्यामित्यादि। प्रत्यङ्। प्रत्यञ्चौ। प्रत्यञ्चः। प्रत्य
ञ्चं। प्रत्यञ्चौ। अचइतिलोपस्यविषये अंतरंगोपियण्नप्रवर्तते। अकृतव्यूहाइतिपरिभाषया। प्रतीचः। प्रतीचेत्यादि। अमुम

पवादः॥ आदेःपरस्य। संयोगांतस्यलोपः। युष्मान्। अस्मान्॥ योचि। अनयोर्यकारादेशःस्यादनादेशेजादौविभक्तौ। त्वया। मया॥ युष्मद
स्मदोरनादेशे। अनयोराकारःस्यादनादेशेहलादौपरे। युवाभ्यां। आवाभ्यां। युष्माभिः। अस्माभिः॥ तुभ्यमह्यौङयि। अनयोर्मपर्यंतस्य
तुभ्यमह्यौस्तोङयि। अमादेशः॥ शेषेलोपः। तुभ्यं। मह्यं। परमतुभ्यं। परममह्यं। अतितुभ्यं। अतिमह्यं। युवाभ्यां। आवाभ्यां॥ भ्यसोभ्यम्॥
भ्यम्अभ्यम्वादेशःस्यात्। आद्यःशेषेलोपइत्यंत्यलोपपक्षएव। तत्रांगवृत्तिपरिभाषयाएत्वंन। अभ्यम्तुपक्षद्वयेपिसाधुः। युष्मभ्यं। अस्मभ्यं।
एकवचनस्यच। आभ्यांपंचम्येकवचनस्यअत्स्यात्। त्वत्। मत्। ङसेश्चेतिसूत्रवचं। युवाभ्यां। आवाभ्यां॥ पंचम्याअत्। आभ्यांपंचम्याभ्य
सोअत्स्यात्। युष्मत्। अस्मत्॥ तवममौङसि। अनयोर्मपर्यंतस्यतवममौस्तोङसि॥ युष्मदस्मभ्यांङसोश्। स्पष्टं। तव। मम। युवयोः। आ
वयोः॥ सामआकं। आभ्यांपरस्यामआकंस्यात्। भाविनःसुटोनिवृत्त्यर्थंससुट्कनिर्देशः। युष्माकं। अस्माकं। त्वयि। मयि। युवयोः। आ
वयोः। युष्मासु। अस्मासु। समस्यमानेद्व्येकत्ववाचिनीयुष्मदस्मदी। समासार्थोन्यसंख्यश्चेत्स्तोयुवावौत्वमावपि १ सुजसङेङस्सुपरतआ
देशाःस्युःसदैवते। त्वाहौयूयवयौतुभ्यमह्यौतवममावपि २ एतेपरत्वाद्बाधंतेयुवावौविषयेस्वके। त्वमावपिप्रबाधंतेपूर्वविप्रतिषेध
तः। ३॥ द्व्येकसंख्यःसमासार्थोबह्वर्थेयुष्मदस्मदी। तयोरद्व्येकतार्थत्वान्नयुवावौत्वमौनच ४ त्वांमांवाअतिक्रांतइतिविग्रहे। अतित्वं।
अत्यहं। अतित्वां। अतिमां। अतियूयं। अतिवयं। अतित्वां। अतिमां २ अतित्वान्। अतिमान्। अतित्वया। अतिमया। अतित्वाभ्यां ३

ञ्चतीतिविग्रहेअदस्अञ्चइतिस्थिते॥विष्वग्देवयोश्चटेरद्र्यंचतोवप्रत्यये।अनयोःसर्वनाम्नश्चटेरद्र्यादेशःस्यादप्रत्ययांतेंचतौपरे।
अदद्रिअंचुइतिस्थितेयण्॥अदसोसेर्दादुदोमः।अदसोऽसांतस्यदात्परस्यउदूतौस्तोदस्यमश्च।उइतिह्रस्वदीर्घयोःसमाहा
रद्वंद्वः॥आंतरतम्याद्ध्रस्वव्यंजनयोर्ह्रस्वोदीर्घस्यचदीर्घः।अमुमुयङ्।अमुमुयंचौ।अमुमुयञ्चः।अमुमुयंचं।अमुमुयंचौ।अमुमुईचः।
अमुमुईचा।अमुमुयग्भ्यामित्यादि।मुत्वस्यासिद्धत्वान्नयण्।अंत्यबाधेंत्यसदेशस्येतिपरिभाषामाश्रित्यपरस्यैवमुत्वंचवदंतोमन्ते
२ अदमुयङ्।अदःसेःसकारस्यस्थानेयस्यसोसौसितिव्याख्यानात्।त्यदाद्यत्वविषयएवमुत्वंनान्यत्रेतिपक्षेअदद्र्यङ्।उक्तंच।अदसोद्रेःपृथ
ङ्मुत्वंकेचिदिच्छंतिलत्ववत्।केचिदंत्यसदेशस्यनेत्येकेऽसोर्हिदृश्यते।विष्वग्देवयोःकिं।अश्वाची।अंचतौकिं।विष्वग्युक्।अप्रत्ययेकिं।
विष्वगंचनं।वप्रत्ययग्रहणंज्ञापयति।अन्यत्रधातुग्रहणेतदादिविधिरिति।तेनायस्कारः।उदङ्।उदंचौ।उदञ्चः॥उदईत्।उच्छब्दा
त्परस्यलुप्तनकारस्यांचतेर्भस्याकारस्यईत्स्यात्।उदीचः।उदीचा।उदग्भ्यामित्यादि॥समःसमि।वप्रत्ययांतेंचतौपरेसमःसमिरादेशः
स्यात्।सम्यङ्।सम्यंचौ।सम्यंचः।समीचः।समीचा॥सहस्यसध्रिः।सध्र्यङ्॥तिरसस्तिर्यलोपे।अलुप्ताकारेंचतौवप्रत्ययांतेचप
रेतिरसस्तिर्यादेशःस्यात्।तिर्यङ्।तिर्यंचौ।तिर्यंचः।तिर्यंचं।तिर्यंचौ।तिरश्चः।तिरश्चा।तिर्यग्भ्यामित्यादि॥नांचेःपूजा
यां।पूजार्थस्यांचतेरुपधायानस्यलोपोनस्यात्।अलुप्तनकारत्वान्नुम्।प्राङ्।प्रांचौ।प्रांचः।नलोपाभावादकारलोपोन।

प्राञ्चः। प्राञ्चा। प्राङ्भ्यामित्यादि। प्राङ्क्षु। प्राङ्षु। एवंपूजार्थे प्रत्यङ्ङुदङ्यः॥ क्रुंचेः क्रोदित्त्वात्स्त्रीभावयोः। अस्यऋत्विगादिना
नलोपाभावोपिनिपात्यते। क्रुङ्। क्रुञ्चौ। क्रुञ्चः। क्रुञ्चा। क्रुङ्भ्यामित्यादि॥ चोः कुः। पयोमुक्। पयोमुग्। पयोमुचौ। पयोमुचः।
व्रश्चेतिषत्वं। स्कोरितिसलोपः। ओव्रश्चूछेदने। जश्त्वचर्त्वे। रुक्वृट्। रुक्वृड्। रुव्रश्चौ। रुव्रश्चः। रुवृड्भ्यां। सुवृट्सु। महत्पूजायां।
वर्तमानेपृषन्महद्बृहज्जगच्छतृवच्च। एतेनिपात्यंते शतृवच्चैषांकार्यंस्यात्। उगित्वान्नुम्। सांतमहतइतिदीर्घः। मह्यतेपूज्यतइति
महान्। महांतौ। महांतः। हे महन्। महता। महद्भ्यामित्यादि॥ अत्वसंतस्यचाधातोः। अत्वंतस्योपधायादीर्घःस्याद्धातुभिन्न
संतस्यचासंबुद्धौसौपरे। परंनित्यंचनुमंबाधित्वावचनसामर्थ्याददोदीर्घः। ततोनुम्। धीमान्। धीमंतौ। धीमंतः। हेधीमन्। शसादौ
महद्वत्। धातोरप्यत्वंतस्यदीर्घः। गोमंतमिच्छतिगोमानिवाचरतिवाक्यजंताद्वाचारक्विबंताद्वाकर्तरिक्विप्। उगिदचामितिसू
त्रेऽच्ग्रहणंनियमार्थं। धातोश्चेदुगित्कार्यंतर्ह्यंचतेरेवेति। तेनस्रत् ध्वत् इत्यादौन। अधातोरितितुअधातुभूतपूर्वस्यापिनुमं
र्थं। गोमान्। गोमंतौ। गोमंतइत्यादि। भातेर्डवतुः। भवान्। भवंतौ। भवंतः। शत्रंतस्यतुत्वंनत्वाभावान्नदीर्घः। भवतीतिभवन्॥ उभेअभ्य
स्तं। षाष्ठद्वित्वप्रकरणेयेद्वेविहितेतेउभेसमुदितेअभ्यस्तसंज्ञेस्तः॥ नाभ्यस्ताच्छतुः। अभ्यस्तात्परस्यशतुर्नुम्नस्यात्। ददत्। ३९
ददतौ। ददतः॥ जक्षित्यादयःषट्। षड्धातवोन्येजक्षितिश्चससमएतेअभ्यस्तसंज्ञाःस्युः। जक्षत्। जक्षतौ। जक्षतः। एवंजाग्रत्।

र्वोरुपधायादीर्घइकः।रेफवांतस्यधातोरुपधायाइकोदीर्घःस्यात्पदांते।पिपठीः।पिपठिषौ।पिपठिषः।पिपठीर्भ्यां।वाशरीतिवाविसर्जनीयः।।
१० नुम्विसर्जनीयशर्व्यवायेपि।एतैःप्रत्येकंव्यवधानेपीण्कुभ्यांपरस्यसस्यमूर्धन्यादेशःस्यात्।ष्टुत्वेनपूर्वस्यषत्वं।पिपठीष्षु।पिपठीःषु।
प्रत्येकमितिव्याख्यानादनेकव्यवधानेषत्वंन।निंस्स्व।निंस्से।नुम्ग्रहणंनुम्स्थानिकानुस्वारोपलक्षणार्थंव्याख्यातं।तेनहन्।सुहि
न्सु।पुंसु।अतएवनशर्ग्रहणेनगतार्थता।रात्सस्येतिसलोपेविसर्गः।चिकीः।चिकीर्षौ।चिकीर्षः।रोःसुपीतिनियमान्नविसर्गः।चिकी
र्षु।दमेर्डोस्।डित्वसामर्थ्याट्टिलोपः।रुत्वविसर्गौ।दोः।दोषौ।दोषः।पद्दन्नितिवादोषन्।दोष्णः।दोषः।दोष्णा।दोषा।विशप्रवेश
ने।सनंताक्विप्।षत्वस्यासिद्धत्वात्संयोगांतस्यलोपः।व्रश्चेतिषः।जश्त्वचर्त्वे।विविट्।विविड्।विविक्षौ।विविक्षः।स्कोरितिकलोपः।तट्।
तड्।तक्षौ।तक्षः।गोरट्।गोरड्।गोरक्षौ।गोरक्षः।तक्षिरक्षिभ्यांण्यंताभ्यांक्विपितुस्कोरितिनप्रवर्तते।णिलोपस्यस्थानिवद्भावात्।पूर्व
त्रासिद्धीयेनस्थानिवदितितुतस्यदोषःसंयोगादिलोपलत्वणत्वेष्वितिनिषिद्धं।तस्मात्संयोगांतलोपएव।तक्।तग्।गोरक्।गोरग्।स्को
रितिकलोपंप्रतिकुत्वस्यासिद्धत्वात्संयोगांतलोपः।पिपिक्।पिपग्।पिपक्षौ।पिपक्षः।एवंविवक्।दिधक्।पिसगतौ।सुष्ठुपेसतीतिसुपीः।
सुपिसौ।सुपिसः।सुपिसा।सुपीर्भ्यां।सुपीष्षु।सुपीःषु।एवंसुतूः।तुसखंडने।विद्वान्।विद्वांसौ।विद्वांसः।हेविद्वन्।विद्वांसं।विद्वां
सौ।।वसोःसंप्रसारणं।वस्वंतस्यभस्यसंप्रसारणंस्यात्।पूर्वरूपत्वं।षत्वं।विदुषः।वसुस्रंस्वितिदत्वं।विद्वद्भ्यामित्यादि।सेदिवान्। ३०

सेदिवांसौ।सेदिवांसः।सेदिवांसं।सेदिवांसौ।अंतरंगोपीडागमःसंप्रसारणविषयेनप्रवर्तते।अकृतव्यूहाइतिपरिभाषया।सेदुषः।से
दुषा।सेदिवद्भ्यामित्यादि।सांतमहतइत्यत्रसांतसंयोगोपिप्रातिपदिकस्यैवगृह्यते।नतुधातोः।महच्छब्दसाहचर्यात्।सुष्ठुहिनस्तीतिसु
हिन्।सुहिंसौ।सुहिंसः।सुहिन्भ्यां।सुहिन्सु।ध्वत्।ध्वसौ।ध्वसः।ध्वद्भ्यां।एवंस्रत्।।पुंसोसुङ्।सर्वनामस्थानेविवक्षितेपुंसोसुङ्
स्यात्।उकारउच्चारणार्थः।वक्ष्येपुंसीत्यत्रउगितश्चेतिङीबर्थंकृतेनपूञोडुमसुन्नितिप्रत्ययस्यागित्वेनैवनुम्सिद्धः।पुमान्।पुमांसौ।
पुमांसः।हेपुमन्।पुमांसं।पुमांसौ।पुंसः।पुंसा।पुंभ्यां।पुंभिः।पुंसु।ऋदुशनस्इत्यनङ्।उशना।उशनसौ।उशनसः।अस्यसंबुद्धौवा
नङ्नलोपश्चवावाच्यः।हेउशनन्।हेउशन।हेउशनः।उशनोभ्यामित्यादि।अनेहा।अनेहसौ।अनेहसः।हेअनेहः।वेधाः।वेधसौ।
वेधसः।हेवेधः।वेधोभ्यामित्यादि।अधातोरित्युक्तेर्नदीर्घः।सुष्ठुवस्तेवेस्।सुवसौ।पिंडंग्रसतेइतिपिंडग्रः।पिंडग्लः।ग्रसुग्लसुअदने।।अ
दसऔसुलोपश्च।अदसऔकारोंतादेशःस्यात्सौपरे।सुलोपश्च।तदोःसःसावितिदस्यसः।असौ।औत्वप्रतिषेधःसाकच्कस्यवा
वक्तव्यः।सादुत्वंच।प्रतिषेधसन्नियोगशिष्टमुत्वंतदभावेनप्रवर्तते।असकौ।असुकः।त्यदाद्यत्वं।पररूपं।वृद्धिः।अदसोसेरित्युत्वम
त्वे।अमू।जसःशी।आद्गुणः।एतईद्बहुवचने।अदसोदात्परस्यैतईत्स्याद्दस्यचमोबह्वर्थोक्तौ।अमी।पूर्वत्रासिद्धमितिविभक्तिकार्यंप्रा
क्पश्चादुत्वमत्वे।अमुं।अमू।अमून्।मुत्वेकृतेघिसंज्ञायांनाभावः।।नमुने।नाभावेकर्तव्येकृतेचमुभावोनासिद्धः।अमुना।अमूभ्यां।

सिं॰कौ॰स॰ अमीभिः। अमुष्मै। अमूभ्यां। अमीभ्यः। अमुष्मात्। अमुष्य। अमुयोः। अमीषां। अमुष्मिन्। अमुयोः। अमीषु॥ इति हलंताः पुंल्लिंगाः॥
३१ नहो धः। नहो हस्य धः स्याज्झलि पदांते च। उपानत्। उपानद्। उपानहौ। उपानद्भ्यां। उपानत्सु। उत्पूर्वात्ष्णिह प्रीतावित्यस्मादृ
त्विगादिना क्विन् निपातनात्तल्लोपषत्वे। क्विन्नंतत्वात्कुत्वेन हस्य घः। जश्त्वचर्त्वे। उष्णिक्। उष्णिग्। उष्णिहौ। उष्णिहः। उष्णिग्भ्यां। उष्णिक्षु।
द्यौः। दिवौ। दिवः। द्युभ्यां। द्युषु। गीः। गिरौ। गिरः। एवं पूः। चतुरश्चतस्रादेशाच्चतस्रः। चतसृणां। किमः कादेशे टाप्। का। के। काः। स
र्वावत्॥ यः सौ। इदमो दस्य यः स्यात्सौ॥ इदमो मः। इयं। त्यदाद्यत्वं। टाप्। दश्चेति मः। इमे। इमाः। इमां। इमे। इमाः। अनया। हलि लोपः।
आभ्यां। आभिः। अस्यै। अस्याः २ अनयोः। आसां। अस्यां। अनयोः। आसु। अन्वादेशे तु एनां। एने। एनाः। एनया। एनयोः। ऋ
त्विगादिना स्रजेः क्विन्। अमागमश्च निपातितः। स्रक्। स्रग्। स्रजौ। स्रजः। स्रग्भ्यां। स्रक्षु। त्यदाद्यत्वं। टाप्। स्या। त्ये। त्याः। एवं तद्
यद्। एतद्। वाक्। वाग्। वाचौ। वाचः। वाग्भ्यां। वाक्षु। अप्शब्दो नित्यं बहुवचनांतः। अप्तृन्निति दीर्घः। आपः। अपः। अपो भि।
अपस्तकारः स्याद्भादौ प्रत्यये परे। अद्भिः। अद्भ्यः २ अपां। अप्सु। दिक्। दिग्। दिशौ। दिशः। दिग्भ्यां। दिक्षु। त्यदादिष्विति दृशेः
क्विन्विधानादन्यत्रापि कुत्वं। दृक्। दृग्। दृशौ। दृशः। त्विट्। त्विड्। त्विषौ। त्विषः। त्विड्भ्यां। त्विट्सु त्विट्त्सु। सह जुषत इति सजूः। ३१
सजुषौ। सजूर्भ्यां। सजूःषु। सजूष्षु। रुत्वं। आशीः। आशिषौ। आशीर्भ्यां। असौ। त्यदाद्यत्वं। टाप्॥ औङः शी। उत्वमत्वे। अमू। अमूः।

एवं दरिद्रत्। शासत्। चकासत्। दीधीवेव्योर्ङित्त्वेपि छांदसत्वाद्व्यत्ययेन परस्मैपदं। दीध्यत्। वेव्यत्। गुप्। गुब्। गुपौ। गुपः। गुब्भ्यामित्या
दि॥ त्यदादिषु दृशोनालोचने कञ्च। त्यदादिषूपपदेष्वज्ञानार्थाद्दृशेर्धातोः कञ् स्याच्चात्क्विन्॥ आ सर्वनाम्नः। सर्वनाम्न आकारोंतादेशः
स्याद्दृग्दृशवतुषु। कुत्वस्यासिद्धत्वाद्व्रश्चेति षः। तस्य जश्त्वेन डः। तस्य कुत्वेन गः। तस्य चर्त्वेन पक्षे कः। तादृक्। तादृग्। तादृशौ। तादृ
शः। षत्वापवादत्वात्कुत्वेन ख इति कैयटहरदत्तादिमते तु चर्त्वाभावपक्षे ख एव श्रूयते न तु गः। जश्त्वं प्रति कुत्वस्यासिद्धत्वात्। व्रश्चादि
भ्यायरीति निर्देशान्नासिद्धत्वमिति वा बोध्यं। व्रश्चेति षत्वं जश्त्वचर्त्वे। विट्। विड्। विशौ। विशः॥ नशेर्वा। नशेः कवर्गोंतादेशो वा स्यात्पदांते।
नक्। नग्। नट्। नड्। नशौ। नशः। नग्भ्यां। नड्भ्यां॥ स्पृशोनुदके क्विन्। अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात्। घृतस्पृक्। घृतस्पृशौ।
घृतस्पृशः। क्विन्प्रत्ययो यस्मादिति बहुव्रीह्याश्रयणात्क्विप्यपि कुत्वं। स्पृक्। स्पृग्। षडगकाः प्राग्वत्। ञिधृषा प्रागल्भ्ये। अस्मा
दृत्विगित्यादिना क्विन्। द्वित्वमंतोदात्तत्वं च निपात्यते। कुत्वात्पूर्वं जश्त्वेन डः। गः। कः। धृष्णोतीति दधृक्। दधृषौ। दधृषः। दधृग्भ्या
मित्यादि। रत्नानि मुष्णातीति रत्नमुट्। रत्नमुड्। रत्नमुषौ। रत्नमुड्भ्यां॥ षड्भ्यो लुक्। षट्। षड्। षड्भिः। षड्भ्यः। षट्चतुर्भ्यश्चेति नु
ट्। अनामिति पर्युदासान्न ष्टुत्वनिषेधः। यरोनुनासिक इति विकल्पं बाधित्वा प्रत्यये नित्यवचनान्नित्यमनुनासिकः। षण्णां। षट्
सु। षट्त्सु। तदंतविधिः परमषट्। परमषण्णां। गौणत्वे तु प्रियषषः। प्रियषषां। ससजुषो रुरिति रुत्वं। रुत्वं प्रति षत्वस्यासिद्धत्वात्।

अमुं। अमू। अमूः। अमुया। अमूभ्यां। अमूभिः। अमुष्यै। अमुष्याः। अमुयोः। अमूषां। अमुष्यां। अमुयोः। अमूषु॥ इति हलंतास्त्रीलिं
गाः॥ स्वमोर्लुक्। दत्वं। स्वनडुत्। स्वनडुद्। स्वनडुही। चतुरनडुहोरित्याम्। स्वनड्वांहि। पुनस्तद्वत्। शेषंपुंवत्॥ दिवउत्॥ विमलद्यौः
यस्मिन् विमलद्यु। अहः। अंतर्वर्तिनीं विभक्तिमाश्रित्य पूर्वपदस्यैवोत्तरखंडस्यापि संज्ञायां प्राप्तायां उत्तरपदत्वे चापदादिविधौप्र
तिषेधइतिप्रत्ययलक्षणं न। विमलदिवी। विमलदिवि। अपदादिविधौ किं। दधिसेचौ। इहषत्वनिषेधे कर्तव्ये पदत्वमस्त्येव॥ कु
र्वतुन। वाः। वारी। वारि। अझलंतत्वान्ननुम्। चत्वारि। नलुमतेतिकादेशोन। किं। के। कानि। इदं। इमे। इमानि। अन्वादेशेनपुं
सके एनद्वक्तव्यः। एनत्। एने। एनानि। एनेन। एनयोः। ब्रह्म। ब्रह्मणी। ब्रह्माणि। हे ब्रह्मन्॥ रोऽसुपि। अहर्भाति॥ विभाषाङिश्योः।
अह्नी। अहनी। अहानि॥ अहन्। अहन्नित्यस्य रुः स्यात्पदांते। अहोभ्यां। अहोभिः। इह अहः अहोभ्यामित्यादौ रत्वरुत्वयोरसिद्ध
त्वान्नलोपेप्राप्ते। अहन्नित्यावर्त्यनलोपाभावं निपात्य हितीयेन रुर्विधेयः। तदंतस्यापि रुत्वरत्वे। दीर्घाण्यहानि यस्मिन्स दीर्घाहा निदाघः। इह हल्
ङ्यादिलोपे प्रत्ययलक्षणे नारूपीति निषेधाद्रुत्वाभावे रुः। तस्यासिद्धत्वान्नांतलक्षण उपधायादीर्घः। संबुद्धौ तु। हे दीर्घाहो निदाघः। दीर्घाहानौ।
दीर्घाहानः। दंडि। दंडिनी। दंडीनि। स्रग्वि। स्रग्विणी। स्रग्वीणि। वाग्मि। वाग्मिनी। वाग्मीनि। बहुवृत्रहा बहुवृत्रघ्नी। बहुवृत्रहणी। ब
हुवृत्रहाणि। बहुपूषाणि। बह्वर्यमाणि। असृजः पदांते कुत्वं। सृजेः क्विनो विधानात्। विश्वसृजादीन। सृजिदृशोरिति सूत्रे रज्जुसृड्भ्या

सि·को·स
३२

मितिभाष्यप्रयोगात्। षट्। भ्रस्जादिसूत्रे सजियज्योः पदान्ते षत्वं कुत्वापवादः। स्रग्गृत्विक्शब्दयोस्तु निपातनादेव कुत्वं। असृक्श
ब्दस्तु अस्यतेरौणादिके ऋज्प्रत्यये बोध्यः। असृक्। असृजी। असृंजि। पद्दन्निति वा असन्। असानि। असृजा। अस्ना। असृग्भ्यां।
असभ्यामित्यादि। ऊर्क्। रात्सस्येति नियमान्न संयोगान्तलोपेन ककारलोपः। ऊर्ग्। ऊर्जी। ऊर्जि। नरजानां संयोगः। बहूर्जि नुम्प्र
तिषेधः। अन्त्यात्पूर्वो वा नुम्। बहूर्जि। बहूर्जि वा कुलानि। त्यद्। त्यत्। त्ये। त्यानि। तद्। ते। तानि। यद्। ये। यानि। एतद्। एते। एतानि।
अन्वादेशे तु। एनत्। बभिद्यतेः क्विप्। बेभित्। बेभिद्। बेभिदी।। चो। अल्लोपस्य स्थानिवत्त्वाद् झलन्तत्वान्न नुम्। अजन्तलक्षणस्तु
नुम्। स्वविधौ स्थानिवत्त्वाभावात्। बेभिदि। ब्राह्मणकुलानि।। चेच्छिदि। गवाक्शब्दस्य रूपाणि। क्लीबे र्चागतिभेदतः। असंध्यवङ्
पूर्वरूपैर्नवाधिकशतं मतं। स्वमसुप्सु नव षड्भादौ षट्के स्युस्त्रीणि जश्शसोः। चत्वारि शेषे दशके रूपाणीत्यादि भावय। तथाहि। गामञ्च
तीति विग्रहे ऋत्विगादिना क्विन्। गतौ न लोपः।। अवङ् स्फोटायनस्येत्यवङ्। गवाक्। गवाग्। सर्वत्र विभाषेति प्रकृतिभावे। गो
अक्। गोअग्। पूर्वरूपे। गोक्। गोग्। पूजायां नस्य कुत्वेन ङः। गवाङ्। गोअङ्। गोङ्। अभ्यर्च्येते तान्येव नव। औङः शी। भत्वाद
चइत्यल्लोपः। गोची। पूजायां तु गवाञ्ची। गोअञ्ची। गोञ्ची। स्वमसुप्सु प्रत्येकं त्रयाणां नवरूपाणि मिलित्वा सप्तविंशतिः। २७ रूपाणि
।। जश्शसोः शिः। शेः सर्वनामस्थानत्वान्नुम्। गवांचि। गोअंचि। गोञ्चि। गतिपूजनयोस्त्रीण्येव। गोचा। गवांचा। गोअञ्चा। गोञ्चा। ३२

पयस्स्थानिवत्त्वाज्झलंतलक्षणोनुम्न। स्वरविधौस्थानिवत्त्वाभावादजंतलक्षणोपिन। पिपठिषि। पिपठीर्भ्यामित्यादि। पय॥
३३ पयसी। पयांसि। पयसा। पयोभ्यामित्यादि। सुपुम्। सुपुंसी। सुपुमांसि। अदः। विभक्तिकार्यं। उत्वमत्वे। अमू। अमूनि। शेषंपुंवत्।
॥ इतिहलंतानपुंसकलिंगाः॥ स्वरादिनिपातमव्ययम्। स्वरादयोनिपाताश्चाव्ययसंज्ञाःस्युः। स्वर्। अंतर। प्रातर्। पुनर्।
सनुतर। उच्चैस्। नीचैस्। शनैस्। ऋधक्। ऋते। युगपत्। आरात्। पृथक्। ह्यस्। श्वस्। दिवा। रात्रौ। सायं। चिरं। मनाक्। ईषत्।
जोषं। तूष्णीं। बहिस्। अवस्। समया। निकषा। स्वयं। वृथा। नक्तं। नञ्। हेतौ। इद्धा। अद्धा। सामि। वत्। ब्राह्मणवत्। क्षत्रियवत्॥
सना। सनत्। सनात्। उपधा। तिरस्। अंतरा। अंतरेण। ज्योक्। कं। शं। सहसा। विना। नाना। स्वस्ति। स्वधा। अलं। वषट्। श्रौषट्।
वौषट्। अन्यत्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मृषा। मिथ्या। मुधा। पुरा। मिथो। मिथस्। प्रायस्। मुहुस्। प्रवाहुकं।
प्रवाहिका। आर्यहलं। आभीक्ष्णं। साकं। सार्धं। नमस्। हिरुक्। धिक्। अथ। अम्। आम्। प्रताम्। प्रशान्। प्रतान्। मा। माङ्॥
आकृतिगणोयं॥ च। वा। ह। अह। एव। एवं। नूनं। शश्वत्। युगपत्। भूयस्। कूपत्। सूपत्। कुवित्। नेत्। चेत्। चण्। कच्चित्। य
त्र। नह। हंत। माकिः। माकीं। नकिः। आकीं। माङ्। नञ्। यावत्। तावत्। त्वै। द्वै। न्वै। रै। श्रौषट्। वौषट्। स्वाहा। स्वधा। वषट्। तुम्। ३३
तथाहि। खलु। किल। अथ। सुष्ठु। स्म। अ दह॥ उपसर्गविभक्तिस्वरप्रतिरूपकाश्च। अवदत्तं। अहंयुः। अस्तिक्षीरा। अ। आ। इ। ई।

उ। ऊ। ऐ। ऐ। ओ। औ। पशु। शुकं। यथा। कथा च। पाट्। प्याट्। अंग। है। हे। भोः। अये। द्य। विषु। एकपदे। युत्। आतः। चादिरप्याकृतिग
णः॥ तद्धितश्चासर्वविभक्तिः। यस्मात्सर्वाविभक्तिर्नोत्पद्यते सतद्धितांतोप्यव्ययंस्यात्। परिगणनंकर्तव्यं। तसिलादयःप्रा
क्पाशपः। शस्प्रभृतयःप्राक्समासांतेभ्यः। अम्। आम्। कृत्वोर्थाः। तसिवती। नानाञाविति। तेनहन्। पचतिकल्पं। प
चतिरूपं॥ कृन्मेजंतः। कृद्योमांतएजंतश्चतदंतमव्ययंस्यात्। स्मारंस्मारं। जीवसे। पिबध्यै॥ क्त्वातोसुन्कसुनः। एदंतमव्य
यंस्यात्। कृत्वा। उदेतोः। विसृपः॥ अव्ययीभावश्च। अधिहरि॥ अव्ययादाप्सुपः। अव्ययाद्विहितस्यापःसुपश्चलुक्स्यात्।
तत्रशालायां। अथ। विहितविशेषणान्नेह। अत्सकच्चैसो। अव्ययसंज्ञायांयद्यपितदंतविधिरस्तितथापिनगौणे। आप्
ग्रहणंव्यर्थमलिंगत्वात्। सदृशंत्रिषुलिंगेषुसर्वासुचविभक्तिषु। वचनेषुचसर्वेषुयन्नव्येतितदव्ययं। इतिश्रुतिः। लिंगका
रकसंख्याभावपरा। वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः। पैवैवहलंतानांयथावाचानिशादिशा। अवगाहः। वगाहः॥
अपिधानं। पिधानं॥ इत्यव्ययानि॥ स्त्रियां। अधिकारोयं। समर्थनामितियावत्॥ अजाद्यतष्टाप्। अजादीनाम
कारांतस्यचवाच्यंयत्स्त्रीत्वंतत्रद्योत्येटाप्स्यात्। अजाद्युक्तिर्ङीषोङीपश्चबाधनाय। अजा। अतः। खट्वा। अजादिभिःस्त्री
त्वस्यविशेषणान्नेह। पंचाजी। अत्राहिसमासार्थसमाहारनिष्ठंस्त्रीत्वं। अजा। एडका। अश्वा। चटका। मूषिका। एणुजाति

लक्षणो ङीषु प्राप्तः। बाला। वत्सा। होडा। मंदा। विलाता। एषु वयसि प्रथम इति ङीषु प्राप्तः॥ संभस्त्राजिनशणपिंडेभ्यः फलात्।
संफला। भस्त्रफला। अजापोरिति ह्रस्वः। सदच्काण्डप्रांतशतैकेभ्यः पुष्पात्। सत्पुष्पा। प्राक्पुष्पा। प्रत्यक्पुष्पा॥ शूद्रा चाम
हत्पूर्वा जातिः। पुंयोगे तु शूद्री। अमहत्पूर्वा किं। महाशूद्री। क्रुंचा। उष्णिहा। देवविशा। ज्येष्ठा कनिष्ठा। मध्यमेति पुंयोगेपि। को
किला जाता वपि। एतेषां गणपठितत्वाट्टाप्। मूलान्नञः। अमूला॥ ऋन्नेभ्यो ङीप्। कर्त्री। दंडिनी॥ उगितश्च। उगिदंतात्प्राति
पदिकात्स्त्रियां ङीप्स्यात्। भवंती। पचंती। शप्श्यनोर्नित्यं नुम्। उगिदचामिति सूत्रे अज्ग्रहणेन धातोश्चेदुगित्कार्यं तर्ह्यंचतेरे
वेति नियम्यते। तेन हन्। उखास्रत्। पर्णध्वत्। क्विप्। अनिदितामिति लोपः। अंचतेस्तु स्यादेव। प्राची। प्रतीची॥ वनोरच।
वन्नंतात्तदंताच्च प्रातिपदिकान्स्त्रियां ङीप्स्यात्रश्चांतादेशः। वानिति ङ्वनिप्क्वनिप्वनिपां सामान्यग्रहणं। प्रत्ययग्रहणेय
स्मात्स विहितस्तदादेस्तदंतस्य ग्रहणं। तेन प्रातिपदिकविशेषणात्तदंतांतमपि लभ्यते। सुत्वानमतिक्रांता अतिसुत्वरी॥
अतिधीवरी। शर्वरी। वनो न हश इति वक्तव्यं। हशंताद्धातोर्विहितो यो वन् तदंतात्तदंताच्च प्रातिपदिकान्ङीप्रश्चनेत्यर्थः॥ ओ
णृ अपनयने। वनिप्। विड्वनोरनुनासिकस्यात्। अवावा ब्राह्मणी। राजयुध्वा। बहुधीवा। बहुधीवरी। बहुधीवा। पक्षे डाब्वक्ष्यते॥ ३४
पादोन्यतरस्यां। पाद्भ्यः कृतसमासांतः तदंतात्प्रातिपदिकान्ङीब्वा स्यात्। द्विपदी। द्विपात्॥ टाबृचि। ऋचि वाच्यायां पादंतात्

गवाग्भ्यां। गोअग्भ्यां। गोग्भ्यां। गवाङ्भ्यां। गोअङ्भ्यां। गोङ्भ्यां। इत्यादि। सुपि तु ङांतानां पक्षे ङ्णोः कुक्टुगिति कुक्। गवाङ्क्षु। गोअङ्
क्षु। गोङ्क्षु। नचेह चयो द्वितीया इति पक्षे ककारस्य खकारेण पक्षमाधिक्यं शक्यं। चर्त्वस्यासिद्धत्वात्। कुक्पक्षे तु तस्यासिद्धत्वाज्झश्चाभा
वे पक्षे द्वितीयादेशात् त्रीणि रूपाणि वर्धंत एव। एवं च द्वादशाधिकशतं ११२ भवंतीत्यर्थः। उक्तमेषां द्विर्वचनानुनासिकविकल्पनात्
रूपाण्यष्टाक्षिभूतानि ५२७ भवंतीति मनीषिभिः। तिर्यक्। तिरश्ची। तिर्यंचि। यकृत्। यकृती। यकृंति। पद्दन्निति वा यकन्। यकानि।
यक्ना। यकृता। शकृत्। शकृती। शकृंति। शकानि। शक्ना। शकृता। ददत्। ददती॥ वा नपुंसकस्य। अभ्यस्तात्परो यः शतुस्तदंत
स्य क्लीबस्य नुम्वा स्यात्सर्वनामस्थाने परे। ददंति। ददति। तुदत्॥ आच्छीनद्योर्नुम्। अवर्णांतादंगात्परो यः शतुरवयवस्तदंत
स्यांगस्य नुम्वा स्याच्छीनद्योः परतः। तुदंती। तुदती। तुदंति। भात्। भांती। भाती। भांति। पचत्॥ शप्श्यनोर्नित्यं। शप्श्यनो
शात्परो यः शतुरवयवस्तदंतस्य नित्यं नुम्वा स्याच्छीनद्योः परतः। पचंती। पचंति। दीव्यत्। दीव्यंती। दीव्यंति। स्वप्। स्वपी॥ नित्या
त्परादपि नुमः। प्राक्। अप्तृन्निति दीर्घः। प्रतिपदोक्तत्वात्। स्वांपि। निरवकाशं प्रतिपदोक्तमिति पक्षे नुमप्रकृते तद्विरहात्तु
मेव। स्वांपि। स्वपा॥ अपो भि। स्वद्भ्यां। स्वद्भिः। अर्तिपृवपि इत्यादिना धनेरुस्। धनुः। धनुषी। सांतेति दीर्घः। नुम्विसर्जनी
येति षत्वं। धनूंषि। धनुषा। धनुर्भ्यां। एवं चक्षुर्हविरादयः। पिपठिषतेः क्विप्। वोरिति दीर्घः। पिपठीः। पिपठिषी। अल्ली

दाप्स्यात्।द्विपदाऋक्।एकपदा॥नषट्स्वस्रादिभ्यः।पंच।पंचतस्रः।पंचेत्यत्रनलोपेकृतेपिष्णांताषडितिषट्संज्ञांप्रतिनलोपःसु
प्स्वरेतिनलोपस्यासिद्धत्वान्नषट्स्वस्रादिभ्यइतिनटाप्॥मनः।मन्नंतान्नङीप्।सीमा।सीमानौ॥अनोबहुव्रीहेः।अन्नंताद्बहु
व्रीहेर्नङीप्।बहुयज्वा।बहुयज्वानौ॥डाबुभाभ्यामन्यतरस्यां।सूत्रद्वयोपात्ताभ्यांडाब्वास्यात्।सीमा।सीमानौ।सीमे।दामा।दा
मानौ।दामे।नपुंसिदामेत्यमरः।बहुयज्वा।बहुयज्वानौ।बहुयज्वे॥अनउपधालोपिनोन्यतरस्यां।अन्नंताद्बहुव्रीहेरुपधा
लोपिनोङीब्वास्यात्।पक्षेडाब्निषेधौ।बहुराज्ञी।बहुराज्ञ्यौ॥बहुराजे।बहुराजानौ॥प्रत्ययस्थात्कात्पूर्वस्यातइदाप्यसुपः।प्रत्य
यस्थात्कात्पूर्वस्याकारस्येकारःस्याद्टापिपरेसआप्सुपःपरोनचेत्।सर्पिका।कारिका।अतःकिं।नौका।प्रत्ययस्थात्किं।शक्नोती
तिशका।असुपःकिं।बहुपरिव्राजकानगरी।कात्किं।नंदना।नंदिघ्नेतिहेल्युट्।युवोरनादेशः।पूर्वस्यकिं।परस्यमाभूत्।कटु
का।तपरःकिं।राका।आपिकिं।कारकः।मामकनरकयोरुपसंख्यानं।मामिका।नरान्कायतीतिनरिका।त्यक्त्यपोश्च।दाक्षिणात्य
का।इहत्यिका॥नयासयोः।यत्तदोरस्येत्वंस्यात्।यका।सका।यकां।सतकां।त्यकनश्चनिषेधः।अधित्यका।उपत्यका।आशि
षिवुनश्च।जीवका।भावका।उत्तरपदलोपेन।देवदत्तिका।देयका।क्षिपकादीनांच।क्षिपका।ध्रुवका।कन्यका।चटका।ता
रकाज्योतिषि।अन्यत्रतारिका।वर्णकातांतवे।अन्यत्रवर्णिका।वर्तिकाशकुनौप्राचां।उदीचांतुवर्तिका।अष्टकापितृदैवत्ये॥

अष्टिकान्या। सूतका। पुत्रिका। वृंदारकाणां चेति वक्तव्यं। इह वा अ इति छेदः। कात्पूर्वस्या अकारादेशो वेत्यर्थः। तेन पुत्रिकाद्या बेद्धीन
इवर्णस्य पक्षे अकारः। अन्यत्रेत्वबाधनार्थं मकारस्येव पक्षे अकारः। सूतका। सूतिकेत्यादि॥ उदीचामातः स्थाने यकपूर्वायाः। यकपू
र्वस्य स्त्रीप्रत्ययस्य आतः स्थाने योऽकारस्तस्य कात्पूर्वस्येद्वा स्यादापि परे। केण इति ह्रस्वः। आर्यका। आर्यिका। चटकका। चटकि
का। आतः किं। साकाङ्क्षेभ्य सांकाश्यिका। यकेति किं। अश्विका। स्त्रीप्रत्ययः किं। शुभंयातीति शुभंयाः। अज्ञाता शुभंयाः। शुभं
यिका। धात्वंतयकोऽस्त्रीनित्यं। सुनयिका। सूपाकिका॥ भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि। स्वेत्यंतं लुप्तषष्ठीकं पदं। एषामत इद्वा
स्यात्। तदंतविधिनैव सिद्धे नञ्पूर्वाणामपीति स्पष्टार्थं। भस्त्राग्रहणमुपसर्जनार्थं। अन्यत्तूत्तरसूत्रेण सिद्धं। एषाद्वा एतयोस्तु सपू
र्वयोर्नेत्वं। अंतर्वर्तिनीं विभक्तिमाश्रित्य सुप इति प्रतिषेधात्। अनेषका। परमैषका। अद्वके। परमद्वके। स्वशब्दग्रहणं संज्ञोपसर्ज
नार्थं। इह हि अतः स्थाने इत्यनुवृत्तं स्वशब्दस्यातो विशेषणं। नतु द्वेषयोरसंभवात्। नाप्यन्येषां। अव्यभिचारात्। स्वशब्दस्त्वनुपसर्जने
मात्मीयवाची अकजर्हः। अर्थांतरे तु न स्त्री। संज्ञोपसर्जनीभूतस्तु कप्रत्ययांतत्वादुदाहरणं। एवं चात्मीयायां स्विकापरमस्वि
केति नित्यमेवेत्वं। निर्भस्त्रका। निर्भस्त्रिका। एषका। एषिका। कृतषत्वनिर्देशान्नेह विकल्पः। एतिके। एतिकाः। अजिका। अजका। ज्ञका। ३५
ज्ञिका। द्विके। द्वके। निःस्वका। निःस्विका॥ अभाषितपुंस्काच्च। एतस्माद्विहितस्यातः स्थाने तद्वा स्यात्। गंगका। गंगिका। वङ्कजी

षित्त्वात्षिद्गौरेतिवक्ष्यमाणोङीष्‌। गार्ग्यायणी॥ सर्वत्रलोहितादिकतंतेभ्यः। लोहितादिभ्यः कतशब्दांतेभ्यो यञंतेभ्यो नित्यं ष्फः स्यात्‌।
२६ लोहितायनी। कात्यायनी॥ कौरव्यमांडूकाभ्यांच। आभ्यां ष्फः स्यात्‌। क्रमेण टाप्ङीषोरपवादः॥ कुर्वादिभ्याण्यः। कौरव्यायणी।
ढक्‌मंडूकादित्यण्‌। मांडूकायनी॥ आसुरेरुपसंख्यानं। आसुरायणी॥ वयसिप्रथमे। प्रथमवयोवाचिनोदंतात्स्त्रियांङीप्स्यात्‌॥
कुमारी। वयस्यचरमइतिवाच्यं। वधूटी। चिरंटी। वधूटचिरंटशब्दौयौवनवचनौ। अतः किं। शिशुः। कन्यायांन। कन्यायाः कनीनचे
तिनिर्देशात्‌॥ द्विगोः। अदंताद्द्विगोर्ङीप्स्यात्‌। त्रिलोकी। अजादित्वात्त्रिफला। त्र्यनीका॥ अपरिमाणबिस्ताचितकंबल्येभ्योनतद्धित
लुकि। अपरिमाणांताद्बिस्ताद्यंताच्चद्विगोर्ङीप्नस्यात्तद्धितलुकिसति। पंचभिरश्वैः क्रीतापंचाश्वा। आर्हीयष्ठक्‌। अध्यर्द्धेलुक्‌॥
द्वौबिस्तौपचतिद्विबिस्ता। द्व्याचिता। द्विकंबल्या। परिमाणांतात्तु द्व्याढकी। तद्धितलुकिकिं। समाहारेपंचाश्वी॥ कांडांतात्क्षेत्रे। क्षेत्रेयः
कांडांताद्द्विगोस्तेनोङीप्तद्धितलुकि। द्वेकांडेप्रमाणमस्याः द्विकांडाक्षेत्रभक्तिः। प्रमाणेद्वयसजितिविहितस्यमात्रचः प्रमाणेलो
द्विगोर्नित्यमितिलुक्‌। क्षेत्रेकिं। द्विकांडीरज्जुः॥ पुरुषात्प्रमाणेन्यतरस्यां। प्रमाणेयः पुरुषस्तदंताद्द्विगोर्ङीब्वास्यात्‌ तद्धितलुकि।
द्वौपुरुषौप्रमाणमस्याः द्विपुरुषी। द्विपुरुषापरिखा॥ ऊधसोनङ्‌। ऊधोंतस्यबहुव्रीहेरनङादेशः स्यात्स्त्रियां। इत्यनङिकृतेडाबुङी २६
प्प्रतिषेधेषुप्राप्तेषु॥ बहुव्रीहेरूधसोङीष्‌। ऊधोंताद्बहुव्रीहेर्ङीष्स्यात्स्त्रियां। कुंडोध्नी। स्त्रियांकिं। कुंडोधोधेनुकं। इहानङपिन।

तद्धितोस्त्रियामित्युपसंख्यानात्‌॥ संख्याव्ययादेर्ङीप्‌। ङीषोपवादः। द्व्यूध्नी। अत्यूध्नी। बहुव्रीहेरित्येव। ऊधोतिक्रांता अत्यूधाः॥ दाम
हायनांताच्च। संख्यादेर्बहुव्रीहेर्दामांताद्धायनांताच्चङीप्स्यात्‌। दामांतेडाप्प्रतिषेधयोः प्राप्तयोर्हायनांतेटापिप्राप्तेवचनं। द्विदाम्नी।
अव्ययग्रहणान्नतुसुनेरुद्दामावडवेत्यत्रडाप्निषेधावपिपक्षेस्तः। द्विहायनीबाला। त्रिचतुर्भ्यांहायनस्यणत्वंवाच्यं। वयोवाचकस्यैव
हायनस्यङीप्णत्वंचेष्यते। त्रिहायणी। चतुर्हायणी। वयसोन्यत्रद्विहायनाशाला। चतुर्हायना॥ नित्यंसंज्ञाछंदसोः। अन्नंताद्बहु
व्रीहेरुपधालोपिनोनित्यंङीप्‌। सुराज्ञीनामनगरी। अन्यत्रपूर्वेणविकल्पएव। वेदेशतमूर्ध्नी। केवलमामकभागधेयपापापरस
मानार्यकृतसुमंगलभेषजाच्च। एभ्योनवभ्योनित्यंङीप्स्यात्संज्ञाछंदसोः। अथोइंद्रः केवलीः। मामकीभागधेयी। पापी। अपरी। स
मानी। आर्यकृती। सुमंगली। भेषजी। अन्यत्रकेवलाइत्यादि। मामकग्रहणंनियमार्थं। अणंतत्वादेवसिद्धेः। तेनलोकेअसंज्ञायांमा
मिका॥ अंतर्वत्पतिवतोर्नुक्‌। एतयोर्नुक्स्यात्स्त्रियां॥ ऋन्नेभ्योङीप्‌। गर्भिण्यांजीवद्भर्तृकायांचप्रकृतिभागौनिपात्येते। तत्रांतरस्त्यस्यां
गर्भइतिविग्रहेअंतःशब्दस्याधिकरणशक्तिप्रधानतयाअस्तिसामानाधिकरण्याभावादप्राप्तोमतुब्निपात्यते। पतिवत्नीत्यत्रतुवत्वंनिपा
त्यते। अंतवत्नी। पतिवत्नी। प्रत्युदाहरणंतुअंतरस्त्यस्यांशालायांघटः। पतिमतीपृथिवी॥ पत्युर्नोयज्ञसंयोगे। पतिशब्दस्यनकारादे
नस्य शः स्याद्यज्ञेनसंबंधे। वसिष्ठस्यपत्नी। तत्कर्तृकयज्ञफलभोक्त्रीत्यर्थः। दंपत्योः सहाधिकारात्‌॥ विभाषापूर्वस्य। पतिशब्दांतस्यसपूर्वस्य

प्रातिपदिकस्य नो वा स्यात्। गृहस्य पतिर्गृहपतिः। गृहपत्नी। अनुपसर्जनस्येति हीन्तरार्थमनुवृत्तमपि न पत्युर्विशेषणं। किं तु तदंतस्य॥
तेन बहुव्रीहावपि। दृढपत्नी। दृढपतिः। वृषलपत्नी। वृषलपतिः। अथ वृषलस्य पत्नीति व्यस्ते कथमिति चेत्। पत्नीव पत्नीत्युपचारात्।
यद्वा। आचारक्विबंतात्कर्तरि क्विप्। अस्मिंश्च पक्षे पत्नियौ। पत्नियः इति। इयङ् विषये विशेषः। सपूर्वस्य किं। गवां पतिः स्त्री॥ नित्यं सप
त्न्यादिषु। पूर्वविकल्पापवादः। समानस्य सभावोपि निपात्यते। समानः पतिर्यस्याः सा सपत्नी। एकपत्नी। वीरपत्नी॥ पूतक्रतोरै च॥ अ
स्य स्त्रियामैकारादेशो भवति। इयं त्रिसूत्री पुंयोग एवेष्यते। पूतक्रतोः स्त्री पूतक्रतायी। यया तु पूतक्रतवः पूताः पूतक्रतुरेव सा॥ वृषा
कप्यग्निकुसितकुसिदानामुदात्तः। एषामुदात्त ऐ आदेशः स्यात् ङीप् च। वृषाकपेः स्त्री वृषाकपायी। हरिर्विष्णुर्वृषाकपी इत्यमरः। वृषाकपायी
श्रीगौर्योरिति च। अग्नायी। कुसितायी। कुसिदायी। कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्यः॥ मनोरौ वा॥ मनुशब्दस्यौकारादेशः स्या
दुदात्तैकारश्च वा ताभ्यां सन्नियोगलक्षणो ङीप् च। मनोः स्त्री मनायी। मनावी। मनुः॥ वर्णादनुदात्तात्तोपधात्तो नः॥ वर्णवाची यो नुदा
त्तस्तोपधस्तदंतादनुपसर्जनात्प्रातिपदिकाद्वा ङीप् स्यात्तकारस्य नकारादेशश्च। एता। एनी। रोहिता। रोहिणी। वर्णानां तणितिनितां
नानामिति फिट्सूत्रेणाद्युदात्तः। श्येण्या वश्शालल्वेति निर्देशः। त्रीण्येतान्यस्या इति बहुव्रीहिः। अनुदात्तात्किं। श्वेता। घृतादीनां चेत्यंतोदात्तोयं।
असित इत्येव। शितिः स्त्री। पिशंगादुपसंख्यानं। अन्यतो ङीषित्यनेन नित्यं ङीषि प्राप्ते। ङीप् विकल्पार्थमिदमुपसंख्यानं। तेन स्वरभेदः भि

हेर्भाषितपुंस्कत्वात्ततो विहितस्य नित्यं। असिता। असक्नी। असक्निका। शेषिके कपि तु विकल्प एव॥ आदाचार्याणाम्॥ पूर्वसूत्रविष
ये आ इ स्यात्। गंगाका। उत्तरपुरकात्तु। शुभ्रिका॥ अनुपसर्जनात्॥ अधिकारोयं। पुनस्त्रिरित्यभिव्याप्य। अयमेव स्त्रीप्रत्ययेषु त
दंतविधिं ज्ञापयति॥ टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः॥ अनुपसर्जनं यट्टिदादि तदंतं यदंतं प्रातिपदिकं ततः स्त्रियां ङी
प्स्यात्। कुरुचरी। उपसर्जनत्वान्नेह। बहुकुरुचरा॥ नदट्। नदी। वक्ष्यमाणे त्यत्र टित्वादुगित्वाच्च ङीप्प्राप्तः। यासुटो ङित्वेन लाभ्यमनु
बंधकार्यं नादेशानामिति ज्ञापनान्न भवति। श्वः शानच्। शित्वेन क्वचिद्दनुबंधकार्येप्यनल्विधाविति निषेधज्ञापनाद्वा। सौवर्णे
यी। ऐंद्री। औत्सी। ऊरुद्वयसी। ऊरुदघ्नी। ऊरुमात्री। पंचतयी। आक्षिकी। लावणिकी। यादृशी। इत्वरी। ताच्छीलिके णेपि। चौरी।
नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानं। स्त्रैणी। पौंस्नी। शाक्तीकी। आढ्यंकरणी। तरुणी। तलुनी॥ यञश्च॥ यञंतात्स्त्रि
यां ङीप् स्यात्। अकारलोपे कृते॥ हलस्तद्धितस्य॥ हलउत्तरस्य तद्धितयकारस्योपधाभूतस्य लोपः स्यादीति परे। गार्गी। अनपत्या
धिकारस्थान्न ङीप्। द्वैपेभ्यो अधिकारग्रहणाद्वेवस्यापसंदेश्या। देवायञ इञादिति हिमाच्छीय्य तीयो न तस्य स्वाधिकारवर्जितः।
प्राचां ष्फ तद्धितः। यञंतात्ष्फो वा स्यात्स्त्रियां स च तद्धितः॥ षः प्रत्ययस्य॥ प्रत्ययस्यादिः ष इत्स्यात्॥ आयनेयीनीयियः फढखछ
घां प्रत्ययादीनां॥ प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः। तद्धितांतत्वात्प्रातिपदिकत्वं। विद्वसामर्थ्यात्ष्फेणोक्त

ङः। पिशंगी। असितपलितयोर्न। असिता। पलिता। छंदसि क्नमेके। असिक्नी। पलिक्नी। अवदात्तशब्दस्तु न वर्णवाची। किंतु विशुद्धवा
ची। तेनावदातेत्येव॥ अन्यतो ङीष्। तोपधभिन्नाद्वर्णवाचिनोनुदात्तांतात्प्रातिपदिकात्स्त्रियां ङीष्स्यात्। कल्माषी। सारंगी। लघावं
ते द्वयोश्च बह्वषो गुरुरिति मध्योदात्ताविति। अनुदात्तात्किं। कृष्णा। कपिला॥ षिद्गौरादिभ्यश्च। षिद्भ्यो गौरादिभ्यश्च ङीष्स्यात्। नर्तकी।
गौरी। अनडुही। अनड्वाही॥ पिप्पल्यादयश्च। आकृतिगणोयं॥ सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः। अंगस्योपधायायकारस्य
स्य लोपः स्यात्स चेद्यः सूर्याद्यवयवः। मत्स्यस्य ङ्यां। सूर्यागस्त्ययोश्छे च ङ्यां च। तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यं। मत्सी।
मातरिषिचेति षित्त्वादेव सिद्धे गौरादिषु मातामहीशब्दपाठसामर्थ्यादनित्यः षितो ङीष्। दंष्ट्रा॥ जानपदकुंडगोणस्थलभाजनाग
कालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेषु। एकादशभ्यः
प्रातिपदिकेभ्यः क्रमाद्वृत्त्यादिष्वर्थेषु ङीष्स्यात्। जानपदी। वृत्तिश्चेत्। प्रत्युदाहरणं टाबंतं ङीबंतं च। अन्यातु जानपदी। उत्सादित्वा
दञंतत्वेन टिड्ढाणञिति ङीपाद्युदात्तः। कुंडी। अमत्रं चेत्। कुंडान्या। कुंडदाहे। गुरोश्च हल इत्यप्रत्ययः। पत्यौ मृते जारजः कुंड इति
मनुष्यजातिवचनस्ततो जातिलक्षणो ङीष्भवत्येव। अमत्रे हि स्त्रीविषयत्वाद्धमात्रो ङीष्विधीयते। नतु नियम्यते। गोणी। आवपनं
चेत्। गोणान्या। स्थली। अकृत्रिमा चेत्। स्थलान्या। भाजी। श्राणा चेत्। भाजान्या। नागी। स्थूला चेत्। नागान्या। गजवाची नागश

श्यः स्थौल्यगुणयोगादन्यत्रप्रयुक्तउदाहरणं।सर्पवाचीतुदैर्घ्यगुणयोगादन्यत्रप्रयुक्तः प्रत्युदाहरणं।काली।वर्णश्चेत्।कालान्या।नी
ली।अनाच्छादनंचेत्।नीलान्या।नील्यारक्तकृशाटीत्यर्थः।नील्याअन्वक्तव्यइत्यत्र।अनाच्छादनेपिनसर्वत्र।किंतु।नीलादोषधौ॥
नीली।प्राणिनिच।नीलीगौः॥संज्ञायांवा।नीली।नीला।कुशी।अयोविकारश्चेत्।कुशान्या।कामुकी।मैथुनेच्छाचेत्।कामुका
न्या।कबरी।केशानांसन्निवेशविशेषः।कबरान्याचित्रेत्यर्थः॥शोणात्प्राचां।शोणी।शोणा॥वोतोगुणवचनात्।उदंताद्गुणव
चनोवाङीष्स्यात्।मृद्वी।मृदुः।उतः किं।शुचिः।गुणेति किं।आखुः।खरुसंयोगोपधान्न।खरुः पतिंवरा कन्या।पांडुः॥बह्वादिभ्य
श्च।एभ्योवाङीष्।बह्वी।बहुः।कृदिकारादक्तिनः।रात्रिः।रात्री।सर्वतोक्तिन्नर्थादित्येके।शकटी।शकटिः।अक्तिन्नर्थात्किं।अ
जननिः।क्तिन्नंतत्वादप्राप्तेविध्यर्थं।पद्धतिशब्दोगणेपठ्यते।हिमकाषिहतिषुचेतिपद्भावः॥पुंयोगादाख्यायां।यापुमाख्या
पुंयोगात्स्त्रियांवर्ततेततोङीष्स्यात्।गोपस्यस्त्रीगोपी।पालकांतान्न।गोपालिका।अश्वपालिका।सूर्याद्देवतायांचाब्वाच्यः।सूर्यस्त्रीदे
वतासूर्या।देवतायांकिं।सूरी कुंती।मानुषीयं॥इंद्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्।एषामानु
गागमः स्यान्ङीष्च।इंद्रादीनांषण्णांमातुलाचार्ययोश्चपुंयोगएवेष्यते।तत्रङीषिसिद्धे आनुगागममात्रंविधीयते।इतरेषांचतुर्णामु ३८
भयं।इंद्राणीत्यादि।हिमारण्ययोर्महत्वे।महद्धिमंहिमानी।अरण्यानी॥यवाद्दोषे।दुष्टोयवोयवानी।यवनाल्लिप्यां।यवनानांलि

स्वकेशी । सुकेशा वा रथ्या । अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात् । तेन चेत्तु न तथा युतं । सुस्तनी । सुस्तना वा प्रतिमा । प्राणिवत्प्राणिसदृ
शे स्थितत्वात् ॥ नासिकोदरौष्ठजंघादंतकर्णशृंगाच्च । एभ्यो वा ङीष् । आद्ययोर्बह्वज्लक्षणो निषेधो बाध्यते । पुरस्तादपवादन्यायात् ।
ओष्ठादीनां पंचानां तु असंयोगोपधात् इति बाध्यते । मध्येऽपवादन्यायात् । सहनञ्लक्षणस्तु प्रतिषेधः परत्वादस्य बाधकः । तुंगनासि
की । तुंगनासिका इत्यादि । नेह । सहनासिका । अनासिका । विद्यमाननासिका । अत्र वृत्तिः । अंगगात्रकंठेभ्यो वक्तव्यं । स्वंगी । स्वं
गेत्यादि । एतच्चानुक्तसमुच्चयार्थचकारेण संग्राह्यमिति केचित् । भाष्याद्यनुक्तत्वादप्रमाणमिदमिति प्रामाणिकाः । अत्र वार्त्तिकानि । पु
च्छाच्च । सुपुच्छी । सुपुच्छा । कबरमणिविषशरेभ्यो नित्यं । कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छीत्यादि । उपमानात्पक्षाच्च पुच्छाच्च । नि
त्यमित्येव । उलूकपक्षी शाला । उलूकपुच्छी सेना ॥ न क्रोडादिबह्वचः । क्रोडादेर्बह्वचश्च स्वांगान्न ङीष् । कल्याणक्रोडा । अश्वानामुरः क्रो
डा । आकृतिगणोऽयं । सुजघना ॥ सहनञ्विद्यमानपूर्वाच्च । सहेत्यादित्रिकपूर्वान्न ङीष् । सकेशा । अकेशा । विद्यमाननासिका ॥ न
खमुखात्संज्ञायां । न ङीष् स्यात् । शूर्पणखा । गौरमुखा । संज्ञायां किं । ताम्रमुखी कन्या ॥ दिक्पूर्वपदान्ङीप् । दिक्पूर्वपदात्स्वांगात्प्रा
तिपदिकात्परस्य ङीषो ङीबादेशः स्यात् । प्राङ्मुखी । आद्युदात्तं पदं । वाहः । वाहंतात्प्रातिपदिकान्ङीष् स्यात् । ङीषेवानुवर्तते न ङीप् ३९
दित्यवाङ्मे दित्यौही च मे ॥ सख्यशिश्वीति भाषायां । इति शब्दः प्रकारे भाषायामित्यस्यानंतरं द्रष्टव्यः । तेन छंदस्यपि क्वचित् । सखी ।

स

अशिश्वी । आध्येन वीधुनयंत्रा मा शिश्वीः ॥ जातेरस्त्रीविषयादयोपधात् । जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङी
ष् स्यात् । आकृतिग्रहणा जातिः । अनुगतसंस्थानव्यंग्येत्यर्थः । तटी ॥ लिंगानां च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या । असर्वलिंगत्वे सत्ये
कस्यां व्यक्तौ कथनाद्व्यक्त्यंतरे कथनं विनापि सुग्रहा जातिरिति लक्षणांतरं । वृषली । सत्यंतं किं । शुक्ला । सकृदित्यादि किं । देवदत्ता
। गोत्रं च चरणैः सह । अपत्यप्रत्ययांतः शाखाध्येतृवाची च शब्दो जातिकार्यं लभत इत्यर्थः । औपगवी । कठी । बह्वृची । ब्राह्मणी
त्यत्र तु शार्ङ्गरवादिपाठान्ङीना ङीष् बाध्यते । जातेः किं । मुंडा । अस्त्रीविषयात्किं । बलाका । अयोपधात्किं । क्षत्रिया । योपधप्रति
षेधे गवयहयमुकयमनुष्यमत्स्यानामप्रतिषेधः । गवयी । हयी । मुकयी । हलस्तद्धितस्येति यलोपः । मानुषी । मत्स्यस्य ङ्यां । मत्सी ॥ पा
ककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च । पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादपि ङीष् स्यात् । ओदनपाकी । शंकुकर्णी ।
शालपर्णी । शंखपुष्पी । दासीफली । दर्भमूली । गोवाली । ओषधिविशेषे रूढा एते ॥ इतो मनुष्यजातेः । ङीष् स्यात् । दाक्षी । योप
धादपीष्यते । उदमेयस्यापत्यमौदमेयी । मनुष्येति किं । तित्तिरिः ॥ ऊङुतः । उकारांतादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ्
स्यात् । कुरूः ॥ कुरुनादिभ्यो ण्यः । तस्य स्त्रियामवंतीत्यादिना लुक् । अयोपधात्किं । अध्वर्युर्ब्राह्मणी । अप्राणिजातेश्चारज्ज्वादीना
मुपसंख्यानं । रज्ज्वादिपर्युदासादुवर्णांतेभ्य एव । अलाबूः । कर्कंधूः । अनयोर्दीर्घांतत्वेपि नोङ् आत्वोरिति विभक्त्युदात्तत्व

प्रतिषेधः। ऊङुतः। कुरूः। ऊङ्धोर्थेणः परश्चासादयवदात्तानस्युरिति सूत्रार्थः। प्राणिजातेस्तु। कृकवाकुः। रज्ज्वादेस्तु। रज्जुः। हनुः॥ बाह्वन्तात्संज्ञा-
यां। स्त्रियामूङ्। भद्रबाहूः। संज्ञायां किं। वृत्तबाहुः॥ पङ्गोश्च। पङ्गूः। श्वशुरस्योकाराकारलोपश्च। श्वश्रूः। पुंयोगलक्षणस्य ङीषोऽपवादः।
लिंगविशिष्टपरिभाषया स्वादयः। श्वश्र्वः॥ ऊरूत्तरपदादौपम्ये। उपमानवाचिपूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्य ऊङ् स्यात्। करभोरूः।
संहितशफलक्षणवामादेश्च। अनौपम्यार्थमिदं सूत्रं। संहितोरूः। सैवशफोरूः। शफौ खुरौ ताविव संश्लिष्टत्वादुपचारात्। लक्षणशब्दा-
दर्श आद्यच्। लक्षणोरूः। वामोरूः। सहितसहाभ्यां चेति वक्तव्यं। हितेन सह सहिते ऊरू यस्याः सा सहितोरूः। सह इते इति सहे ऊरू यस्याः
सा सहोरूः। यद्वा विद्यमानवचनस्य सहशब्दस्य ऊरू इति वा यप्रतिपादनाय प्रयोगः॥ संज्ञायां। कद्रुकमण्डल्वोः संज्ञायां। स्त्रियामूङ्।
कद्रूः। कमण्डलूः। संज्ञायां किं। कद्रुः। कमण्डलुः। अछन्दोर्थवचनं॥ शार्ङ्गरवाद्यञो ङीन्। शार्ङ्गरवादेरञो यो कारस्तदन्ताच्च जातिवचनो ङीन्
स्यात्। शार्ङ्गरवी। बैदी। जातेरित्यनुवृत्तेः पुंयोगे ङीषेव। नृनरयोर्वृद्धिश्चेति गणसूत्रं। नारी॥ यङश्चाप्। यङन्तात्स्त्रियां चाप् स्यात्। अय-
ङ्घ्यङोः सामान्यग्रहणं। आंबष्ठ्या। कारीषगन्ध्या। षाच्च यञश्चाप्। पौतिमाष्या॥ आवट्याच्च। अस्माच्चाप् स्यात्। यञश्चेति ङीषो-
पवादः। अवटशब्दो गर्गादिः। आवट्या॥ तद्धिताः। आपंचमपरिसमाप्तेरधिकारोयं॥ यूनस्तिः। यूनशब्दात्तिप्रत्ययः स्यात्स च तद्धि- ५०
तः। लिंगविशिष्टपरिभाषया सिद्धे तद्धिताधिकार उत्तरार्थः। युवतिः॥ अनुपसर्जनादित्येव। बहवो युवानो यस्यां बहुयुवा। युव-

पिर्यवनानी। मातुलोपाध्याययोरानुग्वा। मातुलानी। मातुली। उपाध्यायानी। उपाध्यायी। या तु स्वयमेवाध्यापिका तत्र वा ङीष्वा-
च्यः। उपाध्यायी। उपाध्याया। आचार्यादणत्वं च। आचार्यस्य स्त्री आचार्यानी। पुंयोग इत्येव। आचार्या स्वयं व्याख्यात्री। अर्यक्ष-
त्रियाभ्यां वा स्वार्थे। अर्याणी। अर्या। स्वामिनी वैश्या वेत्यर्थः। क्षत्रियाणी। क्षत्रिया। पुंयोगे तु। अर्यी। क्षत्रियी। कथं ब्राह्मणीति
ब्राह्मणमानयति जीवयतीति कर्मण्यण्॥ क्रीतात्करणपूर्वात्। क्रीतान्ताददन्तात्करणादेः स्त्रियां ङीष् स्यात्। वस्त्रक्रीती। क्वचिन्न। धनक्री-
ता॥ क्तादल्पाख्यायां। करणादेः क्तान्तादन्तान्ङीष् स्यात्। अल्पत्वे द्योत्ये। अभ्रलिप्ती द्यौः॥ बहुव्रीहेश्चान्तोदात्तात्। बहुव्रीहेः क्तान्ताद-
न्तोदात्ताददन्तात्स्त्रियां ङीष् स्यात्। जातिपूर्वादिति वक्तव्यं। तेन बहुनञ्सुकालसुखादिपूर्वान्न। ऊरुभिन्नी। नेह। बहुकृता। जाता-
न्ता। दन्तजाता। पाणिगृहीती भार्यायां। पाणिगृहीतान्या॥ अस्वाङ्गपूर्वपदाद्वा। पूर्वेण नित्ये प्राप्ते विकल्पोयं। सुरापीती। सुरा-
पीता। अन्तोदात्तात्किं। वस्त्रछन्ना। अनाछादनादित्येकदान्तनिषेधः। अत एव पूर्वेणापि न ङीष्॥ स्वाङ्गाच्चोपसर्जनादसंयोगोपधा-
त्। असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्तादन्तात्प्रातिपदिकाद्वा ङीष् स्यात्। केशानतिक्रान्ता अतिकेशी। अतिकेशा। चन्द्रमुखी।
चन्द्रमुखा। संयोगोपधात्तु सुगुल्फा। उपसर्जनात्किं। शोभना शिखा सुशिखा। स्वाङ्गं त्रिधा। अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविका-
रजं। सुस्वेदा। द्रवत्वात्। सुज्ञाना। अमूर्तत्वात्। सुमुखा शाला। अप्राणिस्थत्वात्। सुशोफा। विकारजत्वात्। अतत्स्थं तत्र दृष्टं च।

नीतियोक्तेः शास्त्रांतरेऽपि बोध्यं॥ इति स्त्रीप्रत्ययाः॥ ७॥ प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा। नियतोपस्थितिकः प्रातिपदि
कार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिंगमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात्। उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञा
नं। अलिंगा नियतलिंगाश्च प्रातिपदिकार्थमात्रे इत्यस्योदाहरणं। अनियतलिंगास्तु लिंगमात्राद्याधिक्यस्य। तटः। तटी। तटं। परि
माणमात्रे। द्रोणो ब्रीहिः। द्रोणरूपं यत्परिमाणं तत्परिच्छिन्न इत्यर्थः। प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संबंधेन विशेषणं। प्रत्य
यार्थस्तु परिच्छेद्यपरिच्छेदकभावेन ब्रीहौ विशेषणमिति विवेकः। वचनं संख्या। एकः। द्वौ। बहवः। इहोक्तार्थत्वाद्विभक्तेरप्राप्तौ व
चनं॥ संबोधने च। इह प्रथमा स्यात्। हे राम। कारके इत्यधिकृत्य॥ कर्तुरीप्सिततमं कर्म। कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसं
ज्ञं स्यात्। कर्तुः किं। माषेष्वश्वं बध्नाति। कर्मण ईप्सिता माषा न कर्तुः। तमब्ग्रहणं किं। पयसा ओदनं भुंक्ते। कर्मेत्यनुवृत्तौ कर्मग्रहण
माधारनिवृत्त्यर्थं। अन्यथा गेहं प्रविशतीत्यत्रैव स्यात्। अनभिहिते इत्यधिकृत्य। कर्मणि द्वितीया। अनुक्ते कर्मणि द्वितीया स्यात्। ह
रिं भजति। अभिहिते तु कर्मणि प्रातिपदिकार्थमात्रे इति प्रथमैव। अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः। तिङ्। हरिः सेव्यते।
कृत्। लक्ष्म्या सेवितः। तद्धितः। शतेन क्रीतः शत्यः। शतिकः। समासः। प्राप्त आनंदो यं स प्राप्तानंदः। क्वचिन्निपातेनाभिधानं। यथा।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतं। सांप्रतमित्यस्य हि युज्यत इत्यर्थः॥ तथायुक्तं चानीप्सितं। ईप्सिततमवत्क्रियया युक्तमनी

सि·कौ·त·
५१

क्षितमपिकारकंकर्मसंज्ञंस्यात्।ग्रामंगच्छन्तृणंस्पृशति।अविवक्षितंअन्नंभक्षयन् विषंभुंक्ते।।अकथितंच।अपादानादिवि
शेषैरविवक्षितंकारकंकर्मसंज्ञंस्यात्।दुह्याच्पच्दंडरुधिप्रच्छिचिब्रूशासुजिमथ्मुषां।कर्मयुक्स्यादकथितंतथास्यान्नीहृकृष्व
हां।दुहादीनांद्वादशानांतथानीप्रभृतीनांचतुर्णांकर्मणायद्युज्यतेतदेवाकथितंकर्मेतिपरिगणनंकर्तव्यमित्यर्थः।गांदोग्धिप
यः।बलिंयाचतेवसुधां।अविनीतंविनयंयाचते।तंडुलानोदनंपचति।गर्गान्शतंदंडयति।व्रजमवरुणद्धिगां।माणवकंपंथानं
पृच्छति।वृक्षमविचिनोतिफलानि।माणवकंधर्मंब्रूते।शास्तिवा।शतंजयतिदेवदत्तं।सुधांक्षीरनिधिंमथ्नाति।देवदत्तंशतंमुष्णा
ति।ग्राममजांनयति।हरतिकर्षतिवहतिवा।अर्थनिबंधनेयंसंज्ञा।बलिंभिक्षतेवसुधां।माणवकंधर्मंभाषते।अभिधत्तेव
क्तीत्यादि।कारकंकिं।माणवकस्यपितरंपंथानंपृच्छति।अकर्मकधातुभिर्योगेदेशःकालोभावोगंतव्योध्वाचकर्मसंज्ञक
इतिवाच्यं।कुरून्स्वपिति।मासमास्ते।गोदोहमास्ते।क्रोशमास्ते।।गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्तासणौ
।गत्याद्यर्थानांशब्दकर्मकाणामकर्मकाणांचाणौयःकर्तासणौकर्मस्यात्।शत्रूनगमयत्स्वर्गंवेदार्थंस्वानवेदयत्।आशयच्चामृ
तंदेवान्वेदमध्यापयद्विधिं।आसयत्सलिलेपृथ्वींयःसमेश्रीहरिर्गतिः।गतीत्यादिकिं।पाचयत्योदनंदेवदत्तेन।अण्यंता ५१
नांकिं।गमयतिदेवदत्तोयज्ञदत्तंतमपरःप्रयुंक्तेगमयतिदेवदत्तेनयज्ञदत्तंविष्णुमित्रः।।नीवह्योर्न।नाययतिवाहयतिवाभारं

भृत्येन।नियंतृकर्तृकस्यवहेरनिषेधः।वाहयतिरथंवाहान्सूतः।आदिखाद्योर्न।आदयतिखादयतिवाऽन्नंबटुना।भक्षेरहिंसा
र्थस्यन।भक्षयत्यन्नंबटुना।अहिंसार्थस्यकिं।भक्षयतिबलीवर्दान्सस्यं।जल्पतिप्रभृतीनामुपसंख्यानं।जल्पयतिभाषय
तिपुत्रंदेवदत्तः।।दृशेश्च।दर्शयतिहरिंभक्तान्।सूत्रेज्ञानसामान्यार्थानामेवग्रहणंनतुतद्विशेषार्थानामित्यनेनज्ञाप्यते।तेनस्मरतिजिघ्रती
त्यादीनांन।स्मारयतिघ्रापयतिदेवदत्तेन।शब्दायतेर्न।शब्दाययतिदेवदत्तेन।धात्वर्थसंगृहीतकर्मत्वेनाकर्मकत्वात्प्राप्तिः।येषांदेशकाला
दिभिन्नंकर्मनसंभवतितेत्राकर्मकाः।नत्वविवक्षितकर्माणोपि।तेनमासमासयतिदेवदत्तमित्यादौकर्मत्वंभवति।देवदत्तेनपाचयतीत्यादौ
तुन।।हृक्रोरन्यतरस्यां।हृक्रोरणौकर्ताणौवाकर्मस्यात्।हारयतिकारयतिवाभृत्येनभृत्यंवाकटं।अभिवादिदृशोरात्मनेपदेवेतिवाच्यं।
अभिवादयतेदर्शयतेदेवंभक्तेनभक्तंवा।।अधिशीङ्स्थासांकर्म।अधिपूर्वाणामेषामाधारःकर्मस्यात्।अधिशेतेअधितिष्ठतिअध्या
स्तेवावैकुंठंहरिः।।अभिनिविशश्च।अभिनीत्येतत्संघातपूर्वस्यविशतेराधारःकर्मस्यात्।अभिनिविशतेसन्मार्गं।परिक्रयणेसंप्रदा
नमितिसूत्रादिहमंडूकप्लुत्यान्यतरस्यांग्रहणमनुवर्त्यव्यवस्थितविभाषाश्रयणात्क्वचिन्न।पापेभिनिवेशः।।उपान्वध्याङ्वसः।उपादिपू
र्वस्यवसतेराधारःकर्मस्यात्।उपवसति।अनुवसति।अधिवसति।आवसतिवैकुंठंहरिः।अभुक्त्यर्थस्यतुन।वनेउपवसति।उ
भसर्वतसोःकार्याधिगुपर्यादिषुत्रिषु।द्वितीयाम्रेडितांतेषुततोन्यत्रापिदृश्यते।उभयतःकृष्णंगोपाः।सर्वतःकृष्णं।धिक्कृष्णाभक्तं।

उपर्युपरिलोकंहरिः। अध्यधिलोकं। अधोधोलोकं। अभितःपरितःसमयानिकषाहाप्रतियोगेपि। अभितःकृष्णं। परितःकृष्णं।
ग्रामंसमया। निकषावा। हाकृष्णाभक्तं। तस्यदेवोच्यतेत्यर्थः। बुभुक्षितंनप्रतिभातिकिंचित्॥ अंतरांतरेणयुक्ते। आभ्यांयोगेद्वितीयास्या
त्। अंतरात्वांमांहरिः। अंतरेणहरिंनसुखं। कर्मप्रवचनीयाइत्यधिकृत्य॥ अनुर्लक्षणे। लक्षणेद्योत्येनुरुक्तसंज्ञःस्यात्। गत्युपस
र्गसंज्ञापवादः॥ कर्मप्रवचनीययुक्तेद्वितीया। एतेनयोगेद्वितीयास्यात्। जपमनुप्रावर्षत्। हेतुभूतजपोपलक्षितंवर्षणमित्यर्थः। परा
पिहेतौतृतीयानेनबाध्यते। लक्षणेत्थंभूतेत्यादिनासिद्धेपुनःसंज्ञाविधानसामर्थ्यात्॥ तृतीयार्थे। अस्मिन्द्योत्येनुरुक्तसंज्ञःस्यात्।
नदीमन्ववसितासेना। नद्यासहसंबंधेत्यर्थः॥ षिञ्बंधने। क्तः॥ हीने। हीनेद्योत्येनुःप्राग्वत्। अनुहरिंसुराः। हरेर्हीनाइत्यर्थः। उपो
धिकेच। अधिकेहीनेचद्योत्येउपेत्ययंप्राक्संज्ञःस्यात्। अधिकेसप्तमीवक्ष्यते। हीने। उपहरिंसुराः॥ लक्षणेत्थंभूताख्यानभाग
वीप्सासुप्रतिपर्यनवः। एष्वर्थेषुविषयभूतेषुप्रत्यादयउक्तसंज्ञाःस्युः॥ लक्षणे। वृक्षंप्रतिपरिअनुवाविद्योततेविद्युत्। इत्थंभूता
ख्याने। भक्तोविष्णुंप्रतिपर्यनुवा। भागे। लक्ष्मीर्हरिंप्रतिपर्यनुवा। हरेर्भागइत्यर्थः। वीप्सायां। वृक्षंवृक्षंप्रतिपर्यनुवासिंचति। अ
त्रोपसर्गत्वाभावान्नषत्वं। एषुकिं। परिषिंचति॥ अभिरभागे। भागवर्जेलक्षणादावभिरुक्तसंज्ञःस्यात्। हरिमभिवर्तते। भक्तोह
रिमभि। देवंदेवमभिसिंचति। अभागेकिं। यदत्रममाभिष्यात्तद्दीयतां॥ अधिपरीअनर्थकौ। उक्तसंज्ञौस्तः। कुतोध्यागच्छति। कुतः

पर्यागच्छति।गतिसंज्ञाबाधाद्गतिर्गताविति निघातो न॥सुःपूजायां।सुसिक्तं।सुस्तुतं।अनुपसर्गत्वान्नषः।पूजायांकिं।सुषिक्तं
किंतवात्र।सेपोयं॥अतिरतिक्रमणेच।अतिक्रमणेपूजायांचातिःकर्मप्रवचनीयःस्यात्।अतिदेवान्कृष्णः॥अपिःपदार्थसंभाव
नान्ववसर्गगर्हासमुच्चयेषु।एषुद्योत्येष्वपिरुक्तसंज्ञःस्यात्।सर्पिषोपिस्यात्।अनुपसर्गत्वान्नषः॥संभावनायांलिङ्।तस्याएववि
षयीभूतेभवनेकर्तृदौर्लभ्यप्रयुक्तंदौर्लभ्यंद्योतयन्नपिशब्दःस्यादित्यनेनसंबध्यते।सर्पिषइतिषष्ठीतुअपिशब्दबलेनगम्यमा
नस्यबिंदोरवयवावयविभाव[illegible]संबंधे।इयमेवह्यपिशब्दस्यपदार्थद्योतकतानाम।द्वितीयातुनेहप्रवर्तते।सर्पिषोबिंदुनायोगो
नत्वपिनेत्युक्तत्वात्।अपिस्तुयाद्विष्णुं।संभावनंशक्त्युत्कर्षमाविष्कर्तुमत्युक्तिः।अपिस्तुहि।अन्ववसर्गःकामचारानुज्ञा।धि
ग्देवदत्तमपिस्तुयाद्वृषलं।गर्हा।अपिसिंच।अपिस्तुहि।समुच्चये॥कालाध्वनोरत्यंतसंयोगे।इहद्वितीयास्यात्।मासंकल्या
णी।मासमधीते।मासंगुडधानाः।क्रोशंकुटिलानदी।क्रोशमधीते।क्रोशंगिरिः।अत्यंतसंयोगेकिं।मासस्यद्विरधीते।क्रोशस्यैकदेशे
पर्वतः॥स्वतंत्रःकर्ता।क्रियायांस्वातंत्र्येणविवक्षितोर्थःकर्तास्यात्॥साधकतमंकरणं।क्रियासिद्धौप्रकृष्टोपकारकंकरणसंज्ञं
स्यात्।तमब्ग्रहणंकिं।गंगायांघोषः॥कर्तृकरणयोस्तृतीया।अनभिहितेकर्तरिकरणेचतृतीयास्यात्।रामेणबाणेनहतोवाली
।प्रकृत्यादिभ्यउपसंख्यानं।प्रकृत्याचारुः।प्रायेणयाज्ञिकः।गोत्रेणगार्ग्यः।समेनैति।विषमेणैति।द्विद्रोणेनधान्यंक्रीणाति।सुखे

नदुःखेनयातीत्यादि॥ दिवःकर्मच। दिवःसाधकतमंकर्मसंज्ञंस्याच्चात्करणसंज्ञं। अक्षैरक्षान्वादीव्यति॥ अपवर्गेतृतीया। अपवर्गःफल
प्राप्तिस्तस्यांद्योत्यायांकालाध्वनोरत्यंतसंयोगेतृतीयास्यात्। अह्नाक्रोशेनवानुवाकोधीतः। अपवर्गेकिं। मासमधीतोनायातः॥ सह
युक्तेप्रधाने। सहार्थेनयुक्ते अप्रधानेतृतीयास्यात्। पुत्रेणसहागतः पिता। एवंसाकंसार्धंसमंयोगेपि। विनापितद्योगंतृतीयास्या
त्। वृद्धोयूनेतिनिर्देशात्॥ येनांगविकारः। येनांगेनविकृतेनांगिनोविकारोलक्ष्यतेततस्तृतीयास्यात्। अक्ष्णाकाणः। अक्षिसंबं
धिकाणत्वविशिष्टइत्यर्थः। अंगविकारःकिं। अक्षिकाणमस्य॥ इत्थंभूतलक्षणे। कंचित्प्रकारंप्राप्तस्यलक्षणेतृतीयास्यात्। जटा
भिस्तापसः। जटाज्ञाप्यतापसविशिष्टइत्यर्थः॥ संज्ञोन्यतरस्यांकर्मणि। संपूर्वस्यजानातेःकर्मणितृतीयावास्यात्। पित्रापितरं
वासंजानीते॥ हेतौ। हेत्वर्थेतृतीयास्यात्। द्रव्यादिसाधारणंनिर्व्यापारसाधारणंचहेतुत्वं। करणत्वंतुक्रियामात्रविषयं। व्यापा
रनियतंच। दंडेनघटः। पुण्येनदृष्टोहरिः। फलमपीहहेतुः। अध्ययनेनवसति॥ गम्यमानापिक्रियाविभक्तौप्रयोजिका। अ
लंश्रमेण। श्रमेणसाध्यंनास्तीत्यर्थः। इहसाधनक्रियांप्रतिश्रमःकारणं। शतेनशतेनवत्सान्पाययतिपयः। शतेनपरिच्छिद्येत्यर्थः
। अशिष्टव्यवहारेदाणःप्रयोगेचतुर्थ्यर्थेतृतीयास्यात्। दास्यासंयच्छतेकामुकः। धर्म्येतुभार्यायैसंयच्छति॥ कर्मणायमभिप्रैतिससं ४३
प्रदानं। दानस्यकर्मणायमभिप्रैतिससंप्रदानसंज्ञःस्यात्॥ चतुर्थीसंप्रदाने। विप्रायगांददाति। अनभिहितइत्येव। दानीयोविप्रः।

क्रिययायमभिप्रैतिसोपिसंप्रदानं। पस्येद्योते। यजेः कर्मणः करणसंज्ञासंप्रदानस्यचकर्मसंज्ञा। पशुनारुद्रंयजते। पशुंरुद्रायददा
तीत्यर्थः॥ रुच्यर्थानांप्रीयमाणः। रुच्यर्थानांधातूनांप्रयोगेप्रीयमाणोर्थः संप्रदानंस्यात्। हरयेरोचतेभक्तिः। अन्यकर्तृकोभिला
षोरुचिः। हरिनिष्ठप्रीतेर्भक्तिः कर्त्री। प्रीयमाणः किं। देवदत्तायरोचतेमोदकः पथि॥ श्लाघह्नुङ्स्थाशपांज्ञीप्स्यमानः। एषांप्रयो
स्म गेबोधयितुमिष्टः संप्रदानंस्यात्। गोर्पीरात्कृष्णायश्लाघतेह्नुतेतिष्ठतेशपतेवा। ज्ञीप्स्यमानः किं। देवदत्तायश्लाघतेपथि॥ धा
रेरुत्तमर्णः। धारयतेः प्रयोगेउत्तमर्णउक्तसंज्ञः स्यात्। भक्तायधारयतिमोक्षंहरिः। उत्तमर्णः किं। देवदत्तायशतंधारयतिग्रा
मे॥ स्पृहेरीप्सितः। स्पृहयतेः प्रयोगेइष्टः संप्रदानंस्यात्। पुष्पेभ्यः स्पृहयति। ईप्सितः किं। पुष्पेभ्योवनेस्पृहयति। ईप्सितमात्रेइयं
संज्ञा। प्रकर्षविवक्षायांतुपरत्वात्कर्मसंज्ञा। पुष्पाणिस्पृहयति॥ क्रुधद्रुहेर्ष्यासूयार्थानांयंप्रतिकोपः। क्रुधाद्यर्थानांप्रयोगेयं
प्रतिकोपः सउक्तसंज्ञः स्यात्। हरयेक्रुध्यतिद्रुह्यतिईर्ष्यतिअसूयतिवा। यंप्रतिकोपः किं। भार्यामीर्ष्यति। मैनामन्योद्राक्षीदिति।
क्रोधोऽमर्षः। द्रोहोपकारः। ईर्ष्याक्षमा। असूयागुणेषुदोषाविष्करणं। द्रोहादयोपिकोपप्रभवाएवगृह्यंते। अतोविशेषणंसामान्ये
नयंप्रतिकोपइति॥ क्रुधद्रुहोरुपसृष्टयोः कर्म। सोपसर्गयोरनयोर्यंप्रतिकोपस्तत्कारकंकर्मसंज्ञंस्यात्। क्रूरमभिक्रुध्यति। अ
भिद्रुह्यति॥ राधीक्ष्योर्यस्यविप्रश्नः। एतयोः कारकंसंप्रदानसंज्ञंस्यात्यदीयोविविधः प्रश्नः क्रियते। कृष्णायराध्यतिईक्षतेवा। पृ

 ष्टेगर्गः शुभाशुभंपर्यालोचतीत्यर्थः॥ प्रत्याङ्भ्यांश्रुवः पूर्वस्यकर्त्ता। आभ्यांपरस्यशृणोतेर्योगेपूर्वस्यप्रवर्तनारूपव्यापारस्यकर्तासं
 प्रदानसंज्ञःस्यात्। विप्रायगांप्रतिशृणोतिआशृणोतिवा। विप्रेणमह्यंदेहीतिप्रवर्तितः प्रतिजानीतइत्यर्थः॥ अनुप्रतिगृणश्च।
आभ्यांगृणातेः कारकंपूर्वव्यापारस्यकर्तृभूतमुक्तसंज्ञंस्यात्। होत्रेअनुगृणातिप्रतिगृणाति। होताप्रथमंशंसतितमध्वर्युःप्रोत्साहय
तीत्यर्थः॥ परिक्रयणेसंप्रदानमन्यतरस्यां। नियतकालंभृत्यास्वीकरणंपरिक्रयणंतस्मिन्साधकतमंकारकंसंप्रदानसंज्ञंवा
स्यात्। शतेनशतायवापरिक्रीतः। तादर्थ्येचतुर्थीवाच्या। मुक्तयेहरिंभजति। क्लृपिसंपद्यमानेच। भक्तिर्ज्ञानायकल्पतेसंप
द्यतेजायतइत्यादि। उत्पातेनज्ञापितेच। वातायकपिलाविद्युत्। हितयोगेच। ब्राह्मणायहितं॥ क्रियार्थोपपदस्यचक
र्मणिस्थानिनः। क्रियार्थाक्रियाउपपदंयस्यतस्यस्थानिनोऽप्रयुज्यमानस्यतुमुनः कर्मणिचतुर्थीस्यात्। फलेभ्योयाति।
फलान्याहर्तुंयातीत्यर्थः। नमस्कुर्मोनृसिंहाय। नृसिंहमनुकूलयितुमित्यर्थः। एवंस्वयंभुवेनमस्कृत्येत्यादावपि॥ तुमर्थाच्चभाववच
नात्। भाववचनाश्चेतिसूत्रेणयोविहितस्तदन्ताच्चतुर्थीस्यात्। यागाययातियष्टुंयातीत्यर्थः॥ नमःस्वस्तिस्वाहास्वधालंवषड्योगा
च्च। एभिर्योगेचतुर्थीस्यात्। हरयेनमः। उपपदविभक्तेः कारकविभक्तिर्बलीयसी। नमस्करोतिदेवान्। प्रजाभ्यःस्वस्ति। अग्न
येस्वाहा। पितृभ्यःस्वधा। अलमितिपर्याप्त्यर्थग्रहणं। तेनदैत्येभ्योहरिरलं। प्रभुःसमर्थःशक्तइत्यादि। प्रभ्वादियोगेषष्ठ्यपि

साधुः। तस्मैप्रभवतिसएषांग्रामणीरित्यादिनिर्देशात्। तेनप्रभुर्बुभूषुर्भुवनत्रयस्य इतिसिद्धं। वषडिंद्राय। चकारःपुनर्विधानार्थः।
तेनाशीर्विवक्षायांपरामपिचतुर्थीचाशिषीतिषष्ठींबाधित्वाचतुर्थ्येवभवति। स्वस्तिगोभ्योभूयात्॥ मन्यकर्मण्यनादरेविभाषाप्राणिषु।
प्राणिवर्जेमन्यतेःकर्मणिचतुर्थीवास्यात्तिरस्कारे। नत्वांतृणंमन्ये तृणायवा। श्यनानिर्देशात्तनादिकयोगेन। नत्वांतृणंमन्वे। अप्रा
णिष्वित्यपनीयनौकाकान्नशुकशृगालवर्जेष्वितिवक्तव्यं। तेननत्वांनावमन्नंमन्यइत्यत्राप्राणित्वेपिचतुर्थीन। नत्वांशुनेश्वानंवामन्य
इत्यत्रप्राणित्वेपिभवत्येव॥ गत्यर्थकर्मणिद्वितीयाचतुर्थ्यौचेष्टायामनध्वनि। अध्वभिन्नेगत्यर्थानांकर्मण्येतेस्तश्चेष्टायां। ग्रामंग्रा
मायवागच्छति। चेष्टायांकिं। मनसाहरिंव्रजति। अनध्वनीतिकिं। पंथानंगच्छति। गंत्राधिष्ठितेध्वन्येवायंनिषेधः। यदातूत्पथा
त्पंथाएवाक्रमितुमिष्यतेतदाचतुर्थीभवत्येव। उत्पथेनपथेगच्छति॥ ध्रुवमपायेपादानं। अपायोविश्लेषस्तस्मिन्साध्येयद्ध्रुवमवधि
भूतंकारकंतदपादानसंज्ञंस्यात्॥ अपादानेपंचमी। ग्रामादायाति। धावतोश्वात्पतति। कारकंकिं। वृक्षस्यपर्णंपतति। जुगुप्साविराम
प्रमादार्थानामुपसंख्यानं। पापाज्जुगुप्सते। विरमति। धर्मात्प्रमाद्यति॥ भीत्रार्थानांभयहेतुः। भयार्थानांत्राणार्थानांचयोगेभयहेतु
रपादानंस्यात्। चोराद्बिभेति। चोरात्त्रायते। भयहेतुःकिं। अरण्येबिभेति। त्रायतेवा॥ पराजेरसोढः। पराजेःप्रयोगेअसह्योर्थःपा
दानंस्यात्। अध्ययनात्पराजयते। ग्लायतीत्यर्थः। असोढःकिं। शत्रून्पराजयते। अभिभवतीत्यर्थः॥ वारणार्थानामीप्सितः। प्रवृत्ति

सि॰कौ॰रू॰का॰ विघातोवारणं। वारणार्थानांप्रयोगे ईप्सितोर्थोऽपादानंस्यात्। यवेभ्योगांवारयति। ईप्सितः किं। यवेभ्योगांवारयतिक्षेत्रे॥ अंत
७५ र्धौयेनादर्शनमिच्छति। व्यवधानेसतियत्कर्तृकस्यात्मनोदर्शनस्याभावमिच्छतितदपादानंस्यात्। मातुर्निलीयतेकृष्णः। अंतर्द्धौ
किं। चौरान्नदिदृक्षते। इच्छतिग्रहणंकिं। अदर्शनेच्छायांसत्यांसत्यपिदर्शनेयथास्यात्॥ आख्यातोपयोगे। नियमपूर्वकविद्या
स्वीकारेवक्ताप्राक्संज्ञः स्यात्। उपाध्यायादधीते। उपयोगेकिं। नटस्यगाथांशृणोति॥ जनिकर्तुः प्रकृतिः॥ जायमानहेतुरपादानं
स्यात्। ब्राह्मणः प्रजाः प्रजायंते॥ भुवः प्रभवः। भवनंभूः। भूकर्तुः प्रभवस्तथा। हिमवतोगंगाप्रभवति। तत्रप्रकाशत इत्यर्थः॥ ल्यब्
लोपेकर्मण्यधिकरणेच। प्रासादात्प्रेक्षते। आसनात्प्रेक्षते। प्रासादमारुह्यआसनेउपविश्यप्रेक्षत इत्यर्थः। श्वशुराज्जिह्रेति। श्वशु
रंवीक्ष्येत्यर्थः। गम्यमानापिक्रियाकारकविभक्तीनांनिमित्तमित्युक्तं। कस्मात्त्वंनद्याः। यतश्चाध्वकालनिर्माणंतत्रपंचमीतद्यु
क्ताध्वनः प्रथमासप्तम्यौ। कालात्सप्तमीचवक्तव्या। वनाद्ग्रामोयोजनेयोजनंवा। कार्तिक्याआग्रहायणीमासे॥ अन्यारादितरर्तेदिक्छ
ब्दांचूत्तरपदाजाहियुक्ते। एतैर्योगेपंचमी। अन्यइत्यर्थग्रहणं। इतरग्रहणंप्रपंचार्थं। अन्योभिन्नइतरोवाकृष्णात्। आराद्वनात्। ऋते
कृष्णात्। पूर्वोग्रामात्। दिशिदृष्टः शब्दोदिक्शब्दस्तेनसंप्रतिदेशकालवृत्तिनायोगेभवति। चैत्रात्पूर्वः फाल्गुनः। अवयववाचियो ५५
पर गेतुन। तस्यपरमाम्रेडितमिति निर्देशात्। पूर्वंकायस्य। पूर्वकायस्य। अंचूत्तरपदस्यदिक्शब्दत्वेपि षष्ठ्यतसर्थेतिषष्ठींबाधितुं

भ्योद्वितीयास्याच्चात्पंचमीतृतीये।प्रातिपदिकार्थमात्रेविधिरयं।ग्रामस्यदूरंदूराद्दूरेणवा।अंतिकमंतिकादंतिकेनवा।असत्ववचनस्ये
त्यनुवृत्तेर्नेह।दूरःपंथाः॥षष्ठीशेषे।कारकप्रातिपदिकार्थव्यतिरिक्तःस्वस्वामिभावादिःशेषस्तत्रषष्ठी।राज्ञःपुरुषः।कर्मादीना
मपिसंबंधमात्रविवक्षायांषष्ठ्येव।सतांगतं।सर्पिषोजानीते।मातुःस्मरति।एधोदकस्योपस्कुरुते।भजेशंभोश्चरणयोः।फलानां
तृप्तिः॥षष्ठीहेतुप्रयोगे।हेतुशब्दस्यप्रयोगेहेतौद्योत्येषष्ठीस्यात्।अन्नस्यहेतोर्वसति॥सर्वनाम्नस्तृतीयाच।सर्वनाम्नोहेतुशब्द
स्यचप्रयोगेहेतौद्योत्येतृतीयास्यात्षष्ठीच।केनहेतुनावसति।कस्यहेतोः।निमित्तपर्यायप्रयोगेसर्वासांप्रायदर्शनं।किंनिमित्तं
वसति।केननिमित्तेन।कस्मैनिमित्तायेत्यादि॥एवंकिंकार्यंकोहेतुःकिंप्रयोजनमित्यादि।प्रायग्रहणादसर्वनाम्नःप्रथमा
द्वितीयेनस्तः।ज्ञानेननिमित्तेनहरिःसेव्यः।ज्ञानायनिमित्तायेत्यादि॥षष्ठ्यतसर्थप्रत्ययेन।एतद्योगेषष्ठीस्यात्।दिक्शब्देतिपं
चम्याअपवादः।ग्रामस्यदक्षिणतः।पुरःपुरस्तात्।उपर्युपरिष्टात्॥एनपाद्वितीया।एनबंतेनयोगेद्वितीयास्यात्।एनपेतियोगविभाग
त्षष्ठ्यपि।दक्षिणेनग्रामंग्रामस्यवा।एवमुत्तरेण॥दूरांतिकार्थैःषष्ठ्यन्यतरस्यां।एतैर्योगेषष्ठीस्यात्पंचमीच।दूरंनिकटंग्रामाद्ग्रामस्यवा॥
ज्ञोऽविदर्थस्यकरणे।जानतेरज्ञानार्थस्यकरणेशेषत्वेनविवक्षितेषष्ठीस्यात्।सर्पिषोज्ञानं।सर्पिषाउपायेनवर्ततइत्यर्थः॥अधीगर्थ ४६
दयेशांकर्मणि।एषांकर्मणिशेषेषष्ठीस्यात्।मातुःस्मरणं।सर्पिषोदयनं।ईशनंवा॥कृञःप्रतियत्ने।कृञःकर्मणिशेषेषष्ठीगुणाधा

ने।एधोदकस्योपस्करणं॥रुजार्थानांभाववचनानामज्वरेः।भावकर्तृकाणांज्वरिवर्जितानांरुजार्थानांकर्मणिशेषेषष्ठीस्यात्।चौरस्य
रोगस्यरुजा।अज्वरिसंताप्योरितिवाच्यं।रोगस्यचौरज्वरः।चौरसंतापोवा।रोगकर्तृकंचौरसंबंधिज्वरादिकमित्यर्थः॥आशि
षिनाथः।आशीरर्थस्यनाथतेःशेषेकर्मणिषष्ठी।सर्पिषोनाथनं।आशिषीतिकिं।माणवकनाथनं।तत्संबंधिनायाच्ञेत्यर्थः॥जा
सिनिप्रहणनाटक्राथपिषांहिंसायां।हिंसार्थानामेषांशेषेकर्मणिषष्ठीस्यात्।चौरस्योज्जासनं।निप्रौसंहतौविपर्यस्तौव्यस्तौच।चौरस्य
निप्रहणनं।प्रणिहननं।निहननं।प्रहणनंवा।नटअवस्यंदनेचुरादिः।चौरस्योन्नाटनं।चौरस्यक्राथनं।वृषलस्यपेषणं।हिंसायांकिं।धाना
पेषणं॥व्यवहृपणोःसमर्थयोः।शेषेकर्मणिषष्ठीस्यात्।द्यूतेक्रयविक्रयव्यवहारेचानयोस्तुल्यार्थता।शतस्यव्यवहरणं।पणनंवा।स
मर्थयोःकिं।शलाकव्यवहारः।गणनेत्यर्थः।ब्राह्मणपणनं।स्तुतिरित्यर्थः॥दिवस्तदर्थस्य।द्यूतार्थस्यक्रयविक्रयरूपव्यवहारार्थस्य
चदिवःकर्मणिषष्ठीस्यात्।शतस्यदीव्यति।तदर्थस्यकिं।ब्राह्मणंदीव्यति।स्तौतीत्यर्थः॥विभाषोपसर्गे।पूर्वयोगापवादः।शतस्य
शतंवाप्रतिदीव्यति॥प्रेष्यब्रुवोर्हविषोदेवतासंप्रदाने।देवतासंप्रदानकेऽर्थेवर्तमानयोःप्रेष्यब्रुवोःकर्मणोहविर्विशेषस्यवाचकाच्छ
ब्दात्षष्ठीस्यात्।अग्नयेछागस्यहविषोवपायामेदसःप्रेष्यअनुब्रूहिवा।हविषःप्रस्थितस्यविशेषणेप्रतिषेधोवक्तव्यः।इंद्राग्निभ्यां
छागस्यहविर्वपामेदःप्रस्थितंप्रेष्य॥कृत्वोऽर्थप्रयोगेकालेऽधिकरणे।कृत्वोर्थानांप्रयोगेकालवाचिन्यधिकरणेशेषेषष्ठीस्यात्।पंचकृ

सि॰कौ॰कृ॰का॰ त्वोह्नोभोजनं।द्विरह्नोभोजनं।शेषेकिं।द्विरहन्यध्ययने॥कर्तृकर्मणोःकृति।कृद्योगेकर्तरिकर्मणिचषष्ठीस्यात्।कृष्णस्यकृतिः।जगतः
४८ कर्ताकृष्णः।गुणकर्मणिवेष्यते।नेताश्वस्यस्रुघ्नस्यस्रुघ्नंवा।कृतीतिकिं।तद्धितेमाभूत्।कृतपूर्वीकटं।उभयप्राप्तौकर्मणि।उभयोःप्रा
प्तिर्यस्मिन्कृतितत्रकर्मण्येवषष्ठीस्यात्।आश्चर्योगवांदोहोऽगोपेन।स्त्रीप्रत्यययोरकाकारयोर्नायंनियमः।भेदिकाबिभित्सावा
रुद्रस्यजगतः॥शेषेविभाषा।स्त्रीप्रत्ययइत्येके।विचित्राजगतःकृतिर्हरेर्हरिणावा।केचिदविशेषेणविभाषामिच्छंति।शब्दानाम
नुशासनमाचार्येणाचार्यस्यवा।क्तस्यचवर्तमाने।वर्तमानार्थस्यक्तस्ययोगेषष्ठीस्यात्।नलोकेतिनिषेधस्यापवादः।राज्ञांमतोबुद्धः
पूजितोवा॥अधिकरणवाचिनश्च॥क्तस्ययोगेषष्ठी।इदमेषांशयितं।नलोकाव्ययनिष्ठाखलर्थतृनां।एषांप्रयोगेषष्ठीन।लो
केशाः।कुर्वन्कुर्वाणःसृष्टिंहरिः।उ।हरिंदिदृक्षुः।अलंकरिष्णुर्वा।उक।दैत्यान्घातुकोहरिः॥कमेरनिषेधः।लक्ष्म्याःकामुकः।अव्यय।
जगत्सृष्ट्वा।सुखंकर्तुं।निष्ठा।दैत्यान्हतवान्।विष्णुनाहतादैत्याः।खलर्थाः।ईषत्करःप्रपंचोहरिणा।तृन्नितिप्रत्याहारः।शानच्कान
चावितितृन्त्रशब्दादारभ्यात्तृनोनकारात्।शानन्।सोमंपवमानः॥चानश्।आत्मानंमंडयमानः।शतृ।वेदमधीयन्।तृन्।कर्तालो
कान्।द्विषःशतुर्वा।मुरस्यमुरंवाद्विषन्।सर्वोऽयंकारकषष्ठ्याःप्रतिषेधः।शेषषष्ठीतुस्यादेव।ब्राह्मणस्यकुर्वन्।नरकस्यजिष्णुः॥अके
नोर्भविष्यदाधमर्ण्ययोः।भविष्यत्यकस्यभविदाधमर्ण्यार्थेनश्चयोगेषष्ठीनस्यात्।सतःपालकोऽवतरति।व्रजंगामी।शतंदायी॥कृ ४७

पृथग्ग्रहणं।प्राक्प्रत्यग्वाग्रामात्।आरात्।दक्षिणाद्ग्रामात्।आहि।दक्षिणाहिग्रामात्।अपादानेपंचमीतिसूत्रेकार्तिक्याःप्रभृतीति
भाष्यप्रयोगात्।प्रभृतियोगेपंचमी।भवात्प्रभृतिआरभ्यवासेव्योहरिः।अपपरिबहिरितिसमासविधानात्ज्ञापकात्बहिर्योगेपंचमी।
ग्रामाद्बहिः॥अपपरीवर्जने।एतौवर्जनेकर्मप्रवचनीयौस्तः॥आङ्मर्यादावचने।आङ्मर्यादायामुक्तसंज्ञः।वचनग्रहणादभिविधा
वपि॥पंचम्यपाङ्परिभिः।एतैःकर्मप्रवचनीयैर्योगेपंचमीस्यात्।अपहरेःपरिहरेःसंसारः।परिरत्रवर्जने।लक्षणादौतुहरिंपरि।
आमुक्तेःसंसारः।आसकलाद्ब्रह्म॥प्रतिःप्रतिनिधिप्रतिदानयोः।एतयोरर्थयोःप्रतिरुक्तसंज्ञः॥प्रतिनिधिप्रतिदानेचयस्मात्।
अत्रकर्मप्रवचनीयैर्योगेपंचमीस्यात्।प्रद्युम्नःकृष्णात्प्रति।तिलेभ्यःप्रतियच्छतिमाषान्॥अकर्तर्यृणेपंचमी।कर्तृवर्जितंयदृ
णंहेतुभूतंततःपंचमी।शताद्बद्धः।अकर्तरिकिं।शतेनबंधितः॥विभाषागुणेस्त्रियां।गुणेहेतावस्त्रीलिंगेपंचमीवास्यात्।जाड्या
ज्जाड्येनवाबद्धः।गुणेकिं।धनेनकुलं।अस्त्रियांकिं।बुध्यामुक्तः।विभाषेतियोगविभागादगुणेस्त्रियांचक्वचित्।धूमादग्निमान्।
नास्तिघटोऽनुपलब्धेः॥पृथग्विनानानाभिस्तृतीयान्यतरस्यां।एभिर्योगेतृतीयास्यात्पंचमीद्वितीयाच।अन्यतरस्यांग्रहणंसमुच्चया
र्थं।पंचमीद्वितीयेअनुवर्तेते।पृथग्रामेणग्रामाद्ग्रामंवा।एवंविनानाना॥करणेचस्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य।ए
भ्योऽद्रव्यवचनेभ्यःकरणेतृतीयापंचम्यौस्तः।स्तोकेनस्तोकाद्वामुक्तः।द्रव्येतुस्तोकेनविषेणहतः॥दूरांतिकार्थेभ्योद्वितीयाच।ए

श्चः॥पुष्कलकोगंधमृगः।योगविशेषेकिं।वेतनेनधान्यंलुनाति।साध्वसाधुप्रयोगेच।साधुकृष्णोमातरि।असाधुर्मातुले॥य
४८ स्यचभावेनभावलक्षणं।यस्यक्रिययाक्रियांतरंलक्ष्यतेततःसप्तमीस्यात्।गोषुदुह्यमानासुगतः॥अर्हाणांकर्तृत्वेअनर्हाणामक
र्तृत्वेतद्वैपरीत्येच।सत्सुतरत्सु।असंतःआसते।असत्सुतिष्ठत्सु।संतस्तरंति।सत्सुतिष्ठत्सुअसंतस्तरंति।असत्सुतरत्सुसं
तस्तिष्ठंति॥षष्ठीचानादरे।अनादराधिकेभावलक्षणेषष्ठीसप्तम्यौस्तः।रुदतिरुदतोवाप्राव्राजीत्।रुदंतंपुत्रादिकमनादृत्य
सन्यस्तवानित्यर्थः॥स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च।एतैःसप्तभिर्योगेषष्ठीसप्तम्यौस्तः।षष्ठ्यामेवप्राप्तायांपा
क्षिकसप्तम्यर्थंवचनं।गवांगोषुवास्वामी।गवांगोषुवाप्रसूतः।गाएवानुभवितुंजातइत्यर्थः॥आयुक्तकुशलाभ्यांचासेवायां॥
आभ्यांयोगेषष्ठीसप्तम्यौस्तस्तात्पर्ये।आयुक्तोव्यापारितः।आयुक्तःकुशलोवाहरिपूजनेहरिपूजनस्यवा।आसेवायांकिं॥
आयुक्तोगौःशकटेईषद्युक्तइत्यर्थः॥यतश्चनिर्धारणं।जातिगुणक्रियासंज्ञाभिःसमुदायादेकदेशस्यपृथक्करणं।निर्धारणं
यतःततःषष्ठीसप्तम्यौस्तः।नृणांनृषुवाब्राह्मणःश्रेष्ठः।गवांगोषुवाकृष्णाबहुक्षीरा।गच्छतांगच्छत्सुवाधावंतःशीघ्राः।छात्राणां
छात्रेषुवामैत्रःपटुः॥पंचमीविभक्ते।विभागोविभक्तं।निर्धार्यमाणस्ययत्रभेदएवतत्रपंचमीस्यात्।माथुराःपाटलिपुत्रकेभ्यः ४८
आढ्यतराः॥साधुनिपुणाभ्यामर्चायांसप्तम्यप्रतेः।आभ्यांयोगेसप्तमीस्यात्।अर्चायांनतुप्रतेःप्रयोगे।मातरिसाधुर्निपुणोवा

।अर्चायांकिं।निपुणोराज्ञोभृत्यः।इहतत्वकथनेतात्पर्यं।अप्रत्यादिभिरितिवक्तव्यं।साधुर्निपुणोवामातरंप्रतिपरिअनुर्वा॥प्रसितो
त्सुकाभ्यांतृतीयाच।आभ्यांयोगेतृतीयास्यात्।चात्सप्तमी।प्रसितःउत्सुकोवाहरिणाहरौवा॥नक्षत्रेचलुपि।नक्षत्रेप्रकृत्यर्थेस
नियोलुप्संज्ञयालुप्यमानस्यप्रत्ययस्यार्थस्तत्रवर्तमानात्तृतीयासप्तम्यौस्तोऽधिकरणे।मूलेनावाहयेद्देवींश्रवणेनविसर्जयेत्।मू
लेश्रवणेइतिवा।लुपिकिं।पुष्येपानि॥सप्तमीपंचम्यौकारकमध्ये।शक्तिद्वयमध्येयौकालाध्वनौताभ्यामेतेस्तः।अद्यभुक्त्वायंद्व्यहे
द्व्यहाद्वाभोक्ता।कर्तृशक्त्योर्मध्येऽयंकालः।इहस्थोयंक्रोशेक्रोशाद्वालक्ष्यंविध्येत्।कर्तृकर्मशक्त्योर्मध्येक्रोशः।अधिकशब्देनयो
गेसप्तमीपंचम्याविष्येते।तदस्मिन्नधिकमितियस्मादधिकमितिचसूत्रनिर्देशात्।लोकेलोकाद्वाधिकोहरिः॥अधिरीश्वरे।स्वस्वा
मिसंबंधेऽधिःकर्मप्रवचनीयसंज्ञःस्यात्।यस्मादधिकंयस्यचेश्वरवचनंतत्रसप्तमी।अत्रकर्मप्रवचनीययुक्तेसप्तमीस्यात्।उ
पपरार्द्धेहरेर्गुणाः।परार्द्धादधिकाइत्यर्थः।ऐश्वर्येतुस्वस्वामिभ्यांपर्यायेणसप्तमी।अधिविभुरामः।अधिरामेभूः।सप्तमीशौंडै
रितिसमासपक्षेतुरामाधीना।अषडक्षेत्याद्रिनाखः॥विभाषाकृञि।अधिकरोतौप्राक्संज्ञोवास्यादीश्वरेऽर्थे।यदत्रमामधिकरि
ष्यति।विनियोक्ष्यतइत्यर्थः।इहविनियोक्तुरीश्वरत्वंगम्यते।अगतित्वात्तिङिचोदात्तवतीतिनिघातोन।इतिविभक्त्यर्थाः॥श्रीरस्तु
समासःप्रारंभः॥ समर्थःपदविधिः।पदसंबंधीयोविधिःससमर्थाश्रितोबोध्यः॥प्राक्कडारात्समासः।कडाराःकर्मधारयइत्य

तःप्राक्समासइत्यधिक्रियते॥सहसुपा।सहेतियोगोविभज्यते॥सुबंतंसमर्थेनसहसमस्यते।योगविभागस्येष्टसिध्यर्थत्वात्कतिप
यत्तिङंतोत्तरपदोयंसमासः॥सचछंदस्येव।पर्य्यभूषयत्।अनुव्यचलत्॥सुपा।सुप्सुपासहसमस्यते।समासत्वात्प्रातिपदिकत्वे॥सु
पोधातुप्रातिपदिकयोः।एतयोरवयवस्यसुपोलुक्।भूतपूर्वेचरट्इतिनिर्देशात्पूर्वनिपातः।पूर्वंभूतोभूतपूर्वः।इवेनसमासोवि
भक्त्यलोपश्च।जीमूतस्येव॥अव्ययीभावः।अधिकारोयं॥अव्ययंविभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भाव
पश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यांतवचनेषु।अव्ययमितियोगोविभज्यते।अव्ययंसमर्थेनसमस्यतेसोऽव्य
यीभावः॥प्रथमानिर्दिष्टंसमासउपसर्जनं।समासशास्त्रेप्रथमानिर्दिष्टमुपसर्जनसंज्ञंस्यात्॥उपसर्जनंपूर्वं।समासेउपसर्ज
नंप्राक्प्रयोज्यं॥एकविभक्तिचापूर्वनिपाते।विग्रहेयन्नियतविभक्तिकंतदुपसर्जनंस्यात्।नतुतस्यपूर्वनिपातः॥गोस्त्रियोरुपस
र्जनस्य॥उपसर्जनंयोगोशब्दःस्त्रीप्रत्ययांतंचतदंतस्यप्रातिपदिकस्यह्रस्वःस्यात्।अव्ययीभावश्चेत्यव्ययं॥नाव्ययीभावादतोम्त्वपंच मू
म्याः।अदंतादव्ययीभावात्सुपोनलुक्तस्यपंचमींविनाअमादेशः।दिशोर्मध्येमपदिशं।क्लीबेव्ययंत्वपदिशंदिशोर्मध्येविदि
क्स्त्रियामित्यमरः॥तृतीयासप्तम्योर्बहुलं।अदंतादव्ययीभावात्तृतीयासप्तम्योर्बहुलममभावःस्यात्।अपदिशं।अपदिशे ५९
न।अपदिशे।बहुलग्रहणात्सुमद्रमुन्मत्तगंगमित्यादौसप्तम्यानित्यमम्भावः॥विभक्तीत्यादेरयमर्थः।विभक्त्यर्थादिषुवर्त

स्थानांकर्त्तरिवा।षष्ठीवास्यात्।मयाममवासेव्योहरिः।कर्त्तरीतिकिं।गेयोमाणवकःसाम्नां।भव्यगेयेतिकर्त्तरियद्विधानात्।नाभि
हितंकर्म्मअत्रयोगोविभज्यते।कृत्यानां।उभयप्राप्ताविति नेति चानुवर्त्तते।नेननेतव्याःव्रजंगावःकृष्णेन।ततःकर्त्तरिवेत्युक्तोऽर्थः।
तुल्यार्थैरतुलोपमाभ्यांतृतीयान्यतरस्यां।तुल्यार्थैर्योगेतृतीयावास्यात्।पक्षेषष्ठी।तुल्यःसदृशःसमोवाकृष्णस्यकृष्णेनवा।अ
तुलोपमाभ्यांकिं।तुलाउपमावाकृष्णस्यनास्ति॥चतुर्थीचाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः।एतदर्थैर्योगेचतुर्थीवास्यात्। श
आशिषिपक्षेषष्ठीस्यात्।आयुष्यंचिरंजीवितंकृष्णायकृष्णस्यवाभूयात्।एवंमद्रं।भद्रं।कुशलं।निरामयंसुखंशं।अर्थःप्रयोजनं।हितं
पथ्यंभूयात्।आशिषिकिं।देवदत्तस्यायुष्यमस्ति।व्याख्यानात्सर्वत्रार्थग्रहणंमद्रभद्रयोःपर्य्यायत्वादन्यतरोनपठनीयः॥आधारो
धिकरणं।कर्तृकर्म्मद्वारातन्निष्ठक्रियायाआधारःकारकमधिकरणसंज्ञंस्यात्॥सप्तम्यधिकरणेच।अधिकरणेसप्तमीस्यात्।च
काराद्दूरांतिकार्थेभ्यः।औपश्लेषिकोवैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा।कटेआस्ते।स्थाल्यांपचति।मोक्षेइच्छास्ति।सर्वस्मि
न्नात्मास्ति।वनस्यदूरेअंतिकेवा।दूरांतिकार्थेभ्यःइतिविभक्तित्रयेणसहच[illegible]फलितः।क्तस्येन्विषयस्यकर्मण्यु
पसंख्यानं।अधीतीव्याकरणे।अधीतमनेनेतिविग्रहे।इष्टादिभ्यश्चेतिकर्तरीनिः॥निमित्तात्कर्मयोगे।निमित्तमिहफलं।योगः
संयोगसमवायात्मकः।चर्मणिद्वीपिनंहंतिदंतयोर्हंतिकुंजरं।केशेषुचमरींहंतिसीम्निपुष्कलकोहतः।हेतुतृतीयात्रप्राप्ता।सीमांडको

५० त्र मतिसाकल्येनेत्यर्थः। नत्वंतृणभक्षणेतात्पर्यं। अंते।ग्निग्रंथपर्यंतमधीतेसाग्नि॥ यथासादृश्ये। असादृश्येएवयथाशब्दःसमस्यतेनै
नेह। यथाहरिस्तथाहरः। हरेरुपमानत्वंयथाशब्दोद्योतयति। नसादृश्येइतियथार्थइत्येवाप्राप्तंनिषिध्यते॥ यावदवधारणे।
यावन्तःश्लोकास्तावंतो॰च्युतप्रणामायावच्छ्लोकम्॥ सुप्प्रतिनामात्रार्थे। शाकस्यलेशःशाकप्रति। मात्रार्थेकिं। वृक्षंप्रतिविद्योततेविद्युत्।
अक्षशलाकासंख्याःपरिणा। द्यूतव्यवहारेपराजयेएवायंसमासः। अक्षेणविपरीतंवृत्तमक्षपरि शलाकापरि एकपरि॥ विभाषाब
हिरंचवःपंचम्या। अत्रयोगोविभज्यते। विभाषाअधिकारोयं। एतत्सामर्थ्यादेवप्राचीनानांनित्यसमासत्वं। सुप्सुपेतितुनित्यसमासः।
अव्ययमित्यादिसमासविधानात्ज्ञापकात्॥ अपपरिबहिरंचवःपंचम्या। अपविष्णुसंसारः। अपविष्णोः। परिविष्णोः। परिविष्णु। ब
हिर्वनम्। बहिर्वनात्। प्राग्वनं। प्राग्वनात्॥ आङ्मर्यादाभिविध्योः। एतयोराङ्पंचम्यंतेनवासमस्यतेसोव्ययीभावः। आमुक्तिसं
सारः। आमुक्तेः। आबालंहरिभक्तिः। आबालेभ्यः॥ लक्षणेनाभिप्रतीआभिमुख्ये। आभिमुख्यद्योतकावभिप्रतीचिह्नवाचिनास
हप्राग्वत्। अभ्यग्निशलभाःपतंति। अग्निमभि। प्रत्यग्नि। अग्निंप्रति॥ अनुर्यत्समया। यंपदार्थंसमयातेनलक्षणभूतेनानुः
समस्यतेसोव्ययीभावः। अनुवनमशनिर्गतः। वनस्यसमीपंगतइत्यर्थः॥ यस्यचायामः। यस्यदैर्घ्यमनुनाद्योत्यतेतेनलक्षलक्षण ५०
भूतेनानुःसमस्यते। अनुगंगंवाराणसी। गंगायाअनु। गंगादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः॥ तिष्ठद्गुप्रभृतीनिच। एतानिनिपात्य

ते। तिष्ठंतिगावोयस्मिन्कालेसतिष्ठद्गु। दोहनकालः। आयतीगवम्। इहशत्रादेशःपुंवद्भावविरहः। समासांतश्चनिपात्यतेइत्यादि॥ पारेम
ध्येषष्ठ्यावा। पारमध्यशब्दौषष्ठ्यंतेनसहवासमस्येते। एदंतत्वंचानयोर्निपात्यते। पक्षेषष्ठीतत्पुरुषः। पारेगंगादानय। गंगापारात्। म
ध्येगंगात्। गंगामध्यात्। महाविकल्पेनवाक्यमपि। गंगायाःपारात्। गंगायामध्यात्॥ संख्यावंश्येन। वंशोद्विधा। विद्ययाजन्मनाच।
तत्रभवोवंश्यः। तद्वाचिनासहसंख्यावासमस्यते। द्वौमुनीवंश्यौद्विमुनि। व्याकरणस्यत्रिमुनि। विद्यातद्वतामभेदविवक्षायांत्रिमु
निव्याकरणं। एकविंशतिभारद्वाजम्॥ नदीभिश्च। नदीभिःसंख्याप्राग्वत्। समाहारेचायमिष्यते। सप्तगंगं। द्वियमुनम्॥ अन्यप
दार्थेचसंज्ञायां। अन्यपदार्थेविद्यमानंसुबंतंनदीभिःसहनित्यंसमस्यतेसंज्ञायां। विभाषाधिकारेपिवाक्येनसंज्ञानवगमादिहनित्यं
समासः। उन्मत्तगंगं। नामदेशः। लोहितगंगं। समासांताइत्यधिकृत्य॥ अव्ययीभावेशरत्प्रभृतिभ्यः। शरदादिभ्यष्टच्स्यात्समासांतोऽ त्र
व्ययीभावे। शरदःसमीपमुपशरदं। प्रतिविपाशं। शरद्। विपाश्। अनस्। मनस्। उपानह्। दिव्। हिमवत्। अनडुह्। दिश्। दृश्। वि
श्। चेतस्। चतुर्। त्यद्। तद्। यद्। कियत्॥ जरायाजरश्च। उपजरसं॥ प्रतिपरसमनुभ्योक्ष्णः। पस्येतिचप्रत्यक्षं। अक्ष्णःपरमिति
विग्रहेसमासांतविधानसामर्थ्यादव्ययीभावः। परोक्षेलिडितिनिपातनात्परस्यैकारादेशः। परोक्षं। परोक्षाक्रियाइत्यादित्वर्शआद्य
चि। समक्षम्। अन्वक्षम्॥ अनश्च। अन्नंतादव्ययीभावाट्टच्स्यात्॥ नस्तद्धिते। नांतस्यभस्यटेर्लोपःस्यात्तद्धिते। उपराजं। अध्यात्मम्।

सि.कौ.कृ.स. नपुंसकादन्यतरस्यां।अन्नंतं यत् क्लीबं तदंतादव्ययीभावाट्टज्वा। उपचर्मम्।उपचर्म॥ नदीपौर्णमास्याग्रहायणीभ्यः। वाट्टच्।उपनदं।उप
५१ नदि।उपपौर्णमासं।उपपौर्णमासि।उपाग्रहायणं।उपाग्रहायणि॥ झयः। झयंतादव्ययीभावाट्टज्वा।उपसमिधम्।उपसमित्॥गिरे
श्च सेनकस्य।गिर्यंतादव्ययीभावाट्टज्वा।सेनकग्रहणं पूजार्थं।उपगिरं।उपगिरि॥ इत्यव्ययीभावः। तत्पुरुषः।अधिकारोयं प्राग्बहु
व्रीहेः॥ द्विगुश्च।द्विगुरपि तत्पुरुषसंज्ञः स्यात्। इदं सूत्रं त्यक्तुं शक्यं।संख्यापूर्वो द्विगुश्चेति पठित्वा चकारबलेन संज्ञाद्वयसमावेश
स्य सुवचत्वात्।समासांतः प्रयोजनं पंचराजं॥ द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः।द्वितीयांतं श्रितादिप्रकृतिकैः सुबंतैः
वा सह समस्यते स तत्पुरुषः। कृष्णंश्रितः कृष्णश्रितः।दुःखातीतः।तुहिनात्यस्तः।गम्यादीनामुपसंख्यानं।ग्रामंगमी।ग्रामगमी॥
अन्नंबुभुक्षुः।अन्नबुभुक्षुः॥स्वयंक्तेन।द्वितीयेति न संबध्यते योग्यत्वात्।स्वयंकृतस्यापत्यं स्वायंकृतिः॥खट्वाक्षेपे।खट्वाप्रकृतिकं द्वि
तीयांतं क्तांतप्रकृतिकेन सुबंतेन सह समस्यते निंदायां।खट्वारूढो जाल्मः।नित्यसमासोयं।न हि वाक्येन निंदा गम्यते॥सामि।सा
मिकृतं॥ कालाः।क्तेनेत्येव।अत्यंतसंयोगार्थवचनम्।मासप्रमितः।प्रतिपच्चंद्रः।मासं परिच्छेत्तुमारब्धवान्॥अत्यंतसंयोगे च।
कालाइत्येव।अक्तांतार्थं वचनं।मुहूर्तंसुखम्।मुहूर्तसुखं। तृतीया तत्कृतार्थेन गुणवचनेन॥ तत्कृतेति लुप्ततृतीयकं।तृतीयांतं तृती ५३
यांतार्थकृतगुणवचनेनार्थशब्देन च सह प्राग्वत्।शंकुलया खंडः शंकुलाखंडः॥धान्येनार्थो धान्यार्थः।तत्कृतेति किम्।अक्ष्णा काणः।

मानमव्ययं सुबंतेन सह समस्यते सोव्ययीभावः।विभक्तौ तावत्।हरौ इत्यधि हरि।सप्तम्यर्थस्यैवात्र द्योतकोधिः।हरि अधि इत्यलौ ङि
किकं विग्रहवाक्यं।अत्र निपातेनाभिहितेप्यधिकरणे वचनसामर्थ्यात्सप्तमी॥ अव्ययीभावश्च।अयं नपुंसकं स्यात्॥ ह्रस्वो न
पुंसके प्रातिपदिकस्य।गोपायतीति गाः पातीति वा गोपाः तस्मिन्नित्यधिगोपम्।समीपे।कृष्णस्य समीपमुपकृष्णं।समया ग्रामं।निक
षा लंकां।आराद्वनादित्यत्र तु नाव्ययीभावः।अभितः परितः अन्यारादिति द्वितीयापंचम्योर्विधानसामर्थ्यात्।मद्राणां समृद्धिः
नां भृ सुमद्रं।यवनानां ऋद्धिर्दुर्यवनं।विगता ऋद्धिः।मक्षिकाणामभावो निर्मक्षिकं।हिमस्यात्ययो तिहिमं।अत्ययो ध्वंसः।निद्रा संप्रति न युज्यते
इत्यतिनिद्रं।हरिशब्दस्य प्रकाश इति हरि।विष्णोः पश्चादनुविष्णु। पश्चाच्छब्दस्य तु नायं समासः।ततः पश्चात् स्रंस्यत इति भाष्यप्रयो
गात्।योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यानि यथार्थाः।अनुरूपं रूपस्य योग्यमित्यर्थः।अर्थमर्थं प्रति प्रत्यर्थं प्रतिशब्दस्य वी
प्सायां कर्मप्रवचनीयसंज्ञाविधानसामर्थ्यान्न द्योगे द्वितीया गर्भवाक्यमपि।शक्तिमनतिक्रम्य यथाशक्ति।हरेः सादृश्यं सहरि।
वक्ष्यमाणेन सहस्य सः।ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं।चक्रेण युगपदिति विग्रहे॥ अव्ययीभावे चाकाले।सहस्य सः स्यादव्ययी
भावे न तु काले।सचक्रं।काले तु सह पूर्वाह्णं।सदृशः सख्या ससखि।यथार्थत्वेनैव सिद्धे पुनः सादृश्यग्रहणं गुणभूतेपि सादृश्ये यथा
स्यादित्येवमर्थं।क्षत्राणां संपत्तिः सक्षत्रं।ऋद्धेराधिक्यं समृद्धिः।अनुरूपं आत्मभावः संपत्तिरिति भेदः।तृणमप्यपरित्यज्य सतृण

तः॥ अपेतापोढमुक्तपतितापत्रस्तैरल्पशः। एतैः सहाख्यं पंचम्यंतं समस्यते स तत्पुरुषः। सुखापेतः। कल्पनापोढः। चक्रमुक्तः। स्वर्गप
तितः। तरंगापत्रस्तः। अल्पग्रः किं। प्रासादात्पतितः॥ स्तोकांतिकदूरार्थकृच्छ्राणिक्तेन। स्तोकान्मुक्तः। अल्पान्मुक्तः। अंतिकादागतः।
अभ्याशादागतः। दूरादागतः। कृच्छ्रादागतः। पंचम्याः स्तोकादिभ्य इत्यलुक्॥ षष्ठी। सुबंतेन समस्यते। राज्ञः पुरुषो राजपुरुषः॥ याजका
दिभिश्च। एभिः षष्ठ्यंतं समस्यते। तृजकाभ्यां कर्तरीत्यस्य प्रतिप्रसवोयं। ब्राह्मणयाजकः। देवपूजकः। गुणात्तरेण तरब्लोपश्चेति वक्त
व्यं। तरबंतं यद्गुणवाचि तेन समासः तरप्प्रत्ययलोपश्च। न निर्धारण इति पूरणेति च निषेधस्य प्रतिप्रसवोयं। सर्वेषां श्वेततरः सर्वश्वेतः।
सर्वेषां महत्तरः सर्वमहान्। कृद्योगा च षष्ठी समस्यत इति वाच्यं। इध्मप्रव्रश्चनः॥ न निर्धारणे। निर्धारणे या षष्ठी सा न समस्यते। नृणां द्विजः श्रेष्ठः
। प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यं। सर्पिषो ज्ञानं। पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन। पूरणाद्यर्थैः स
दादिभिश्च षष्ठी न समस्यते। पूरणे। सतां षष्ठः। गुणे। काकस्य कार्ष्ण्यं। ब्राह्मणस्य शुक्लाः। यदा प्रकरणादिना दंता इति विशेष्यं ज्ञात
तदेदमुदाहरणं। अनित्योयं गुणे न निषेधः। संज्ञाप्रमाणत्वादिसादिनिर्देशात्। तेनार्थगौरवं बुद्धिमांद्यमित्यादि सिद्धं। सुहितार्थास्तृ
प्त्यर्थाः। फलानां सुहितः। तृप्तिसमास स्वस्यादेव। स्वरे विशेषः। शतृ शानच्। द्विजस्य कुर्वन्कुर्वाणो वा। किंकर इत्यर्थः। अव्ययं। ब्राह्मण ५२
स्य कृत्वा। पूर्वोत्तरसाहचर्यात् कृदव्ययमेव गृह्यते। तेन तदुपरीत्यादि सिद्धमिति रक्षितः। तव्ये। ब्राह्मणस्य कर्तव्यं। तव्यतानुभवस्येच। स्वक

र्तव्यं। स्वरे भेदः॥ समानाधिकरणे। तक्षकस्य सर्पस्य। विशेषणसमासस्त्विह बहुलग्रहणान्न। गोर्धेनोरित्यादि तु पोटायुवतीत्यादीनां विश
ष्यंतरेऽचरितार्थानां परत्वाद्बाधकः षष्ठीसमासः प्राप्तः सोप्यनेन वार्यते॥ क्तेन च पूजायां। मतिबुद्धीति सूत्रेण विहितो यः क्तस्तदंते
न षष्ठी न समस्यते। राज्ञां मतो बुद्धः पूजितो वा। राजपूजित इत्यादौ तु भूते क्तांतेन सह तृतीयांतस्य समासः॥ अधिकरणवाचिना च।
क्तेन षष्ठी न समस्यते। इदमेषामासितं गतं भुक्तं वा। कर्मणि च। उभयप्राप्तौ कर्मणीति या षष्ठी सा न समस्यते। आश्चर्यो गवां दोहो गो
पेन॥ तृजकाभ्यां कर्तरि। कर्त्रर्थे तृजकाभ्यां षष्ठ्या न समासः। अपां स्रष्टा। वज्रस्य भर्ता। ओदनस्य पाचकः। कर्तरि किं। इक्षूणां भक्षण
मिक्षुभक्षिका। पत्यर्थभर्तृशब्दस्य याजकादित्वात्समासः। भूभर्ता। कथं तर्हि घटानां निर्मातुस्त्रिभुवनविधातुश्च कलह इति। शेषषष्ठ्या
समास इति कैयटः॥ कर्तरि च। कर्तृषष्ठ्या अकेन न समासः। भवतः शायिका। नेह तृजनुवर्तते। तद्योगे कर्तुरभिहितत्वेन कर्तृषष्ठ्या अ २
भावात्॥ नित्यं क्रीडाजीविकयोः। एतयोरर्थयोरकेन नित्यं षष्ठी समस्यते। उद्दालकपुष्पभंजिका। क्रीडाविशेषस्य संज्ञा। संज्ञायामिति
भावे ण्वुल्। जीविकायां। दंतलेखकः। तत्र क्रीडायां विकल्पे प्राप्ते जीविकायां तृजकाभ्यां कर्तरीति निषेधे प्राप्ते वचनं॥ पूर्वापराधरो
त्तरमेकदेशिनैकाधिकरणे। अवयविना सह पूर्वादयः समस्यंते एकत्वसंख्याविशिष्टश्चेदवयवी। षष्ठीसमासापवादः। पूर्वं कायस्य पूर्व
कायः। अपरकायः। एकदेशिना किं। पूर्वं नाभेः कायस्य। एकाधिकरणे किं। पूर्वश्छात्राणां। सर्वोप्येकदेशोह्ना सह समस्यते। संख्याविसाये

तिज्ञापकात्। मध्याह्नः। सायाह्नः। केचित्तु सर्वएकदेशः कालेन समस्यते। नत्वह्नैव ज्ञापकस्य सामान्यापेक्षत्वात्। तेन मध्यरात्रः। उपारतः
पश्चिमरात्रगोचरा इत्यादि सिद्धमित्याहुः॥ अर्धं नपुंसकं। समांशकवाच्यर्धशब्दो नित्यं क्लीबे स प्राग्वत्। एकविभक्तावषष्ठ्यंतवचनं। ए
कदेशिसमासविषयकोयं उपसर्जनसंज्ञानिषेधः। तेन पंचखट्वीत्यादि सिध्यति। अर्धं पिप्पल्या अर्धपिप्पली। क्लीबे किं। ग्रामार्धः।
द्रव्यैक्य एव। अर्धं पिप्पलीनां॥ द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां। एतान्येकदेशिना सह प्राग्वद्वा। द्वितीयं भिक्षाया द्वितीयभि
स्यां क्षा। एकदेशिना किं। द्वितीयं भिक्षाया भिक्षुकस्य। अन्यतरस्यांग्रहणसामर्थ्यात्पूरणगुणेति निषेधं बाधित्वा पक्षे षष्ठीसमासः। भिक्षाद्विती
यं॥ प्राप्तापन्ने च द्वितीयया। पक्षे द्वितीया श्रितेति समासः। प्राप्तो जीविकां प्राप्तजीविकः। जीविकाप्राप्तः। आपन्नजीविकः। जीविकापन्नः।
३ इह सूत्रे द्वितीयया अ इति छित्त्वा आकारोपि विधीयते। तेन जीविकां प्राप्ता स्त्री प्राप्तजीविका। आपन्नजीविका॥ कालाः परिमाणि
ना। परिच्छेद्यवाचिना सुबंतेन सह कालाः समस्यंते। मासो जातस्य यस्य स मासजातः। द्व्यहजातः। द्वयोरह्नोः समाहारो द्व्यहः। द्व्यहो
जातस्येति विग्रहः। उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानं। द्वे अहनी जातस्य यस्य द्व्यह्नजातः। अह्नोह्न इति
वक्ष्यमाणोह्नादेशः। पूर्ववत्तु न संख्यादिः समाहार इति तन्निषेधः॥ सप्तमी शौंडैः। सप्तम्यंतं शौंडादिभिः सह प्राग्वद्वा। अक्षेषु शौंडः अक्ष
शौंडः। अधिशब्दोत्र पठ्यते। अध्युत्तरपदादिति खः। ईश्वराधीनः॥ सिद्धशुष्कपक्वबंधैश्च। एतैः सप्तमी प्राग्वत्। सांकाश्यसिद्धः। ५२

पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः। तृतीयांतमेतैः प्राग्वत्। मासपूर्वः। मातृसदृशः। पितृसमः। ऊनार्थः। माषोनं का
र्षापणं। माषविकलम्। वाक्कलहः। आचारनिपुणः। गुडमिश्रः। आचारश्लक्ष्णः। मिश्रग्रहणे सोपसर्गस्यापि ग्रहणं। मिश्रं चानुपस
र्गमसंधाविति त्वनुपसर्गग्रहणात्। गुडसंमिश्रा धानाः। अवरस्योपसंख्यानं। मासेनावरो मासावरः॥ कर्तृकरणे कृता बहुलं। कर्तरि क
रणे च तृतीया कृदंतेन बहुलं प्राग्वत्। हरिणा त्रातो हरित्रातः। नखैर्भिन्नो नखभिन्नः। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं। नखनि
र्भिन्नः। कृता किं। काष्ठैः पचतितरां। बहुलं किं दात्रेण लूनवानित्यादौ समासो न॥ कृत्यैरधिकार्थवचने। स्तुतिनिंदाफलकमर्थवादवच
नमधिकार्थवचनं। तत्र कर्तरि करणे च तृतीया कृत्यैः सह प्राग्वत्। वातच्छेद्यानि तृणानि। काकपेया नदी॥ अन्नेन व्यंजनं। संस्कार
कद्रव्यवाचकं तृतीयांतमन्नेन प्राग्वत्। दध्ना ओदनो दध्योदनः। इहांतर्भूतोपसेकक्रियाद्वारा सामर्थ्यं॥ भक्ष्येण मिश्रीकरणं। गुडेन
धानाः गुडधानाः। मिश्रणक्रियाद्वारा सामर्थ्यं॥ चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः। चतुर्थ्यंतार्थाय यत्तद्वाचिनार्थादिभिश्च चतुर्थ्यं त
तं वा प्राग्वत्। तदर्थेन प्रकृतिविकृतिभाव एव। बलिरक्षितग्रहणाद्ज्ञापकात्। यूपाय दारु यूपदारु। नेह। रंधनाय स्थाली। अश्व
तत्पुरुष घासादयस्तु षष्ठीसमासाः। अर्थेन नित्यसमासो विशेष्यलिंगता चेति वक्तव्यं। द्विजायायं द्विजार्थः सूपः। द्विजार्था यवागूः। द्विजा
र्थं पयः। भूतबलिः। गोहितं। गोसुखं। गोरक्षितं॥ पंचमी भयेन। चोराद्भयं चोरभयं। भयभीतभीतिभीभिरिति वाच्यं। वृकभी

यामेवेतिनियमार्थंसूत्रं। पूर्वेषुकामशमी। सप्तर्षयः। नेह। उत्तरावृक्षाः। पंचब्राह्मणाः॥ तद्धितार्थोत्तरपदसमाहारेच। तद्धितार्थेविषये
५७ उत्तरपदेचपरतःसमाहारेचवाच्येदिक्संख्येप्राग्वत्तथा। पूर्वस्यांशालायांभवःपौर्वशालः। समासेकृतेदिक्पूर्वपदादसंज्ञायांञ
इतिञः। सर्वनाम्नोवृत्तिमात्रेपुंवद्भावः। आपरशालः। पूर्वाशालाप्रियायस्येतित्रिपदेबहुव्रीहौकृतेप्रियाशब्देउत्तरपदेपूर्वयो
स्तत्पुरुषः। तेनशालाशब्देआकारउदात्तः। पूर्वशालाप्रियः। दिक्समाहारोनास्त्यनभिधानात्। संख्यायास्तद्धितार्थेतुषण्णांमा
तॄणांअपत्यंषाण्मातुरः। पंचगावोधनंयस्येतित्रिपदबहुव्रीहावचांतरतत्पुरुषस्यविकल्पेप्राप्ते। द्वंद्वतत्पुरुषयोरुत्तरपदेनि
त्यसमासवचनं॥ गोरतद्धितलुकि। गोंतात्तत्पुरुषाट्टच्स्यात्समासांतोनतुतद्धितलुकि। पंचगवधनः। पंचानांगवांसमाहारः॥ ॥
संख्यापूर्वोद्विगुः। तद्धितार्थेत्यत्रोक्तःसंख्यापूर्वोद्विगुःस्यात्॥ द्विगुरेकवचनं। द्विग्वर्थःसमाहारएकवत्। सनपुंसकमितिनपुंसकत्वम्
पंचगवं॥ कुत्सितानिकुत्सनैः। कुत्स्यमानानिकुत्सनैःसहप्राग्वत्। वैयाकरणखसूचिः। मीमांसकदुर्दुरूढः॥ पापाणकेकुत्सितैः॥
पूर्वसूत्रापवादः। पापनापितः। अणककुलालः॥ उपमानानिसामान्यवचनैः। घनश्यामः। इहपूर्वपदंतत्सदृशेलाक्षणिकमि
तिस्वचयितुंलौकिकविग्रहेइवशब्दःप्रयुज्यते। पूर्वनिपातनियमार्थंसूत्रं॥ उपमितंव्याघ्रादिभिःसामान्याप्रयोगे। उपमेयं ५७
व्याघ्रादिभिःसहप्राग्वत्साधारणधर्मस्यप्रयोगेअसति। विशेष्यस्यपूर्वनिपातार्थंसूत्रं। पुरुषव्याघ्रः। नृसोमः। व्याघ्रादिराकृति

गणः। सामान्याप्रयोगेकिं। पुरुषोव्याघ्रइवशूरः॥ विशेषणंविशेष्येणबहुलं। भेदकंसमानाधिकरणेनभेद्येनबहुलंप्राग्वत्। नी
लमुत्पलंनीलोत्पलं। बहुग्रहणात्क्वचिन्नित्यं। कृष्णसर्पः। क्वचिन्न। रामोजामदग्न्यः॥ पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवी
राश्च। पूर्वनिपातनियमार्थमिदं। पूर्ववैयाकरणः। अपराध्यापकः। अपरस्यार्धेपश्चभावोवक्तव्यः। अपरस्थासावर्धश्चपश्चार्धः।
कथमेकवीरइति। पूर्वकालैकेतिबाधित्वापरत्वादनेनसमासेवीरैकइतिहिस्यात्। बाहुलकाद्भविष्यति॥ श्रेण्यादयःकृतादिभिः। श्रेण्या
दिषुच्व्यर्थवचनं। अश्रेणयःश्रेणयःकृताः। श्रेणिकृताः॥ क्तेननञ्विशिष्टेनानञ्। कृतंचतदकृतंचकृताकृतं। शाकपार्थिवादीनांसिद्ध
येउत्तरपदलोपस्योपसंख्यानं। शाकप्रियःपार्थिवःशाकपार्थिवः। देवब्राह्मणः॥ सन्महत्परमोत्तमोत्कृष्टाःपूज्यमानैः। सद्वैद्यः। व
क्ष्यमाणेनमहतआकारः। महावैयाकरणः। पूज्यमानैःकिं। उत्कृष्टोगौः। पंकादुद्धृतइत्यर्थः॥ वृंदारकनागकुंजरैःपूज्यमानम्। गो
वृंदारकः। व्याघ्रादेराकृतिगणत्वादेवसिद्धेसामान्यप्रयोगार्थंवचनं॥ पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रि
याध्यापकधूर्तैर्जातिः॥ तत्पुरुषःसमानाधिकरणःकर्मधारयः। पुंवत्कर्मधारयजातीयदेशीयेषु। कर्मधारयेजातीयदेशीययो
श्चपरतोभाषितपुंस्कात्परऊङभावोयस्मिंस्तथाभूतंपूर्वंपुंवत्। पूरणीप्रियादिष्वप्राप्तःपुंवद्भावोविधीयते। महानवमी। कृष्णचतुर्द
शी। महाप्रिया। तथाकोपधादेःप्रतिषिद्धःपुंवद्भावःकर्मधारयादौप्रतिप्रसूयते। पाचकस्त्री। दत्तभार्या। पंचमभार्या। शोभनभार्या।
प्रयोगार्थंवचनं॥ कतरकतमौजातिपरिप्रश्ने। कतरकठः। कतमकलापः। गोत्रंचचरणैःसहेतिजातित्वं॥ किंक्षेपे। कुत्सितोराजा

सि·कौ·स·स· स्फकेशीभार्या। ब्राह्मणभार्या। एवंपाचकजातीया। पाचकदेशीयेत्यादि। इभपोटा। पोटास्त्रीपुंसलक्षणा॥ इभयुवतिः। अग्निस्तोकः। उदश्वि
५५ त्कतिपयं। गृष्टिः सकृत्प्रसूता। गोगृष्टिः। धेनुर्नवसूतिका। गोधेनुः। वशावंध्या। गोवशा। वेहद्गर्भोपघातिनी। गोवेहत्। बष्कयणीतरुण
वत्सा। गोबष्कयणी। कठप्रवक्ता। कठश्रोत्रिया। कठाध्यापकः। कठधूर्तः॥ प्रशंसावचनैश्च। एतैः सहजातिः समस्यते। गोमतल्लिका। गोम
चर्चिका। गोप्रकांडं। गवोद्धः। गोतल्लजः। प्रशस्तागौरित्यर्थः। मतल्लिकादयोनियतलिंगाः। नतुविशेष्यनिघ्नाः। जातिः किं। कुमारीम
तल्लिका॥ युवाखलतिपलितवलिनजरतीभिः। पूर्वनिपातनियमार्थंसूत्रं। लिंगविशिष्टपरिभाषयायुवतिशब्दोपिसमस्यते। युवाखल
तिः युवखलतिः। युवतिः खलती युवखलती। युवजरती। युवत्यामेवजरत्वधर्मोपलंभेनतद्रूपारोपात्सामानाधिकरण्यं॥ कृत्यतुल्या
ख्या अजात्या। भोज्योष्णं। तुल्यश्वेतः। सदृशश्वेतः। अजात्याकिं। भोज्य ओदनः। प्रतिषेधात्सामर्थ्याद्विशेषणसमासोपिन॥ वर्णोव
र्णेन। समानाधिकरणेनसहप्राग्वत्। कृष्णसारंगः॥ कडाराः कर्मधारये। कडारादयः शब्दाः कर्मधारयेवापूर्वंप्रयोज्याः। कडारजैमि
निः। जैमिनिकडारः॥ कुमारश्रमणादिभिः। कुमारीश्रमणा। कुमारश्रमणा। इहगणेश्रमणाप्रव्रजितागर्भिणीत्यादयः स्त्रीलिंगाः पठ्य
न्ते। लिंगविशिष्टपरिभाषायाएतदेवज्ञापकंबोध्यं॥ चतुष्पादोगर्भिण्या। चतुष्पाज्जातिवाचिनागर्भिणीशब्देनसहप्राग्वत्। गोगर्भिणी।
मयूरव्यंसकादयश्च। एतेनिपात्यंते। मयूरोव्यंसकोमयूरव्यंसकः। व्यंसकोधूर्तः। उदक्चअवाक्चउच्चावचं। निश्चितंचप्रचितंचनिश्च ५५

आतपशुष्कः। स्थालीपक्वः। चक्रबंधः॥ ध्वांक्षेणक्षेपे॥ ध्वांक्षवाचिनासहसप्तम्यंतंप्राग्वद्वानिंदायां। तीर्थेध्वांक्षइवतीर्थध्वांक्षः। तीर्थका
कः। क्षेपेकिं। तीर्थेध्वांक्षस्तिष्ठति॥ कृत्यैर्ऋणे। सप्तम्यंतंकृत्यप्रत्ययांतैः सहप्राग्वदावश्यके। मासदेयमृणं। ऋणग्रहणंनियोगोपल
क्षणार्थं। पूर्वाह्णेगेयंसाम। ऋणेकिं। तत्पुरुषेकृतिबहुलमित्यलुक्। मासेदेयाभिक्षा॥ संज्ञायां। सप्तम्यंतंसुपाप्राग्वत्संज्ञायाम्।
वाक्येनसंज्ञानवगमान्नित्यसमासोयं। अरण्येतिलकाः। वनेकसेरुकाः। हलदंतादितिसप्तम्याअलुक्॥ क्तेनाहोरात्रावयवाः
अहोरात्रैश्चावयवाः सप्तम्यंताः क्तांतेनसहप्राग्वत्। पूर्वाह्णकृतं। अपराह्णकृतं। मध्यरात्रकृतं। अवयवग्रहणंकिं। अह्निदृष्टं। तत्र।
तत्रेत्येतत्सप्तम्यंतंक्तांतेनसहप्राग्वद्वा। तत्रभुक्तं॥ क्षेपे। सप्तम्यंतंक्तांतेनसहप्राग्वत्क्षेपे। अवतप्तेनकुलस्थितं। तवएतत्॥ पात्रेस
मितादयश्च। एतेनिपात्यंतेक्षेपे। पात्रेसमिताः। भोजनसमयेएवसंगताः। नतुकार्ये। गेहेशूरः। गेहेनर्दी। आकृतिगणोयं। चकारो
वधारणार्थः। तेनैषांसमासांतरेघटकतयाप्रवेशोन। तेनपरमाः पात्रेसमिताइतिवाक्यं। नतुपरमपात्रेसमिताइति॥ पूर्वका मेव
लैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन। विशेषणंविशेष्येणेतिसिद्धेपूर्वनिपातनियमार्थंसूत्रं। एकवीरस्य॥ दि
क्संख्येसंज्ञायामितिनियमबाधनार्थंच। पूर्वंस्नातः पश्चादनुलिप्तः स्नातानुलिप्तः। एकनाथः। सर्वयाज्ञिकाः। जरन्नैयायिकाः।
पुराणमीमांसकाः। नवपाठकाः। केवलवैयाकरणाः॥ दिक्संख्येसंज्ञायां। समानाधिकरणेनेत्यापादपरिसमाप्तेरधिकारः। संज्ञा

सि·कौ·कृ·स·
५६

कभावो निपातनात्। नक्षरतीति नक्षत्रं। क्षीयतेः क्षरतेर्वा क्षत्रमिति निपात्यते। नक्रामतीति नक्रः॥ क्रमेर्डः। नअकमस्मिन्निति नाकः॥ नगोप्रा
णिष्वन्यतरस्यां। नगइत्यत्र नञ्प्रकृत्या। नगाः अगाः पर्वताः। अप्राणिषु किं। अगो वृषलः शीतेन। नित्यं क्रीडेत्यतो नित्यमित्यनुवर्तमाने।
कुगतिप्रादयः। एते समर्थेन नित्यं समस्यंते। कुत्सितपुरुषः कुपुरुषः। गतिश्चेत्यनुवर्तमाने॥ ऊर्यादिच्विडाचश्च। एते क्रियायोगे गतिसंज्ञाः
स्युः। ऊरीकृत्य। शुक्लीकृत्य। पटपटाकृत्य। कारिकाशब्दस्योपसंख्यानं। कारिका क्रिया। कारिकाकृत्य॥ अनुकरणं चानितिपरं। खाट्
कृत्य। अनितिपरं किं। खाडिति कृत्वा निरष्ठीवत्॥ आदरानादरयोः सदसती। सत्कृत्य। असत्कृत्य॥ भूषणेऽलं। अलंकृत्य। भूषणे किं।
अलं कृत्वौदनं गतः। पर्याप्तमित्यर्थः। अनुकरणमित्यादित्रिसूत्री स्वभावात्कृञ्विषया॥ अंतरपरिग्रहे। अंतर्हत्य। मध्ये हत्वेत्यर्थः। अप
रिग्रहे किं। अंतर्हत्वा गतः। हतं परिगृह्य गत इत्यर्थः॥ कणेमनसी श्रद्धाप्रतीघाते। कणेहत्य पयः पिबति। मनोहत्य। कणेशब्दः सप्तमीप्रति
रूपको निपातोभिलाषातिशये वर्तते। मनःशब्दोप्यत्रैव॥ पुरोव्ययम्। पुरस्कृत्य॥ अस्तं च। अस्तमिति मांतमव्ययं गतिसंज्ञं स्यात्। अस्तंगत्य।
अच्छगत्यर्थवदेषु। अव्ययमित्येव। अच्छगत्य। अच्छोद्य। अभिमुखं गत्वा उक्त्वा चेत्यर्थः। अव्ययं किं। जलमच्छं गच्छति॥ अदोनुपदेशे॥
अदःकृत्य। अदःकृतं। परंप्रत्युपदेशोप्रत्युदाहरणं॥ तिरोंतर्धौ। तिरोभूय॥ विभाषा कृञि। तिरःकृत्य। तिरस्कृत्य। तिरःकृत्वा॥ उ
पाजेन्वाजे। एतौ कृञि वा गतिसंज्ञौ स्तः। उपाजेकृत्य। उपाजेकृत्वा। अन्वाजेकृत्य। अन्वाजेकृत्वा। दुर्बलस्य बलमाधायेत्यर्थः॥ सा

क्षात्प्रभृतीनि च। कृञि वा गतिसंज्ञानि स्युः। च्व्यर्थ इति वक्तव्यं। साक्षात्कृत्य। साक्षात्कृत्वा। लवणंकृत्य। लवणंकृत्वा। मांतत्वं निपातनात्॥
अनत्याधान उरसिमनसी। उरसिकृत्य। उरसिकृत्वा। अभ्युपगम्येत्यर्थः। मनसिकृत्य। मनसिकृत्वा। निश्चित्येत्यर्थः। अत्याधानमुपश्ले
षः। तत्र न। उरसिकृत्वा पाणिं शेते॥ मध्येपदेनिवचने च। एते कृञि गतिसंज्ञाः स्युः अनत्याधाने। मध्येकृत्य। मध्येकृत्वा। पदेकृत्य। प
देकृत्वा। निवचनेकृत्य। निवचनेकृत्वा। वाचं नियम्येत्यर्थः॥ नित्यं हस्तेपाणावुपयमने। कृञि। उपयमनं विवाहः। स्वीकारमात्रमि
त्यन्ये। हस्तेकृत्य। पाणौकृत्य॥ प्राध्वं बंधने। प्राध्वमित्यव्ययं। प्राध्वंकृत्य। बंधनेनानुकूलं कृत्वेत्यर्थः। प्रार्थनादिना त्वानुकूल्यकरणे
प्राध्वं कृत्वा॥ जीविकोपनिषदावौपम्ये॥ जीविकामिव कृत्वा जीविकाकृत्य। उपनिषदमिव कृत्वा उपनिषत्कृत्य। औपम्ये किं। जीवि
कां कृत्वा॥ प्रादिग्रहणमगत्यर्थं। सुपुरुषः॥ अत्र वार्तिकानि। प्रादयो गताद्यर्थे प्रथमया। प्रगत आचार्यः प्राचार्यः। अत्यादयः क्रांताद्यर्थे द्विती
य यया। अतिक्रांतो मालां अतिमालः। अवादयः क्रुष्टाद्यर्थे तृतीया। अवक्रुष्टः कोकिलया अवकोकिलः। पर्यादयो ग्लानाद्यर्थे चतुर्थ्या।
परिग्लानोध्ययनाय पर्यध्ययनः। निरादयः क्रांताद्यर्थे पंचम्या। निष्क्रांतः कौशांब्याः निष्कौशांबिः। कर्मप्रवचनीयानां निषेधः। वृक्षं
प्रति॥ तत्रोपपदं सप्तमीस्थं। सप्तम्यंते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुंभादि तद्वाचकं पदमुपपदसंज्ञं स्यात्॥ तस्मिंश्च सत्येव वक्ष्यमाणः
प्रत्ययः स्युः॥ उपपदमतिङ्॥ उपपदं सुबंतं समर्थेन नित्यं समस्यते। अतिङ्। तत्पुरुषः समासः। कुंभं करोतीति कुंभकारः। इह कुंभअस्कारङस लोकि

सि॰कौ॰स॰स॰
५७

कं प्रक्रियावाक्यं। अतिङ् किं। माभवान्भूत्॥ माङि लुङीति सप्तमी निर्देशान्माङुपपदं। अतिङ्ग्रहणं ज्ञापयति सुप्सुपेत्येतन्नेहानुवर्तत इति।
पूर्वसूत्रेपि गतिग्रहणं पृथक्कृत्वातिङ्ग्रहणं तत्राप्यपकृष्यते। सुपेति च निवृत्तं। तथाच गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्
सुबुत्पत्तेरिति सिद्धं। व्याघ्री। अश्वक्रीती। कच्छपी॥ अमैवाव्ययेन। अमैव तुल्यविधानं यदुपपदं तदेवाव्ययेन समस्यते। स्वादुंकारं। तदेवे
ति किं। नेह॥ कालसमयवेलासु तुमुन्। कालः समयो वेला वा भोक्तुं। अमैवेति किं। अग्रेभोजं। अग्रेभुक्त्वा। विभाषाग्रेप्रथमपूर्वेष्विति क्त्वाण
मुलौ। अमा चान्येन तुल्यविधानमेतत्॥ तृतीयाप्रभृतीन्यन्यतरस्यां। उपदंशस्तृतीयायामित्यादीनि उपपदानि अमंतेनाव्ययेन सह वास
मस्यंते। मूलकेनोपदंशं भुंक्ते मूलकोपदंशं॥ क्त्वा च। तृतीयाप्रभृतीन्युपपदानि क्त्वांतेन सह वा समस्यंते। उच्चैः कृत्य। उच्चैः कृत्वा। अव्ययेयथाभि
प्रेताख्याने कृञः क्त्वाणमुलौ इति क्त्वा। तृतीप्रभृतीनीति किं। अलं कृत्वा। खलु कृत्वा। तत्पुरुषस्यांगुलेः संख्याव्ययादेः। संख्याव्ययादे
रंगुल्यंतस्य तत्पुरुषस्य समासांतोऽच्स्यात्। द्वे अंगुली प्रमाणमस्य द्व्यंगुलं दारु। निर्गतमंगुलिभ्यो निरंगुलं॥ अहः सर्वैकदेशसंख्यात
पुण्याच्च रात्रेः। एभ्यो रात्रेरच्स्याच्चात्संख्याव्ययादेः। अहर्ग्रहणं द्वंद्वार्थं। अहश्च रात्रिश्च अहोरात्रः। सर्वा रात्रिः सर्वरात्रः। पूर्वं रात्रेः पू
र्वरात्रः। संख्यातरात्रः। पुण्यरात्रः। द्वयो रात्र्योः समाहारो द्विरात्रं। अतिक्रांतो रात्रिमतिरात्रः॥ राजाहःसखिभ्यष्टच्। एतदंतात्तत्पुरुषा ५७
ट्टच्स्यात्। परमराजः। अतिराजी। कृष्णसखः॥ अह्नष्टखोरेव। टेर्लोपः स्यान्नान्यत्र। उत्तमाहः। द्वे अहनी भृतो द्व्यहीनः। तद्धितार्थे द्विगुः।

प्तं। नास्ति किंचन यस्य अकिंचनः। आख्यातमाख्यातेन क्रियासातत्ये। अश्नीतपिबतेत्येवं सततं यत्राभिधीयते साश्नीतपिबता। पचत
भृज्जता। खादतमोदता। नास्ति कुतोभयं यस्य स अकुतोभयः। अन्यो राजा राजांतरं। चिदेव चिन्मात्रं। एहीडादयोन्यपदार्थे। एहीडं
नियस्मिन्कर्मणि तदेहीडं। एहियवं। उद्धर कोष्ठात् उत्सृज रेहीति यस्यां क्रियायां सा उद्धरोत्सृजा। उद्धमविधमा। असात्तस्यार्थमिह पाठः।
जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति। जहीत्येतत्कर्मणा बहुलं समस्यते आभीक्ष्ण्ये गम्ये समासेन चेत्कर्ताभिधीयते इत्यर्थः।
जहिजोडः। जहिस्तंबः। नास्ति कुतोभयं यस्य स अकुतोभयः। अन्यो राजा राजांतरं। चिदेव चिन्मात्रं। अविहितलक्षणस्तत्पुरुषस्त
मयूरव्यंसकादिषु द्रष्टव्यः॥ ईषदकृता। ईषदित्ययं शब्दः कृदंतेन समस्यते। ईषत्पिंगलः। ईषद्गुणवचनेनेति वाच्यं। ईषद्रक्तं। न
ञ्। नञ्सुपा समस्यते॥ नलोपो नञः। नञो नस्य लोपः स्यादुत्तरपदे। अब्राह्मणः। तस्मान्नुडचि। लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडाग
मः स्यात्। अनश्वः। अर्थाभावे अव्ययीभावेन सहायं विकल्प्यते। रक्षोहागमलघ्वसंदेहाः प्रयोजनमिति। अदुत्तायामसंहितमिति
च भाष्यवार्तिकप्रयोगात्। तेनानुपलब्धिरविवादो विघ्नमित्यादि सिद्धं। नञो नलोपस्तिङि क्षेपे। अपचसि त्वं जाल्म। नैकधेत्यादौ तु
न शब्देन सह सुप्सुपेति समासः। नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या। पादिति त्रात्रंतः।
विदा इत्यस्कृन्नेतः। नसत्या असत्याः। न असत्या नासत्याः। न मुंचतीति नमुचिः। नकुलस्य। नखमस्य। न स्त्री न पुमान् स्त्रीपुंसयोः पुंस

 वानरस्था ॥ उत्तरमृगपूर्वाच्च सक्थ्नः । चादुपमानात् । उत्तरसक्थं । मृगसक्थं । पूर्वसक्थं । फलकमिव सक्थि फलकसक्थं ॥ नावो द्विगोः ।
 नौशब्दांताद्द्विगोष्टच् स्यान्नतु तद्धितलुकि । द्वाभ्यां नौभ्यामागतो द्विनावरूप्यः । द्विगोर्लुगनपत्य इत्यत्र अचीत्यस्यानुपकर्षणाड्डल
देलुक् । पंचनावप्रियः । द्विनावं । त्रिनावं । अतद्धितलुकीति किं । पंचभिर्नौभिः क्रीता पंचनौः ॥ अर्धाच्च । अर्धान्नावष्टच् स्यात् । ना
वोर्धमर्धनावं । क्लीबत्वं लोकात् । खार्याः प्राचाम् । द्विगोरर्धाच्च खार्या टज्वा । द्विखारं । द्विखारि । अर्धखारं । अर्धखारि । द्वित्रिभ्या
मंजलेः । टज्वा स्यात् द्विगो । द्व्यंजलं । द्व्यंजलि । अतद्धितलुकीत्येव । द्वाभ्यामंजलिभ्यां क्रीतः द्व्यंजलिः ॥ ब्रह्मणो जानपदाख्यायां । ब्रह्मां
तात्तत्पुरुषाट्टच् स्यात् समासेन जानपदत्वमाख्यायते चेत् । सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः ॥ कुमहद्भ्यामन्यतरस्यां । आभ्यां ब्रह्मणो वा टच् स्यात्
तत्पुरुषे । कुत्सितो ब्रह्मा कुब्रह्मः । कुब्रह्मा ॥ आन्महतः समानाधिकरणजातीययोः । महत आकारोंतादेशः स्यात्समानाधिकरणेउ
त्तरपदे जातीये च परे । महाब्रह्मः । महाब्रह्मा । महादेवः । महाजातीयः । समानाधिकरणे किं । महतः सेवा महत्सेवा । लाक्षणिकं विहा
य प्रतिपदोक्तस्य महदिति समासो ग्रहीष्यत इति चेत् महाबाहुर्न स्यात् । तस्माल्लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्येति परिभाषाने
ह प्रवर्तते । समाधिकरणग्रहणसामर्थ्यात् । आदिति योगविभागादात्वं । प्रागेकादशभ्य इति निर्देशाद्वा । एकादश । महतीशब्दस्य
पुंवत्कर्मधारयेति पुंवद्भावे कृते आत्वं । महाजातीया । महदात्वे घासकरविशिष्टेषूपसंख्यानं पुंवद्भावश्च । असमानाधिकरणार्थमिदं ।

महतो घासो महतो वा घासो महाघासः । महाकरः । महाविशिष्टः । अष्टनः कपाले हविषि । अष्टाकपालः । गवि च युक्ते । गोशब्दे परे युक्ते इत्यर्थे गम्ये
ष्टन आत्वं वक्तव्यमित्यर्थः । अष्टागवं शकटं । अच्प्रत्यन्ववेत्यत्रात्रिति योगविभागाद्बहुव्रीहावप्यच् । अष्टानां गवां समाहारोष्टगवं । तद्यु
क्तत्वाच्छकटमष्टागवमिति वा । द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः । आत्स्यात् । द्वौ च दश च द्वादश । द्व्यधिका दशेति वा । द्वाविंशतिः ॥
अष्टादश । अष्टाविंशतिः । अबहुव्रीह्यशीत्योः किं । द्वित्राः । द्व्यशीतिः । प्राक्शतादिति वक्तव्यं । नेह । द्विशतं । द्विसहस्रं । त्रेस्त्रयः । त्रिशब्दस्य त्रयः ति
स्यात् पूर्वविषये । त्रयोदश । त्रयोविंशतिः । बहुव्रीहौ तु त्रिर्दशास्त्रिदशाः । सुजर्थे बहुव्रीहिः । अशीतौ तु त्र्यशीतिः ॥ प्राक्शतादित्येव । त्रिश
तं । त्रिसहस्रं ॥ विभाषा चत्वारिंशत्प्रभृतौ सर्वेषां । द्व्यष्टनोस्त्रेश्च प्रागुक्तं वा स्याच्चत्वारिंशदादौ परे । द्विचत्वारिंशत् । द्वाचत्वारिंशत् । अष्टचत्वारिं
शत् । अष्टाचत्वारिंशत् । त्रिचत्वारिंशत् । त्रयश्चत्वारिंशत् । एवं पंचाशत्षष्टिसप्ततिनवतिषु । एकादिश्चैकस्य चादुक् । एकादिर्नञ् प्रकृत्या
स्यादेकस्य दुगागमश्च । नञो विंशत्या समासे कृते एकशब्देन सह तृतीयेति योगविभागात्समासः । अनुनासिकविकल्पः । एकेन न विं
शतिः एकान्नविंशतिः । एकादनविंशतिः । एकोनविंशतिरित्यर्थः । षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च धासु चेति वाच्यं । षोडन् ।
षोडश । षोढा । षड्धा ॥ परवल्लिंगं द्वंद्वतत्पुरुषयोः । एतयोः परपदस्येव लिंगं स्यात् । कुक्कुटमयूर्याविमे । मयूरीकुक्कुटाविमौ । अर्ध
पिप्पली । द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः । पंचसु कपालेषु संस्कृतः पंचकपालः पुरोडाशः । प्राप्तो जीविकां प्राप्त

ह्वाः

सि·कौ·स्मु·स· ५९ जीविकः। आपन्नजीविकः। अलंकुमार्ये अलंकुमारिः। अत एव ज्ञापकात्समासः। निष्कौशाम्बिः॥ पूर्ववदश्ववडवौ। द्विवचनमतंत्रं। अश्ववडवौ। अश्ववडवान्। अश्ववडवैः॥ रात्राह्नाहाः पुंसि। एतदंतौ द्वंद्वतत्पुरुषौ पुंस्येव। अनंतरत्वात्परवल्लिंगतापवादोप्ययं परत्वात्समाहारनपुंसकतां बाधते। अहोरात्रः। रात्रेः पूर्वभागः पूर्वरात्रः। पूर्वाह्णः। द्व्यहः। संख्यापूर्वं रात्रं क्लीबं। द्विरात्रं। त्रिरात्रं। गणरात्रं॥ अपथं नपुंसकं। तत्पुरुष इत्येव। अन्यत्र तु अपथो देशः। कृतसमासांतनिर्देशान्नेह। अपंथाः॥ अर्धर्चाः पुंसि च। अर्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः। अर्धर्चः। अर्धर्चं। ध्वजं। ध्वजः। एवं तीर्थशरीरमंडपयूपदेहअंकुशकलशाद्यत्यादि। जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्॥ एकोप्यर्थो वा बहुवद्भवति। ब्राह्मणाः पूज्याः। ब्राह्मणः पूज्यः॥ अस्मदो द्वयोश्च। एकत्वे द्वित्वे च विवक्षिते अस्मदो बहुवचनं वा स्यात्। वयं ब्रूमः। पक्षे अहं ब्रवीमि। आवां ब्रूव इति वा। सविशेषणस्य प्रतिषेधः। पटुरहं ब्रवीमि॥ फल्गुनीप्रोष्ठपदानां च नक्षत्रे। द्वित्वे बहुत्वप्रयुक्तं कार्यं वा स्यात्। पूर्वे फल्गुन्यौ पूर्वाः फल्गुन्यः। पूर्वे प्रोष्ठपदे पूर्वाः प्रोष्ठपदाः। नक्षत्रे किं। फल्गुन्यौ माणविके॥ तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यं। बहुत्वं द्वित्ववद्भवति। तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू। तिष्येति किं। विशाखानुराधाः। नक्षत्रेति किं। तिष्यपुनर्वसवो माणवकाः॥ स नपुंसकं। समाहारे द्विगुर्द्वंद्वश्च नपुंसकं स्यात्। परवल्लिंगापवादः। पंचगवं। दंतोष्ठं। अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः। पंचमूली। आबंतो वा। पंचखट्वी। पंचखट्वं। अनो नलोपश्च वा च द्विगुः स्त्रियां। पंचतक्षं। पंचतक्षी। ५९

तमधीष्ट इत्यधिकारे द्विगोर्वेत्यनुवृत्तौ रात्र्यहःसंवत्सराच्चेति खः। लिंगविशिष्टपरिभाषाया अनित्यत्वान्नेह। मद्राणां राज्ञी मद्रराज्ञी॥ अह्नोह्न एतेभ्यः। सर्वादिभ्यः परस्याह्नशब्दस्याह्नादेशः स्यात्समासांते परे॥ अह्नोदंतात्। अदंतपूर्वपदस्थात् रेफात्परस्याह्नो नस्य णः स्यात्। सर्वाह्णः। पूर्वाह्णः। संख्याताह्नः। द्वयोरह्नोर्भवः॥ कालाट्ठञ्। द्विगोर्लुगनपत्ये इति ठञो लुक्। द्व्यह्नः। स्त्रियामदंतत्वाट्टाप्। द्व्यह्ना। द्व्यह्नप्रियः। अत्यह्नः॥ क्षुभ्नादिषु च। एषु णत्वं न स्यात्। दीर्घाह्नी प्रावृट्। एवं चैतदर्थमह्न इत्यदंतानुकरणं क्लेशेन कर्तव्यं। प्रातिपदिकांतेति णत्ववारणाय क्षुभ्नादिपाठस्यावश्यकत्वात्। अदंतादिति तपरकरणान्नेह। परागतमहः पराह्णः॥ न संख्यादेः समाहारे। समाहारे वर्तमानस्य संख्यादेरह्नादेशो न स्यात्। संख्यादेरिति स्पष्टार्थं। द्वयोरह्नोः समाहारो द्व्यहः। त्र्यहः। उत्तमैकाभ्यां च। आभ्यामह्नादेशो न। उत्तमशब्दोंत्यार्थः। पुण्यशब्दमाह। पुण्यैकाभ्यामित्येव तु सूत्रयितुमुचितं। पुण्याहं। एकाहः। उत्तमग्रहणमुपांत्यस्यापि ग्रहणार्थमित्येके। संख्याताहः॥ अग्राख्यायामुरसः। टच् स्यात्। अश्वानामुर इवाश्वोरसं। मुख्योश्व इत्यर्थः॥ अनोश्मायःसरसां जातिसंज्ञयोः। टच् स्याज्जातौ संज्ञायां च। उपानसं। अमृताश्मः। कालायसं। मंडूकसरसमिति जातिः। महानसं। पिंडाश्मः। लोहितायसं। जलसरसमिति संज्ञा॥ ग्रामकौटाभ्यां च तक्ष्णः। ग्रामस्य तक्षा ग्रामतक्षः। साधारण इत्यर्थः। कुट्यां भवः कौटः स्वतंत्रः। स चासौ तक्षा च कौटतक्षः॥ अतेः शुनः। अतिश्वो वराहः। अतिश्वी सेवा॥ उपमानादप्राणिषु। अप्राणिविषयकोपमानवाचिनः शुनष्टच् स्यात्। आकर्षः श्वेव आकर्षश्वः। अप्राणिषु किं। वानरः श्वेव

सुदिनाहं। सुदिनशब्दः प्रशस्तवाची।५

 गोशाला।श्वनिश्रं।श्वनिश्रा।तत्पुरुषेः नञ्कर्मधारयइत्यनुवृत्तेर्नेह।दृढसेनोराजा।असेना।परमसेना॥ इतितत्पुरुषः॥ ॥
 शेषोबहुव्रीहिः।अधिकारोयं।द्वितीयाश्रितेत्यादिनायस्यात्रिकस्यविशिष्यसमासोनोक्तः सशेषः।प्रथमांतमित्यर्थः॥अने
कमन्यपदार्थे।अनेकंप्रथमांतमन्यस्यपदस्यार्थेवर्तमानंवासमस्यतेसबहुव्रीहिः।अथप्रथमाविभक्त्यर्थेबहुव्रीहिरितिसमा
नाधिकरणानामितिचफलितं।प्राप्तमुदकंयंप्राप्तोदकोग्रामः।ऊढरथोनड्वान्।उपहृतपशूरुद्रः।उद्धृतौदनास्थाली।पी
तांबरः।वीरपुरुषकोग्रामः।प्रथमार्थेतुन।वृष्टेदेवेगतः।व्यधिकरणानामपिन।पंचभिर्भुक्तमस्य।प्रादिभ्योधातुजस्य
बान्योवा वाच्योवाचोत्तरपदलोपः।प्रपतितंपर्णःप्रपर्णः।नञोस्त्यर्थानांवाचोत्तरपदलोपः।अविद्यमानःपुत्रःअपुत्रः।अस्तीतिविभक्ति
प्रतिरूपकमव्ययं।अस्तिक्षीरागौः॥स्त्रियाःपुंवद्भाषितपुंस्कादनूङ्समानाधिकरणेस्त्रियामपूरणीप्रियादिषु।भाषि
तपुंस्कादनूङ्ऊङोभावोयस्यामितिबहुव्रीहिः।निपातनात्पंचम्याअलुक्।षष्ठ्याश्चलुक्।तुल्येप्रवृत्तिनिमित्तेयदुक्त
पुंस्कंतस्मात्परऊङ्भावोयत्रतथाभूतस्यस्त्रीवाचकस्यपुंवाचकस्येवरूपंस्यात्समानाधिकरणेस्त्रीलिंगेउत्तरपदेनतुपूरण्यां
प्रियादौचपरतः।गोस्त्रियोरितिह्रस्वः।चित्रागावोयस्येतिलौकिकविग्रहेचित्राअस्गौअस्इत्यलौकिकविग्रहेचित्रगुः।रूपव ६०
द्भार्यः।चित्राजरतीगौर्यस्येतिविग्रहेअनेकोक्तेर्बहूनांबहुव्रीहिः॥ अत्रकेचित्।चित्राजरतीगुः।जरतीचित्रागुर्वा।एवंदीर्घत

व
न्वीजंघः।तन्वीदीर्घजंघः।त्रिपदेबहुव्रीहौप्रथमंनपुंवत्।उत्तरपदस्यमध्यमेनव्यवधानात्।द्वितीयमपिनपुंवत्।पूर्वपदत्वाभावात्।उ
त्तरपदशब्दोहिसमासस्यचरमावयवेरूढः।पूर्वपदशब्दस्तुप्रथमावयवेइतिवदंति।वस्तुतस्तुपूर्वपदमाक्षिप्यते।आनङृतद् नेह
त्यत्रयथा।तेनोपांत्यस्यपुंवदेव।चित्राजरद्गुरित्यादि।अतएवचित्राजरत्योगावोयस्येतिद्वंद्वगर्भेपिचित्राजरद्गुरितिभाष्यं।कर्मधा
रयपूर्वपदेतुद्वयोरपिपुंवत्।जरच्चित्रगुः।कर्मधारयोत्तरपदेतुचित्रजरद्गवीकः।स्त्रियाःकिं।ग्रामणिकुलंदृष्टिरस्यग्रामणिदृष्टिः।
भाषितपुंस्कात्किं।गंगाभार्यः।अनूङ्किं।वामोरूभार्यः।समानाधिकरणेकिं।कल्याण्यामाताकल्याणीमाता।स्त्रियांकिं।कल्याणी न्या
प्रधानः।पूरण्यांतु।अप्पूरणीप्रमाण्योः।पूरणार्थप्रत्ययांतंयत्स्त्रीलिंगंतदंतात्प्रमाण्यंताच्चबहुव्रीहेरप्स्यात्।कल्याणीपंचमीयासां
रात्रीणांताःकल्याणीपंचमारात्रयः।स्त्रीप्रमाणीयस्यस्त्रीप्रमाणः।पुंवद्भावनिषेधोअप्प्रत्ययश्चप्रधानपूरण्यामेव।रात्रिःपूरणी
वाच्याचेत्युक्तोदाहरणेमुख्या।अन्यत्रतु॥नद्युतश्च।नद्युत्तरपदादृदंतोत्तरपदाच्चबहुव्रीहेःकप्स्यात्।पुंवद्भावः॥केणः।केपरेणो
ह्रस्वःस्यात्।इतिप्राप्ते॥नकपि।कपिपरेह्रस्वोनस्यात्।कल्याणपंचमीकःपक्षः।अत्रतिरोहितावयवभेदस्यपक्षस्यान्यपदार्थत्त
यारात्रिरप्रधानं।बहुकर्तृकः।अप्रियादिषुकिं।कल्याणीप्रियः।प्रिया।मनोज्ञा।कल्याणीसुभगा।दुर्भगा।भक्तिः।सचिवा।स्व
सा।कांता।क्षांता।समा।चपला।दुहिता।वामा।अबला।तनया।सामान्येनपुंस्त्वं।दृढंभक्तिर्यस्येतिदृढभक्तिः।स्त्रीत्वविवक्षायांतु
त

सि॰कौ॰स॰ दृढभक्तिः। तसिलादिष्वाकृत्वसुचः। तसिलादिषु कृत्वसुजंतेषु परेषु स्त्रियाः पुंवत्। परिगणनं कर्तव्यं। अव्याप्त्यतिव्याप्तिपरिहाराय
६३ त्रतसौ। तरप्तमपौ। चरड्जातीयरौ। कल्पब्देशीयरौ। रूपप्पाशपौ। थाल्। तिलथ्यनौ। बह्वीषु। बहुत्र। बहुतः। दर्शनीयतरा। दर्शनी
यतमा। घरूपेति वक्ष्यमाणो ह्रस्वः परत्वात्पुंवद्भावं बाधते। पट्वितरा। पट्वितमा। पटुचरी। पटुजातीया। दर्शनीयकल्पा। दर्शनीयदेशी
या। दर्शनीयरूपा। दर्शनीयपाशा। बहुथा। प्रशस्ता दृकी दृकतिः। अजाभ्यो हिता अजथ्या। शसि बह्वल्पार्थस्य पुंवद्भावो वक्तव्यः।
बह्वीभ्यो देहि बहुशः। अल्पशः॥ त्वतलोर्गुणवचनस्य। शुक्लाया भावः शुक्लत्वं। शुक्लता। गुणवचनस्येति किं। कर्त्र्याः भावः कर्त्रीत्वं।
शरदः कृतार्थेति तसादौ तु सामान्येन नपुंसकं। भस्याढे तद्धिते। हस्तिनीनां समूहो हास्तिकं। अढे किं। रौहिणेयः। स्त्रीभ्यो ढगिति ढोत्र गृ
ह्यते। अग्नेर्ढगिति ढक् तु पुंवदेव। आग्नायी देवता यस्य स्थालीपाकस्याग्नेयः। सपत्नीशब्दस्त्रिधा। शत्रुपर्यायात्सपत्नशब्दाच्छार्ङ्गरवादित्वा
न्ङीन्येकः। समानः पतिर्यस्या इति विग्रहे विवाहनिबंधनं पतिशब्दमाश्रित्य नित्यस्त्रीलिंगो द्वितीयः। स्वामिपर्यायपतिशब्देन भाषि
तपुंस्कस्तृतीयः। आद्ययोः शिवाद्यण्। सपत्न्या अपत्यं सापत्नः। तृतीयात्तु लिंगविशिष्टपरिभाषया पत्युत्तरपदाण्ण्य एव नत्वण्। लक्ष्मणो
शिवादौ तु द्वयोरेव ग्रहणात्। सापत्नः॥ ठक्छसोश्च। भवत्याश्छात्रा भावत्काः। भवदीयाः। एतद्वार्तिकमेव कृतद्धिते चेति सूत्रं च न क ६३
र्तव्यं। सर्वनाम्नो वृत्तिमात्र इति भाष्यकारेष्ट्यागतार्थत्वात्। सर्वमयः। सर्वकाम्यति। सर्विका भार्या यस्य स सर्वकभार्यः। सर्वप्रियः इत्यादि।

पात्राद्यंतस्य न। पंचपात्रं। त्रिभुवनं। चतुर्युगं। पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा। पुण्याहं। सुदिनाहं। सुदिनशब्दोत्र प्रशस्तवाची। पथः संख्या
व्ययादेः। संख्याव्ययरूपादेः परः कृतसमासांतः पथशब्दः क्लीबमित्यर्थः। त्रयाणां पंथाः त्रिपथं। विरूपः पंथाः विपथं। कृतसमासांतग्र
हणान्नेह। सुपंथाः। सामान्येन नपुंसकं। मृदु पचति। प्रातः कमनीयं॥ तत्पुरुषोऽनञ्कर्मधारयः। अधिकारोयं॥ संज्ञायां कंथोशीनरेषु॥
कंथांतस्तत्पुरुषः क्लीबं स्यात्। सा चेदुशीनरदेशोत्पन्नायाः कंथायाः संज्ञा। सुशमस्यापत्यानि सौशमयः तेषां कंथा सौशमिकंथं। संज्ञायां किं।
वीरणकंथा। उशीनरेषु किं। दाक्षिकंथा॥ उपज्ञोपक्रमं तदाद्याचिख्यासायां। उपज्ञांत उपक्रमांतश्च तत्पुरुषो नपुंसकं स्यात्तयोरुपज्ञायमा
नोपक्रम्यमाणयोरादिः प्राथम्यं चेदाख्यातुमिष्यते। पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रंथः। नंदोपक्रमं द्रोणः। छाया बाहुल्ये। छायांतस्तत्पुरु
षो नपुंसकं स्यात्पूर्वपदार्थबाहुल्ये। इक्षुच्छायं। विभाषा सेनेति विकल्पस्यायमपवादः। इक्षुच्छाया निषादित्य इति तु आसमं
तान्निषादित्य इत्याङ्प्रश्लेषो बोध्यः॥ सभा राजामनुष्यपूर्वा। राजपर्यायपूर्वो मनुष्यपूर्वश्च सभांतस्तत्पुरुषो नपुंसकं स्यात्। इनसभं। ईश्वरस
भं। पर्यायस्यैवेष्यते। नेह। राजसभा। चंद्रगुप्तसभा। अमनुष्यशब्दो रूढ्या रक्षः पिशाचादीनाह। रक्षःसभं। पिशाचसभं॥ अशाला च। संघातार्था
या सभा तदंतस्तत्पुरुषः क्लीबं स्यात्। स्त्रीसभं। स्त्रीसंघात इत्यर्थः। अशाला किं। धर्मसभा। धर्मशालेत्यर्थः॥ विभाषा सेनासुराच्छाया
शालानिशानां। एतदंतस्तत्पुरुषः क्लीबं वा स्यात्। ब्राह्मणसेनं। ब्राह्मणसेना। यवसुरं। यवसुरा। कुड्यच्छायं। कुड्यच्छाया। गोशालं।

पूर्वस्येवेदं। भस्त्रैषादेतिलिंगात्। तेनाकश्चिरकशेषवृत्तोचन। सर्विका। सर्वाः। कुक्कुट्यादीनामंडादिषु। कुक्कुट्याः अंडं कुक्कुडांडं। मृ
ग्याः पदं मृगपदं। मृगक्षीरं। काकशावः॥ क्यङ्मानिनोश्च। एतयोः परतः पुंवत्। एनीवाचरति एतायते। श्येनीवाचरतीति श्येतायते। स्वभि
न्नां कांचिद्दर्शनीयां मन्यते सा दर्शनीयमानिनी। दर्शनीयां स्त्रियं मन्यते दर्शनीयमानिनी चैत्रः॥ न कोपधायाः। कोपधायाः स्त्रिया न पुंव
त्। पाचिकाभार्यः। रसिकाभार्यः। मद्रिकाभार्यः। मद्रिकायते। मद्रिकामानिनी। कोपधप्रतिषेधे तद्धितवुग्रहणं। नेह। पाकाभार्या यस्य स प कर्तव्यं॥
काभार्यः॥ संज्ञापूरण्योश्च। अनयोर्न पुंवत्। दत्ताभार्यः। दत्तामानिनी। दानक्रियानिमित्तः स्त्रियां पुंसि च संज्ञीभूतो यमिति भाषितपुंस्कत्वम
स्ति। पंचमीभार्यः। पंचमीपाशा॥ वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे। वृद्धिशब्देन विहिताया वृद्धिस्तद्धेतुर्यस्तद्धितोऽरक्तविकारार्थ
स्तदंतास्त्री न पुंवत्। स्रौघ्नीभार्यः। माथुरीयते। माथुरीमानिनी। वृद्धिनिमित्तस्य किं। मध्यमभार्यः। तद्धितस्य किं। कांडलावभार्यः। वृ
द्धिशब्देन किं। तावद्भार्यः। रक्ते तु काषायी कंथा यस्य स काषायकंथः। विकारे तु हैमी मुद्रिका यस्य स हैममुद्रिकः। वृद्धिशब्देन वृद्धिप्रति
फलोपधानाभावादिह पुंवत्। वैय्याकरणभार्यः। सौवश्वभार्यः॥ स्वांगाच्चेतः। स्वांगाद्य ईकारस्तदंता स्त्री न पुंवत्। सुकेशीभार्यः।
स्वांगात्किं। पटुभार्यः। ईतः किं। अकेशाभार्यः। अमानिनीति वक्तव्यं। सुकेशामानिनी॥ जातेश्च। जातेः परो यः प्रत्ययस्तदंतं न
पुंवत्स्यात्। शूद्राभार्यः। ब्राह्मणीभार्यः। सौत्रस्यैवायं निषेधः। तेन हस्तिनीनां समूहो हास्तिकमित्यत्र भस्याढे इति भवत्येव॥ संज्ञ्य

याव्ययासन्नादूराधिकसंख्याः संख्येये। संख्येयार्थया संख्ययाव्ययादयः समस्यन्ते स बहुव्रीहिः। दशानां समीपे ये सन्ति ते उपदशाः। न
६२ वे वएकादशेत्यर्थः। बहुव्रीहौ संख्येये इति वक्ष्यमाणो डच्। तिविंशतेर्डिति। विंशतेर्भस्य तिशब्दस्य लोपः स्याड्डिति। आसन्नविं
शाः। विंशतेरासन्ना इत्यर्थः। अदूरत्रिंशाः। अधिक... चत्वारिंशाः। द्वौ वा त्रयो वा द्वित्राः। द्विरावृत्ता दश द्विदशाः। विंशतिरित्य
र्थः॥ दिङ्नामान्यन्तराले। दिशो नामान्यन्तराले वाच्ये प्राग्वत्। दक्षिणस्याः पूर्वस्याश्च दिशोऽन्तरालं दक्षिणपूर्वा। नामग्रहणाद्यौ
गिकानां न। ऐन्द्र्याः कौबेर्याश्चान्तरालं॥ तत्र तेनेदमिति सरूपे। सप्तम्यन्ते ग्रहणविषये सरूपे पदे तृतीयान्ते च प्रहरणविषये इदं
भा युद्धं प्रवृत्तमित्यर्थे समस्येते कर्मव्यतिहारे स समासो वक्ष्यते। तिष्ठद्गुप्रभृतिषु इच्प्रत्ययस्य पाठादव्ययीभावत्वमव्ययत्वं च। केशेषु के
शेषु गृहीत्वेदं युद्धं प्रवृत्तं केशाकेशि। दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तं दण्डादण्डि। मुष्टीमुष्टि॥ ओर्गुणः। उवर्णान्तस्य भस्य गुणः स्या
त्तद्धिते। अवादेशाः। बाहूबाहवि। ओरोदिति वक्तव्ये गुणोक्तिः संज्ञापूर्वको विधिरनित्य इति ज्ञापयितुं। तेन स्वायंभुव इत्यादि
सिद्धं। सरूपे किं। हलेन मुसलेन॥ तेन सहेति तुल्ययोगे। तुल्ययोगे वर्तमानं सहेत्येतत्तृतीयान्तेन प्राग्वत्॥ वोपसर्जनस्य। बहुव्रीहे
रवयवस्य सहस्य सः स्याद्वा। पुत्रेण सह सपुत्रः। सहपुत्रो वागतः। तुल्ययोगवचनं प्रायिकं। सकर्मकः। सलोमकः॥ प्रकृत्याशिषि। स ६२
हशब्दः प्रकृत्या स्यादाशिषि। स्वस्ति राज्ञे सहपुत्राय सहामात्याय। अगोवत्सहलेष्विति वक्तव्यं। सगवे सवत्साय सहलाय॥ बहुव्रीहौ संख्ये
बहुव्रीहिः। इतिशब्दस्य विषयविशेषो लभ्यते। अन्येषामपि दृश्यते। दीर्घ इत्यनुवर्तते। इति कर्मव्यतिहारे बहुव्रीहौ पूर्वपदान्तस्य दीर्घः॥ इच्समा ६

सरइतिसूत्रंतद्भंक्त्वाभाष्यकारआह॥ उपसर्गाच्च॥ उपसर्गस्थान्निमित्तात्परस्यनसोनस्यणःस्याद्बहुव्रीहौ। प्रणसः। वेर्ग्रोवक्तव्यः। विगतानासि
६२ कायस्यविग्रः। ख्यश्चविख्यः। कथंतर्हिविनसाहतबांधवेतिभट्टिः। विगतयानासिकयोपलक्षितेतिव्याख्येयं। सुप्रातसुश्वसुदिवशारि
कुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः। एतेबहुव्रीहयोचप्रत्ययांतानिपात्यंते। शोभनंप्रातरस्यसुप्रातः। शोभनंश्वोऽस्यसुश्वः। शोभनंदिवा
स्यसुदिवः। शारेरिवकुक्षिरस्यशारिकुक्षः। चतस्रो श्रयोऽस्य चतुरश्रः। एण्याइवपादावस्य एणीपदः। अजपदः। प्रोष्ठोगौः तस्येवपा
दौअस्य प्रोष्ठपदः॥ नञ्दुःसुभ्योहलिसक्थ्योरन्यतरस्यां। अच्स्यात्। अहलः। अहलिः। असक्थः। असक्थिः। एवंदुःसुभ्यां। शक्त्योरिति
पाठांतरं। अशक्तः। अशक्तिः॥ नित्यमसिच्प्रजामेधयोः। नञ्दुःसुभ्यइत्येव। अप्रजाः। दुःप्रजाः। सुप्रजाः। अमेधाः। दुर्मेधाः। सुमेधाः॥
धर्मादनिच्केवलात्। केवलात्पूर्वपदात्परोयोधर्मशब्दस्तदंताद्बहुव्रीहेरनिच्स्यात्। कल्याणधर्मा। केवलात्किं। परमःस्वोधर्मोयस्येति
त्रिपदेबहुव्रीहौमाभूत्। स्वशब्दोहिइहनकेवलंपूर्वपदंकिंतुमध्यमत्वादापेक्षिकं। संदिग्धसाध्यधर्मेत्यादौतुकर्मधारयपूर्वपदोबहुव्रीहिः।
एवंतुपरमस्वधर्मेत्यपिसाध्येव। निवृत्तिधर्मा। अनुच्छित्तिधर्मेत्यादिवत्। पूर्वपदंतुबहुव्रीहिणाक्षिप्यते। जंभासुहरितत्तृणसोमेभ्यः। जंभे
तिकृतसमासांतंनिपात्यते। जंभोभक्ष्येदंतेच। शोभनोजंभोयस्यसुजंभा। हरितजंभा। तृणंभक्ष्यंयस्यतृणमिवदंताअस्येतिवातृणजं ६३
भा। एवंसोमजंभा। स्वादिभ्यःकिं। पतितजंभः॥ दक्षिणेर्माळुब्धयोगे। दक्षिणेईर्मव्रणंयस्यदक्षिणेर्मामृगः। व्याधेनकृतव्रणइत्यर्थः॥ इच्
ण

कर्मव्यतिहारे। कर्मव्यतिहारेयोबहुव्रीहिस्तस्मादिच्समासांतः। केशाकेशि। मुसलामुसलि॥ द्विदंड्यादिभ्यश्च। तादर्थ्येचतुर्थ्येषा। एषांसिध्य
र्थमिच्प्रत्ययःस्यात्। द्वौदंडौयस्मिन्प्रहरणेतद्द्विदंडि। द्विमुसलि। उभयाहस्ति। उभाहस्ति॥ प्रसंभ्यांजानुनोर्ज्ञुः। आभ्यांपरयोर्जानुशब्दयो
र्ज्ञुरादेशःस्याद्बहुव्रीहौ। प्रगतेजानुनीअस्यप्रज्ञुः। संज्ञुः। ऊर्ध्वाद्विभाषा। ऊर्ध्वज्ञुः। ऊर्ध्वजानुः॥ धनुषश्च। धनुरंतस्यबहुव्रीहेरनङादेशः
शतधनुः स्यात्। शार्ङ्गधन्वा॥ वासंज्ञायां। शतधन्वा॥ जायायानिङ्। जायांतस्यबहुव्रीहेर्निङादेशःस्यात्॥ लोपोव्योर्वलि। वकारयकारयोर्लोपः
स्याद्वलि। पुंवद्भावः। युवतिर्जायायस्ययुवजानिः॥ गंधस्येदुत्पूतिसुसुरभिभ्यः। एभ्योगंधस्यइकारोंतादेशःस्यात्। उद्गंधिः। पूतिगंधिः।
सुगंधिः। सुरभिगंधिः। गंधस्येत्वेतदेकांतग्रहणं। एकांतएकादेशश्च याविभागेनलक्ष्यमाणइत्यर्थः। सुगंधिपुष्पंसलिलंच। सुगंधिर्वा
युः। नेह। शोभनाःगंधाःद्रव्याणयस्यसुगंधआपणिकः॥ अल्पाख्यायां। सूपगंधोलेशोयस्मिंस्तत्सूपगंधि। पादस्यलोपोऽहस्त्यादिभ्यः। हस्त्या स्य
दिवर्जितादुपमानात्परस्यपादशब्दस्यलोपःस्याद्बहुव्रीहौ। भोजनं। घृतगंधि। गंधोगंधकआमोदलेशसंबंधगर्वयोरितिविश्वः। उपमाना
च्च। पद्मस्येवगंधोयस्यपद्मगंधिः। स्थानिद्वारेणायंसमासांतः। व्याघ्रस्येवपादावस्यव्याघ्रपात्। अहस्त्यादिभ्यःकिं। हस्तिपादः। कुशूलपा
दः। कुंभपदीषुच। कुंभपद्यादिषुपादस्यलोपोङीप्चनिपात्यतेस्त्रियां॥ पादःपत्। कुंभपदी। स्त्रियांकिं। कुंभपादः॥ संख्यासुपूर्वस्य। पा
दस्यलोपःस्यात्समासांतोबहुव्रीहौ। द्विपात्। सुपात्॥ वयसिदंतस्यदतृ। संख्यापूर्वस्यदंतस्यदतृइत्यादेशःस्याद्वयसि। द्विदन्। चतुर्दन्।
सु भोजनं

सि॰कौ॰स॰ षड्दंता अस्य षोडन्। सुदन्। सुदती। वयसि किं। द्विदंतः करी। सुदंतः॥ स्त्रियांसंज्ञायां। दंतस्य दतृ स्यात्समासांतो बहुव्रीहौ। अयोदती।
६५ फालदती। संज्ञायां किं। समदंती॥ विभाषा श्यावारोकाभ्यां। दंतस्य दतृ स्याद्वा बहुव्रीहौ। श्यावदन्। श्यावदंतः। अरोकदन्। अरोक
दंतः॥ अग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च। एभ्यो दंतस्य दतृ वा। कुड्मलाग्रदन्। कुड्मलाग्रदंतः॥ ककुदस्यावस्थायां लोपः। अजात
ककुत्। पूर्णककुत्॥ त्रिककुत्पर्वते। त्रीणि ककुदानि यस्य त्रिककुत्। संज्ञैषा पर्वतविशेषस्य। त्रिककुदोन्यः॥ उद्विभ्यां काकुदस्य।
लोपः। उत्काकुत्। विकाकुत्। काकुदं तालु॥ पूर्णाद्विभाषा। पूर्णकाकुत्। पूर्णकाकुदः। सुहृद्दुर्हृदौ मित्रामित्रयोः। सुदुर्भ्यां हृदयस्य हृद्भावो निपा
त्यते। सुहृन्मित्रं। दुर्हृदमित्रः। अन्यत्र सुहृदयः। दुर्हृदयः॥ उरःप्रभृतिभ्यः कप्। व्यूढोरस्कः। प्रियसर्पिष्कः। इह पुमाननड्वान्पयः नौर्लक्ष्मी अ
रिति एकवचनांतान् पठ्यंते। द्विवचनबहुवचनांतेभ्यस्तु शेषाद्विभाषेति विकल्पेन कप्। द्विपुमान्। द्विपुंस्कः॥ अर्थान्नञः। अनर्थकं। इति वचनात्॥
नञः किं। अपार्थं। अपार्थकं॥ इनः स्त्रियां। बहुदंडिका नगरी। अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदंतविधिं प्रयोजयंति।
बहुवाग्मिका। स्त्रियां किं। बहुदंडी। बहुदंडिको ग्रामः॥ शेषाद्विभाषा। अनुक्तसमासांताच्छेषाधिकारस्थाद्बहुव्रीहेः कब्वा स्यात्।
महायशस्कः। महायशाः। अनुक्तेत्यादि किं। व्याघ्रपात्। सुगंधिः। प्रियपथः। शेषाधिकारस्थात्किं। उपबहवः। उत्तरपूर्वा। सपुत्रः। तंत्रा ६५
दिना शेषशब्दोऽर्थद्वयपरः॥ आपोन्यतरस्यां। कपि आबंतस्य ह्रस्वो वा स्यात्। बहुमालाकः। कबभावे बहुमालः॥ नसंज्ञायां। शेषादि
बहुमालकः।

येऽजबहुगणात्। संख्येये यो बहुव्रीहिस्तस्माड्डच् स्यात्। उपदशाः। अबहुगणात्किं। उपबहवः। उपगणाः। अत्र स्वरे विशेषः। संख्यायास्तत्पुरुषस्योपसंख्यानं। उप
निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि चैत्रस्य। निर्गतः त्रिंशतोंगुलिभ्यो निस्त्रिंशः खड्गः। बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच्। व्यत्ययेन षष्ठी। स्वां
गवाचिसक्थ्यक्ष्यंताद्बहुव्रीहेः षच् स्यात्। दीर्घे सक्थिनी यस्य स दीर्घसक्थः। जलजाक्षी। स्वांगात्किं। दीर्घसक्थि शकटं। स्थूलाक्षा वेणुयष्टिः। अक्ष्णो
दर्शनादित्यच्। अंगुलेर्दारुणि। अंगुल्यंताद्बहुव्रीहेः षच् स्याद्दारुण्यर्थे। पंच अंगुलयो यस्य तत्पंचांगुलं दारु। अंगुलिसदृशावयवं धान्यादिवि यो
क्षेपणकाष्ठमुच्यते। बहुव्रीहिः किं। द्वे अंगुली प्रमाणमस्याः द्व्यंगुला यष्टिः। तद्धितार्थे तत्पुरुषे। तत्पुरुषस्यांगुलेरित्यच्। दारुणि किं। पंचांगुलि
र्हस्तः। द्वित्रिभ्यां ष मूर्ध्नः। आभ्यां मूर्ध्नः षः स्याद्बहुव्रीहौ। द्विमूर्धः। त्रिमूर्धः। नेतुर्नक्षत्रे अब्वक्तव्यः। मृगो नेता यासां ताः मृगनेत्राः रात्रयः। पुष्य
नेत्राः। अंतर्बहिर्भ्यां च लोम्नः। आभ्यां लोम्नोप् स्याद्बहुव्रीहौ। अंतर्लोमः। बहिर्लोमः॥ अञ्नासिकायाः संज्ञायां नसं चास्थूलात्। नासिकांताद्बहु
व्रीहेरच् स्यान्नासिकाशब्दश्च नसं प्राप्नोति न तु स्थूलपूर्वात्॥ पूर्वपदात्संज्ञायामगः। पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्संज्ञायां न तु गका
रव्यवधाने। द्रुरिव नासिका यस्य स द्रुणसः। खरणसः। अगः किं। ऋचामयनं ऋगयनं। अणृगयनादिभ्य इति निपातनाण्णत्वाभावमाश्रि
त्यागइति प्रत्याख्यातं भाष्ये। अस्थूलात्किं। स्थूलनासिकः। खुरखराभ्यां वा नस्। खुरणाः। खरणाः। पक्षे अजपीष्यते। खुरणसः। खरणसः॥
उपसर्गाच्च। प्रादेर्यो नासिकाशब्दस्तदंतो बहुव्रीहिरच् नासिकाया नसादेशश्च। असंज्ञार्थं वचनं। उन्नता नासिका यस्य स उन्नसः। उपसर्गाद्बहुलं

हरिश्चहरश्चहरिहरौ ॥ अनेकप्रासावेकत्वनियमो नियमःशेषे ॥ हरिगुरुहराः ॥ हरिहरगुरवः ॥ अजाद्यदंतं ॥ इदंद्वंद्वे पूर्वंस्यात् ॥

न्वयःसमुच्चयः। अन्यतरस्यानुषंगिकत्वे ऽन्वाचयः। मिलितानामन्वय इतरेतरयोगः। समूहः समाहारः। तत्रेश्वरंगुरुंचभजस्वेतिसमुच्चये भिक्षामट गांचानयेत्यन्वाचयेचनसमासो ऽसामर्थ्यात्। धवखदिरौ। संज्ञापरिभाषं। अनेकोक्तेः होतृपोतृनेष्टोद्गातारः। द्वद्वयोर्द्वंद्वं कृत्वापुनर्द्वंद्वेतुहोतापोतानेष्टोद्गातारः॥ राजदंतादिषुपरं। एषुपूर्वप्रयोगार्हंपरंस्यात्। दंतानांराजाराजदंतः॥ धर्मादिष्वनियमः। अर्थधर्मौ। धर्मार्थौ। जंपती। दंपती। जायापती। जायाशब्दस्यजंभावो दंभावश्चवानिपात्यते। आकृतिगणोयं॥ द्वंद्वेघि॥ द्वंद्वेघिसंज्ञंपूर्वंस्यात्। ईशकृष्णौ। बहु ष्वनियमः। अश्वरथेंद्राः। इंद्राश्वरथाः। घ्यंतादजाद्यंतंविप्रतिषेधेन। इंद्राग्नी॥ अल्पाच्तरं। शिवकेशवौ। ऋतुन क्षत्राणांसमाक्षराणामानुपूर्व्येण। हेमंतशिशिरवसंताः। कृत्तिकारोहिण्यौ। समाक्षराणांकिं। ग्रीष्मवसंतौ। लघ्वक्षरंपूर्वं। कुशकाशं॥ अभ्यर्हितंच। तापसपर्वतौ॥ वर्णानामानुपूर्व्येण। ब्राह्मणक्षत्रियविट्शूद्राः॥ भ्रातुर्ज्यायसः। युधिष्ठिरार्जुनौ॥ द्वंद्वश्चप्राणितूर्यसेनांगानां। एषांद्वंद्वएकवत्स्यात्। पाणिपादं। मार्दंगिकपाणविकं। रथिकाश्वारोहं। समाहारस्यैकत्वादेकत्वेसिद्धेनियमार्थंप्रकरणं। प्राण्यंगादीनां समाहारएवयथास्यात्॥ अनुवादेचरणानां। चरणानांद्वंद्वएकवत्सिद्धस्योपन्यासे। स्थेणोर्लुङीतिवक्तव्यं। उदगात्कठकालापं। प्रत्यष्ठात्कठकौथुमं॥ अध्वर्युक्रतुरनपुंसकं। यजुर्वेदेविहितोयःक्रतुस्तद्वाचिनामनपुंसकलिंगानांद्वंद्वएकवत्स्यात्। अर्काश्वमेधं। अध्वर्युक्रतुः किं। इषुवज्रौसामवेदेविहितौ। अनपुंसकंकिं। राजसूयवाजपेये। अर्धर्चादी॥ अध्ययनतोऽविप्रकृष्टाख्यानां। अध्ययनेनप्रत्यासन्ना आ ६५

ख्यायेषांतेषांद्वंद्वएकवत्। पदककमकं। जातिरप्राणिनां। प्राणिवर्ज्यजातिवाचिनांद्वंद्व एकवत्। धानाशष्कुलि। प्राणिनांतु विट्शूद्राः। द्रव्यजातीनामेव। नेह। रूपरसौ। गमनाकुंचने। जातिप्राधान्यएवायमेकवद्भावः। द्रव्यविशेषविवक्षायांतु बदरामलकानि। विशिष्टलिंगोनदीदेशोऽग्रामाः। ग्रामवर्जनदीदेशवाचिनांभिन्नलिंगानांसमाहारेद्वंद्वएकवत्स्यात्। उध्यश्चइरावतीचउध्येरावति। गंगाशोणंगंगाशोणं। कुरवश्चकुरुक्षेत्रंचकुरुकुरुक्षेत्रं। भिन्नलिंगानांकिं। गंगायमुने। मद्रकेकयाः। अग्रामाःकिं। जांबवंनगरं। शाल्हूकिनीग्रामः। जांबवशाल्हूकिन्यौ॥ क्षुद्रजंतवः। एषांसमाहारेद्वंद्वएकवत्स्यात्। यूकालिक्षं। आनकुलात्क्षुद्रजंतवः॥ येषांचविरोधःशाश्वतिकः। एषांप्राग्वत्। अहिनकुलं। गोव्याघ्रं। काकोलूकमित्यादौपरत्वाद्विभाषावृक्षमृगेत्याद्यतिप्राप्तंचकारेणबाध्यते॥ शूद्राणामनिरवसितानां। अबहिष्कृतानांशूद्राणांप्राग्वत्। तक्षायस्कारं। पात्राद्बहिष्कृतानांतुचांडालमृतपाः॥ गवाश्वप्रभृतीनिच। यथोच्चारितानिसाधूनि। गवाश्वं। दासीदासमित्यादि॥ विभाषावृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणां। वृक्षादीनांसप्तानांद्वंद्वः। अश्ववडवेत्यादिद्वंद्वत्रयंचवाप्राग्वत्। वृक्षादौविशेषाणामेवग्रहणं। प्लक्षन्यग्रोधं। प्लक्षन्यग्रोधाः। रुरुपृषतं। रुरुपृषताः। कुशकाशं। कुशकाशाः। व्रीहियवं। व्रीहियवाः। दधिघृतं। दधिघृते। गोमहिषं। गोमहिषाः। शुकबकं। शुकबकाः। अश्ववडवं। अश्ववडवौ। पूर्वापरं। पूर्वापरे। अधरोत्तरं। अधरोत्तरे। फलसेनावनस्पतिमृगशकुनिक्षुद्रजंतुधान्यतृणानांबहुप्रकृतिरेवद्वंद्वएकवदितिवाच्यं। बदराणिचामलकानिच बदरामलकं॥ [illegible]मेकास्मिन्बहु

सि॰को॰सं॰द्वं॰ वचनं च। जातिरप्राणिनामित्येकवद्भावः। नेह। बदरामलके। रथिकाश्वारोहौ। कुसन्ययोधावित्यादि। विभाषावृक्षेति सूत्रे ये प्राणिनस्तेषां ग्र
९९ हणं जातिरप्राणिनामिति नित्यं प्राप्ते विकल्पार्थं। पशुग्रहणं हस्त्यश्वादिषु सेनांगत्वान्नित्ये प्राप्ते। मृगाणां मृगैरेव शकुनीनां तैरेवोभयत्र द्वंद्वः।
तर अन्यैरुक्तसहितैर्योग एवेति नियमार्थं मृगशकुनिग्रहणं। एवं पूर्वापराधरोत्तरमित्यपि। अश्ववडवग्रहणं तु पक्षे नपुंसकत्वार्थं। अन्यथा परव
त्पूर्ववदश्ववडवाविति स्यात्॥ विप्रतिषिद्धं चानधिकरणवाचि। विरुद्धार्थानामद्रव्यवाचिनां द्वंद्व एकवद्वा स्यात्। वैकल्पिकः समाहारे द्वंद्वश्चा
र्थे इति सूत्रेण प्राप्तः स विरुद्धार्थानां यदि भवति तर्ह्यद्रव्यवाचिनामेवेति नियमार्थमिदं। तेन द्रव्यवाचिनामितरेतरयोग एव। शीतोष्णे उद
के स्तः। विप्रतिषिद्धं किं। नंदकपांचजन्यं। इह पाक्षिकः समाहारद्वंद्वो भवत्येव। न दधिपय आदीनि। एतानि नैकवत्स्युः। दधिपयसी। इध्माब
र्हिषी। निपातनाद्दीर्घः। ऋक्सामे। वाङ्मनसे॥ अधिकरणैतावत्त्वे च। द्रव्यसंख्यावगमे एकवदेवेति नियमो न स्यात्। दशदंतोष्ठाः। दशदंतो
ष्ठाः॥ विभाषा समीपे। अधिकरणैतावत्त्वस्य सामीप्येन परिच्छेदे समाहार एवेत्येवंरूपो नियमो वा स्यात्। उपदशं दंतोष्ठं। उपदशाः दंतोष्ठाः॥ आ
ऋ नङृतो द्वंद्वे। विद्यायोनिसंबंधवाचिनामृदंतानां द्वंद्वे आनङ् स्यादुत्तरपदे परे। होतापोतारौ। होतृपोतृनेष्टोद्गातारः। मातापितरौ। पुत्रेऽ
न्यतरस्यामित्यतो मंडूकप्लुत्या पुत्र इत्यनुवृत्तेः। पितापुत्रौ॥ देवताद्वंद्वे च। इहोत्तरपदे आनङ्। मित्रावरुणौ। वायुशब्दप्रयोगे प्रतिषेधः। अग्नि ९९
वायू। वाय्वग्नी। पुनर्द्वंद्वग्रहणं प्रसिद्धसाहचर्यस्य परिग्रहणार्थं। तेन ब्रह्मप्रजापती इत्यादौ नानङ्। एतद्द्वे च कहविर्भागित्वेन श्रुतं। नापि लो

तिप्राप्तः कप् न स्यात्संज्ञायां। विश्वे देवा अस्य विश्वदेवः॥ ईयसश्च। ईयसंतोत्तरपदान्न कप्। बहवः श्रेयांसो यस्य बहुश्रेयान्। गोस्त्रियो
रिति ह्रस्वे प्राप्ते। ईयसो बहुव्रीहेर्नेति वाच्यं। बह्व्यः श्रेयस्यो यस्य बहुश्रेयसी। बहुव्रीहिः किं। अतिश्रेयसिः॥ वंदिते भ्रातुः। पूजिते
सुभ्राता। र्थे यो भ्रातृशब्दस्तदंतान्न कप्। प्रशस्तो भ्राता यस्य सप्रशस्तभ्राता। नद्यृजनादिति निषेधस्य बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवेति वक्ष्यते।
वंदिते किं। मूर्खभ्रातृकः॥ नाडीतंत्र्योः स्वांगे। स्वांगे यौ नाडीतंत्रीशब्दौ तदंतान्न कप्। बहुनाडीकायः। बहुतंत्रीर्ग्रीवा। तंत्री धमनी। स्त्रीप्रत्य
यांतत्वाभावाद्ध्रस्वो न। स्वांगे किं। बहुनाडीकस्तंभः। बहुतंत्रीका वीणा॥ निष्प्रवाणिश्च। कबभावोऽत्र निपात्यते। प्रपूर्वाद्वयतेर्ल्युट्। प्रवाणी
तंतुवायशलाका। निर्गता प्रवाणी अस्या निष्प्रवाणिः। पटः समाप्तवानः। नव इत्यर्थः॥ सप्तमीविशेषणे बहुव्रीहौ। सप्तम्यंतं विशेषणं च बहु
व्रीहौ पूर्वं प्रयोज्यं। कंठेकालः। अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः। चित्रगुः। सर्वनामसंख्ययोरुपसंख्यानं। सर्वश्वेतः। द्विशुक्लः।
मिथोऽनयोः समासे कृते संख्या पूर्वं। शब्दपरविप्रतिषेधात्। द्व्यन्यः। संख्याया अल्पीयस्याः। द्वित्राः॥ द्वंद्वेऽपि। द्वादश। वाप्रियस्य। गुडप्रि
यः। प्रियगुडः॥ गड्वादेः परा सप्तमी। गडुकंठः। क्वचिन्न। वहेगडुः॥ निष्ठा। निष्ठांतं बहुव्रीहौ पूर्वं प्रयोज्यं। कृतकृत्यः॥ जातिकालसुखा
दिभ्यः परा निष्ठा वाच्या। सारंगजग्धी। मासजाता। सुखजाता। प्रायिकं चेदं। कृतकटः। पीतनासिः॥ इति बहुव्रीहिः॥ ॥ चार्थे द्वंद्वः।
अनेकं सुबंतं चार्थे वर्तमानं वा समस्यते स द्वंद्वः। समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः। परस्परनिरपेक्षस्यानेकस्यैकस्मिन्न
नोटकः। वाहिताग्न्यादिषु। आहिताग्निः। अग्न्याहितः। आकृतिगणोऽयं। प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ स्तः। अस्युद्यतः। दंडपाणिः। क्वचिन्न। वि२

पितुर्दशगुणं माता गौरवेणातिरिच्यते इति स्मृतेर्मातुरभ्यर्हितत्वात्पूर्वनिपातः। श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिता इति स्मृतेस्तस्या अभ्यर्हितत्वात्पूर्वनिपातः।

यञञोश्चेति लुक्। दाक्षी च दाक्षायणश्च दाक्षी॥ पुमान्स्त्रिया। स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत्। हंसी च हंसश्च हंसौ॥ भ्रा-
तृपुत्रौ स्वसृदुहितृभ्यां। भ्राता च स्वसा च भ्रातरौ। पुत्रश्च दुहिता च पुत्रौ॥ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां॥ अक्लीबेन सहोक्तौ
क्लीबं शिष्यते तच्च वा एकवत्स्यात्। तल्लक्षण एव विशेषश्चेत्। शुक्लः पटः। शुक्ला शाटी। शुक्लं वस्त्रं। तदिदं शुक्लं। तानीमानि शुक्लानि॥ पिता
मात्रा। मात्रा सहोक्तौ पिता वा शिष्यते। माता च पिता च पितरौ। मातापितरौ॥ श्वशुरः श्वश्र्वा। श्वश्र्वा सहोक्तौ श्वशुरो वा शिष्यते। श्वशुरश्च
श्वश्रूश्च श्वशुरौ। श्वश्रूश्वशुरौ॥ त्यदादीनि सर्वैर्नित्यं। सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यंते। स च देवदत्तश्च तौ। त्यदादीनां मिथः सहोक्तौ यत्परं
तच्छिष्यते। स च यश्च यौ। पूर्वशेषोपि दृश्यत इति भाष्यं। स च यश्च तौ। त्यदादितः शेषे पुंनपुंसकतो लिंगवचनानि। सा च देवदत्तश्च तौ। तच्च दे-
वदत्ता च यज्ञदत्ता च तानि। पुंनपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते। तच्च देवदत्तश्च ते। अद्वंद्वतत्पुरुषविशेषणानामिति वक्तव्यं। कुक्कुटमयू-
र्याविमे। मयूरीकुक्कुटाविमौ। तच्चसा च अर्धपिप्पल्यौ ते॥ ग्राम्यपशुसंघेष्वतरुणेषु स्त्री। एषु सहविवक्षायां स्त्री शिष्यते। पुमान्स्त्रियेत्यस्या-
पवादः। गाव इमाः। ग्राम्येति किं। रुरव इमे। पशुषु किं। ब्राह्मणा इमे। संघेषु किं। एतौ गावौ। अतरुणेषु किं। वत्सा इमे। अनेकशफेष्विति वाच्यं।
अश्वा इमे। इह सर्वत्र एकशेषे कृते अनेकाभावाद्द्वंद्वो न। तेन शिरसी शिरांसीत्यादौ समासस्येत्यंतोदात्तत्वं। प्राण्यंगादेर्द्वंद्वश्च न। पंथा ६७
नौ। पंथानः इत्यादौ समासान्तो न॥ इत्येकशेषः॥ कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पंच वृत्तयः। परार्थाभिधानं वृत्तिः।

वृत्त्यर्थावबोधकं वाक्यं विग्रहः। स द्विधा। लौकिको ऽलौकिकश्च। परिनिष्ठितत्वात्साधुर्लौकिकः। प्रयोगानर्हो ऽसाधुरलौकिकः। यथा राज्ञः
पुरुषः। राजन् अस् पुरुष सु इति। अविग्रहो नित्यसमासः। अस्वपदविग्रहो वा। समासश्चतुर्धेति प्रायोवादः। अव्ययीभावतत्पुरुषबहुव्री-
हिद्वंद्वाधिकारबहिर्भूतानामपि सह सुपेति विधानात्। पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। अन्यपदार्थप्रधा-
नो बहुव्रीहिः। उभयपदार्थप्रधानो द्वंद्वः इत्यपि प्रायं प्रवादः। प्रायोऽभिप्रायः। सूपप्रति उन्मत्तगंगमित्याद्यव्ययीभावे अतिमालादौ तत्पुरु-
षे द्वित्रा इत्यादि बहुव्रीहौ दंतोष्ठमित्यादौ द्वंद्वे चाभावात्। तत्पुरुषविशेषः कर्मधारयः। तद्विशेषो द्विगुः। अनेकपदत्वं द्वंद्वबहुव्रीह्योरेव।
तत्पुरुषस्य क्वचिदेवेत्युक्तं। किंच। सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा। सुबंतेनेति च ज्ञेयः समासः षड्विधो बुधैः। सुपा। राजपुरुषः। ति-
ङा पर्यभूषयत्। नाम्ना। कुंभकारः। धातुना। कटप्रूः। अजस्रं। तिङां तिङा। पिबतखादता। तिङं सुपा। कृंतविचक्षणेति यस्यां क्रियायां सा कृंतवि-
चक्षणा। एहीडादयोन्यपदार्थे इति मयूरव्यंसकादौ पाठात्समासः॥ इति सर्वसमासशेषः॥ ऋक्पूरब्धूःपथामानक्षे। अ अनक्ष इति छे-
दः। ऋगाद्यंतस्य समासस्य अप्रत्ययोंतावयवः स्यादक्षे या धूस्तदंतस्य तु न। अर्धर्चः। अनृचबहृचावध्येतर्येव। नेह। अनृक्साम। बहृक्सूक्तं।
विष्णोः पूः विष्णुपुरं। क्लीबत्वं लोकात्। विमलापं सरः॥ द्व्यंतरुपसर्गेभ्योप ईत्। अप इति कृतसमासांतस्यानुकरणं षष्ठ्यर्थे प्रथमा। एभ्योपस्य ईत्स्या-
त्। द्विर्गता आपो अस्मिन्निति द्वीपं। अंतरीपं। प्रतीपं। समीपं। समापो देवयजनमिति तु समा आपो यस्मिन्निति बोध्यं। कृतसमासांतग्रहणान्नेह।

सि·को·स· स्वप्। स्वपी।। अवर्णांताद्वा। प्रेषं। परेषं। प्राषं। परापं।। ऊदनोर्देशे। अनोः परस्यापस्य ऊत्स्याद्देशे। अनूपो देशः। राजधुरा। अक्षे तु। अक्षधूः। दृ
६८ ढधूरक्षः। सखिपथौ। रम्यपथो देशः। अच्प्रत्यन्ववपूर्वात्सामलोम्नः। एतत्पूर्वात्सामलोमांतात्समासादच् स्यात्। प्रतिसामं। अनुसामं।
अवसामं। प्रतिलोमं। अनुलोमं। अवलोमं।। कृष्णोदक्पांडुसंख्यापूर्वाया भूमेरजिष्यते। कृष्णभूमः। उदग्भूमः। पांडुभूमः। द्विभूमः। त्रिभूमः
प्रासादः।। संख्याया नदीगोदावरीभ्यां च। पंचनदं। सप्तगोदावरं। अजिति योगविभागादन्यत्रापि। पद्मनाभः।। अक्ष्णोऽदर्शनात्। अचक्षुः
पर्यायादक्ष्णोऽच् स्यात्समासांतः। गवामक्षीव गवाक्षः।। अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्व
ष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः। एते पंचविंशति
रजंता निपात्यंते। आद्यास्त्रयो बहुव्रीहयः। अविद्यमानानि चत्वार्यस्य अचतुरः। विचतुरः। सुचतुरः। त्र्युपाभ्यां चतुरोऽजिष्यते। त्रिचतुराः। च
तुर्णां समीपे उपचतुराः। तत एकादेशो द्वंद्वाः। स्त्रीपुंसौ। धेन्वनडुहौ। ऋक्सामे। वाङ्मनसे। अक्षिणी च भ्रुवौ च अक्षिभ्रुवं। दाराश्च गावश्च
दारगवं। ऊरू च अष्ठीवंतौ च ऊर्वष्ठीवं। निपातनाट्टिलोपः। पदष्ठीवं। निपातनात्पादशब्दस्य पद्भावः। नक्तं च दिवा च नक्तंदिवं। रात्रौ च
दिवा च रात्रिंदिवं। रात्रेर्मांतत्वं निपात्यते। अहनि च दिवा च अहर्दिवं। वीप्सायां द्वंद्वो निपात्यते। अहन्यहनीत्यर्थः। सरजसमिति साक ६८
ल्ये अव्ययीभावः। बहुव्रीहौ तु सरजः पंकजं। निश्चितं श्रेयो निःश्रेयसं। तत्पुरुष एव। नेह। निःश्रेयान्पुरुषः। पुरुषस्यायुः पुरुषायुषं। तनो

ना
केप्रसिद्धसाहचर्यं।। ईदग्नेः सोमवरुणयोः। देवताद्वंद्व इत्येव।। अग्नेः स्तुत्स्तोमसोमाः। अग्नेः परेषामेषां सस्य षः स्यात्समासे। अग्निष्टुत्। अग्निष्टो
मः। अग्नीषोमौ। अग्नीवरुणौ।। इद्वृद्धौ। वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्याद्देवताद्वंद्वे। अग्नामरुतौ देवता अस्य आग्निमारुतं कर्म। अ
ग्नीवरुणौ देवता अस्य आग्निवारुणं। देवताद्वंद्वे चेत्युभयपदवृद्धिः। अलौकिके वाक्ये आनङ्भावत्वं च बाधित्वा इः। वृद्धौ किं। आग्नेंद्रः। नें
द्रस्य परस्येत्युत्तरपदवृद्धिप्रतिषेधः। विष्णौ न। आग्नावैष्णवं। दिवो द्यावा। देवताद्वंद्वे उत्तरपदे। द्यावाभूमी। द्यावाक्षामा।। दिवसश्च पृथि
व्यां। दिवस इत्येव। चाद्द्यावा। आदेशे अकारोच्चारणं सकारस्य रुत्वं माभूदित्येतदर्थं। द्यौश्च पृथिवी च दिवस्पृथिव्यौ। द्यावापृथिव्यौ। छंदसि दृष्टानुवि
धिः। द्यावा चिदस्मै पृथिवी। दिवस्पृथिव्यांनिरित्यत्र पदकारा विसर्गं पठंति। उषासोषसः। उषसः उषासादेशो देवताद्वंद्वे। उषासासूर्यं। मातर
पितरावुदीच्यां। उदीच्यां किं। मातापितरौ। द्वंद्वाच्चुदषहांतात्समाहारे। चवर्गांताद्दषहांताच्च द्वंद्वाट्टच् स्यात्समाहारे। वाक्त्वचं। त्वक्स्रजं। शमीदृषदं।
वाक्त्विषं। छत्रोपानहं। समाहारे किं। प्रावृट्शरदौ।। इति द्वंद्वः।। ।।अथैकशेषः।। ।।सरूपाणां। रामौ। रामाः। विरूपाणामपि समानार्था
नां। वक्रदंडश्च कुटिलदंडश्च वक्रदंडौ। कुटिलदंडौ।। वृद्धो यूना तल्लक्षणश्चेदेव विशेषः। यूना सहोक्तौ गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं
चेत्तयोः कृत्स्नं वैरूप्यं स्यात्। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। वृद्धः किं। गर्गगार्ग्यायणौ। यूना किं। गर्गगार्ग्यौ। तल्लक्षणः किं। भागवित्तिभागवित्तिकौ।
कृत्स्नं किं। गार्ग्यवात्स्यायनौ।। स्त्री पुंवच्च। यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत्। गार्गी च गार्ग्यायणश्च गार्ग्यौ। अस्त्रियामित्यनुवर्तमाने

अलुगुत्तरपदे। अलुगधिकारः प्रागानङः। उत्तरपदाधिकारस्त्वापादपरिसमाप्तेः॥ पंचम्याः स्तोकादिभ्यः। एभ्यः पंचम्या अलुक्स्यादुत्तरपदे। स्तो
कान्मुक्तः। एवमंतिकार्थदूरार्थकृच्छ्रेभ्यः। उत्तरपदे किं। निष्क्रांतः स्तोकान्निस्तोकः। ब्राह्मणाच्छंसिन उपसंख्यानं। ब्राह्मणे विहितानि शस्त्राणि
उपचाराद्ब्राह्मणानि तानि शंसतीति ब्राह्मणाच्छंसी। कश्चिद्विशेषः। द्वितीयार्थे पंचम्युपसंख्यानादेव। ओजःसहोंभस्तमसस्तृतीयायाः। ओजसा
कृतमित्यादि। अंजस उपसंख्यानं। अंजसा कृतं। आर्जवेन कृतमित्यर्थः। पुंसानुजो जनुषांध इति च। यस्याग्रजः पुमान्स पुंसानुजः। ज
नुषांधो जात्यंधः॥ मनसः संज्ञायां। मनसागुप्ता॥ आज्ञायिनि च। मनस इत्येव। मनसा आज्ञातुं शीलमस्य मनसाज्ञायी॥ आत्मनश्च। आ
त्मनस्तृतीयाया अलुक्स्यात्। पूरण इति वक्तव्यं। पूरणप्रत्ययांत उत्तरपदे इत्यर्थः। आत्मनापंचमः। जनार्दनस्त्वात्मचतुर्थ एवेति बहुव्री
हिर्बोध्यः। पूरणे किं। आत्मकृतं॥ वैयाकरणाख्यायां चतुर्थ्याः। आत्मन इत्येव। आत्मनेपदं। आत्मनेभाषाः। तादर्थ्ये चतुर्थी चतुर्थीति योगवि
 भागात्समासः॥ परस्य च। परस्मैपदं। परस्मैभाषा॥ हलदंतात्सप्तम्याः संज्ञायां। हलंतादंताच्च सप्तम्या अलुक्स्यात्संज्ञायां। त्वचिसारः॥ गवियुधिभ्यां
स्थिरः। आभ्यां स्थिरस्य सस्य षः स्यात्। गविष्ठिरः। अत्र गवीति वचनादेवालुक्। युधिष्ठिरः। अरण्येतिलकः। अत्र संज्ञायामिति सप्तमीसमा
सः। हृद्द्युभ्यां च। हृदिस्पृक्। दिविस्पृक्॥ कारनाम्नि च प्राचां हलादौ। प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे हलदंतात्सप्तम्या अलुक्। मुकु
टेकार्षापणं। दृषदिमाषकः। पूर्वेण सिद्धे नियमार्थं। कारनाम्न्येव। प्राचामेव। हलादावेवेति। कारनाम्नीति किं। आभ्याहितपशुः। कारादन्यस्येत ६९

दियस्य नाम। प्राचां किं। यूथपशुः। हलादौ किं। अविकटोरणः। हलदंतात्किं। नद्यांदोहो नदीदोहः॥ मध्याद्गुरौ। मध्येगुरुः॥ अंताच्च। अंतेगुरुः॥ अमू
र्धमस्तकात्स्वांगादकामे। कंठेकालः। उरसिलोमा। अमूर्धमस्तकात्किं। मूर्धशिखः। मस्तकशिखः। अकामे किं। मुखेकामो यस्य मुखकामः।
बंधे च विभाषा। हलदंतात्सप्तम्या अलुक्। हस्तेबंधः। हस्तबंधः। हलदंतेति किं। गुप्तिबंधः॥ तत्पुरुषे कृति बहुलं। स्तंबेरमः। कर्णेजपः।
क्वचिन्न। कुरुचरः॥ प्रावृट्शरत्कालदिवां जे। प्रावृषिजः। शरदिजः। कालेजः। दिविजः। पूर्वस्यायं प्रपंचः॥ विभाषा वर्षक्षरशरवरात्। एभ्यः सप्त
म्या अलुक्जे। वर्षेजः। वर्षजः। क्षरेजः। क्षरजः। शरेजः। शरजः। वरेजः। वरजः॥ घकालतनेषु कालनाम्नः। सप्तम्या विभाषा अलुक्स्यात्। घ। पू
र्वाह्णेतरे। पूर्वाह्णतरे। पूर्वाह्णेतमे। पूर्वाह्णतमे। काल। पूर्वाह्णेकाले। पूर्वाह्णकाले॥ तन। पूर्वाह्णेतने। पूर्वाह्णतने॥ शयवासवासिष्वकालात्। खे
शयः। खशयः। ग्रामेवासः। ग्रामवासः। ग्रामेवासी। ग्रामवासी॥ अपो योनियन्मतुषु। अप्सुयोनिरुत्पत्तिर्यस्य सो ऽप्सुयोनिः। अप्सुभवः
अप्सव्यः। अप्सुमंतावाज्यभागौ॥ नेन्सिद्धबध्नातिषु च। इन्नंतादिषु सप्तम्या अलुग्न। स्थंडिलशायी। सांकाश्यसिद्धः। चक्रबंधः॥ स्थे च भा
षायां। सप्तम्या अलुग्न। समस्थः। भाषायां किं। कृष्णोस्यारवरेष्ठः॥ षष्ठ्या आक्रोशे। चौरस्यकुलं। आक्रोशे किं। ब्राह्मणकुलं। वाग्दिक्पश्य
द्भ्यो युक्तिदंडहरेषु। वाचोयुक्तिः। दिशोदंडः। पश्यतोहरः। आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति च। अमुष्यापत्यं आमुष्यायणः। नडा
दित्वात्फक्। अमुष्यपुत्रस्य भाव आमुष्यपुत्रिका। मनोज्ञादित्वाद्वुञ्। एवमामुष्यकुलिका। देवानांप्रिय इति च। मूर्खे। अन्यत्र देवप्रियः। शेपपुच्छ

सि॰को॰स॰
७०

लांगूले शुनः। शुनःशेपः। शुनःपुच्छः। शुनोलांगूलः। दिवश्च दासे। दिवोदासः॥ पुत्रेऽन्यतरस्यां। षष्ठ्याः पुत्रे परे अलुग्वा निंदायां। दास्याः पुत्रो दा
सीपुत्रः। निंदायां किं। ब्राह्मणीपुत्रः॥ ऋतो विद्यायोनिसंबंधेभ्यः। विद्यासंबंधयोनिसंबंधवाचिन ऋदंतात्षष्ठ्या अलुक् स्यात्। होतुरंतेवासी
होतुःपुत्रः। पितुरंतेवासी। पितुःपुत्रः। विद्यायोनिसंबंधेभ्यस्तत्पूर्वोत्तरपदग्रहणं। नेह। होतृधनं। पितृ [illegible] गृहं॥ विभाषा स्वसृपत्योः॥ ऋदंतात्
षष्ठ्या अलुग्वा स्वसृपत्योः परयोः॥ मातुःपितृभ्यामन्यतरस्यां। आभ्यां स्वसुः सस्य षो वा स्यात्समासे। मातुःष्वसा। मातुःस्वसा। पितुःष्वसा। पितृस्वसा।
लुक्पक्षे तु॥ मातृपितृभ्यां स्वसा। आभ्यां परस्य स्वसुः सस्य षः स्यात्समासे। मातृष्वसा। पितृष्वसा। असमासे तु। मातुःस्वसा। पितुःस्वसा॥ ॥
इत्यलुक्समासः॥ ॥ घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः॥ भाषितपुंस्काद्यो ङी तदंतस्यानेकाचो ह्रस्वः स्याद्घरूपकल्प
प्रत्ययेषु परेषु चेलडादिषु चोत्तरपदेषु। ब्राह्मणितरा। ब्राह्मणितमा। ब्राह्मणिरूपा। ब्राह्मणिकल्पा। ब्राह्मणिचेली। ब्राह्मणिब्रुवा। ब्राह्म
णिगोत्रेत्यादि। भ्रूवः पचाद्यचि वच्यादिना गुणयोरभावोऽपि निपात्यते। चेलडादीनि वृत्तिविषये कुत्सनवाचीनि। तैः कुत्सितानि कुत्सनैरि
ति समासः। ङ्यः किं। दत्तातरा। भाषितपुंस्कात्किं। आमलकीतरा। कुवलीतरा॥ नद्याः शेषस्यान्यतरस्यां। अङ्यंतनद्याः ङ्यंतेऽकाच
श्च घादिषु ह्रस्वो वा स्यात्। ब्रह्मबंधूतरा। ब्रह्मबंधुतरा। स्त्रीतरा। स्त्रितरा। कृन्नद्यां न। लक्ष्मीतरा॥ उगितश्च। उगितः परा या नदी तदंतस्य घादि ७०
षु ह्रस्वो वा स्यात्। विदुषितरा। ह्रस्वाभावपक्षे तसिलादिष्विति पुंवत्। विद्वत्तरा। वृत्यादिषु तु विदुर्षीतरेत्युदाहृतं तन्निर्मूलं भ [illegible]। हृदयस्य हृल्ले
षी

द्विगू। द्व्यायुषं। त्र्यायुषं। ततो द्वंद्वः। ऋग्यजुषं। ततस्त्रयः कर्मधारयाः। जातोक्षः। महोक्षः। वृद्धोक्षः। शुनः समीपमुपशुनं। टिलोपाभावः संप्रसा
रणं च निपात्यते। गोष्ठे श्वा गोष्ठश्वः॥ ब्रह्महस्तिभ्यां वर्चसः॥ अच् स्यात्। ब्रह्मवर्चसं। हस्तिवर्चसं। पल्यराजभ्यां चेति वक्तव्यं। पल्यवर्चसं। राज
वर्चसं॥ अवसमंधेभ्यस्तमसः। अवतमसं। संतमसं। अंधयतीत्यंधं। पचाद्यच्। अंधमोंधतमसं॥ श्वसो वसीयःश्रेयसः। वसुशब्दः प्रशस्तवा
चीतत ईयसुनि वसीयः। श्वस्शब्द उत्तरपदार्थप्रशंसामाशीर्विषयमाह। मयूरव्यंसकादित्वात्समासः। श्वोवसीयसं। श्वःश्रेयसं ते भूयात्। अन्व
वतप्ताद्रहसः। अनुरहसं। अवरहसं। तप्तरहसं॥ प्रतेरुरसः सप्तमीस्थात्। उरसि प्रत्युरसं। विभक्त्यर्थेऽव्ययीभावः॥ अनुगवमायामे। एत
न्निपात्यते दीर्घत्वे। अनुगवं यानं। यस्य चायाम इति समासः॥ द्विस्तावा त्रिस्तावा वेदिः। अच् प्रत्ययष्टिलोपः समासश्च निपात्यते। यावती प्र
कृतौ वेदिस्ततो द्विगुणा त्रिगुणा वाश्वमेधादौ तत्र वेदिनिपातनं। वेदिरिति किं। द्विस्तावती त्रिस्तावती रज्जुः॥ उपसर्गादध्वनः। प्रगतोऽध्वानं प्राध्वो रथः
॥ न पूजनात्। पूजनार्थात्परेभ्यः समासांता न स्युः। सुराजा। अतिराजा। स्वतिभ्यामेव। नेह। परमराजः। पूजनात्किं। गामतिक्रांतोऽतिगवः।
बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवायं निषेधः। नेह। सुसक्थः। स्वक्षः॥ किमः क्षेपे। क्षेपे यः किंशब्दस्ततः परं यत्तदंतात्समासांता न स्युः। कुत्सि
तो राजा किंराजा। किंसखा। किंगौः। क्षेपे किं। किंराजः। किंसखः। किंगवः॥ नञस्तत्पुरुषात्। समासांतो न। अराजा। असखा। तत्पुरुषात्किं।
अधुरं शकटं॥ पथो विभाषा। नञ्पूर्वात्पथो वा समासांतः। अपथं। अपंथाः। तत्पुरुषादित्येव। अपथो देशः। अपथं वा [illegible]॥ इति समासांताः॥ ते

तरपदे। ग्रामणीपुत्रः। ग्रामणिपुत्रः। इकः किं। रमापतिः। अंज्य इति किं। गौरीपतिः। गालवग्रहणं पूजार्थं। अन्यतरस्यामित्यनुवर्तते॥ इयङुवङ्
७१ भाविनामव्ययानां चनेति वाच्यं। श्रीमदः। भ्रूभंगः। शुक्लीभावः। अभ्रुकुंसादीनामिति वक्तव्यं। भ्रुकुंसः। भ्रुकुटिः। भ्रूकुंसः। भ्रूकुटिः। अकारो
न नैव विधीयत इति व्याख्यांतरं। भ्रकुंसः। भ्रकुटिः। भ्रुवा कुंसो भाषणं शोभा यस्य सः। स्त्रीवेषधारी। नर्तकः। भ्रुवः कुटिः। कौटिल्यं॥ एकत
द्धिते च। एकशब्दस्य ह्रस्वः स्यात्तद्धिते उत्तरपदे च। एकस्या आगतं एकरूप्यं। एकक्षीरं। ङ्यापोः संज्ञाछंदसोर्बहुलं। रेवतिपुत्रः। अज
क्षीरं। त्वे च। त्वप्रत्यये च ङ्याप्पोर्ह्रस्वः। अजत्वं। रोहिणित्वं॥ ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे। ष्यङंतस्य पूर्वपदस्य संप्रसारणं स्यात्पुत्रपत्योरुत्तर
पत्यात् त्पुरुषे॥ संप्रसारणस्य। संप्रसारणस्य दीर्घः स्यादुत्तरपदे। कौमुदगंध्यायाः पुत्रः कौमुदगंधीपुत्रः। कौमुदगंधीपतिः। व्यवस्थितभाषया
द्व्यसान। स्त्रीप्रत्यये चानुपसर्जने नेति तदादिनियमप्रतिषेधात्। परमकारीषगंधीपुत्रः। उपसर्जने तु तदादिनियमान्नेह। अतिकारीषगंध्य
पुत्रः॥ बंधुनि बहुव्रीहौ। बंधुशब्दे उत्तरपदे ष्यङः संप्रसारणं स्याद्बहुव्रीहौ। कारीषगंध्या बंधुरस्येति कारीषगंधीबंधुः। बहुव्रीहौ किं। का बिति
रीषगंध्याया बंधुः कारीषगंध्याबंधुः। ङ्कीबनिर्देशात् शब्दस्वरूपापेक्षया॥ मातच्मातृकमातृषु वा। कारीषगंधीमातः। कारीषगंध्यामातः। कारीषगं
धीमातृकः। कारीषगंध्यामातृकः। कारीषगंधीमाता। कारीषगंध्यामाता। अस्मादेव निपातान्मातृशब्दस्य मातजादेशः कश्च विकल्पश्च। ७१
बहुव्रीहावेवेदं। नेह। कारीषगंध्यायाः माता कारीषगंध्यामाता। चित्सामर्थ्याच्चित्स्वरो बहुव्रीहिस्वरं बाधते॥ इष्टकेषीकामालानां चिततू

मातृक

लभारिषु। इष्टकादीनां तदंतानां च पूर्वपदानां चितादिषु क्रमादुत्तरपदेषु ह्रस्वः स्यात्। इष्टकचितं। पक्वेष्टकचितं। इषीकतूलं। मुंजेषीक
तूलं। मालभारी। उत्पलमालभारी। कारे सत्यागदस्य। मुम् स्यात्। सत्यंकारः। अगदंकारः। अस्तोश्चेति वक्तव्यं। अरुंकारः। धेनोर्भव्या
यां। धेनुंभव्या॥ लोकस्य पृणे। लोकंपृणः। पृण इति मूलविभुजादित्वात्कः॥ इत्येऽनभ्याशस्य। अनभ्याशमित्यः। दूरतः परिहर्तव्य इत्य
र्थः॥ भ्राष्ट्राग्न्योरिंधे। भ्राष्ट्रमिंधः। अग्निमिंधः॥ गिलेऽगिलस्य। तिमिंगिलः। अगिलस्य किं। गिलगिलः॥ गिलगिले च। तिमिंगिल
गिलः॥ उग्रंभद्रयोः करणे। उग्रंकरणं। भद्रंकरणं॥ रात्रेः कृति विभाषा। रात्रिंचरः। रात्रिचरः। रात्रिमटः। रात्र्यटः। अखिदर्थमिदं सूत्रं।
स्य खिति तु अरुर्द्विषदिति नित्यमेव वक्ष्यते। रात्रिंमन्यः॥ सहस्य सः संज्ञायां। उत्तरपदे। सपलाशं। संज्ञायां किं। सहयुध्वा। ग्रंथांतेऽधिके च।
अनयोरर्थयोः सहस्य सः स्यादुत्तरपदे। सकलं ज्योतिषमधीते। सद्रोणा खारी॥ द्वितीये चानुपाख्ये। अनुमेये द्वितीये सहस्य सः स्यात्।
सराक्षसीका निशा। राक्षसी साक्षादनुपलभ्यमाना निशयानुमीयते॥ समानस्य छंदस्यमूर्धप्रभृत्युदर्केषु। समानस्य सः स्यादुत्तरपदे न तु
मूर्धादिषु। अनुभ्राता सगर्भ्यः। अनुसखा सयूथ्यः। यो नः सनुत्यः। तत्र भव इत्यर्थे सगर्भसयूथसनुताद्यत्। अमूर्धादिषु किं। समानमू
र्धा। समानप्रभृतयः। समानोदर्काः। समानस्येति योगो विभज्यते। तेन सपक्षः। साधर्म्यं। सजातीय इत्यादि सिद्धमिति काशिका। अ
थवा सहशब्दः सदृशवचनोऽस्ति। सदृशः सख्या ससखीति यथा। तेनायमस्वपदविग्रहो बहुव्रीहिः। समानः पक्षोऽस्येत्यादि॥ ज्योतिर्ज

नपदराविनाभिनामगोत्ररूपस्थानवर्णवयोवचनबंधुषु। एषुद्वादशसूत्तरपदेषु समानस्यसः स्यात्। सज्योतिः। सजनपद इत्यादि॥ चरणे
ब्रह्मचारिणि। ब्रह्मचारिण्युत्तरपदेसमानस्यसः स्याच्चरणेसमानत्वे नगम्यमाने। चरणः शाखा। ब्रह्मवेदः। तदध्ययनार्थं व्रतमपितच्चर ब्रह्म
तीतिब्रह्मचारी। समानः सः सब्रह्मचारी॥ तीर्थेये। तीर्थेउत्तरपदेयादौ प्रत्ययेविवक्षितेसमानस्यसः स्यात्। सतीर्थ्यः। एकगुरुकः। समान
तीर्थेवासीतियत्प्रत्ययः। विभाषोदरे। यादौप्रत्ययेविवक्षितेइत्येव। सोदर्यः। समानोदर्यः॥ दृग्दृशवतुषु। सदृक्। सदृशः। दृक्षेचेतिवक्तव्यं।
सदृक्षः। वत्तुरुत्तरार्थः॥ इदंकिमोरीश्की। दृग्दृशवतुषुइदमईशाकिमः कीस्यात्। ईदृक्। ईदृशः। कीदृक्। कीदृशः। वत्तूदाहरणंवक्ष्यते।
दृक्षेच। ईदृक्षः। कीदृक्षः॥ आसर्वनाम्नः। सर्वनाम्नआकारो[illegible]ःस्याद्दृग्दृशवतुषु॥ दृक्षेच। तादृक्। तादृशः। तावान्। तादृक्षः। दीर्घः
 मतोले। अमूदृक्। अमूदृशः॥ समासेंगुलेः संगः। अंगुलिशब्दात्संगस्यसस्यमूर्धन्यः स्यात्समासे। अंगुलिषंगः। समासेकिं। अंगुलेःसंगः
॥ भीरोस्थानं। भीरुशब्दात्स्थानस्यसस्यमूर्धन्यः स्यात्समासे। भीरुष्ठानं। असमासेतुभीरोःस्थानं॥ ज्योतिरायुषःस्तोमः। आभ्यांस्तोमस्य
सस्यमूर्धन्यः स्यात्समासे। ज्योतिष्टोमः। आयुष्टोमः। समासेकिं। आयुषस्तोमः॥ सुषामादिषुच। सस्यमूर्धन्यः॥ शोभनंसामयस्यसुषामा।
सुषंधिः॥ एतिसंज्ञायामगात्। सस्यमूर्धन्यः। हरिषेणः। एतिकिं। हरिसक्थः। संज्ञायांकिं। पृथुसेनः। अगकारात्किं। विष्वक्सेनः। इण्कोरित्येव। ७२
सर्वसेनः॥ नक्षत्राद्वा। एतिसंज्ञायामगकारान्मूर्धन्योवा। रोहिणीषेणः। रोहिणीसेनः। अगकारात्किं। शतभिषक्सेनः। आकृतिगणोयम्॥

ज्योतिषः स्तोमः॥

स्वपदण्लासेषु। हृदयंलिखतीतिहृल्लेखः। हृदयस्यप्रियंहृद्यं। हृदयस्येदंहार्दं। हृदयस्यलासः हृल्लासः। लेखेत्यणंतस्यग्रहणं। घञिंतु
हृदयलेखः। लेखग्रहणमेव ज्ञापकंउत्तरपदाधिकारेतदंतविधिर्नास्तीति॥ वाशोकष्यञ्रोगेषु। हृच्छोकः। हृदयशोकः। सौहार्द्यं।
सौहृदय्यं। हृद्रोगः। हृदयरोगः। हृदयशब्दपर्यायोहृच्छब्दोप्यस्ति। तेनासिद्धमपंचार्थमिदं॥ पादस्यपदाज्यातिगोपहतेषु। एतेषूत्तरपदे
षुपादस्यपदइत्ययमादेशः स्यात्। पादाभ्यामजतीतिपदाजिः। पदातिः। अज्यतिभ्यांपादेचेतीणप्रत्ययः। अजेर्व्यभावोनिपातना
त्। पदगः। पदोपहतः॥ पद्यत्यतदर्थे। पादस्यपत्स्यादतदर्थेयतिपरे। पादौविध्यंतिपद्याः शर्कराः। विध्यत्यधनुषेतिय[illegible]। अतदर्थे
किं। पादार्थमुदकंपाद्यं। पादार्घाभ्यामितियत्। इकेचरतावुपसंख्यानं। पादाभ्यांचरतिपदिकः। पर्पादित्वात्ष्ठन्॥ हिमकाषिहतिषुच। प
द्धिमं। पत्काषी। पद्धतिः॥ ऋचःशे। ऋचः पादस्यपत्स्याच्छेपरे। गायत्रीपच्छः शंसति। पादंपादमित्यर्थः। ऋचःकिं। पादशः कार्षापणंददा
ति॥ वाघोषमिश्रशब्देषु। पादस्यपत्। पद्घोषः। पादघोषः। पन्मिश्रः। पादमिश्रः। पच्छब्दः। पादशब्दः। निष्केचेतिवक्तव्यं। पन्निष्कः। पादनि
ष्कः॥ उदकस्योदः संज्ञायां। उदमेघः। उत्तरपदस्यचेतिवक्तव्यं। क्षीरोदः॥ पेषंवासवाहनधिषुच। उदपेषंपिनष्टि। उदवासः। उदवाहनः। उदधि
र्घटः। समुद्रेतुपूर्वेणसिद्धं॥ एकहलादौपूरयितव्येन्यतरस्यां। उदकुंभः। उदककुंभः। एकेतिकिं। उदकस्थाली। पूरयितव्येतिकिं। उदकपर्वतः २
॥ मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषुच। उदमंथः। उदौदनः। उदकौदनः॥ इकोह्रस्वोङ्योगालवस्य। इगंतस्यअङ्यंतस्यह्रस्वोवास्यादु

उदमथः॥

लक्षणस्याविष्टाष्टपंचमणिभिन्नछिंनछिद्रस्रुवस्वस्तिकस्य। कर्णशब्देपरेलक्षणवाचकस्यदीर्घः। द्विगुणाकर्णः। लक्षणस्यकिं। शोभनकर्णः।
७३ अविष्टादीनांकिं। विष्टकर्णः। अष्टकर्णः। पंचकर्णः। मणिकर्णः। भिन्नकर्णः। छिन्नकर्णः। छिद्रकर्णः। स्रुवकर्णः। स्वस्तिकर्णः॥ नहिवृ क
तिवृषिव्यधिरुचिसहितनिषु क्वौ। क्विबंतेष्वेतेषुपूर्वस्यदीर्घः। उपानत्। नीवृत्। प्रावृट्। मर्माविन्। नीरुक्। अभीरुक्। ऋतीषट्। परी
तत्। क्वावितिकिं। परिणहनं। विभाषापुरुषइत्यतोमंडूकप्लुत्याविभाषानुवर्तते। सा चव्यवस्थिता। तेनगतिकारकयोरेव। नेह। पटुरुक्। ति
ग्मरुक्॥ वनगिर्योःसंज्ञायांकोटरकिंशुलकादीनां। कोटरादीनांवनेपरेकिंशुलकादीनांगिरौपरेदीर्घःस्यात्संज्ञायां॥ वनेपुरगामिश्र
कासिध्रकासारिकाकोटराग्रेभ्यः। वनशब्दस्योत्तरपदस्यएभ्यएवणत्वंनत्वन्येभ्यः। इहकोटरांताःपंचदीर्घविधौकोटरादयोबाध्याः
तेषांकृतदीर्घाणांणत्वविधौनिर्देशोनियमार्थः। अग्रेशब्दस्यतुविध्यर्थः। पुरगावणं। मिश्रकावणं। सिध्रकावणं। सारिकावणं। को
टरावणं। एभ्यएवेतिकिं। असिपत्त्रवनं। वनस्याग्रेअग्रेवणं। राजदंतादिषुनिपातनात्सप्तम्याअलुक्। प्रातिपदिकार्थमात्रेप्रथमा।
किंशुलकागिरिः॥ वले। वलप्रत्ययेपरेदीर्घःस्यात्संज्ञायां। कृषीवलः॥ मतौबह्वचोऽनजिरादीनां। अमरावती। अनजिरादीनांकिं।
अजिरवती। बह्वचःकिं। व्रीहिमती। संज्ञायामित्येव। नेह। वलयवती॥ शरादीनांच। शरावती॥ इकोवहेऽपीलोः। इगंतस्यदीर्घःस्या ७३
द्वहे। ऋषीवहं। कपीवहं। इकःकिं। पिंडवहं। अपीलोःकिं। पीलुवहं। अपील्वादीनामितिवक्तव्यं। दारुवहं। उपसर्गस्यघञ्यमनु

ष्येबहुलं। उपसर्गस्यबहुलंदीर्घःस्याद्घञंतेपरे नतुमनुष्ये। परिपाकः। परीपाकः। अमनुष्येकिं। निषादः॥ इकःकाशे। इगंतस्योपसर्गस्यदीर्घः
काशे। वीकाशः। नीकाशः। इकःकिं। प्रकाशः॥ अष्टनःसंज्ञायां। उत्तरपदेदीर्घः। अष्टापदं। संज्ञायांकिं। अष्टपुत्रः॥ चितेःकपि। एकचितीकः।
द्विचितीकः॥ नरेसंज्ञायां। विश्वानरः॥ मित्रेचर्षौ। विश्वामित्रः। संज्ञायांकिं। विश्वमित्रोमाणवकः॥ श्वनोदंतदंष्ट्राकर्णकुंदवराहपुच्छेषु कपोतकिं।
दीर्घोवाच्यः। श्वादंत इत्यादि॥ प्रनिरंतःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योसंज्ञायामपि। एभ्योवनस्यणत्वंस्यात्। प्रवणं। कार्ष्यव
णं। इहषात्परत्वाण्मत्वं। विभाषौषधिवनस्पतिभ्यः। वनस्यणःस्याद्वा। दूर्वावणं। दूर्वावनं। शिरीषवनं। द्व्यक्षरत्र्यक्षराभ्यामेव। नेह। देवदारुवनं। इरि शिरीषवणं।
कादिभ्यःप्रतिषेधोवाच्यः। इरिकावनं। नारिकावनं॥ वाहनमाहितात्। आरोप्यययदुह्यतेतद्वाचिस्थान्निमित्तात्परस्यवाहननकारस्यणत्वं
स्यात्। इक्षुवाहणं। आहितात्किं। इंद्रवाहनं। इंद्रस्वामिकंवाहनमित्यर्थः। वहतेर्ल्युटिवृद्धिरिहैवसूत्रेनिपातनात्॥ पानंदेशे। पूर्वपदस्थान्नि
मित्तात्परस्यपानस्यनस्यणत्वंस्याद्देशेगम्ये। क्षीरंपानंयेषांतेक्षीरपाणाउशीनराः। सुरापाणाःप्राच्याः। पीयतइतिपानं। कर्मणिल्युट्॥ वाभा
वकरणयोः। पानस्येत्येव। क्षीरपानं। क्षीरपाणं। गिरिनद्यादीनांवा। गिरिणदी। गिरिनदी। चक्रनितंबा॥ प्रातिपदिकांतनुम्विभक्तिषुच। पूर्व चक्रणितंबा।
पदस्थान्निमित्तात्परस्यएषुस्थितस्यनस्यणत्वंवास्यात्। प्रातिपदिकांते। माषवापिणौ। नुमि। व्रीहिवापिणि। विभक्तौ। माषवापेण। पक्षेमा
षवापिनावित्यादि। उत्तरपदंयत्प्रातिपदिकंतदंतस्यैवणत्वं। नेह। गर्गाणांभगिनीगर्गभगिनी। अतएवनुम्ग्रहणंकृतं। अंगस्यनुम्विधौतद्धितोहि

सि॰कौ॰स॰ नुमन्तादुत्तरपदस्य। किंच। अहिण्वन्नित्यत्र दोहि वेर्नुमो णत्वार्थमपि नुमग्रहणं। प्रेन्वनमित्यादौ तु क्षुभ्नादित्वान्न। युवादेर्न। रम्ययूना। परिपक्वानि। एका
७८ जुत्तरपदे णः। नित्यमिस्फत्वं। वृत्रहणौ। हरिमानयतीति हरिमाणी। नुमि। क्षीरपाणि। विभक्तौ। क्षीरपेण। रम्यविणा॥ कुमति च। कवर्गवत्यु
त्तरपदे प्राग्वत्। हरिकामिणौ। हरिकामाणि। हरिकामेण॥ पदव्यवायेऽपि। पदेन व्यवधानेऽपि णत्वं न स्यात्। माषकुंभवापेन। चतुरंगयोगेन। अ
तद्धित इति वक्तव्यं। आर्द्रगोमयेण। शुष्कगोमयेण॥ कुस्तुंबुरूणि जातिः। अत्र सुण्निपात्यते। कुस्तुंबुरु धान्यकं। क्लीबत्वमतंत्रं। जातिः किं। कु
रस्प तुंबुरूणि। कुत्सितानि तिंदुकीफलानीत्यर्थः॥ अपरस्पराः क्रियासातत्ये। सुण्निपात्यते। अपरस्पराः सार्थाः गच्छंति। सततमविच्छेदेन गच्छंती
त्यर्थः। क्रियेति किं। अपरपरा गच्छंति। अपरे च परे च सकृदेव गच्छंतीति॥ गोष्पदं सेवितासेवितप्रमाणेषु। सुट् षत्वं च निपात्यते। गावः पा त्यर्थः
द्यंते यस्मिन्देशे स गोभिः सेवितो गोष्पदो देशः। असेविते। अगोष्पदान्यरण्यानि। प्रमाणे। गोष्पदमात्रं क्षेत्रं। सेवितेति किं। गोः पदं गोपदं॥ आस्प
दं प्रतिष्ठायां। आत्मयापनाय स्थाने सुण्निपात्यते। प्रतिष्ठेति किं। आपदा दापदं। आश्चर्यमनित्ये। अद्भुते सुण्निपात्यते। आश्चर्यं यदि स भु
ञ्जीत। अनित्ये किं। आचर्यं कर्म शोभनं॥ वर्चस्केऽवस्करः। कुत्सितं वर्चो वर्चस्कमन्नमलं तस्मिन्सुट्। अवकीर्यत इत्यवस्करः। वर्चस्के किं। अवकरः।
किरोवा अपस्करो रथांगं। अपकरोऽन्यः॥ विष्किरः शकुनिर्वा। पक्षे विकिरः। वावचनेन वेचस्कुडिति विकल्पो सिद्धे विकिरग्रहणं तस्यापि शकुनेरन्यत्र प्रयोगो ७४
माभूदिति वृत्तिः। तन्न। भाष्यविरोधात्॥ प्रतिष्कशश्च कशेः। कशगतिशासनयोरित्यस्य प्रतिपूर्वस्य पचाद्यचि सुण्निपात्यते षत्वं च। सहा

अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु। अन्यशब्दस्य दुगागमः स्यादाशीरादिषु परेषु। अन्यदाशीः। अन्यदाशा।
अन्यदास्था। अन्यदास्थितः। अन्यदुत्सुकः। अन्यदूतिः। अन्यद्रागः। अषष्ठ्यादि किं। अन्यस्यान्येन वा आशीरन्याशीः। कारके छे च नायं निषे
धः। अन्यस्य कारकोऽन्यत्कारकः। अन्यस्यायमन्यदीयः। गहादिराकृतिगणत्वाच्छः। अर्थे विभाषा। अन्यदर्थः। अन्यार्थः॥ कोः कत्तत्पुरुषेऽचि॥
अजादावुत्तरपदे। कुत्सितोऽश्वः कदश्वः। कदन्नं। तत्पुरुषे किं। कूष्ट्रो राजा॥ त्रौ च। कुत्सितास्त्रयः कत्त्रयः। रथवदयोश्च। कद्रथः। कद्वदः॥ तृणे
च जातौ। कत्तृणं॥ कापथ्यक्षयोः। कापथं। काक्षः। अक्षशब्देन तत्पुरुषः। अक्षिशब्देन बहुव्रीहिर्वा॥ ईषदर्थे। ईषज्जलं। काजलं। अजाद
वपि परत्वात्कादेशः। काम्लं॥ विभाषा पुरुषे। कापुरुषः। कुपुरुषः। अप्राप्तविभाषेयं। ईषदर्थे हि पूर्वविप्रतिषेधान्नित्यमेव॥ कवं चोष्णे।
उष्णशब्दे उत्तरपदे कवं का च वा स्यात्। कवोष्णं। कोष्णं। कदुष्णं॥ पृषोदरादीनि यथोपदिष्टं। पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथै
ह वसाधूनि। पृषत् उदरं पृषोदरं। तलोपः। वारिवाहको बलाहकः। पूर्वपदस्य बः। उत्तरपदादेश्च लत्वं। भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्। गू
ढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरं। दिक्शब्देभ्यस्तीरस्य तारभावो वा। दक्षिणतारं। दक्षिणतीरं। उत्तरतारं। उत्तरतीरं। दुरो दाशनाशदभध्येषूत्व
मुत्तरपदादेष्टुत्वं च। दुःखेन दाश्यते दूडाशः। दुःखेन नाश्यते दूणाशः। दुःखेन दभ्यते दूडभः॥ खलर्थेभ्यः। दंभेर्नलोपो निपात्यते। दुष्टं ध्यायतीति वि
मुन्यासनं दूढ्यः। आश्वीनिकः। ब्रुवतोऽस्यां सीदंतीति बृसी। ब्रुवच्छब्दस्य ब्रुआदेशः। सदेरधिकरणे ड्रट्। आकृतिगणोऽयं॥ संहितायां। अधिकारोऽयं। कर्णे
रर · ष्ट

इति सिध्दान्तकौमुदी समास-प्रकरणम्

इति समासाश्रय विधिः

यःपुरोयायीवाप्रतिष्कशइत्युच्यते।कशेःकिं।प्रतिगतःकशांप्रतिकशोऽश्वः।यद्यपिकशेरेवकशा।तथापिकशेरितिधातोर्ग्रहणमुपसर्गस्यप्रतेर्ग्रह
णार्थं।तेनधात्वंतरोपसर्गान्न॥प्रस्कण्वहरिश्चंद्रावृषी।प्रस्कण्वाऋषिः।हरिश्चंद्रग्रहणममंत्रार्थं।ऋषीतिकिं।प्रकण्वोदेशः।हरिश्चंद्रोमाणवकः॥मस्क
रमस्करिणौवेणुपरिव्राजकयोः।मकरशब्दोऽव्युत्पन्नः।तस्यसुडिनिश्चनिपात्यते।वेण्वितिकिं।मकरोग्राहः।मकरीसमुद्रः॥कास्तीराजस्तुंदेनगरे।ईषत्ती
रमस्येतिकास्तीरंनामनगरं।अजस्येवतुंदमस्येत्यजस्तुंदंनामनगरं।नगरेकिं।कातीरं।अजतुंदं॥कारस्करोवृक्षः।कारंकरोतीतिकारस्करोवृक्षः।अन्यत्रका
रकरः।केचित्तुकस्कादिषुइदंपठंतिनसूत्रेषु॥पारस्करप्रभृतीनिचसंज्ञायां।एतानिससुट्कानिनिपात्यंतेनाम्नि।पारस्करः।किष्किंधा।तद्बृहतोःकरपत्यो
श्चोरदेवतयोःसुट्तलोपश्च।तत्पूर्वंचत्वेनदकारोपिबोध्यः।तद्बृहतोर्दकारतकारौलुप्येते।करपत्योस्तुसुट्।चोरदेवतयोरितिसमुदायोपाधिः।तस्क
रः।बृहस्पतिः।प्रायस्यचित्तिचित्तयोः।प्रायश्चित्तिः।प्रायश्चित्तं।वनस्पतिरित्यादि।आकृतिगणोयं॥ इतिसमासाश्रयविधयः॥ समर्थानांप्रथमाद्वा॥
।इदंपदत्रयमधिक्रियते।प्राग्दिशइतियावत्।सामर्थ्यंपरिनिष्ठितत्वं।कृतसंधिकार्यत्वमितियावत्॥प्राग्दीव्यतोऽण्।तेनदीव्यतीत्यतःप्रागणधिक्रिय
ते॥अश्वपत्यादिभ्यश्च।एभ्योऽण्स्यात्प्राग्दीव्यतीयेष्वर्थेषु।वक्ष्यमाणस्यण्यस्यापवादः॥तद्धितेष्वचामादेः।ञितिणितिचतद्धितेपरेऽचामादेरचोवृ
द्धिःस्यात्॥कितिच।कितितद्धितेपरेचतथा।अश्वपतेरपत्यादिआश्वपतं।गाणपतं।गाणपत्योमंत्रइतितुप्रामादिकमेव॥दित्यदित्यादित्यपत्युत्तर ७५
पदाण्यः।दित्यादिभ्यःपत्युत्तरपदाच्चप्राग्दीव्यतीयेष्वर्थेषुण्यःस्यादणोपवादः।दैत्यः।अदितेरादित्यस्यवाआदित्यः।प्राजापत्यः।यमाच्चेतिकाशिकायां।

इति सिध्धानकौमुदी समास-प्रकरणम्

इति समासाश्रय विधिः

स्यः। उत्तरपदे किं। निष्क्रान्तस्तोकान्निस्तोकः। ब्राह्मणाच्छंसिन उपसंख्यानं॥ ब्राह्मणे विहितानि शास्त्राणि उपचाराद्ब्राह्मणानि तानि
शंसतीति ब्राह्मणाच्छंसी॥ ऋत्विग्विशेषः॥ द्वितीयार्थे पंचम्युपसंख्यानादेव। ओजःसहोम्भस्तमसस्तृतीयायाः॥ ओजसा
कृतमित्यादि। अंजस उपसंख्यानं। अंजसाकृतं। आर्जवेन कृतमित्यर्थः॥ पुंसानुजो जनुषांध इति वाच्यं॥ यस्याग्रजः पु
मान्स पुंसानुजः। जनुषांधो जात्यंधः। मनसः संज्ञायां। मनसागुप्ता। अज्ञायिनि च। मनस इत्येव। मनसा आज्ञातुंशीलम
स्य मनसाज्ञायी॥ आत्मनश्च। आत्मनस्तृतीयाया अलुक्स्यात्। पूरण इति वक्तव्यं। पूरणप्रत्ययांते उत्तरपदे इत्य
र्थः। आत्मनापंचमः। जनार्दनस्त्वात्मचतुर्थ एवेति बहुव्रीहिर्वोध्यः। पूरणे किं। आत्मकृतं वैय्याकरणाख्यायां च
तुर्थ्याः। आत्मन इत्येव। आत्मनेपदं। आत्मनेभाषा। तादर्थ्ये चतुर्थी। चतुर्थी इति योगविभागात्समासः। परस्य च।
परस्मैपदं। परस्मैभाषा॥ हलदंतात्सप्तम्याः संज्ञायां। हलंताददंताच्च सप्तम्या अलुक्संज्ञायां। त्वचिसारः। गवियु
धिभ्यांस्थिरः॥ आभ्यां स्थिरस्य सस्य षः स्यात्। गविष्ठिरः। अत्र गवीति वचनाद्वालुक्। युधिष्ठिरः। अरण्येतिलकः।

अत्र संज्ञायामिति समासः॥ हद्द्युभ्यां च। हृदिस्पृक्॥ दिविस्पृक्॥ कारनाम्नि च प्राचां हलादौ। प्राचां देशे यत्कारनाम
तत्र हलादावुत्तरपदे हलदंतात्सप्तम्या अलुक्। मुकुटेकार्षापणं। दृषदिमाषकः। पूर्वेण सिद्धे नियमार्थं। कारना
म्न्येव। प्राचामेव। हलादावेवेति॥ कारनाम्नीति किं। अभ्याहितपशुः॥ काराद्न्यस्मै देयस्य नाम। प्राचां किं। यू
थपशुः। हलादौ किं। अविकटोरणः॥ हलदंतात् किं। नद्यां दोहो नदीदोहः। मध्याद्गुरौ। मध्येगुरुः। अंताच्च। अंते
गुरुः। अमूर्धमस्तकात्स्वांगादकामे॥ कंठेकालः। उरसिलोमा। अमूर्धमस्तकात् किं। मूर्धशिखः। मस्तकशिखः।
अकामे किं। मुखेकामोस्य मुखकामः। बंधे च विभाषा। हलदंतात्सप्तम्या अलुक्। हस्तेबंधः। हस्तबंधः। हलदं
तेति किं। गुप्तिबंधः। तत्पुरुषे कृति बहुलं। स्तंबेरमः। कर्णेजपः। क्वचिन्न। कुरुचरः। प्रावृट्शरत्कालदिवां जे॥
प्रावृषिजः॥ शरदिजः॥ कालेजः॥ दिविजः। पूर्वस्यायं प्रपंचः॥ विभाषा वर्षक्षरशरवरात्। एभ्यः सप्तम्या अ

सि० कौ० स लुक्। जे। वर्षेजः। वर्षजः॥ क्षरेजः। क्षरजः॥ शरेजः। शरजः। वरेजः। वरजः। घकालतनेषु कालनाम्नः। सप्तम्या विभाषा
१२ लुक् स्यात्॥ घ। पूर्वाह्णेतरे। पूर्वाह्णेतमे। काल। पूर्वाह्णेकाले। तन। पूर्वाह्णेतने। पूर्वाह्णतने। शयवासवासिष्वका
लात्। खेशये। खशयः। ग्रामेवासः। ग्रामवासः॥ ग्रामेवासी। ग्रामवासी॥ अपो योनियन्मतुषु॥ अप्सुयोनि
रुत्पत्तिर्यस्य सोऽप्सुयोनिः॥ अप्सव्यः। अप्सुमन्तावाज्यभागौ॥ नेन्सिद्धबध्नातिषु च॥ इन्ने
तादिषु सप्तम्या अलुङ्न। स्थण्डिलशायी। सांकाश्यसिद्धः। चक्रबन्धः। स्थे च भाषायां॥ सप्तम्या अलुग्न
समस्थः। विषमस्थः। भाषायां किं। कृष्णोऽस्यारवरेष्ठः। षष्ठ्या आक्रोशे। चौरस्यकुलं। आक्रोशे किं। ब्राह्मणकु आ
लं। वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु॥ वाचोयुक्तिः॥ दिशोदण्डः। पश्यतोहरः। आमुष्यायणामुष्यपुत्रिका
मुष्यकुलिकेति च। अमुष्यापत्यं आमुष्यायणः॥ नडादित्वात्फक्। अमुष्य पुत्रस्य भाव आमुष्यपुत्रिका।
मनोज्ञादित्वाद्वुञ्। एवमामुष्यकुलिका। देवानांप्रिय इति च मूर्खे। अन्यत्र देवप्रियः। शेपपुच्छलाङ्गूलेषु शुनः। १२

समासान्त प्रकरणम्

(सू) अनुगवमायामे॥ एतानि निपात्यन्ते दीर्घत्वे॥ अनुगवं॥ यानं॥ यस्य चायाम इति समासः॥ द्विस्तावा त्रिस्तावा वेदिः॥ अच्प्रत्य
याष्टिलोपः॥ समासमासश्च निपात्यते॥ यावती प्रकृतौ वेदिस्ततो द्विगुणा त्रिगुणा वा अश्वमेधादौ तत्रेदं निपातनं॥ वेदिरिति
किं। द्विस्तावती त्रिस्तावती रज्जुः॥ उपसर्गादध्वनः॥ प्रगतोऽध्वानं प्राध्वो रथः॥ न पूजनात्॥ पूजनार्थात्परेभ्यः समासान्त
न स्यात्॥ सुराजा॥ अतिराजा॥ स्वतिभ्यामेव॥ नेह। परमराजः॥ पूजनात्किं। गामतिक्रान्तोऽतिगवः। बहुव्रीहौ सक्थ्यक्ष्णो
रित्यतः प्रागेवायं निषेधः॥ नेह। सुसक्थः॥ स्वक्षः॥ किमः क्षेपे॥ क्षेपे यः किंशब्दस्ततः परं यदन्तं तदन्तात्समासान्तो न स्यात्॥ कु
त्सितो राजा किंराजा॥ किंसखा। किंगौः॥ क्षेपे किं॥ किंराजः॥ किंसखः किंगवः॥ नञस्तत्पुरुषात्॥ समासान्तो न॥ अराजा
असखा। तत्पुरुषात्किं॥ अधुरं शकटं। पथो विभाषा। नञ्पूर्वात्पथो वा समासान्तः॥ अपथः। अपन्थाः। तत्पुरुषादित्येव॥
६४ सां अपथो देशः॥ अपथं वा तीरं॥ इति समासान्ताः॥ अलुगुत्तरपदे॥ अलुगधिकारः प्रागानङः। उत्तरपदाधिकारस्त्वापाद
परिसमाप्तेः। पंचम्याः स्तोकादिभ्यः। एभ्यः पंचम्या अलुक् स्यादुत्तरपदे॥ स्तोकान्मुक्तः। एवमन्तिकार्थदूरार्थकृच्छ्रे

मलकीतरा। कुवलीतरा। नद्याः शेषस्यान्यतरस्यां। अङ्यंतनद्याः ङ्यंतेकाश्वघादिषु ह्रस्वो वास्यात्। ब्रंसबधूत्तरा॥ ब्रं
सबंधुतरा। स्त्रीतरा। स्त्रितरा॥ कृन्नद्या न। लक्ष्मीतरा। उगितश्च। उगितः परायानदीतदंतस्याघादिषु ह्रस्वो वास्यात्। विदु
षितरा। ह्रस्वाभावपक्षेतसिलादिष्विति पुंवत्॥ विद्वत्तरा। घादिषु तु विदुषीतरेत्येकदात्तं। तन्निर्मूलं। हृदयस्य हृल्ले
खयदण्लासेषु। हृदयं लिखतीति हृल्लेखः॥ हृदयस्य प्रियं हृद्यं॥ हृदयस्येदं हार्दं। हृदयस्य लासः॥ हृल्लासः। लेखेत्यण
न्तस्य ग्रहणं॥ घञि तु हृदयलेखः॥ लेखग्रहणमेव ज्ञापकं॥ उत्तरपदाधिकारे तदंतविधिर्नास्तीति॥ वा शोकष्य
ञ्रोगेषु। हृच्छोकः। हृदयशोकः॥ सौहार्द्यं॥ सौहृदय्यं। हृद्रोगः। हृदयरोगः॥ हृदयशब्दपर्यायो हृच्छब्दोप्यस्ति तेन सि
द्धे प्रपंचार्थमिदं। पादस्य पदाज्यातिगोपहतेषु। एतेषूत्तरपदेषु पादस्य पद इत्यदं आदेशः स्यात्॥ पादाभ्यामजतीति त आ
पदाजिः॥ पदातिः। अज्यतिभ्यां पादे चेति णप्रत्ययः। अजेर्व्यभावो निपातनात्। पदगः। पदोपहतः। पद्यत्यतदर्थे। पा ९३
दस्य पत्स्यादतदर्थे यति परे। पादौ विध्यंति पद्याः शर्कराः। विध्यत्यधनुषेति यत्॥ अतदर्थे किं। पादार्थमुदकं पाद्यं।

त२

पादार्घाभ्यां चेति यत्॥ इके चरतावुपसंख्यानं॥ पादाभ्यां चरति पदिकः। पर्पादिभ्यः ष्ठन्॥ हिमकाषिहतिषु च। पद्धिमं। पत्का
षी। पद्धतिः। ऋचः शे॥ ऋचः पादस्य पत्स्याच्छे परे। गायत्रीं पच्छः शंसति॥ पादं पाद मित्यर्थः॥ ऋचः किं। पादशः कार्षाप
णं ददाति। वा घोषमिश्रशब्देषु। पादस्य पत्। पद्घोषः। पादघोषः। पन्मिश्रः। पादमिश्रः॥ पच्छब्दः। पादशब्दः॥ निष्के च तक
व्यां। पन्निष्कः। उदकस्योदः संज्ञायां॥ उदमेघः। उत्तरपदस्य चेति वक्तव्यं॥ क्षीरोदः॥ पेषंवासवाहनधिषु च। उदपेषं पिन
ष्टि। उदवासः। उदवाहनः। उदधिर्घटः॥ समुद्रे तु पूर्वेण सिद्धं। एकहलादौ पूरयितव्येऽन्यतरस्यां। उदकुंभः। उदककुंभः।
एके...ति किं॥ उदकस्थाली॥ पूरयितव्येति किं॥ उदकपर्वतः। मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषु च। उदमं
थः॥ उदकमंथः॥ उदौदनः। उदकौदनः॥ इको ह्रस्वो ङ्यो गालवस्य॥ इगंतस्य अङ्यंतस्य ह्रस्वो वा स्यादुत्तरपदे। ग्रा
मणिपुत्रः॥ ग्रामणीपुत्रः॥ इकः किं। रमापतिः। अङ्यंत इति किं। गौरीपतिः॥ गालवग्रहणं किं॥ पूजार्थं॥ अन्यतरस्यां
मित्यनुवृत्तेः। इयङुवङ्भाविनामव्ययानां च नेति वाच्यं॥ श्रीमदः॥ भ्रूभंगः॥ शुक्लीभावः। अभ्रुकुंसादीनामि

सि॰कौ॰स तिवक्तव्यं॥भ्रुकुंसः॥भ्रकुटिः॥भ्रुकुंसः॥भ्रूकुटिः॥अकारोनोनं विधीयत इतिव्याख्यांतरं॥भ्रुकुंसः॥भ्रकुटिः॥भ्रु
९४ भ्रुवाकुंसोभाषयां शोभावायस्यसः॥स्त्रीवेषधारी।नर्तकः॥भ्रवः कुटिः॥कौटिल्यं।एकतद्धितेच॥एकशब्दस्य ह्रस्वस्या
त्तद्धितेउत्तरपदेच।एकस्यारूप्यंआगतं एकरूप्यं।एकक्षीरं।ङ्यापोः संज्ञाछंदसोर्बहुलं।रेवतिपुत्रः।अजक्षीरं॥त्वे
च।त्वप्रत्ययेनङ्यापोर्वाह्रस्वः।अजत्वं।रोहिणित्वं।ष्यङः संप्रसारणंपुत्रपत्योस्तत्पुरुषे।ष्यङंतस्यपूर्वपदस्यसंप्रसार
णंस्यात्पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे।संप्रसारणस्य।संप्रसारणस्यदीर्घस्यादुत्तरपदे।कौमुदगंध्यायाः पुत्रः कौ
मुदगंधीपुत्रः।कौमुदगंधीपतिः॥व्यवस्थितविभाषयाद्दस्येन॥स्त्रीप्रत्ययेचानुपसर्जनेतितदादिनियमप्रतिषे
धात्।परमकारीषगंधीपुत्रः।उपसर्जनेतुतदादिनियमात्रेह॥अतिकारीषगंध्यपुत्रः॥बंधुनिबहुव्रीहौ।बंधु
शब्देउत्तरपदेष्यङः संप्रसारणंस्यात् बहुव्रीहौ।कारीषगंध्याबंधुर्यस्येतिकारीषगंधीबंधुः।बहुव्रीहौकिं॥का
रीषगंध्यायाः बंधुः।कारीषगंध्याबंधुः॥क्लीबनिर्देशस्तुशब्दस्वरूपापेक्षया।मातान्मातृकमातृषुचा।कारीष ९४

श्रुनःशेपः।श्रुनःपुछः।श्रुनोलांगूलः।दिवश्चदासे।दिवोदासः।पुत्रेन्यतरस्यां।षष्ठ्याः पुत्रेपरेअलुग्वानिंदायां॥दास्
स्यापुत्रोदासीपुत्रः।निंदायांकिं।ब्राह्मणीपुत्रः।ऋतोविद्यायोनिसंबंधेभ्यः।विद्यासंबंधयोनिसंबंधवाचिनः ऋदंतात्षष्
ष्ठ्याअलुक्स्यात्।होतुरंतेवासी।होतुःपुत्रः॥पितुरंतेवासी॥पितुःपुत्रः।विद्यायोनिसंबंधेभ्यस्तत्पूर्वोत्तरपदग्र
हणं॥नेह।होतृधनं॥पितृगृहं।विभाषास्वसृपत्योः।ऋदंतात्षष्ठ्याअलुग्वास्वसृपत्योःपरयोः॥मातुःपितुर्भ्यो
स्वस्य मन्यतरस्यां॥आभ्यांस्वसुःषत्वंवास्यात्समासे।मातुःष्वसा।मातुःस्वसा।पितुःष्वसा।पितुःस्वसा।लुकपक्षेतु।
मातृपितृभ्यांस्वसा।आभ्यांपरस्यस्वसुःसस्यषःस्यात्समासे।मातृष्वसा।पितृष्वसा।असमासेतु।मातुःस्वसा।
पितुःस्वसा।इत्यलुक्समासः॥घरूपकल्पचेलड्ब्रुवगोत्रमहत्हतेषुङ्योनेकाचोह्रस्वः।भाषितपुंस्काद्योङीदंतेत
स्यानेकाचोह्रस्वःस्याद्घरूपकल्पप्रत्ययेषुचेलडादिषुचोत्तरपदेषु।ब्राह्मणितरा।ब्राह्मणितमा।ब्राह्मणिरूपा।ब्राह्म
णिकल्पा।ब्राह्मणिचेलि।ब्राह्मणिब्रुवा।ब्राह्मणिगोत्रेत्यादि।कृतः।पचाद्यच्विवच्यादेशगुणयोरभावोपिनिपात्यते
चेलडादीनिवृत्तिविषये।कुत्सिनवाचितेः कुत्सितानिकुत्सनैरितिसमासः।उग्रः किं।दत्तातरा।भाषितपुंस्कात्किं।आ

मतौ बह्वचोऽनजिरादीनां। अमरावती। अनजिरादीनां किं। अजिरवती। बह्वचः किं। व्रीहिमती। संज्ञायामित्येव। नेह। वलयवती।
शरादीनां च। शरावती। इको वहेऽपीलोः। इगंतस्य दीर्घः स्याद्वहे। ऋषीवहं। कपीवहं। इकः किं। पिंडवहं। अपीलोः किं। पीलु
वहं। अपील्वादीनामिति वक्तव्यं। दारुवहं। उपसर्गस्य घञ्यमनुष्ये बहुलं। उपसर्गस्य बहुलं दीर्घः स्याद्घञंते परे
न तु मनुष्ये। परिपाकः। परीपाकः। अमनुष्ये किं। निषादः। इकः काशे। इगंतस्योपसर्गस्य दीर्घः काशे। वीकाशः।
नीकाशः। इकः किं। प्रकाशः। अष्टनः संज्ञायां। उत्तरपदे दीर्घः। अष्टापदं। संज्ञायां किं। अष्टपुत्रः। चितेः कपि। एकचि
तीकः। द्विचितीकः। नरे संज्ञायां। विश्वानरः। मित्रे चर्षौ। विश्वामित्रः। संज्ञायां किं। विश्वमित्रो माणवकः। मनोः दंतदंष्ट्रा
कर्णकंदवराहपुच्छपदेषु दीर्घो वाच्यः। श्वादंत इत्यादि। प्रनिरंतःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि।
एभ्यो वनस्य णत्वं स्यात्। प्रवणं। कार्ष्यवणं। इह षात्परत्वाण्णत्वं। विभाषौषधिवनस्पतिभ्यः। वनस्य णः स्याद्वा। दूर्वावणं।
दूर्वावनं। शिरीषवणं। शिरीषवनं। द्व्यक्षरत्र्यक्षरेभ्य एव। नेह। देवदारुवनं। इरिकादिभ्यः प्रतिषेधो वाच्यः। इरिकावनं। नारिका
वनं।। वाहनमाहितात्। आरोप्य यदुह्यते तत् इति स्वान्निमित्तात्परस्य वाहननकारस्य णत्वं स्यात्। इक्षुवाहणं।। आहि
तात् किं। इंद्रवाहनं। इंद्रस्वामिकं वाहनमित्यर्थः। वहेर्ल्युटि स्थिरे देवस्तेन निपातात्। पानं देशे। पूर्वपदस्थान्निमित्तात्पर ९७
स्य पानस्य नस्य णत्वं स्याद्देशे गम्ये। क्षीरं पानं येषां ते क्षीरपाणा उशीनराः। सुरापाणाः प्राच्याः। पीयत इति पानं। कर्मणि

र ल्युट्। वाभावकरणयोः।। पानस्य इत्येव। क्षीरपानं।। क्षीरपाणं।। गिरिनद्यादीनां वा।। गिरिणदी।। गिरिनदी। चक्रनितंबा।। चक्रणितं
बा। प्रातिपदिकांतनुम्विभक्तिषु च। पूर्वपदस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य णत्वं वा स्यात्। प्रादिकांते।। माषवापिणौ
नुमि। व्रीहिवापिणि। विभक्तौ। माषवापेण।। पक्षे माषवापिनावित्यादि। उत्तरपदत्वादिनिमित्तप्रातिपदिकांतदंतस्यैव णत्वं। नेह। गर्गा
णां भगिनी गर्गभगिनी। अत एव नुम्ग्रहणं। कृतं। अंगस्य नुमविधानात्तद्... कोऽहि नुम्न उत्तरपदस्य।। किं च प्रहिण्वन्निव्या
दौ हिर्वर्तुमो नेत्वार्थमपि नुम्ग्रहणं।। प्रेन्वनमित्यादौ तु क्षुभ्नादित्वान्न। युवादेर्न। आर्यस्य यूना। परिपक्वानि। एकाजुत्तरप
दे णः। नित्यमित्युक्तं। वृत्रहणौ। हरिमानयतीति हरिमाणी। नुमि। क्षीरपाणि। विभक्तौ। क्षीरपेण। रम्यविणा। कुमति च
कवर्गवत्युत्तरपदे णत्वं वा। हरिकामिणौ। हरिकामणि। हरिकामेण। पदव्यवायेऽपि। पदेन व्यवधाने णत्वं न स्यात्। माषकुं
भवापेन। चतुरंगयोगेन। अतद्धित इति वक्तव्यं। आर्द्रगोमयेण। शुष्कगोमयेण। कुस्तुंबुरूणि जातिः। अत्र सुण्णिपात्यते।।
कुस्तुंबुरु धान्यकं। क्लीबत्वमतंत्रं। जातिः किं। कुतुंबुरूणि। कुत्सितानि तिंदुकीफलानीत्यर्थः।। अपरस्पराः क्रियासा

त्ये॥ सुण्णिपात्यते। अपरस्पराः सार्थाः गच्छंति। सततमविछेदेन गच्छंतीत्यर्थः। क्रियेति किं। अपरपराः गच्छंति॥ अपरे च
परे च सकृदेव गच्छंति॥ गोष्पदं सेवितासेवितप्रमाणेषु। सुट् सस्य षत्वं च निपात्यते। गावः पद्यंते ऽस्मिन्देशे स गोभिः सेवितो
गोष्पदो देशः। असेविते। अगोष्पदान्यरण्यानि। प्रमाणे। गोष्पदमात्रं क्षेत्रं। सेवितेति किं। गोः पदं गोपदं॥ आस्पदं प्रति
ष्ठायां॥ आत्मयापनाय स्थाने सुण्णिपात्यते। नेतिकिं। आपदापदं। आश्चर्यमनित्ये॥ अद्भुते सुण्णिपात्यते। आ
श्चर्यं यदि स भुंजीत। अनित्ये किं। आश्चर्यं कर्मशोभनं। वर्चस्केवस्करः। कुत्सितं वर्चो वर्चस्कं अन्नमलं तस्मिन्सुट्
अवकीर्यत इत्यवस्करः। वर्चस्के किं। अवकरः। अपस्करो रथांगं। अपकरोन्यः। विष्किरः शकुनौ वा। पक्षे विकिरः
वावचने नैव सुट्विकल्पः। विशेषे विकिरग्रहणं तस्यापि शकुनेरन्यत्र प्रयोगमाह दिति वृत्तिः। तन्न। भाष्यवि
रोधात्। प्रतिष्कशश्च कशेः। कशगतिशासनयोरित्यस्य प्रतिपूर्वस्य पचाद्यचि सुण्णिपात्यते। षत्वं च। सहा
यः पुरोयायी वा प्रतिष्कश उच्यते। कशः किं। प्रतिगतः कशां प्रतिकशोऽश्वः। यद्यपि कशेरेव कशा॥ तथापि कशे
रिति धातोर्ग्रहणं मुपसर्जनस्य प्रतेर्ग्रहणार्थं। तेन॥ धात्वंतरोपसर्गोऽन्न॥ प्रस्कण्वहरिश्चंद्रावृषी। प्रस्कण्वोत्र १८

उत्तरतारं। उत्तरतीरं। दुरोदाशनाशदभध्येषु उत्वमुत्तरपदादेः ष्टुत्वं च। दुःखेन दाश्यते दूडाशः। दुःखेन नाश्यते दूणाशः। दुःखेन दभ्य
ते दूडभः। खलर्थेभ्यः। दंभेर्नलोपो निपातनात्। दुष्टं ध्यायतीति दूढ्यः। आतश्चेति कः। ध्रुवं तोस्यांसीदंतीति ध्रुसी। ध्रुवशब्द
स्य ध्रु आदेशः। सदेरधिकरणे ड्रट्। आकृतिगणोऽयं। संहितायां। अधिकारोऽयं। कर्णे लक्षणस्याविष्टाष्टपंचमणिभिन्नछिन्नछिद्र
स्रुवस्वस्तिकस्य। कर्णशब्दे परे लक्षणवाचकस्य दीर्घः। द्विगुणाकर्णः। लक्षणस्य किं। शोभनकर्णः। लक्षण्यस्य किं। शोभनकर्णः॥
अविष्टादीनां किं। विष्टकर्णः। अष्टकर्णः। पंचकर्णः। मणिकर्णः। भिन्नकर्णः। छिन्नकर्णः। छिद्रकर्णः। स्रुवकर्णः। स्वस्ति
कर्णः। नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ॥ क्विबंतेषु एतेषु पूर्वस्य दीर्घः। उपानत्। नीवृत्। प्रावृट्। मर्माविध्। नीरुक्। अ
भीरुक्। ऋतीषट्। परीतत्। क्वाविति किं। परिणहनं। विभाषा पुरुषे इत्यतो मंडूकप्लुत्या विभाषानुवर्तते। सा च व्यवस्थिता। तेन ग
तिकारकयोरेव। नेह। पटुरुक्। तिग्मरुक्। वनगिर्योः संज्ञायां कोटरकिंशुलकादीनां। कोटरादीनां वने परे किंशुलकादीनां गि
रौ परे दीर्घः स्यात्संज्ञायां। वने पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः। वनशब्दस्योत्तरपदस्य एभ्य एव णत्वं नान्येभ्यः। इ
हकोटरांताः पंच दीर्घविधौ कोटरादयो बोध्याः। तेषां कृतदीर्घाणां णत्वविधौ निर्देशो नियमार्थः। अग्रेशब्दस्य तु विध्यर्थः॥ पुर
गावणं। मिश्रकावणं। सिध्रकावणं। सारिकावणं॥ कोटरवणं। एभ्य एवेति किं। असिपत्रवनं। वनस्याग्रे अग्रेवणं॥ राजदंतादिषु
निपातनात्सप्तम्या अलुक्। प्रातिपदिकार्थमात्रे प्रथमा। किंशुलका गिरिः। वले। वलप्रत्यये परे दीर्घः स्यात्संज्ञायां। कृषीवलः॥

पार्थिवा। पार्थिवी। देवाद्यञञौ ॥४

एभ्यो ऽण्स्यात्प्राग्दीव्यतीयेष्वर्थेषु। वक्ष्यमाणस्य ण्यस्यापवादः। तद्धितेष्वचामादेः। ञिति णिति च तद्धिते परे ऽचामा
देरचो वृद्धिः स्यात्। किति च। किति तद्धिते परे च तथा। अश्वपतेरपत्यादि आश्वपतं। गाणपतं। गाणपत्यो मंत्र इति
तु प्रामादिकमेव। दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः। दित्यादिभ्यः पत्युत्तरपदाच्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यादणो
पवादः। दैत्यः। अदितेरादित्यस्य वा। आदित्यः। प्राजापत्यः। यमाच्चेति काशिकायां। याम्यः। पृथिव्या ञाञौ॥ दैव्यं॥२
दैवं। बहिषष्टिलोपो यञ् च। बाह्यः। ईकक् च। बाहीकः। स्थाम्नोकारः। अश्वस्थामः। पृषोदरादित्वात्सस्य तः। भवार्थे तु
लुग्वाच्यः। अश्वत्थामा। लोम्नोऽपत्येषु बहुषु। बाह्वादिरिञोऽपवादः। उडुलोमाः। उडुलोमान्। बहुष्विति किं। औडुलो
मिः। गोरजादिप्रसंगे यत्। गव्यं। अजादिप्रसंगे किं। गोभ्यो हेतुभ्य आगतं गोरूप्यं। गोमयं। उत्सादिभ्यो ऽञ्। औ
त्सः। अग्निकलिभ्यां ढक्वक्तव्यः। अग्नेरपत्यादि आग्नेयं। कालेयं॥ ॥इत्यपत्यादिविकारांतार्थसाधारणाः प्र
त्ययाः॥ ॥स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्। धान्यानां भवनेऽइत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ स्तः। स्त्रै
णः। पौंस्नः। वत्यर्थे न। स्त्रीपुंवच्चेति ज्ञापकात्॥ स्त्रीवत्। पुंवत्। द्विगोर्लुगनपत्ये। द्विगोर्निमित्तं यस्तद्धितो ऽजादिरन ११

पत्यार्थः प्राग्दीव्यतीयस्तस्य लुक्स्यात्॥ पंचसु कपालेषु संस्कृतः पुरोडाशः पंचकपालः। द्विगुनिमित्तस्य किं। पंचकपालस्येदं खंडं
पांचकपालं। अजादिः किं। पंचगर्गरूप्यं। अनपत्ये किं। द्वयोर्मित्रयोरपत्यं द्वैमित्रिः॥ गोत्रे लुगचि। अजादौ प्राग्दीव्यतीये वि
वक्षिते गोत्रप्रत्ययस्य लुक्स्यात्। गर्गाणां छात्राः। वृद्धाच्छः। आपत्यस्य च तद्धिते नाति। हलः परस्यापत्ययकारस्य लोप
स्यात्तद्धिते परे न त्वाकारे। गार्गीयाः। प्राग्दीव्यतीति किं। गर्गेभ्यो हितं गर्गीयं। अचि किं। गर्गेभ्य आगतं गर्गरूप्यं। यूनि लुक्॥
प्राग्दीव्यतीये अजादौ प्रत्यये विवक्षिते युवप्रत्ययस्य लुक्स्यात्। ग्लुचुकस्य गोत्रापत्यं ग्लुचुकायनिः। वक्ष्यमाणः फिञ्
ततो यून्यण्॥ ग्लौचुकायनः। तस्य छात्राः ग्लौचुकायनाः। अणो लुकि वृद्धत्वाभावाच्छो न। पैलादिभ्यश्च। एभ्यो युवप्रत्यय
स्य लुक्स्यात्। पीलाया वेत्यण्। तस्माद् अणो द्व्यचः इति फिञ्। तस्य लुक्। पैलः। पिता पुत्रश्च। तद्राजाच्चाणः। द्व्यञ्मगधेत्यणंता
दांगशब्दादणो द्व्यचः इति फिञो लुक्। आंगः पिता पुत्रश्च। इञः प्राचां। गोत्रे य इञ् तदंताद्युवप्रत्ययस्य लुक्स्यात्तच्चेद्गोत्रं
प्राचां भवति। पन्नागारस्यापत्यं। अत इञ्। यञिञोश्चेति फक्। पान्नागारिः। पिता पुत्रश्च। प्राचां किं। दाक्षिः पिता।

इदमर्थे अपत्यसमूहविकारादीनां मतभेदादपत्येपि तस्येदमित्यण् प्रवर्त्तेतेति किमनेन निषेधेन तस्यापत्यमिति सूत्रेणेत्यर्थः। यद्यपि तत्र ... स्यादर्थे तस्यापत्यमिति
तदुक्तं तया विधौ गविभागः किमर्थं इत्याक्षेपो द बोध्यः। समाधत्ते बाधनार्थमिति। तस्येदमित्यस्य यद्बाधकं ... तद्बाधनार्थं कृतं स्यादिति भावे नेदिमर्थः

सिं॰कौ॰त॰ दाक्षायणः। पुत्रः। न तौल्विभ्यो लि॰॥ तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य लुग्नस्यात्॥ पूर्वेण प्राप्तः। तुल्वलः॥ तत इञि फक्
१०० तौल्वलिः। पिता॥ तौल्वलायनः पुत्रः। फक्फिञोरन्यतरस्यां॥ यूनि लुगिति नित्यं लुकि प्राप्ते विकल्पार्थं सूत्रं॥ कात्यायनस्य
छात्राः। कात्तीयाः। कात्यायनीयाः। यस्कस्यापत्यं यास्कः॥ शिवाद्यण्॥ तस्यापत्यं युवा यास्कायनिः॥ अणो द्व्यचः इति फि
ञ्॥ तस्य छात्राः यास्कीयाः। यास्कायनीयाः। तस्यापत्यं। षष्ठ्यंतात्कृतसंधेः समर्थादपत्येर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया
स्युः। उपगोरपत्यमौपगवः॥ आदिवृद्धिरंत्योपधावृद्धिं बाधते। तस्येदमित्यपत्येपि बाधनार्थं कृतं भवेत्॥ उत्सर्गः शेष एवा
सौ वृद्धान्यस्य प्रयोजनं। भानोरपत्यं भानवः। कृतसंधेः किं। सौत्थितिः॥ अकृतव्यूहपरिभाषया सावुत्थितिर्मा भूत्।
समर्थपरिभाषया नेह॥ वस्त्रमुपगोरपत्यं चैत्रस्य॥ प्रथमात्किं॥ अपत्यवाचकात् षष्ठ्यर्थे माभूत्॥ वाग्रहणाद्वाक्यम
पि। द्वैयज्ञीति सूत्रादन्यतरस्यांग्रहणानुवृत्तेः समासोपि। उपग्वपत्यं॥ जातित्वान्ङीष्॥ औपगवी। आश्वपतः १००
दैत्यः। औत्सः। स्त्रैणः। पौंस्नः। अपत्यं पौत्रप्रभृति गोत्रं॥ अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात्। जी

षिः। हरिश्चंद्रग्रहणमसंज्ञार्थं॥ ऋषाविति किं॥ प्रस्कण्वो देशः॥ हरिश्चंद्रो माणवकः॥ मस्करमस्करिणौ वेणुपरिव्राजकयोः॥ मक
रशब्दो अस्युमन्त्रः। तस्य सुडिनिश्च निपात्यते। वेण्विति किं॥ मकरो ग्राहः॥ मकरी समुद्रः॥ कास्तीराजस्तुंदे नगरे। ईषत्तीरम
स्येति कास्तीरं नाम नगरं। अजस्येव तुंदमस्येति अजस्तुंदं नाम नगरं। नगरे किं। कातीरं। अजतुंदं। कास्कोरो वृक्षः। कारं
र करोतीति कारस्करो वृक्षः। अन्यत्र कारकरः। केचित्तु कस्कादिषु इदं पठंति। न सूत्रेषु। पारस्करप्रभृतीनि च संज्ञायां। एता
नि ससुट्कानि निपात्यंते नाम्नि। पारस्करः। किष्किंधा। तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च। तात्पर्येण च वर्णे
दकारोपि बोध्यः। तद्बृहतोर्दकारतकारौ लुप्येते। करपत्योः सुट्। चोरदेवतयोरिति समुदायोपाधिः। तस्करः॥ बृह
स्पतिः। प्रायस्य चित्तिचित्तयोः। प्रायश्चित्तिः। प्रायश्चित्तं। वनस्पतिरित्यादि॥ आकृतिगणोयं। इति समाश्रयाविधि
यः॥ ॥श्रीशंकराय नमः॥ समर्थानां प्रथमाद्वा॥ इदं पदत्रयमधिक्रियते॥ प्राग्दिश इति यावत्॥ सामर्थ्यं परिनिष्ठि
तत्वं। कृतसंधिकार्यत्वमिति यावत्। प्राग्दीव्यतोऽण्॥ तेन दीव्यतीत्यतः प्रागणधिक्रियते। अश्वपत्यादिभ्यश्च॥

स्याच्च तुर्थे तजीवज्ज्येष्ठे मृतवंश्ये औपगवेः फक् । इत्थं फगिञोः परंपरायां मूलाच्छततमे गोत्रे एकोनशततं प्रत्ययास्स्युः ॥
पितामहादीनामपीति मुख्यपक्षे तु तृतीये वा च्येउपगोरणाद्युष्टसिद्धेपि अणंतादिञपि स्यात् । चतुर्थे ततः फगिति फ
गिञोः परंपरायां ज्ञाततमे गोत्रे अष्टनवतेरनिष्टप्रत्ययास्स्युः । अतो नियमार्थ मिदं सूत्रं । एवमुत्तरसूत्रेष्वपूह्यं । गोत्राद्यु
न्यः स्त्रियां । यून्यपत्ये गोत्रप्रत्ययांतादेव प्रत्ययः स्यात् । स्त्रियां तु न युवसंज्ञा । गर्ग्गस्य युवापत्यं गार्ग्यायणः ॥ स्त्रियां गु
पा२ गोत्र वा एक एव प्रत्ययः । अत इञ् ॥ अदंतं यत्प्रातिकं तस्म ज्ञतिकास्स ष्ठ्यंतादिञ्स्यादपत्येर्थे ॥ दाक्षिः ॥ बाह्वादिभ्यश्च ॥
क बाहविः । औडुलोमिः । आकृतिगणोयं ॥ सुधातुरकङ् चादिञ् ॥ सुधातुरपत्यं सौधातकिः । व्यासवरुडनिषादचंडाल
के बिंबानां चेति वक्तव्यं । न य्वाभ्यां पदांताभ्यां पूर्वौ तु ताभ्यामैच् । पदांताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः । किंतु ताभ्यां पूर्वौ
क्रमादैचावागमौ स्तः । वैयासकिः । वारुडकिः । इत्यादि ॥ गोत्रे कुंजादिभ्यश्च्फञ् ॥ आतच्फञोरस्त्रियां ॥ व्रातवाचिभ्य च्फञं
अंतेभ्यश्च स्वार्थे ञ्यः स्यात् न तु स्त्रियां । कौंजायन्यः । बहुत्वे तद्राजत्वाल्लुग्वक्ष्यते । व्राध्नायन्यः । स्त्रियां कौंजायनी ॥ गो १०९

त्वेन जातित्वान्ङीष् । अनंतरापत्ये कौंजिः । नडादिभ्यः फक् । गोत्र इत्येव । नाडायनः । चारायणः । अनंतरे नाडिः । हरितादिभ्योञः
भ्यो ऽञंतेभ्यो यूनि फक् । हारितायनः । इह गोत्राधिकारेपि सामर्थ्याद्यून्ययं । न हि गोत्रादन्यो गोत्रप्रत्ययः । बिदाद्यंतर्गणो ह त
रितादिः ॥ यञिञोश्च । गोत्रे यौ यञिञौ तदंतात्फक् स्यात् ॥ आनातीत्यक्रेरापत्यस्येति यूपीन । गार्ग्यायणः । दाक्षायणः ॥ लो
शारद्वच्छुनकदर्भाद्भृगुवत्साग्रायणेषु । गोत्रे फक् । अञिञोरपवादः । आद्यो बिदादी । शारद्वतायनो भार्गवश्चेत् । शारद्वतोन्यः ।
शौनकायनो वात्स्यश्चेत् । शौनकोन्यः । दार्भायणः । आग्रायणश्चेत् । दार्भिरन्यः ॥ द्रोणपर्वतजीवंतादन्यतरस्यां ॥ एभ्यो गोत्रे फ
क्वा । द्रोणायनः । द्रौणिः । पार्वतायनः । पार्वतिः । जैवंतायनः । जैवंतिः । अनादिरिह द्रोणः । अश्वत्थाम्न्यनंतरेपि तूपचाराद्द्रौणायनं
इति ॥ अनृष्यानंतर्ये बिदादिभ्योञ् । एभ्योञ्स्याद्गोत्रे । ये त्वत्रानृषयस्तेभ्य आनंतर्ये । सूत्रे स्वार्थे ष्यञ् । बिदस्य गोत्रापत्यं बैदः ।
अनंतरे बैदिः । बाह्वादेराकृतिगणत्वादिञ् । पुत्रस्यापत्यं पौत्रः । दौहित्रः ॥ गर्गादिभ्यो यञ् ॥ गोत्र इत्येव । गार्ग्यः । वात्स्यः ॥ यञञोश्च
मो श्च । गोत्रे यद्यञंतमञंतं च तदवयवा ये तयोर्लुक् स्यात्तत्कृते बहुत्वे सति न तु स्त्रियां । गर्गाः । वत्साः । बिदाः । उर्वाः । तत्कृते इति किं
प्रियगार्ग्याः । स्त्रियां तु गार्ग्यः स्त्रियः । गोत्रे किं । द्वैप्याः । औत्स्याः । यचराध्याय प्रसिद्धमिह गोत्रं । तेनेह न । पौत्राः । दौहित्राः ॥

सि॰कौ॰न॰ मधुबभ्वोर्ब्राह्मणकौशिकयोः। गोत्रे यञ्। माधव्यो ब्राह्मणः। माधवोऽन्यः। बाभ्रव्यः कौशिकः। बाभ्रवोऽन्यः। बहुवचनाद्धस्य गर्गा
दिपाठात्सिद्धे नियमार्थमिदं। गर्गादिपाठफलं तु लोहितादिकार्यं। बाभ्रव्यायणी। कपिबोधादाङ्गिरसे। गोत्रे यञ् स्यात्।
काप्यः। बौध्यः। आङ्गिरसे किं। कापेयः। बौधिः। वतण्डाच्च। आङ्गिरस इत्येव। वातण्ड्यः। अनाङ्गिरसे तु गर्गादौ शिवादौ च पाठ
द्यञणौ॥ वातण्ड्यः। वातण्डः। लुक् स्त्रियां। वतण्डाद्विहितस्य लुक् स्यात् स्त्रियां। शार्ङ्गरवादिपाठान्ङीन्। वतण्डी॥ अनाङ्गिरसे तु
वातण्ड्यायनी। लोहितादित्वात् ष्फः। आङ्गिरसी तु वातण्डी। कपित्वाद्वक्ष्यमाणः ष्यङ्। अश्वादिभ्यः फञ्। गोत्रे आश्वायनः। पुंसि जा
ते। पुंसीति निवृत्तिविशेषणं॥ जातस्य गोत्रापत्यं जातायनः। पुंसीति किं॥ जाताया अपत्यं जातेयः। भर्गात्त्रैगर्ते। गोत्रे फञ्।
भार्गायणस्त्रैगर्तः। भार्गिरन्यः। शिवादिभ्योऽण्। गोत्र इति निवृत्तं। शिवस्यापत्यं शैवः। गाङ्गः। पक्षे तिकादित्वात् फिञ्। गाङ्
गायनिः। शुभ्रादित्वाड्ढक्। गाङ्गेयः। अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः। अवृद्धाभ्यो नदीमानुषीनामभ्यः
अण् स्याड्ढकोऽपवादः। यामुनः। नार्मदः। वैतिस्ताया अपत्यं वैतस्तः। अवृद्धाभ्यः किं। वासवदत्तेयः। नदीत्यादि किं शंकर
वैनतेयः। तन्नामिकाभ्यः किं। शोभनाया अपत्यं शौभनेयः। ऋष्यन्धकवृष्णिकुरुभ्यश्च। ऋषयो मन्त्रद्रष्टारः। वा १·२
बाडुदेयः

यतीतु वंश्ये युवा॥ वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञं स्यान्न गोत्रसंज्ञं॥ भ्रातरि च ज्यायसि। ज्ये भ्रातरि ष्ठे
जीवति कनीयांश्चतुर्थादिर्युवैव स्यात्॥ वान्यस्मिन्सपिण्डे स्थविरतरे जीवति। भ्रातुरन्यस्मिन्सपिण्डे स्थविरतरे जीवति पौत्रप्र
भृतेरपत्यं जीवदेव युवसंज्ञं स्यात् वा॥ एकं जीवतिग्रहणमपत्यस्य विशेषणं द्वितीयं सपिण्डस्य। तरब्निर्देशादुभयोरुत्कर्षो
र्थः। स्थानेन वयसा चोत्कृष्टे पितृव्ये मातामहे भ्रातरि वा जीवति। गार्ग्यस्य अपत्यं गार्ग्यायणः॥ गार्ग्यो वा॥ स्थविरतरे किं। स्था
नवयोन्यूने गार्ग्य एव॥ जीवति किं। मृते मृतो वा गार्ग्य एव। वृद्धस्य च पूजायामिति वाच्यं। गोत्रस्यैव वृद्धसंज्ञा प्राचां॥ गोत्रस्य
युवसंज्ञा पूजायां गम्यमानायां। तत्रभवान् गार्ग्यायणः। पूजेति किं। गार्ग्यः। यूनश्च कुत्सायां। गोत्रसंज्ञेति वाच्यं। गार्ग्यो
जाल्मः। कुत्सेति किं। गार्ग्यायणः। एको गोत्रे। गोत्रे एक एवापत्यप्रत्ययः स्यात्। उपगोर्गोत्रापत्यमौपगवः॥ गार्ग्यः। नाडायनः।
गोत्रे स्वैकोनसंख्यानां प्रत्ययानां परंपरा। यद्वा स्युर्द्व्यूनसंख्यास्ते निष्टे सति प्रसज्यते॥१॥ अपत्यं पितुरेव स्यात्ततः
प्राचामपीति च। मतभेदेन तद्धान्ये सन्त्वमेतद्यथोत्तरं॥२॥ पितुरेवापत्यमिति पक्षे उपगोस्तृतीये वाच्ये औपगवादिञ्
न

सि०कौ०न

१०२

त्रिभ्रः। इकारांताद्व्यचोपत्येढक्स्यान्नत्विञंतात्। दौलेयः। नैधेयः। शुभ्रादिभ्यश्च। ढक्स्यात्। शुभ्रस्यापत्यं शौभ्रेयः। विक
र्णकुषीतकात्काश्यपे। अपत्येढक्स्यात्। वैकर्णेयः। कौषीतकेयः। अन्यो वैकर्णिः। कौषीतकिः। भ्रुवोवुक्च। ढक्। भ्रौवे
यः। प्रवाहणस्यढे। प्रवाहणशब्दस्योत्तरपदस्याचामादेरचोवृद्धिः स्यात्पूर्वपदस्यतुवाढेपरे। प्रवाहणस्यापत्यं प्राव
प्रवाहणेक हणेयः। तत्प्रत्ययस्यच। ढांतस्य प्रवाहणस्योत्तरपदस्याचामादेरचोवृद्धिः पूर्वपदस्यतुवा। प्रवाहणस्यापत्यं प्राव
हणेयिः। बाह्यलक्षितनिमित्तावृद्धिः दाक्षायणविकल्पेनबाधितुं नशब्दस्यत्तइतिसूत्रारंभः। कल्याण्यादीनामिनङ्। एषा
मिनङादेशः स्याड्ढक्च। काल्याणिनेयः। बांधकिनेयः। कुलटायावा। इनङ् मात्रे विकल्प्यते ढक्तु नित्यः। पूर्वेणैव। कौल
टिनेयः। कौलटेयः। सतीभिक्षुकस्यचकुलटा। यातुव्यभिचारार्थं कुलान्यटति। तस्याः क्षुद्राभ्योवेतिपक्षेद्रक्। कौलटेरः।
हृद्भगसिंध्वंते पूर्वपदस्यच। हृदाद्यंते पूर्वोत्तरपदयोरचामादेरचोवृद्धिः ञ्णितिकितिच। सुहृदोपत्यं सौहार्दः। सुभाग
याः अपत्यं सौभागिनेयः। सक्तुप्रधानाः सिंधवः सक्तुसिंधवः। तेषुभवः साक्तुसैंधवः। चटकायाएरक्। चटकस्येतिवाच्यं॥
लिंगविशिष्टपरिभाषया स्त्रियाअपि। चटकस्य चटकायावाऽपत्यं चाटकैरः। स्त्रियामपत्येलुग्वक्तव्यः। तयोरैंपवा

त्यं स्त्री चटका। अजादित्वाट्टाप्। गोधायाढ्रक्। गौधेरः। शुभ्रादित्वाड्ढक्। गौधेयः। आरगुदीच्यां। गौधारः। रकारसिद्धे आकारोच्चारण
मन्यतोविधानार्थं। जडस्यापत्यं जाडारः। पंडस्यापत्यं पांडारः। क्षुद्राभ्योवा। अंगहीनाः शीलहीनाश्चक्षुद्राः ताभ्योवाढ्र
क्। पक्षेढक्। काणेरः। काणेयः। दासेरः। दासेयः। पितृष्वसुश्छण्। अणोपवादः। पैतृष्वस्रीयः। ढकिलोपः। पितृष्वसुरंत
लोपः स्याड्ढकि। अतएववचनाज्ज्ञापकाड्ढक्। पैतृष्वसेयः। मातृष्वसुश्च। पितृष्वसुर्यदुक्तं तदस्यापिस्यात्। मातृष्वस्रीयः। मातृष्वसे
यः। चतुष्पाद्भ्योढञ्। ढेलोपोऽकद्र्वाः। कद्रूभिन्नस्योवर्णांतस्य भस्य लोपः स्याड्ढेपरे। कामंडलेयः। कमंडलुशब्दश्चतुष्पाज्जा
तिविशेषः। गृष्ट्यादिभ्यश्च। एभ्योढञ्स्यात्। अणादेरपवादः। गार्ष्टेयः। मित्रयोरपत्यं। कृष्यणिप्राप्तेढञ्। कैकयमित्रयु
प्रलयानांयादेरियः। एषांयकारादेः इयादेशः स्याञ्ञितिणितिकितिच तद्धितेपरे। इतिइयादेशेप्राप्ते। दाण्डिनायनहास्ति
नायनाथर्वणिकजैह्माशिनेयवाशिनेयभ्रौणहत्यधैवत्यसारवैश्वाकमैत्रेयहिरण्मयानि। एतानिनिपात्यंते इतियुलो
पः। मैत्रेयः। मैत्रेयो। यस्कादिभ्योगोत्रे। एभ्योऽपत्यप्रत्ययस्यलुक्स्यात्तत्कृते बहुत्वेनतुस्त्रियां। मित्रयवः। अत्रि
भृगुकुत्सवसिष्ठगोतमांगिरोभ्यश्च। एभ्योगोत्रप्रत्ययस्यलुक्स्यात्तत्कृते बहुत्वे। अत्रयः। भृगवः। कुत्साः। वसिष्ठाः। गोतमाः।

सि०कौ०त० अंगिरसः। अस्त्रियामित्येव। आत्रेय्यः स्त्रियः। बह्वच इञः प्राच्यभरतेषु। बह्वचः परो य इञ् प्राच्यगोत्रे भरतगोत्रे च वर्तमानस्तस्य लुक् त
स्यात्। पन्नागाराः। युधिष्ठिराः। न गोपवनादिभ्यः। एभ्यो गोत्रप्रत्ययस्य लुङ् न स्याद्बहुषु। बिदाद्यन्तर्गणोऽयं। गौपवनाः। शैग्रवाः।
तिककितवादिभ्यो द्वंद्वे। एभ्यो गोत्रप्रत्ययस्य बहुषु लुक् द्वंद्वे। तैकायनयश्च कैतवायनयश्च। तिकादिभ्यः फिञ्। तस्य लुक्।
तिककितवाः। उपकादिभ्योऽन्यतरस्यामद्वंद्वे। एभ्यो गोत्रप्रत्ययस्य बहुषु लुग्वा स्याद्द्वंद्वे चाद्वंद्वे च। भ्राष्टककपिष्ठलाः। भ्रा ट्र
ष्टकिकापिष्ठलयः। लमकाः। लामकायनाः। आगस्त्यकौंडिन्ययोरगस्तिकुंडिनच्। एतयोरवयवस्य गोत्रप्रत्ययस्याणो यञ
श्च बहुषु लुक् स्यादवशिष्टस्य प्रकृतिभागस्य यथासंख्यमगस्ति कुंडिनच् एतावादेशौ स्तः। अगस्तयः। कुंडिनाः। राजश्वशु
राद्यत्। राज्ञो जातावेवेति वाच्यं। ये चाभावकर्मणोः। यादौ तद्धिते परेऽन् प्रकृत्या स्यान्न तु भावकर्मणोः। राजन्यः। श्वशुर्यः।
जातिग्रहणाच्छूद्रादावुत्पन्नो राजनः। अन्। अणि अन् प्रकृत्या स्यादिति टिलोपेन। अभावकर्मणोः किं। राज्ञः कर्म भावो
वा राज्यं। संयोगादिश्च। इन् प्रकृत्या स्यादणि परे। चाक्रिणोऽपत्यं चाक्रिणः। न मपूर्वोऽपत्येऽवर्मणः। मपूर्वोऽन् प्रकृत्या न शंकर
स्यादपत्येऽणि। भाद्रसामः। मपूर्वः किं। सौत्वनः। अपत्ये किं। चर्मणा परिवृतश्चार्मणो रथः। अवर्मणः किं। चक्र १०४

मिष्ठः। वैश्वामित्रः। अंधकेभ्यः। श्वाफल्कः। वृष्णिभ्यः। वासुदेवः। आनिरुद्धः। शौरिरिति तु बाह्वादित्वात्। कुरुभ्यः। ना
कुलः। साहदेवः। इञ एवायमपवादो मध्येऽपवादन्यायात्। अविशिष्टात्तु परत्वाड्ढक्। आत्रेयः। मातुरुत्संख्यासंभद्रपू
र्वायाः। संख्यादिपूर्वस्य मातृशब्दस्य उदादेशः स्यादण्प्रत्ययश्च। द्वैमातुरः। षाण्मातुरः। सांमातुरः। भाद्रमातुरः। आ
देशार्थं वचनं। प्रत्ययः उत्सर्गेण सिद्धः। स्त्रीलिंगनिर्देशोऽर्थापेक्षः। तेन धान्यमातुर्न। संख्येति किं। सौमात्रः। शुभ्रादित्वाद्वै
मात्रेयः। कन्यायाः कनीन च। ढकोऽपवादोऽण् तत्संनियोगेन कनीनादेशश्च। कानीनो व्यासः। कर्णश्च। अनूढाया एवाप
त्यमित्यर्थः। विकर्णशुंगछगलाद्वत्सभरद्वाजात्रिषु। अपत्येऽण्। वैकर्णो वात्स्यः। वैकर्णिरन्यः। शौंगो भारद्वाजः। शौंगिर
न्यः। छागलः आत्रेयः। छागलिरन्यः। केचित्तु शुंगेति आवर्तं पठंति। तेषां द्वयमप्युदाहरणं। शौंगेयः। पीलाया वा। तन्ना
मिकाण्या बाधित्वाद्ध्यच इति ढकि प्राप्ते पक्षेऽण् विधीयते। पीलाया अपत्यं पैलः। पैलेयः। ढक् च मंडूकात्। चादण् पक्षे इञ्।
मांडूकेयः। मांडूकः। मांडूकिः। स्त्रीभ्यो ढक्। स्त्रीप्रत्ययांतेभ्यो ढक् स्यात्। वैनतेयः। बाह्वादित्वात्सौमित्रिः। शिवादित्वात्ता
पतेः। द्व्यचः। द्व्यचः स्त्रीप्रत्ययांतादपत्ये ढक् स्यात्। तन्नामिकाणोऽपवादः। दात्तेयः। पार्थः। पृत्र तु स्येदमित्यण्। इतश्चा
त

३ + षपूर्वहन्धृतराज्ञामणि। षपूर्वो यो ऽन्तस्य हनादेश्च तस्यातो लोपोणि॥ ताक्ष्णः। भ्रौणघ्नः ×३

वर्मणो ऽपत्यं चाक्रवर्मणः। वाहितुनाम्न इति वाच्यं। हैतनाम्नो ऽपत्यं हैतनामनः। हैतनामः। ब्राह्मोजातौ। योगविभागो ऽत्र कर्त
व्यः। ब्राह्म इति निपात्यते। अनपत्ये ऽणि। ब्राह्मं हविः। ततो जातौ। अपत्ये जातावणि ब्रह्मणष्टिलोपो न स्यात्। ब्रह्मणो ऽपत्यं ब्राह्म
णः। अपत्ये किं। ब्राह्मी। औषधिः। औक्षमनपत्ये। अणि टिलोपो निपात्यते। औक्षंपदं। अनपत्ये किं। उक्ष्णो ऽपत्यमौक्ष्णः। धृ
तराज्ञो ऽपत्यं धार्त्तराज्ञः। षपूर्वेत्यादि किं। सामनः। अणि किं। ताक्षण्यः। क्षत्राद्घः। क्षत्रियजाताविवेव। क्षात्त्रिरन्यः। कुला
त्खः। कुलीनः। तदंतादपि। उत्तरसूत्रे ऽपूर्वपदादिति लिंगात्। आढ्यकुलीनः। अपूर्वपदादन्यतरस्यां यड्ढकञौ। कुलादि
त्येव। पक्षे खः। महाकुलः। महाकुलीनः। कुल्यः। कौलेयकः। कुलीनः। पदग्रहणात्किं। बहुकुल्यः। बाहुकुलेयकः। बहुकुली
नः। महाकुलादञ्खञौ। अन्यतरस्यामित्यनुवर्त्तते। पक्षे खः। माहाकुलः। माहाकुलीनः। महाकुलीनः। दुष्कुलाड्ढक्। पूर्ववत्प
क्षे खः। दौष्कुलेयः। दुष्कुलीनः। स्वसुश्छः। स्वस्रीयः। भ्रातुर्व्यच्च। चाच्छः। अणोपवादः। भ्रातृव्यः। भ्रात्रीयः। व्यन्सपत्ने। भ्रा
तुर्व्यन्स्यादपत्ये प्रकृतिप्रत्ययसमुदायेन शत्रौ वाच्ये। भ्रातृव्यः। भ्रातुः। पाप्मना भ्रातृव्येणेति तूपचारात्॥ रेवत्यादिभ्यः
ष्ठक्। ठस्येकः। अंगात्परस्य ठस्य इकादेशः स्यात्। रैवतिकः। गोत्रस्त्रियाः कुत्सने णच। गोत्रं या स्त्री तद्वाचकात्त

सि॰कौ॰त॰ वृद्धाट्ठकोस्तः कुत्सायां। सामर्थ्याद्यूनि। गार्ग्यापत्यं गार्ग्यो [illegible]: गार्गिको वा जाल्मः। पुंवद्भावाद्गार्ग्यश्च वृद्धाट्ठको
स्तः। यस्येति लोपः। आपत्यस्येति यलोपः। वृद्धाट्ठक्सौवीरेषु बहुलं। सुवीरदेशोद्भवाः सौवीराः। वृद्धात्सौवीरगोत्राद्यूनि
बहुलं ठक्स्यात्कुत्सायां। भागवित्तेर्भागवित्तिकः। पक्षे फक्। भागवित्तायनः। फेश्छ च। फिञन्तात्सौवीरगोत्रादपत्ये छः
ठक् च कुत्सने गम्ये। यमुन्दस्यापत्यं यामुन्दायनिः। तिकादिभ्यः फिञ्। तस्यापत्यं यामुन्दायनीयः। यामुन्दायनिकः। कुत्सने
किं। यामुन्दायनिः। औत्सर्गिकस्याणो ण्यक्षत्रियेति लुक्। सौवीरेषु किं। तैकायनिः। फांटाहृतिमिमताभ्यां णफिञौ।
सौवीरेषु। नेह यथासंख्यं। अल्पाच्तरस्य परनिपातालिंगादिति वृत्तिः। भाष्ये तु यथासंख्यमेव स्थितं। फांटाहृतः। फां
टाहृतायनिः। मैमतः। मैमतायनिः। कुर्वादिभ्यो ण्यः। अपत्ये। कौरव्याः ब्राह्मणाः। वावदूक्यः। सम्राजः क्षत्रिये। सांम्रा
ज्यः। सांम्राजोऽन्यः। सेनान्तलक्षणकारिभ्यश्च। एभ्यो ण्यः। हारिषेण्यः। लाक्षण्यः। कारिः शिल्पी। तस्मात्। तान्तु
वाय्यः। कौम्भकार्यः। नापित्यः। उदीचामिञ्। हारिषेणिः। लाक्षणिः। तान्तुवायिः। कौम्भकारिः। नापितात्तु परत्वात्फिञेव।
नापितायनिः। लक्ष्णोऽणुपसंख्यानं। लाक्ष्णः। पक्षे लाक्षण्यः। तिकादिभ्यः फिञ्। तैकायनिः। कौशल्यकार्मार्या १०५

सिं०कौ०त० १०६

रु

वृद्धात्। आंबष्ठ्यः। सौवीर्यः। इत्। आवंत्यः। कौसल्यः। अजादस्यापत्यमाजाद्यः। कुरुनादिभ्यो ण्यः। कौरव्यः। नैषध्यः। सनैषधस्या
र्थपतेरित्यादौ तु शैषिकोऽण्। साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्। साल्वो जनपदस्तदवयवा उदुंबरादयस्तेभ्यः प्रत्य
ग्रथादिभ्यः स्त्रिभ्यश्च इञ् स्यात्॥ अत्रोपवादः। औदुंबरिः। प्रात्यग्रथिः। कालकूटिः। आश्मकिः। राजन्यस्यैवं। ते तद्राजाः।
अञादयस्तत्संज्ञाः स्युः। तद्राजस्य बहुषु तेनैवास्त्रियां। बहुष्वर्थेषु तद्राजस्य लुक् स्यात्तदर्थकृते बहुत्वे न तु स्त्रियां। इक्ष्वा
कवः। पंचाला इत्यादि। कथं तर्हि कौरव्याः पशवः। तस्यामेव रघोः पांड्याः इति। कौरव्ये पांड्ये च साधव इति समाधेयं॥
रघूणामन्वयं वक्ष्ये। निरुध्यमाना यदुभिः कथंचिदिति तु रघुयदुशब्दयोस्तदपत्ये लक्षणया। कंबोजाल्लुक्। अस्मात्त
द्राजस्य लुक् स्यात्। कंबोजः। कंबोजौ। कंबोजादिभ्य इति वक्तव्यं। चोलः। शकः। द्व्यच्लक्षणस्याणो लुक्। केरलः। यवनः। अ
ञो लुक्। कंबोजाः समरे इति पाठस्त्वगमः। दीर्घादिपाठे तु कंबोजोऽभिजनो येषामित्यर्थः। सिंधुतक्षशिलादिभ्योऽणञा
वित्यण्। स्त्रियामवंतिकुंतिकुरुभ्यः। तद्राजस्य लुक् स्यात्। अवंती। कुंती। कुरूः। अतश्च। तद्राजस्याकारस्य स्त्रियां लुक्
स्यात्। शूरसेनी। मद्री। कथं माद्रीसुतौ इति। ह्रस्व एव पाठ इति हरदत्तः। भर्गादित्वं वा कल्प्यं। न प्राच्यभर्गादियौधेयादि

कु

भ्यः। एभ्यः तस्य तद्राजस्य न लुक् स्यात्। पांचाली। वैदर्भी। आंगी। वांगी। मागधी। एते प्राच्याः। भार्गी। कारूशी। केक
यी। केकयीत्यत्र जन्यजनकभावलक्षणे पुंयोगे ङीष्। युधाशुभ्राभ्यां द्व्यच इति ढक्। ततः स्वार्थे पर्श्वादियौधेयादि
भ्यामणञाविति अञ्। शार्ङ्गरवाद्यञ इति ङीन्। आदयस्तद्राजा इति तद्राजसंज्ञायां। अतश्चेति लुक् तु ढगंतत्वान्ङीप्युदात्तनि
वृत्तिस्वरः स्यात्। यौधेयी शौभ्रेयी। अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे। त्र्यादीनामंत्यमुत्तमं तस्य समीप
मुपोत्तमं। गोत्रे यावणिञौ विहितावनार्षौ तदंतयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रियां ष्यङादेशः स्यात्। निर्दि
श्यमानस्यादेशा भवंतीति अणिञोरेव। षङावितौ। यङश्चाप्। कुमुदगंधेरपत्यं स्त्री कौमुदगंध्या। वाराह्या। अनार्ष
योः किं। वासिष्ठी। वैश्वामित्री। गुरूपोत्तमयोः किं। औपगवी। जातिलक्षणो ङीष्। गोत्रे किं। अहिच्छत्रे जाता आहिच्छत्री
गोत्रावयवात्। गोत्रावयवाः गोत्राभिमताः कुलाख्याः। ततो गोत्रे विहितयोरणिञोः स्त्रियां ष्यङादेशः स्यात्। अगुरूपो
त्तमार्थमारंभः। पौणिक्या। भौणिक्या। क्रौड्यादिभ्यश्च। स्त्रियां ष्यङ् प्रत्ययः स्यात्। अगुरूपोत्तमार्थोऽनणिञर्थश्चा
रंभः। क्रौड्या। व्याड्या। सूतयुवत्यां। सूत्या। भोज क्षत्रिये। भोज्या। दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकांठेविद्धिभ्योऽन्यत

सि०कौ०त० स्यां। एभ्यश्चतुर्भ्यः ष्यङ् वा। अगोत्रार्थमिदं गोत्रेपि परत्वाद्बाधते। पक्षे इञ्। तौ मनुष्ये तिङ्॰ घ्॥ दैवयज्ञ्यौ दैवयज्ञी॥ ॥इत्य स्या
१०७ पत्याधिकारः॥ तेन रक्तं रागात्। रज्यतेऽनेनेति रागः। कषायेण रक्तं वस्त्रं काषायं। मांजिष्ठं। रागात्किं। देवदत्तेन रक्तं वस्त्रं। ला
क्षारोचनाट्ठक्। लाक्षिकः। रौचनिकः। शाकलकर्दमाभ्यामुपसंख्यानं। शाकलिकः। कार्दमिकः। आभ्यामणपीति वृत्तिकारः।
शाकलः। कार्दमः। नील्या अन्। नील्या रक्तं नीलं। पीतात्कन्। पीतकं। हरिद्रामहारजनाभ्यामञ्। हारिद्रं। माहारजनं। नक्ष
त्रेण युक्तः कालः। पुष्येण युक्तं पौषमहः। पौषी रात्रिः। लुबविशेषे। पूर्वेण विहितस्य लुप्स्यात्। षष्टिदंडात्मकस्य कालस्य
अवांतरविशेषैश्चेन्न गम्यते। अद्य पुष्यः। कथं तर्हि पुष्ययुक्ता पौर्णमासी पौषीति। विशाखाश्रवणौ फाल्गुनी कार्तिकी
चैत्रीभ्य इति निर्देशात् न पौर्णमास्यामयं लुब्भवतीति ज्ञापितत्वात्। श्रवणशब्दात् अत एव लुप्। युक्तवद्भावाभावश्च। अव
धकान्यपि निपातनानि। श्रावणी। संज्ञायां श्रवणाश्वत्थाभ्यां। विशेषार्थोयमारंभः। श्रवणा रात्रिः। अश्वत्थो मुहूर्तः। सं
ज्ञायां किं। श्रावणी। आश्वत्थी। द्वंद्वाच्छः। नक्षत्रद्वंद्वाद्युक्ते काले छः स्यादविशेषे सति च। तिष्यपुनर्वसवीयमहः।
राधानुराधीया रात्रिः। दृष्टं साम। तेनेत्येव। वसिष्ठेन दृष्टं वासिष्ठं साम। अस्मिन्नर्थे डिद्वा वक्तव्यः। उशनसा १०७

रिष्यांच। अपत्ये किञ् इञोपवादः॥ परमप्रकृतिरेवायमिष्यते। प्रत्ययसंनियोगेन प्रकृतिरूपं निपात्यते। कुशलस्यापत्यं
कौशल्यायनिः। कर्मारस्यापत्यं कार्मार्यायणिः। छागवृषयोरपि॥ छाग्यायनिः। वार्ष्यायणिः। अणो द्व्यचः। अपत्ये फि
ञ् इञोपवादः। कार्त्र्यायणिः। अण इति किं। दाक्षायणः। द्व्यचः किं। औपगविः। त्यदादीनां फिञ् वा स्यात्। त्यादायनिः। त्यादः।
उदीचां वृद्धादगोत्रात्। आम्रगुप्तायनिः। प्राचां तु आम्रगुप्तिः। वृद्धात्किं। दाक्षिः। अगोत्रात्किं। औपगविः। वाकिनादीनां कु
क् च। अपत्ये फिञ् वा। वाकिनस्यापत्यं वाकिनकायनिः। वाकिनिः। पुत्रान्तादन्यतरस्यां। अस्माद्वा फिञ् सिद्धः। तस्मिन्परे पुत्रान्तस्य वा
कुक् विधीयते॥ गार्गीपुत्रकायनिः। गार्गीपुत्रायणिः॥ गार्गीपुत्रिः। प्राचामवृद्धात्फिन् बहुलं। ग्लुचुकायनिः। मनोर्जातावञ्य
तौ षुक् च॥ समुदायार्थो जातिः। मानुषः। मनुष्यः। जनपदशब्दात्क्षत्रियादञ्। जनपदक्षत्रिययोर्वाचकादञ् स्यादपत्ये॥ दा
ण्डिनायनेति सूत्रे निपातनाट्टिलोपः। ऐक्ष्वाकः। इक्ष्वाकौ। क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्। तद्राजमाचक्षा
णस्तद्राज इत्यन्वर्थसंज्ञासामर्थ्यात्। पंचालानां राजा पांचालः। पूरोरण्वक्तव्यः। पौरवः। पाण्डोर्ड्यण्। पांड्यः। साल्वेयगांधा
रिभ्यां च। आभ्यामपत्येञ्। वृद्धेदिति ञ्यङोपवादः। साल्वेयः। गांधारः। तस्य राजन्यप्येवं। द्व्यञ्मगधकलिंगसूरमसादण्॥
अञोपवादः। द्व्यच्। आंगः। वांगः। सौह्मः। मागधः। कालिंगः। सौरमसः। तस्य राजन्यप्येवं। वृद्धेत्कोसलाजादाञ्ञ्यङ्

सि०कौ०त० त्रिस्कः ॥ भ्राष्ट्रे संस्कृता ॥ भ्राष्ट्राः । अष्टाकपालेषु संस्कृतः पुरोडाशः अष्टाकपालः ॥ शूलोखाद्यत् । अणोपवादः । शूले संस्कृतं
शूल्यं मांसं । उखा पात्रविशेषः तस्यां संस्कृतं उख्यं । दध्नष्ठक् । दध्नि संस्कृतं दाधिकं । उदश्वितोन्यतरस्यां ॥ ठक् स्यात् । पक्षे
अण् । इसुसुक्तांतात्कः । इस् उस् उक् त एतदंतादंगात्परस्य ठस्य कः स्यात् । उदके न श्वयति वर्द्धते इत्युदश्वित् । तत्र संस्कृ
तं औदश्वित्कं ॥ औदश्वितं । इसुसोः प्रतिपदोक्तयोर्ग्रहणान्नेह । आशिषाचरति आशिषिकः । उषाचरति औषिकः ।
दोषउपसंख्यानं । दोष्णा तरति दौष्कः । क्षीराड्ढञ् । अत्र संस्कृतमित्येव संबध्यते न तु भक्षा इति । नेत्यवाच्यामपिप्र
वति ॥ क्षैरेयी सास्मिन्पौर्णमासीति । इति शब्दात्संज्ञायामिति लभ्यते । पौषी पौर्णमासी । अस्मिन्पौषो मासः । आग्रहायण्य
श्वत्थाट्ठक् । अग्रे हायनमस्या इत्याग्रहायणी ॥ प्रज्ञादेराकृतिगणत्वादण् । पूर्वपदात्संज्ञायामिति णत्वं ॥ आग्रहायणी पौर्ण
मासी अस्मिन्नाग्रहायणिको मासः ॥ अश्वत्थेन युक्ता पौर्णमासी अश्वत्थः । निपातनात्पौर्णमास्यामपि लुक् । आश्वत्थिकः ।
विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः ॥ एभ्यः ठञ्वा । पक्षेऽण् । फाल्गुनिकः ॥ फाल्गुनो मासः ॥ श्रावणिकः । श्रावणः । कार्त्ति
किकः । कार्त्तिकः ॥ चैत्रिकः ॥ चैत्रः ॥ सास्य देवता । इंद्रो देवतास्येति ऐंद्रं हविः । पाशुपतं । बार्हस्पत्यं । त्यज्यमानद्रव्ये उद्देश्यविशे

षो देवता । मंत्रस्तुत्या च । ऐंद्रो मंत्रः ॥ आग्नेयो वै ब्राह्मणो देवतयेति तु शैषिकेऽर्थे सर्वत्राग्नीतिढक् । कस्येत् । कशब्दस्येकारादेशः स्यात्प्रत्यय
संनियोगेन । यस्येति लोपात्स्वरत्वादादिवृद्धिः ॥ को ब्रह्मा देवतास्य कायं हविः ॥ श्रीर्देवतास्य श्रायं हविः ॥ शुक्राद्घन् । शुक्रियं ॥
अपोनप्त्रपांनप्तृभ्यां घः । अपोनप्त्रियं । अपांनप्त्रियं । अपोनपात् ॥ अपांनपाच्च देवता । प्रत्ययसंनियोगेन तु कृतरूपं
निपात्यते ॥ अत एव आपोनप्त्रे पांनप्त्रे इति नुगृह्णीति शेषः । छ च । योगविभागो यथासंख्यनिवृत्यर्थः । अपोनप्त्रीयं । छ
प्रकरणे पैंगाक्षीपुत्रादिभ्य उपसंख्यानं । पैंगाक्षीपुत्रीयं ॥ तार्णबिंदवीयं । शतरुद्राद्घश्च । चाच्छः । शतरुद्रो देवतास्य श
घ तरुद्रियं । शतरुद्रीयं । छयोर्विधानसामर्थ्याद्द्विगोर्लुगनपत्य इति न लुक् । महेंद्राद्घाणौ च । चाच्छः । महेंद्रियं । हविः
माहेंद्रं । महेंद्रीयं । सोमाट्ट्यण् । सौम्यं ॥ टित्वान्ङीप् । सौमी ऋक् ॥ वाय्वृतुपित्रुषसो यत् । वायव्यं । ऋतव्यं । रीङ्
ऋतः । अकृद्यकारे ऽसार्वधातुके यकारे च्वौ च परे ऋदंतांगस्य रीङादेशः स्यात् ॥ यस्येति च । पित्र्यं । उषस्यं । द्यो
द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च । चाद्यत् । द्यावापृथिवीयं ॥ द्यावापृथिव्यं । शुना
सीरीयं ॥ शुनासीर्यं । अग्नेर्ढक् । आग्नेयः । कालेभ्यो भववत् ॥ मासिकं । प्रावृषेण्यं ॥ महाराजप्रोष्ठपदाट्ठञ् ॥

सि॰कौ॰त माहाराजिकं ॥ प्रौष्ठपदिकं । देवताद्वंद्वे च ॥ अत्र पूर्वोत्तरयोराद्यचो वृद्धिः स्यात् ञिति णिति किति च परे । आग्निमारुतं । नेंद्रस्य पर
स्य । सौमेंद्रः । परस्याकिं । ऐंद्राग्नः । दीर्घाच्च वरुणस्य । दीर्घात्परस्य वरुणस्य न वृद्धिः । ऐंद्रावरुणं । दीर्घात्किं । आग्निवा
रुणीमनड्वाही । तदस्मिन्वर्त्तत इति नवयज्ञादिभ्य उपसंख्यानं । नावयज्ञिकः । पाकयज्ञिकः । पूर्णमासादण् वक्तव्यः । पू
र्णमासोस्यां वर्त्तते पौर्णमासी तिथिः । पितृव्यमातुलमातामहपितामहाः ॥ एते निपात्यंते । पितुर्भ्रातरि व्यत् ॥ पितु
र्भ्राता पितृव्यः । मातुर्डुलच् । मातुर्भ्राता मातुलः । मातृपितृभ्यां पितरि डामहच् । मातुः पिता ॥ मातामहः । पितामहः ।
मातरि षिच्च ॥ मातामही । पितामही । अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः । सेकारपाठसामर्थ्यान्न षः । अविसो
ढं । अविदूसं । अविमरीसं । तिलान्निष्फलात्पिंजपेजौ ॥ तिलपिंजः । तिलपेजः । वंध्यस्तिल इत्यर्थः । पिंजश्छंदसि
डिच्च । तिल्पिंजः । तस्य समूहः । काकानां समूहः । काकं । बाकं । भिक्षादिभ्योऽण् ॥ भिक्षाणां समूहो भैक्षं । गर्भि
वड्वा णीनां समूहो गार्भिणं । इह भस्याढे इति पुंवद्भावे कृते । इनण्यनपत्ये ॥ अनपत्यार्थेऽणि परे इन् प्रकृत्या स्यात् ॥ तेनन स्या
त्तद्धित इति टिलोपो न । युवतीनां समूहो यौवनं । शर्वंनादनुदात्तादेरञ् ॥ यौवतं । गोत्रोक्षोष्ट्रोरभ्रराजराजन्यरा ३०९

सामा सर्वज्ञस्रि कालि ध्यायं दम्य रूच्यः अभिनाइष्ट तत्त्वाभ र्तत आगर्ते तस्य स्वामित्यो ध्येयं ॥ घा

ष्टं औशनसं । औशनं । कलेर्ढक् । कलिना दृष्टं कालेयं । वामदेवाड्ड्यड्ड्यौ । वामदेवेन दृष्टं साम वामदेव्यं । सिद्धेयस्येति लो
पेन किमर्थं यत्तोऽनितौ । ग्रहणं मा तदर्थे भूद्वामदेव्यस्य नञ्स्वरे ॥ परिवृतो रथः । वस्त्रैः परिवृतो वास्त्रो रथः । रथः किं ।
वस्त्रेण परिवृतः कायः । समंताद्वेष्टितः परिवृत इत्युच्यते । तेनेह न । छात्रैः परिवृतो रथः । पांडुकंबलादिनिः । पांडुकं
बलेन परिवृतः पांडुकंबली । पांडुकंबलशब्दो राजास्तरणवर्णकंबलस्य वाचकः । मत्वर्थ इनिनैव सिद्धे । वचनमण्
निवृत्त्यर्थं । द्वैपवैयाघ्रादञ् । द्वीपिनो विकारो द्वैपं । तेन परिवृतो द्वैपो रथः । एवं वैयाघ्रः । कौमारापूर्ववचने । कौमा
रेत्यविभक्तिको निर्देशः । अपूर्वत्वे निपातनं इदं । अपूर्वपतिं कुमारीं उपपन्नः कौमारः पतिः । यद्वा अपूर्वपतिः कु
मारी पतिमुपपन्ना कौमारी भार्या । तत्रोद्धृतममत्रेभ्यः । शरावे उद्धृतः [illegible] नः शाराव ओदनः । उद्धरतिरिहोद्धा
रणपूर्वके निधाने वर्त्तते । तेन सप्तमी । उद्धृत्य निहित इत्यर्थः । स्थंडिलाच्छयितरि व्रते । तत्र इत्येव । समुदायेन चेद्व्रत
यि गम्यते । स्थंडिले शेतुं नियमोऽस्य स्थांडिलः ॥ संस्कृतं भक्षाः ॥ सप्तम्यंतादण् स्यात् संस्कृतेऽर्थे यत्संस्कृतं भक्षाश्चे

सि० कौ० त

३१।३०

दिश्योयः।पाश्या।तृण्या।धूम्या।वन्या।वात्या।खलगोरथात्।खल्या।गव्या।रथ्या।इनित्रकट्यचश्च।खलादिभ्यः क्र
मात्स्युः।।खलिनी।गोत्रा।रथकट्या।खलादिभ्य इनिर्वक्तव्यः।डाकिनी।कुटुंबिनी।।आकृतिगणोयं।षष्ठ्यंतादणा विषयो देशे॥
दयः स्युरस्यं तत्परिशीलितेऽर्थे संज्ञे देशे।।शिबीनां विषयो देशः शैबः देशे किं।देवदत्तस्य विषयोऽनुवाकः।राजन्यादि
भ्यो वुञ्।राजन्यकः।भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ।भौरिकीणां विषयो देशः भौरिकिविधं।भौलिकिवि
धं।ऐषुकारिभक्तं।।सारसायनभक्तं।।सोस्यादिरिति छंदसः प्रगाथेषु।।पंक्तिरादिरस्येति पांक्तः प्रगाथः।स्वार्थ
उपसंख्यानं।।त्रिष्टुबेव त्रैष्टुभं।।संग्रामे प्रयोजनयोद्धृभ्यः।सोस्येत्यनुवर्तते।सुभद्रा प्रयोजनमस्य संग्रामस्येति सौ
भद्रः।भरता योद्धारोस्य संग्रामस्य भारतः।तद स्याप्रहरणमिति क्रीडायां णः।दंडः प्रहरणमस्यां क्रीडायां
दांडा।मौष्टा।घञः सास्यां क्रियेति ञः।घञंता क्रियावाचिनः प्रथमांतादस्यामिति सप्तम्यर्थे स्त्रीलिंगे ञप्रत्य
यः स्यात्।घञ इति कृदग्रहणाद्गतिकारकपूर्वस्यापि ग्रहणं।श्येनतिलस्य पाते ञे।श्येनतिलयोर्मुमागमः स्या

त् ञप्रत्यये परे पातशब्दे उत्तरपदे।श्येनपातोऽस्यां वर्तते श्यैनंपाता मृगया।।तिलपातोऽस्यां वर्तते तैलंपाता स्वधा।।श्ये
नतिलस्य किं।दंडपातोऽस्यां तिथौ वर्तते दांडपाता।।तदधीते तद्वेद।।व्याकरणमधीते वेद वा वैयाकरणः।क्रतूक्थादिसू
त्रांताट्ठक्।।क्रतुवाचिनामेवेह ग्रहणं।।तेभ्यो मुख्यार्थेभ्यो विहितास्तत्प्रतिपादग्रंथपरेभ्यस्त्वध्येतरि।।आग्निष्टोमि
कः।।वाजपेयिकः।उक्थं सामविशेषः।तल्लक्षणपरो ग्रंथविशेषो लक्षणयोक्थं।।तदधीते वेद वा औक्थिकः।मुख्या
र्थात्तूक्थशब्दाट्ठगणे नेष्यते।।न्यायमधीते वेत्ति वा नैयायिकः।।वृत्तिं वेत्ति वा वार्त्तिकः।लोकायतं।लौकायतिकः इ
त्यादि।सूत्रांतात्तु।।अकल्पादेरेवेष्यते।सांग्रहसूत्रिकः।।अकल्पादेः किं।।कात्यसूत्रः।विद्यालक्षणकल्पांताच्चेति व
क्तव्यं।वायसविद्यिकः।।गौलक्षणिकः।।आश्वलक्षणिकः।पाराशरकल्पिकः।अंगक्षत्रधर्मत्रिपूर्वाद्विद्यांतान्ने
ति वक्तव्यं।।आंगविद्यः।क्षात्रविद्यः।।धार्मविद्यः।।त्रिविधा विद्या त्रिविद्या तामधीते वेत्ति वा त्रैविद्यः।।आ
ख्यानाख्यायिकेतिहासपुराणेभ्यश्च।।यवक्रीतमधिकृत्य कृतमाख्यानमुपचाराद्यवक्रीतं तद्

सि०कौ०त धीतेवेत्तिवायावक्रीतिकः।वासवदत्तामधिकृत्यकृताख्यायिकावासवदत्ता।अधिकृत्यकृतेग्रंथेइत्यर्थेवृद्धाच्छः।।तस्य
११२ लुबाख्यायिकेभ्योबहुलमितिलुप्।।ततोनेनठक्।।वासवदत्तिकः।ऐतिहासिकः।।पौराणिकः।सर्वादेःसादेश्चलुग्व
क्तव्यः।सर्ववेदानधीतेसर्ववेदः।।सर्वतंत्रः।सवार्त्तिकः।द्विगोर्लुगितिलुक्।द्वितंत्रः।इकन्पदोत्तरपदाच्छतषष्टेःषिकन्
पथः।।पूर्वपदिकः।उत्तरपदिकः।शातपथिकः।शातपथिकी।षाष्टिपथिकः।षाष्टिपथिकी।क्रमादिभ्योवुन्।क्रमकः।
क्रमपदशिक्षामीमांसाक्रमादिः।अनुब्राह्मणादिनिः।तदधीतेतद्वेदेत्यर्थे।।ब्राह्मणसदृशोग्रंथोनुब्राह्मणं।।तदधी
इति तेअनुब्राह्मणी।मत्वर्थेनैवसिद्धेऽणूबाधनार्थमिदं।।वसंतादिभ्यष्ठक्।वासंतिकः।अथर्वाणमधीतेआथर्वणि
कः।दांडिनायनसूत्रेनिपातनाट्टिलोपोन।प्रोक्ताल्लुक्।प्रोक्तार्थकप्रत्ययात्परस्याध्येतृवेदितृप्रत्ययस्यलुक्स्यात्। शंकर
पणनंपणः।घञर्थेकविधानमितिकः।सोस्यास्तीतिपणी।तस्यगोत्रापत्यंपाणिनः।गाथिविदथिकेशिगणि
पणिनश्च।एतेऽणिप्रकृत्यास्युः।इतिटिलोपोन।ततोयूनिइञ्।पाणिनिः।ण्यक्षत्रियार्षञितोयूनिलुगणिञोः। १११
(१११)

जपुत्रवत्समनुष्याजाद्वुञ्।एभ्यःसमूहेवुञ्स्यात्।लौकिकमिहगोत्रंतच्चापत्यमात्रं।युवोरनाकौ।युवुएतयोरनुनासि
कयोःक्रमादनअकएतावादेशोस्तः।ग्लुचुकायनीनांसमूहोग्लौचुकायनकं।औक्षकमित्यादि।आपत्यस्यचेति
यलोपेप्राप्ते।प्रकृत्याऽकेराजन्यमनुष्ययुवानः।राजन्यकं।मानुष्यकं।वृद्धाच्चेतिवक्तव्यं।वार्धकं।।केदाराद्यञ्च।चा
केदारकं।कैदार्यं।गणिकायायञितिवक्तव्यं।गाणिक्यं।ठञ्कवचिनश्च।चात्केदारादपि।कवचिनांसमूहःकावचिकं।
माण कैदारिकं।ब्राह्मणवाडव्याद्यत्।ब्राह्मण्यं।माणव्यं।वाडव्यं।पृष्ठादुपसंख्यानं।पृष्ठ्यः।ग्रामजनबंधुभ्यस्तल्।
ग्रामता।जनता।बंधुता।।गजसहायाभ्यांचेतिवक्तव्यं।।गजता।सहायता।अह्नःखःक्रतौ।अहीनः।अहर्गणसाध्यस्
अहीनः इह त्याकःक्रतुरित्यर्थः।क्रतौकिं।आह्नः।खंडिकादित्वादञ्।अह्नष्टखोरेवेतिनियमाट्टिलोपोन।पर्श्वाणस्वक्तव्यः।सि
तिच।सितिपरेपूर्वपदस्यात्।।अप्रत्वादौर्गुणोन।पर्शूनांसमूहःपार्श्वं।अनुदात्तादेरञ्।कापोतं।।मायूरं।खंडि
कादिभ्यश्च।अञ्स्यात्।खंडिकानांसमूहःखांडिकं।चरणेभ्योधर्मवत्।काठकं।छांदोग्यं।अचित्तहस्तिधेनोष्ठक्
साक्तुकं।हास्तिकं।धैनुकं।केशाश्वाभ्यांयञ्छावन्यतरस्यां।पक्षेठगणौ।कैश्यं।कैशिकं।आश्वीयं।आश्वं।पाशा यं

र

सि॰कौ॰त निवासो देशः शैवः। अदूरभवश्च। विदिशाया अदूरभवं नगरं वैदिशं। चकारेण प्रागुक्ताः त्रयोऽर्थाः सन्निधाप्यंते तेन वक्ष्यमाण
प्रत्ययानां चातुरर्थिकत्वं सिध्यति। ओरञ्॥ अणोऽपवादः। कक्षतु। काक्षतवं। नद्यां तु परत्वान्मतुप्। इक्षुमती॥ मतोश्च बह्वजंगा
त्। बह्वच् अंगं यस्य मतुपस्तदंतादञ् नाण्। सैध्रकावतं। बह्वजिति किं। आहिमतं। अंगग्रहणं बह्वजिति तद्विशेषणं य कि
था स्यात्। मत्वंतविशेषणं मा भूत्। बह्वचः कूपेषु। अणोऽपवादः। दीर्घवरत्रेण निर्वृत्तो दैर्घवरत्रः। कूपः। उदक्च विपाशः। विपा
श उत्तरे कूले ये कूपास्तेष्वञ्। अबह्वजर्थ आरंभः। दत्तेन निर्वृत्तः कूपो दात्तः। उदक् किं। दक्षिणतः कूपेष्वणेव। संकलादिभ्यश्च। कू
पेष्विति निवृत्तं। संकलेन निर्वृत्तं सांकलं। पौष्कलं। स्त्रीषु सौवीरसाल्वप्राक्षु। स्त्रीलिंगे एषु देशेषु वाच्येष्वञ्। सौवीरेषु दत्तामि
त्रेण निर्वृत्ता दात्तामित्री नगरी। साल्वे। वैधूमाग्नी। प्राची। माकंदी। सुवास्त्वादिभ्योऽण्। अञोऽपवादः। सुवास्तोरदूरभवं नग
रं सौवास्तवं। वर्णु। वार्णवं। अण्ग्रहणं नद्यां मतुपो बाधनार्थं। सौवास्तवी। रोणी। रोणीशब्दात्तदंताच्चाण्। कूपाञोऽपवादः उत्सपंचस्यंतं
रौणः। आजकरोणः॥ कोपधाच्च। अण्। अञोऽपवादः। कर्णछिद्रकेण कार्णछिद्रकः। कूपः। कार्कवाकवं। त्रैशंकवं। वु
जि ञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्ष ११२

कर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः। सप्तदशभ्यः सप्तदशप्रत्ययाः क्रमात्स्युश्चातुरर्थ्यां। अरीहणादिभ्यो वुञ्। अरीहणेन
निर्वृत्तमारीहणकं। कृशाश्वादिभ्यश्छण्॥ कार्शाश्वीयं॥ ऋश्यादिभ्यः कः। ऋश्यकं। कुमुदादिभ्यष्ठच्। कुमुदिकं। काशा
दिभ्य इलः। काशिलः। तृणादिभ्यः सः। तृणसं। प्रेक्षादिभ्य इनिः। प्रेक्षी। अश्मादिभ्यो रः। अश्मरा। सख्यादिभ्यो ढञ्। सा
खेयं॥ संकाशादिभ्यो ण्यः। सांकाश्यं॥ बलादिभ्यो यः। बल्यं पक्षादिभ्यः फक्॥ पाक्षायणः। पथः पंथच॥ पांथा
यनः॥ कर्णादिभ्यः फिञ्॥ कार्णायनिः। सुतंगमादिभ्य इञ्॥ सौतंगमिः॥ प्रगद्यादिभ्यो ञ्यः॥ प्रगदिन्। प्राग
द्यः। वराहादिभ्यः कक्। वाराहकः। कुमुदादिभ्यः ठक्॥ कौमुदिकः। जनपदे लुप्॥ जनपदे वाच्ये चातुरर्थिकस्य
लुप् स्यात्॥ लुपि युक्तवद्व्यक्तिवचने। लुपि सति प्रकृतिवल्लिंगवचने स्तः। पंचालानां जनपदो निवासः पंचा
लाः। कुरवः। अंगाः। वंगाः। कालिंगाः। तदशिष्यं संज्ञाप्रमाणत्वात्॥ युक्तवद्वचनं न कर्तव्यं। संज्ञानां प्रमाणत्वात्॥
लुब्योगाप्रख्यानात्। लुबपि न कर्तव्योऽवयवार्थस्येहाप्रतीतेः। योगप्रमाणे च तदभावेऽदर्शनं स्यात्। यदि हि त

सि०कौ०त० योगस्यअवयवार्थस्यद्वंद्वबोधकंस्यात्तदातद्भावेनदूष्येत्। प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्। प्रत्य
म यार्थःप्रधानमित्येवंरूपंवचनंनशिष्यंकुतः। अर्थस्यलोकतएवसिद्धेः। कालोपसर्जनेचतुल्यं॥ अतीतायाः
रात्रेःपश्चार्धेनागामिन्याःपूर्वार्धेनचसहितोदिवसोऽद्यतनः। विशेषणमुपसर्जनमित्यादिपूर्वाचार्यैःपरिभा
षितंतत्राप्यशिष्यत्वंसमानोलोकप्रसिद्धेः॥ विशेषणानांचाजातेः॥ लुबर्थस्यविशेषणानामपितद्वल्लिंगवचने
स्तोजातिंवर्जयित्वा। पंचालारमणीयाः। गोदौरमणीयौ। अजातेःकिं॥ पंचालाजनपदः। गोदौग्रामः॥ हरि
तक्यादिषुव्यक्तिः॥ हरीतक्याःफलानिहरीतक्यः। खलतिकादिषुवचनं। खलतिकस्यपर्वतस्यादूरभवानिख
लतिकंवनानि॥ मनुष्यलुपिप्रतिषेधः॥ मनुष्यलक्षणेलुबर्थेविशेषणानांन। लुबंतस्यतुभवतीत्यर्थः॥ चाः चं
अभिरूपः॥ वरणादिभ्यश्च॥ अजनपदार्थआरंभः॥ वरणानामदूरभवंनगरंवरणाः॥ शर्करायावा॥ अस्माच्चा
तुरर्थिकस्यवालुप्स्यात्॥ ठक्छौच। शार्करयाएतौस्तः। कुमुदादौवराहादौचपाठसामर्थ्यात्सक्षेठक्कौ ३१३

ण्यप्रत्ययांतात्क्षत्रियगोत्रप्रत्ययांताद्द्व्यभिधायिनोगोगोत्रप्रत्ययांताञ्ञितश्चपरयोर्युवाभिधायिनोरणिञोर्लुक्।
स्यात्॥ कौरव्यःपिता। कौरव्यःपुत्रः। श्वाफल्कःपिता। श्वाफल्कःपुत्रः। वासिष्ठःपिता। वासिष्ठःपुत्रः। तैकायनिःपि
ता। तैकायनिःपुत्रः। एभ्यःकिं। शिवाद्यण्। कौहडः। ततइञ्। कौहडिःपुत्रः। यूनिकिं। वामरथ्यस्यछात्राःवामर
थाः। इतिइञोलुक्तुनभवति। आर्षग्रहणेनप्रतिपदोक्तस्यऋष्यणएवग्रहणात्। पाणिनाप्रोक्तंपाणिनीयं॥ वृद्धा
च्छः। इञश्चेत्यण्तुन। गोत्रेयदिञ्तदंतादितिवक्ष्यमाणत्वात्॥ ततोऽध्येतृवेदित्रणोलुक्॥ स्वरेस्त्रियांचविशेषः॥ पापि
नीयः॥ पापिनीया॥ सूत्राच्चकोपधात्॥ सूत्रवाचिनःककारोपधादध्येतृवेदितृप्रत्ययस्यलुक्स्यात्॥ अप्राप्तार्थआरंभः।
अष्टावध्यायाःपरिमाणमस्याष्टकंपाणिनेःसूत्रं॥ तदधीतेविदंतिवाअष्टकाः॥ छंदोब्राह्मणानिचतद्विषयाणि॥ छं
दांसिचब्राह्मणानिचप्रोक्तप्रत्ययांतानितद्विषयाणिस्युः॥ अध्येतृवेदितृप्रत्ययंविनानप्रयोज्यानीत्यर्थः॥ कठेनप्रो
क्तमधीयतेकठाः। वैशंपायनांतेवासित्वाण्णिनिः। तस्यकठचरकादितिलुक्ततोऽण्। तस्यप्रोक्ताल्लुक्। तदस्मिन्नस्तीति अथचातुरर्थिकाः
देशेतन्नाम्नि। उदुंबराःसंत्यस्मिन्देशेऔदुंबरः॥ तेननिर्वृत्तं। कुशांबेननिर्वृत्ताकौशांबीनगरी। तस्यनिवासः। शिबीनां

मद्रः। पुरुषः। दृषदि पिष्टा दार्षदाः सक्तवः। उलूखले क्षुण्णः औलूखलो यावकः। अश्वैरुह्यते आश्वो रथः। चतुर्भिरुह्यते
चातुरं शकटं। चतुर्दश्यां दृश्यते चातुर्दशं रक्षः। शेषे। इति लक्षणं चाधिकारश्च। तस्य विकार इत्यतः प्राक् शेषाधिका
रः। राष्ट्रावारपाराद्घखौ॥ आभ्यां क्रमाद्घखौ स्तः शेषे॥ राष्ट्रियः। अवारपारीणः। अवारपाराद्विगृहीतादपि विप
रीताच्चेति वक्तव्यं। अवारीणः। पारीणः॥ पारावारीणः॥ इह प्रकृतिविशेषाद्घादयष्ट्युट्युलन्ताः प्रत्यया उच्यन्ते॥ तेषां
जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते। ग्रामाद्यखञौ। ग्राम्यः॥ ग्रामीणः। कत्र्यादिभ्यो ढकञ्। कुत्सितास्त्र
यः कत्त्रयः। तत्र जातादिः कात्त्रेयकः। नागरेयकः। ग्रामादित्यनुवृत्तेर्ग्रामेयकः। कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु। कौ
लेयकः श्वा। कौलीन्यः। कौक्षेयकोऽसिः। कौक्षोऽन्यः। ग्रैवेयकोऽलंकारः। ग्रैवोऽन्यः। नद्यादिभ्यो ढक्। नादेयं॥ माहेयं
वाराणसेयं॥ दक्षिणापश्चात्पुरसस्त्यक्। दक्षिणेत्याजंतमव्ययं। दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः॥ कापिश्याः ष्फक्
कापिश्यां जातादि कापिशायनं मधु॥ कापिशायनी द्राक्षा॥ रंकोरमनुष्येऽण्च। चात्ष्फक्। रांकवो गौः॥ रांकवाय ११४

णः। अमनुष्ये किं। रांकवो मनुष्यः। द्युप्रागपागुदक्प्रतीचो यत्। दिव्यं॥ प्राच्यं। अपाच्यं। उदीच्यं॥ प्रतीच्यं। कंथायाष्ठक्। का
न्थिकं। वर्णौ वुक्। वर्णुनदसमीपो देशो वर्णुः। तद्विषयार्थवाचि कंथाशब्दाद्वुक्। यथा हिमवत्सु कान्थकं॥ अव्ययात्त्यप्॥
अमेहक्वतसित्रेभ्य एव। अमाति सहार्थे। अमात्यः। इहत्यः। क्वत्यः। ततस्त्यः। तत्रत्यः। परिगणनं किं। उपरिष्टाद्भव
औपरिष्टः। अव्ययानां भमात्रे टिलोपः। नित्योऽयं। बहिषष्टिलोपे विधानात्। तेनेह न। आरातीयः। त्यब्नेर्ध्रुव इति वक्तव्यं॥
नित्यः। निसो गते। ह्रस्वात्तादौ तद्धिते। ह्रस्वात्परस्य सस्य षः स्यात्तादौ तद्धिते परे। निर्गतो वर्णाश्रमेभ्यो निष्ट्यः। चं
डालादिः। अरण्याण्णः। आरण्याः सुमनसः। दूरादेत्यः। दूरेत्यः। उत्तरादाहञ्। औत्तराहः। ऐषमोह्यःश्वसोऽन्यतरस्यां।
ट्युट्यु एभ्यस्त्यब्वा स्यात्। पक्षे वक्ष्यमाणौ ट्युलौ। ऐषमस्त्यं। ऐषमस्तनं। ह्यस्त्यं ह्यस्तनं। श्वस्त्यं। श्वस्तनं॥ पक्षे शौवस्तिकं
वक्ष्यते। तीररूप्योत्तरपदादञ्ञौ॥ यथासंख्येन। काकतीरं॥ पाल्वलतीरं। शैवरूप्यं॥ तीररूप्यान्तादिति तु नोक्तं। बहु
च्पूर्वान्मा भूत्। बाहुरूप्यं॥ दिक्पूर्वपदादसंज्ञायां ञः। अणोऽपवादः। पौर्वशालः। असंज्ञायां किं। संज्ञाभूतायाः प्रकृ
तेर्मा भूत्। पूर्वेषुकामशम्यां। भवः पौर्वेषुकामशमः॥ प्राचां ग्रामनगराणां। मित्युत्तरपदवृद्धिः। मद्रेभ्योऽञ्। दिक्पूर्व

पदादिष्वेव। दिशोमद्राणांमितिमद्रपर्युदासाद्दादिष्विधिः। पौर्वमद्रः। आपरमद्रः। उदीच्ययामाद्बहुचोंतोदात्तात्। अङ्कस्यात्।
शैवपुरं। प्रस्थोत्तरपदपलद्यादिकोपधादण्। माहकिप्रस्थः। पालदः। पारिदः। नैलीनकः। कण्वादिभ्योगोत्रे। एभ्योगोत्र
प्रत्ययांतेभ्योण्स्यात्। कण्वोगर्गादिः॥ काण्वस्यछात्राः काण्वाः। इञश्च। गोत्रेयइञ्तदंतादण्स्यात्। दाक्षाः। गोत्रेकिं।
सौतंगमेरिदं सौतंगमीयं। गोत्रमिहशास्त्रीयंनतुलौकिकं। तेनेहन। पाणिनीयं। नद्यन्तः प्राच्यभरतेषु। इञश्चेद्वृणप्
वादः। प्रौष्ठीयाः। भरतानांप्राच्यत्वेपिपृथगुपादानमन्यत्रप्राच्यग्रहणेभरतानामग्रहणस्यलिंगं। वृद्धिर्यस्याचामादि
स्तद्वृद्धं। यस्यसमुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात्। त्यदादीनिच॥ वृद्धसंज्ञानिस्युः। वृद्धाच्छः।
शालीयः। मालीयः। तदीयः। एङ्प्राचांदेशे। एङ्यस्याचामादिस्तद्वृद्धसंज्ञंवास्या देशाभिधाने। एणीपचनीयः
ऐणीपचनः। गोनर्दीयः। गौनर्दः। भोजकटीयः। भोजकटः। एङ्किं। आहिच्छत्रः। कान्यकुब्जः। वानामधेयस्यविवा
च्यं। देवदत्तीयः। दैवदत्तः। भवतष्ठक्छसौ। वृद्धाद्भवतएतौस्तः॥ भावत्कः। सितिचेतिपदसंज्ञायांजस्त्वं। भवदीयः
वृद्धादित्यनुवृत्तः शत्रंतादणेव। भावतः। काश्यादिभ्यष्ठञ्ञिठौ॥ इकारउच्चारणार्थः। काशिकी। काशिका। चैदिकी ३३८

मधुमान्+

ग्रहणसामर्थ्यात्पक्षेऔत्सर्गिकोऽण्। तस्यलुब्विकल्पः। षड्पाणि। शार्करा। शार्करं। शार्करिकं॥ शार्करीयं। शर्करिकं। शा
र्करकं॥ नद्यांमतुप्। चातुरर्थिकः॥ इक्षुमती॥ मध्वादिभ्यश्च॥ मतुप्स्याच्चातुरर्थिकः॥ अनद्यर्थमारंभः॥ कुमुदनडवेतसेभ्योड्मतुप् नड
प्॥ कुमुद्वान्॥ नड्वान्। वेतस्वान्। आद्ययोर्झयइति अंत्येमादुपधायाइतिवक्ष्यमाणेनवः। महिषाच्चेतिवक्तव्यं॥ महिष्माती
मदेशः। नडशादाड्डुलच्। नड्वलः। शादोजंबालघासयोः॥ शाड्वलः। शिखायावलच्। शिखावलः। उत्करादिभ्यश्छः। उत्क
रीयः। नडादीनांकुक्च। नडकीयं॥ कुञ्चाह्रस्वत्वंच। कुंचकीयः। तक्षंनलोपश्च॥ तक्षकीयः। बिल्वकादिभ्यश्छस्यलुक्
नडाद्यंतर्गताबिल्वकादयः। तेभ्यश्छस्यलुक्तद्धितेपरे। बिल्वायस्यांसंतिसाबिल्वकीया। तस्यांभवाबैल्वकाः। वेत्र
कीया। वैत्रकाः। छस्यकिं॥ छमात्रस्यलुग्यथास्यात्। कुकोनिवृत्तिर्मासूत्॥ अन्यथासन्नियोगशिष्टानामितिकुग
पिनिवर्तेत॥ दलोपोकद्वाइतिलोपेअनुवर्तमानेलुग्ग्रहणंसर्वलोपार्थंलोपोर्थहियमात्रस्यस्यात्॥ इतिचातुरर्थिकाः॥
शेषे। अपत्यादिचतुरर्थ्यंतादन्योर्थः शेषः तत्रायादयः स्युः। चक्षुषागृह्यतेचाक्षुषंरूपं॥ श्रावणः शब्दः। औपनि

सि॰ कौ॰ त॰ दपि बहुवचनविषयात्। अवृद्धाद्वृद्धाच्च जनपदतदवधिवाचिनो बहुवचनविषयात्प्रातिपदिकाद्वुञ् स्यात्। अवृद्धा
दणो वृद्धाच्छस्यापवादः। अवृद्धाज्जनपदात्। आंगकः। अवृद्धाज्जनपदावधेः। आजमीढकः। वृद्धाज्जनपदात्। दा
र्वकः। वृद्धाज्जनपदावधेः। कालंजरकः। विषयग्रहणं किं। एकशेषेण बहुत्वे माभूत्। वर्तनी च२ वर्तन्यः। तासु भवो वा
र्त्तनः। कच्छाग्निवक्त्रवर्त्तोत्तरपदात्। देशवाचिनो वृद्धादवृद्धाच्च वुञ् स्यात्। दारुकच्छकः। कांडाग्नकः। सैंधुवक्त्रकः।
बाहुवर्त्तकः। धूमादिभ्यश्च। देशवाचिभ्यो वुञ् स्यात्। धौमकः। तैर्थकः। नगरात्कुत्सनप्रावीण्ययोः। नगरशब्दाद्वु
ञ् स्यात्कुत्सने प्रावीण्ये च गम्ये। नागरकः। चोरः शिल्पी वा। कुत्सने किं। नागराः ब्राह्मणाः। अरण्यान्मनुष्ये। अ
न्याय रण्याण इत्यस्यापवादः। पथ्यध्याय, विहारमनुष्यहस्तिष्विति वाच्यं। आरण्यकः। वा गोमयेषु। आरण्यकाः। आरण्या
वा। गोमयाः। विभाषा कुरुयुगंधराभ्यां। वुञ्। कौरवः। कौरवकः। यौगंधरः। यौगंधरकः। मद्रवृज्योः कन्। जन
पदवुञोऽपवादः। मद्रेषु जातो मद्रकः। वृजिकः। कोपधादण्। माहिषिकः। कच्छादिभ्यश्च। देशवाचिभ्योऽण्वु ११६

* साल्वकः। अपदातौ किं २

ञादेरपवादः। काच्छः। सैंधवः। मनुष्यतत्स्थयोर्वुञ्। कच्छादिभ्यः वुञ्। अणोऽपवादः। कच्छे जातादिः काच्छको मनु
ष्यः। काच्छकं हसितं। मनुष्यादि किं। काच्छो गौः। अपदातौ साल्वात्। साल्वशब्दस्य कच्छादित्वाद्वुञि सिद्धे नियमा
र्थमिदं। अपदातावेवेति। साल्वः पदातिर्व्रजति। गोयवाग्वोश्च। साल्वाद्वुञ् कच्छाद्यणोऽपवादः। साल्वको गौः। सा
ल्विका यवागूः। साल्वमन्यत्। गर्तोत्तरपदाच्छः। देशे अणोऽपवादः। वृकगर्तीयं। उत्तरपदग्रहणं बहुच्पूर्वनिरा
सार्थं। गहादिभ्यश्च। छः स्यात्। गहीयः। मुखपार्श्वतसोर्लोपश्च। मुखतीयं। पार्श्वतीयं। अव्ययानां भमात्रे टिलोपस्या
नित्यताज्ञापयितुमिदं। कुग्जनस्य परस्य च। जनकीयं। परकीयं। देवस्य च। देवकीयं। स्वस्य च। स्वस्येदं स्वकीयं। वे
णुकादिभ्यश्छण् वाच्यः। वैणुकीयं। वैत्रकीयं। औत्तरपदकीयं। प्राचां कटादेः। प्राग्देशवाचिनः कटादेश्छः स्यात्। अणो
ऽपवादः। कटनगरीयं। कटघोषीयं। कटपल्वलीयं। राज्ञः क च। वृद्धाच्छे सिद्धे तत्संनियोगेन कादेशमात्रं विधीयते
राजकीयं। वृद्धादकेकान्तखोपधात्। अक इक एवमंतात्खोपधाच्च वृद्धाद्देशवाचिनश्छः स्यात्। ब्राह्मणको ना
म जनपदः। यत्र ब्राह्मणा आयुधजीविनस्तत्र जातो ब्राह्मणकीयः। शाल्मकीलियः। आयोमुखीयं। कंथापलदन

गरग्रामह्रदोत्तरपदात् ॥ कंथादिपंचकोत्तरपदाद्देशवाचिनो वृद्धाच्छः स्यात् ॥ ठञिठादेरपवादः । दाक्षिकंथीयं । दाक्षि
पलदीयं । दाक्षिनगरीयं ॥ दाक्षिग्रामीयं ॥ दाक्षिह्रदीयं ॥ पर्वताच्च । पर्वतीयः । विभाषामनुष्ये । मनुष्यभिन्नेर्थे पर्वताच्छो
वास्यात्सक्षेण । पर्वतीयानि । पार्वतानि वा फलानि ॥ अमनुष्ये किं । पर्वतीयो मनुष्यः ॥ कृकणपर्णाद्भारद्वाजे । भारद्वाजवाचिदे
शवाचिभ्यामाभ्यां छः । कृकणीयं । पर्णीयं । भौतिकिं ॥ काकणं । पार्णं । युष्मदस्मदोरन्यतरस्यां खञ्च ॥ चाच्छः । पक्षेण् ।
युवयोर्युष्माकं वा युष्मदीयः । अस्मदीयः । तस्मिन्नणि च युष्माकास्माकौ ॥ युष्मदस्मदोरेतौ वा देशौ स्तः खञि अणि
च । यौष्माकीणः । आस्माकीनः । यौष्माकः । आस्माकः ॥ तवकममकावेकवचने । एकार्थवाचिनो युष्मदस्मदस्तवकममकौ स्तः
खञि अणि च । तावकीनः । तावकः । मामकीनः । मामकः । छेतु । प्रत्ययोत्तरपदयोश्च । मपर्यंतयोरेकार्थयोस्त्वमौ स्तः ॥
प्रत्ययेत्तरपदे च । त्वदीयः । त्वत्पुत्रः । मत्पुत्रः । अर्द्धाद्यत् । अर्द्ध्यः ॥ परावराधमोत्तमपूर्वाच्च । परार्द्ध्यं । अवरार्द्ध्यं । अधमा
र्द्ध्यं ॥ उत्तमार्द्ध्यं ॥ दिक्पूर्वपदाट्ठञ्च । पौर्वार्धिकं । पूर्वार्ध्यं ॥ ग्रामजनपदैकदेशादञ्ठञौ ॥ ग्रामैकदेशवाचिनो जनपदैक
देशवाचिनश्च दिक्पूर्वपदादर्द्धांतादञ्ठञौ स्तः । इमे अस्माकं ग्रामस्य जनपदस्य वा पौर्वार्द्धाः । पौर्वार्धिकाः । ग्रामस्य पू

चेदिका । आपदादिपूर्वपदात्कालांतात् । आपदादिराकृतिगणः । आपत्कालिकी । आपत्कालिका । वाहीकग्रामेभ्यश्च ॥ वाहीकग्राम
वाचिभ्यो वृद्धेभ्यो ठञ्ञिठौ स्तः । छस्यापवादः । कास्तीरनाम वाहीकग्रामः । कास्तीरिकी कास्तीरिका । विभाषोशीनरेषु । एषु ग्रा
मात्मद्वाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः । सौदर्शनिकी । सौदर्शनिका ॥ सौदर्शनीयः । ओर्देशे ठञ् । उवर्णांताद्देशवाचिनष्ठञ्
निषादकर्षूः निषादकर्षुकः । केयड्ढतिद्रुसः । देशे किं । पटोश्छात्राः पाटवाः । ञिठव्यावर्तयितुं ठञ्ग्रहणं । वृद्धाच्छं परत्वाद्
यं बाधते । दाक्षिकर्षुकः । वृद्धात्प्राचां ठञ् । प्राग्देशवाचिनो वृद्धाद्देवेति नियमार्थसूत्रं । आढकजंबुकः । नेह । मल्लवास्तुः ।
मल्लवास्तवः । रावत्तकः । सांकाश्यकापिल्यशब्दौ वुञ्छण्णादिसूत्रेण ण्यंतौ । सांकाश्यकः । कापिल्यकः । प्रस्थपुरवहांता
त वृवृक्षा च्च । एदंताद्देशवाचिनो वुञ् स्यात् । छस्यापवादः । मालाप्रस्थकः । नांदीपुरकः । पैलुवहकः । पुरांतग्रहणमप्रागर्थं ॥
प्राग्देशोत्तरसूत्रेण सिद्धं ॥ रोपधेतोः प्राचां । रोपधादीकारांताच्च प्राग्देशवाचिनो वृद्धाद्वुञ् स्यात् । पाटलिपुत्रकः । ऐत
कार्द्दकः । जनपदतदवध्योश्च । जनपदवाचिनस्तदवधिवाचिनश्च वृद्धाद्वुञ् स्यात् आदर्शकः । त्रैगर्त्तकः । अवृद्धा
४ ४ धन्वयोपधाद्वुञ् । धन्वविशेषवाचिनो यकारोपधाच्च देशवाचिनो वृद्धाद्वुञ् स्यात् ऐरावतं धनु ऐ ॰ ४

सध्या।अमावास्या।त्रयोदशी।चतुर्दशी।पंचदशी।पौर्णमासी॥प्रतिपत्॥संवत्सरात्फलपर्वणोः॥सांवत्सरं फलं पर्व वा। सं
सावत्सरिक मन्यत्॥प्रावृषेण्यः॥प्रावृषेण्यः॥वर्षाभ्यष्ठक्॥वर्षासु साधु वार्षिकं वासः॥कालात्साधुपुष्प्यत्पच्यमानेष्विति सा
ध्वर्थे।सर्वत्राण् च तलोपश्च॥हेमंतादण् स्यात् तलोपश्च।चेदलोकं थाः।चकारात् सन्नियोगेन् लक्षणं॥हैमनं हेमंतं॥सायंचिरंप्राह्णेप्र
गेऽव्ययेभ्यष्ट्युट्युलौ तुट् च॥सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यष्ट्युट्युलौ स्तः तयोस्तुट् च।तुरःप्र
गनादेशः।अनद्यतनट्यादेनिर्देशात्।सायंतनं।चिरंतनं।प्राण्हप्रयोगयोरेदंतत्वं निपात्यते॥प्राण्हेतनं।प्रगेतनं॥दो
षातनं।दिवातनं॥चिरपरुत्परारिभ्यस्त्नो वक्तव्यः॥चिरत्नं।परुत्नं।परारित्नं।अग्रादिपश्चाड्डिमच्॥अग्रिमं।आदि
मं।पश्चिमं।अंतात्त्व।अंतिमं॥विभाषा पूर्वाह्णापराह्णाभ्यां॥आभ्यां ट्युट्युलौ वास्तः स्तयोस्तुट् च।पक्षे ठञ्।पू
र्वाह्णेतनं।अपराह्णेतनं॥घकालतनेषु इत्यलुक्॥पूर्वाण्हः सोढोऽस्येति विग्रहे तु पूर्वाण्हतनं।अपराह्णतनं।पौर्वाह्णि चिरंतन
तकं।अपराण्हिकं॥तत्र जातः॥सप्तमीसमर्थाज्जात इत्यर्थे ऽणादयो घादयश्च स्युः॥स्रुघ्ने जातः स्रौघ्नः।औत्सः।राष्ट्रियः।अव
रपारीणः॥प्रावृषष्ठप्॥एण्यस्यापवादः।प्रावृषिजातः।प्रावृषिकः।संज्ञायां शरदो वुञ्।ऋत्वणोऽपवादः।शारदकाः॥ ११८

दर्भविशेषाश्च मुद्गविशेषाश्च॥उत्तरपदस्य।अधिकारोयं॥हनस्तद्धिते स्यस्मात्प्राक्॥अवयवादृतोः॥अवयववाचिनः पूर्वप
दाद् ऋतुवाचिनो नोत्तरपदस्य वृद्धिर्ञिति णिति किति च तद्धिते।पूर्ववार्षिकः।अपरहैमनः।अवयवात्किं।पूर्वासु च
स्रभवः पौर्ववार्षिकः॥ऋतोर्वृद्धिमद्विधाववयवानामिति तदंतविधिः पूर्वत्र इह तु न।अवयवत्वाभावात्॥सर्वार्धाज्ज
नपदस्य।उत्तरपदस्य वृद्धिः।सुपांचालकः।सर्वपांचालकः।अर्धपांचालकः।जनपदतदवध्योरिति वुञ्।सर्वादिर्दि
क्शब्देभ्यो जनपदस्येति तदंतविधिः।दिशोऽमद्राणां।दिग्वाचकाज्जनपदवाचिनो वृद्धिः।पूर्वपांचालकः।दिशः
किं।पूर्वपांचालानामयं पौर्वपांचालः॥अमद्राणां किं।पौर्वमद्रः।योगविभाग उत्तरार्थः।प्राचां ग्रामनगराणां।दिशः परेषां ग्रा
मवाचिनो नगरवाचिनां वृद्धिः।पूर्वेषुकामशम्यां भवः पूर्वेषुकामशमः।नगरे।पूर्वपाटलिपुत्रकः।पूर्वाण्हापरा
ण्हार्द्रामूलप्रदोषावस्कराद्वुन्।पूर्वाण्हकः।अपराण्हकः।आर्द्रकः।मूलकः।प्रदोषकः।अवस्करकः॥पथः पंथ च।पथि
जातः पंथकः॥अमावास्याया वा।अमावास्यकः।आमावास्यः॥अ च॥अमावास्यः॥सिंधुपकराभ्यां कन्।सिंधुकः।क
छ्वादिभ्यः अण्।सेंधवः।आपकरः।
छाद्यणि मनुष्य वुञिच प्राप्ते।अपकरकः।औत्सर्गिक अणि प्राप्ते।अण्ञौ च।क्रमात्स्तः।सैंधवः।आपकरः।

सि०कौ०त० श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक्। एभ्यो नक्षत्रवाचिभ्यः परस्य जातार्थे प्रत्ययस्य लुक्॥
३३९ स्यात्। लुक्तद्धितलुकि। तद्धितलुकि उपसर्जनस्त्रीप्रत्ययस्य लुक्। श्रविष्ठासु जातः श्रविष्ठः। फल्गुनः इत्यादि। चित्रारेवतीरोहिणी
भ्यः स्त्रियामुपसंख्यानं। चित्रायां जाता चित्रा। रेवती। रोहिणी। आभ्यां लुक् तद्धितलुकीति लुकि कृते पिप्पल्यादेराकृतिगण
त्वात्पुनर्ङीष्। फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ स्त्रियामित्येव। फल्गुनी। अषाढा। श्रविष्ठाषाढाभ्यां छण्वक्तव्यः॥ अस्त्रि
यामपि। श्राविष्ठीयः॥ आषाढीयः। जे प्रोष्ठपदानां। प्रोष्ठपदानामुत्तरपदस्याचामादेरचो वृद्धिर्जातार्थे ञ्णिति किति च
प्रोष्ठपदासु जातः प्रौष्ठपादो माणवकः। जे इति किं। प्रोष्ठपदासु भवः प्रौष्ठपदः। बहुवचननिर्देशात्पर्यायोपि गृह्यते। भद्रपादः।
स्थानान्तगोशालखरशालाच्च। एभ्यो जातार्थे प्रत्ययस्य लुक् स्यात्। गोस्थाने जातः। गोस्थानः। गोशालः। खरशालः। वि
भाषा सेनेति नपुंसकैकत्वं। वत्सशालाभिजिदश्वयुक्छतभिषजो वा। एभ्यो जातार्थप्रत्ययस्य लुग्वा स्यात्। वत्सशाले जातः चिदंबर
वत्सशालः। वात्सशालः इत्यादि॥ जातार्थे प्रतिप्रसूतोण्वा ङिद्वक्तव्यः। शातभिषः। शातभिषजः। शतभिषक्। नक्षत्रे
भ्यो बहुलं। जातार्थस्य प्रत्ययस्येयं लुक् बहुलं। रोहिणः। रौहिणः। कृतलब्धक्रीतकुशलाः। तत्रेत्येव। स्रुघ्ने कृतो लब्धः क्रीत ११९

वा धेनुर्वा इति तत्राधिजातार्थे समासः। ठञ्ग्रहणं स्पष्टार्थं। अञ्चेत्कृतेपि तोप्यकेनुर्षसभाव्यते। मध्यान्मः। मध्यमं॥ असांप्रतिके। म
ध्यशब्दादकारप्रत्ययः स्यात्सांप्रतिकेर्थे। उत्कर्षापकर्षहीनो मध्यो वैयाकरणः। मध्यं दारु। नातिह्रस्वनातिदीर्घमित्यर्थः।
द्वीपादनुसमुद्रं यञ्। समुद्रसमीपो यो द्वीपः तद्विषयाद्द्वीपशब्दाद्यञ्स्यात्॥ द्वैप्यं। द्वैप्या॥ कालाट्ठञ्। कालवाचिभ्यष्ठ
ञ्स्यात्। मासिकं। सांवत्सरिकं। सायंप्रातिकः। पौनःपुनिकः। कथन्तर्हि शार्वरस्य तमसो निषिद्धये इति कालिदासः।
अनुदितौषसरागेति भारविः॥ समानकालीनं। प्राक्कालीनं इत्यादि॥ अपभ्रंशा एवैते प्रामाणिकाः। तत्र जात इति य
वत्कालाधिकारः। श्राद्धे शरदः। ठञ्स्यात्। ऋत्वणोरपवादः। शारदिकं श्राद्धं। विभाषा रोगातपयोः। शारदिकः
हं शारदो वा रोगः। आतपो वा। एतयोः किं। शारदं दधि॥ निशाप्रदोषाभ्यां च॥ वा ठञ्स्यात्। नैशिकं। नैशं॥ प्रादोषिकं॥
प्रादोषं॥ श्वसस्तुट् च। श्वसशब्दात् ठञ्स्यात् तस्य तुडागमः स्यात्॥ द्वारादीनां च। द्वार। [illegible]। स्वस्ति। श्व
स्। स्वस्य कृत्। स्वादु। मृदु। श्वस्। स्वन्। एषां न वृद्धिः। ऐजागमश्च। शौवस्तिकं। संधिवेलाद्यृतुनक्षत्रेभ्योण्॥ सं
धिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योण्स्यात्॥ संधिवेलायां भवं। सांधिवेलं। ग्रैष्मं। तैषं। संधिवेला॥ सं

सिं॰कौ॰त दंस्यं॥ कण्व्यं। प्राचांनगरांते। प्राचां देशे नगरांतेंगे पूर्वपदस्योत्तरपदस्य चामादेरचो वृद्धिः स्याञ्ञिति णिति किति च। सुह्मनगरे भवः सौह्मनाग
रः। पौंड्रनागरः। प्राच्यं किं। मद्रनगरमुदक्षु तत्र भवः माद्रनगरः॥ जंगलधेनुवलजांतस्य विभाषितमुत्तरं। जंगलाद्यंतेस्यांगस्य पूर्वप ला
दस्य चामादेरचो वृद्धिः स्याञ्ञिति णिति किति च। कुरुजंगले भवं कौरुजंगलं॥ कौरुजांगलं। वैश्वधेनवं। वैश्वधैनवं। सौवर्णवालजं। सौ
स्य वर्णवलजं। दृतिकुक्षिकलशिवस्त्यहेर्ढञ्॥ दार्तेयं। कौक्षेयं। कलशिर्घटः तत्र भवं कालशेयं। वास्तेयं। आस्तेयं। आहेयं
ग्रीवाभ्योण्च। चाड्ढञ्। ग्रैवेयं। ग्रैवं। गंभीराञ्ञ्यः। गंभीरे भवं गांभीर्यं। पंचजनादुपसंख्यानं। पांचजन्यं। अव्ययीभावाच्च॥
परिमुखं भवं पारिमुख्यं। परिमुखादिभ्य एवेष्यते। नेह। औपकूलः। अंतःपूर्वपदाट्ठञ्। अव्ययीभावादित्येव। वेश्म
न्यंतर्वेश्मं। तत्र भवमांतर्वेश्मिकं। आंतर्गणिकं। अध्यात्मादेष्ठञिष्यते। आध्यात्मं भवं आध्यात्मिकं। अनुशतिकादी
ति नां च। एषामुभयपदवृद्धिः स्याञ्ञिति णिति किति च। आधिदैविकं। आधिभौतिकं। ऐहलौकिकं। पारलौकिकं। पार
लौकिकं। अध्यात्मादिराकृतिगणः। देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्। एषां पंचानां वृद्धिप्राप्ता
वादेरच आत्स्यात् ञिति णिति किति च। दाविकं। देविकाकूले भवा दाविकाकूलाः। शालयः। शिंशपायाः विका

रः शांशपश्चमसः। पलाशादिभ्यो वेत्यञ्॥ रत्ये धत्य ठञ्। वाहऊठ्। संप्रसारणाच्च। दित्यौहं इदं दात्यौहं। दीर्घसत्रे भवं दार्घसत्रं॥ श्रे
यसि भवं श्रायसं। ग्रामात्पर्यनुपूर्वात् ठञ्स्यात्॥ अव्ययीभावादित्येव। पारिग्रामिकः। आनुग्रामिकः। जिह्वामूलांगुलेश्छः।
जिह्वामूलीयं। अंगुलीयं। वर्गांताच्च। कवर्गीयं। अशब्दे यत्खावन्यतरस्यां। पक्षे पूर्वेण छः। मद्वर्ग्यः। मद्वर्गीणः। मद्वर्गीयः।
अशब्दे किं। कवर्गीयो वर्णः। कर्णललाटात्कनलंकारे। कर्णिका। ललाटिका। तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः। सुपां व्या
ख्यानः सौपो ग्रंथः। तैङः। कार्तः। सुप्सु भवं सौपं। बह्वचोंतोदात्ताट्ठञ्। षत्वणत्वविधायकं शास्त्रं षत्वणत्वं तस्य व्याख्यानं
स्तत्र भवो वा षात्वणत्विकः॥ क्रतुयज्ञेभ्यश्च। सोमसाध्येषु प्रसिद्धौ तत्रान्यतरोपादानेन सिद्धे उभयोपादानसामर्थ्या
द्सोमपा अपीह गृह्यंते। अग्निष्टोमस्य व्याख्यानस्तत्र भवो वा आग्निष्टोमिकः। वाजपेयिकः। पाकयज्ञिकः। नावयज्ञि
कः। बह्वच्त्वनं स्वरूपविधिनिरासार्थं। अनंतोदात्तार्थ आरंभः। अध्यायेष्वेवर्षेः। ऋषिशब्देभ्यो लक्षणया व्याख्येयग्रं च
थ वृत्तिभ्यो भवे व्याख्याने चाध्याये ठञ्स्यात्। वसिष्ठेन दृष्टो मंत्रो वसिष्ठस्तस्य व्याख्यानस्तत्र भवो वा वासिष्ठिको ध्यायः।
अध्यायेषु किं। वासिष्ठी ऋक्। पौरोडाशपुरोडाशात्ष्ठन्। पुरोडाशसहचरितो मंत्रः पुरोडाशः स एव पौरोडाशस्तत्र

सि॰कौ॰त॰ ष्ठञ्। पौरोडाशिकं। पुरोडाशिकः॥ छंदसोयदणौ। छंदस्यः। छांदसः। द्व्यज्‌ऋद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्
द्व्यचः। ऐष्टिकः। पाशुकः। ऋत्। चातुर्होतृकः। ब्राह्मणिकः। आर्चिकः। इत्यादि॥ अणृगयनादिभ्यः। ठञादेरपवादः। आर्गयनः।
औपनिषदः। वैयाकरणः। ततआगतः। स्रुघ्नादागतः। स्रौघ्नः। ठगायस्थानेभ्यः। शुल्कशालाया आगतः शौल्कशालिकः॥ आ
शुंडिकादिभ्योण्। आयस्थानेठक्छणादीनांचापवादः। शुंडिकादागतः शौंडिकः। कार्कणः। तैर्थकः। विद्यायोनिसंबंधेभ्यो
वुञ्। औपाध्यायिकः। पैतामहकः। ऋतष्ठञ्। वुञोपवादः। हौतृकं। मातृकं। भ्रातृकं। पितुर्यच्च। चाठञ्॥ रीङृतः। य
स्येतिलोपः। पित्र्यं। पैतृकं। गोत्रादंकवत्। बिदेभ्य आगतं बैदं। गार्गं। दाक्षं। औपगवं। नञः शुचीश्वरक्षेत्रज्ञकुशलानां। निपुणा
नञः परेषां शुच्यादिपंचानामादेरचोवृद्धिः पूर्वपदस्य तु वा स्यादिदादौ॥ आशौचं। अशौचं। आनैश्वर्यं। अनैश्वर्यं। आक्षेत्रज्ञं
लं अक्षेत्रज्ञं॥ आकौशलं। अकौशलं॥ आनैपुणं। अनैपुणं। हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः। समादागतं। समरूप्यं॥ वि चिरंबद्
षमरूप्यं। पक्षे गहादित्वाच्छः। समीयं। विषमीयं॥ देवदत्तरूप्यं। दैवदत्तं॥ मयट् च॥ सममयं॥ विषममयं। देवदत्तमयं।
प्रभवति॥ तत्तइतित्येव। हिमवतःप्रभवति हैमवती गंगा। विदूराञ्ञ्यः। विदूरात्प्रभवति वैदूर्यो मणिः। तद्गच्छति पथिदूतयोः। १२३

कुशलो वा। स्रौघ्नः। प्रायभवः। तत्रेत्येव। स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः। उपजानूपकर्णोपनीवेष्ठक्। औपजानुकः। औपकर्णिकः॥
औपनीविकः॥ संभूते। तत्रेत्येव॥ स्रुघ्ने संभवति स्रौघ्नः॥ कोशाड्ढञ्। कौशेयं वस्त्रं। कालात्साधुपुष्प्यत्पच्यमानेषु। हेमंते साधुर्हैमंतः॥
प्राकारः। वसंते पुष्प्यंति वासंत्यः। कुंदलताः। शरदि पच्यंते शारदाः। शालयः। उप्ते च। हेमंते उप्यंते हैमंता यवाः॥ आश्वयुज्या वुञ्। ठञोपवा
दः। आश्वयुज्यामुप्ता आश्वयुजका माषाः। ग्रीष्मवसंतादन्यतरस्यां। पक्षे ऋतवण्। ग्रैष्मकं। ग्रैष्मं। वासंतकं। वासंतं॥ देयमृणे। काला
दित्येव। मासे देयं ऋणं मासिकं। कलाप्यश्वत्थयवबुसाद्वुन्। यस्मिन्काले मयूराः कलापिनो भवंति स उपचारात्कलापी तत्र देय
मृणं कलापकं। अश्वत्थस्य फलमश्वत्थः। तद्युक्तः कालोऽश्वत्थः। यस्मिन्नश्वत्थाः फलंति तत्र देयमृणमश्वत्थकं। यस्मिन्यवबुस
समुत्पद्यते तत्र देयमृणं यवबुसकं। ग्रीष्मावरसमाद्वुञ्। ग्रीष्मे देयमृणं ग्रैष्मकं। आवरसमकं। संवत्सराग्रहायणीभ्यां ठञ् च। वा
वुञ्। सांवत्सरिकं। सांवत्सरकं। आग्रहायणिकं। आग्रहायणकं। व्याहरति मृगः। कालवाचिनः सप्तम्यंताच्छब्दायत इत्यर्थे ण
द्यः स्कः। यो व्याहरति स मृगश्चेत्। निशायां व्याहरति नैशो मृगः। नैशिकः। तदस्य सोढं। कालादित्येव। निशासहचरितमध्यय
नं निशा तत्सोढमस्य नैशः। नैशिकः। तत्रभवः। स्रुघ्ने भवः स्रौघ्नः। राष्ट्रियः। दिगादिभ्यो यत्। दिश्यं। वर्ग्यं। शरीरावयवाच्च।

सि॰कौ॰त॰ तूदीवर्मतीकूचवाराड्ढक्छण्ढञ्यकः॥ तूदी अभिजनोस्य तौदेयः। शालातुरीयः। वार्मतेयः। कौचवार्यः॥ भक्तिः॥ सोस्येत्यनुवर्त्तते।
भज्यते सेव्यते इति भक्तिः। स्रुघ्नो भक्तिरस्य स्रौघ्नः। अ[illegible]॥ अचित्तादेशकालाट्ठक्॥ अपूपा भक्तिरस्य आपूपिकः।
पायसिकः। अचित्तात्किं। दैवदत्तः। अदेशात्किं। स्रौघ्नः। अकालात्किं। ग्रैष्मः। महाराजाट्ठञ्। माहाराजिकः। वासुदेवार्जु
नाभ्यां वुन्। वासुदेवकः। अर्जुनकः। गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्। अणोपवादः। परत्वाद्वृद्धाच्छं बाधते। ग्लुचु
कायनिर्भक्तिरस्य ग्लौचुकायनकः। नाकुलकः। बहुलग्रहणान्नेह। पाणिनो भक्तिरस्य पाणिनीयः। जनपदि
नां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने। जनपदस्वामिवाचिनां बहुवचने जनपदवाचिना समान
श्रुतीनां जनपदवत्सर्वं स्यात्। प्रत्ययः प्रकृतिश्च। जनपदतदवध्योश्चेति प्रकरणे ये प्रत्यया उक्तास्तेत्रापि संदि
श्यंते। अंगा जनपदो भक्तिरस्यांगकः। अंगाः क्षत्रिया भक्तिरस्यां॰ जनपदिनां किं। पंचाला ब्राह्मणा भक्तिरस्य पांचा
लः। जनपदेनेति किं। पौरवा राजानो भक्तिरस्य पौरवीयः। तेन प्रोक्तं। पाणिना प्रोक्तं पाणिनीयं। तित्तिरिवरतंतुखंडि १२९
गकः।

कोखाच्छण्॥ छंदोब्राह्मणानीति तद्विषयाणि ता। तित्तिरिणा प्रोक्तमधीयते तैत्तिरीया इत्यादि॥ काश्यपकौशिकाभ्या
मृषिभ्यां णिनिः। काश्यपेन प्रोक्तमधीयते काश्यपिनः। कौशिकिनः। कलापिवैशंपायनांतेवासिभ्यश्च। कलापिनोंतेवा
सिभ्यः। हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः। वैशंपायनांतेवासिभ्यः॥ कलाप्यंतेवासिभ्यः आलंबिनः। पुराणप्रो
क्तेषु ब्राह्मणकल्पेषु॥ तृतीयांतात्प्रोक्तार्थे णिनिः स्यात्। यत्प्रोक्तं पुराणप्रोक्ताश्चेद्ब्राह्मणकल्पा भवंति। पुराणेन चि
रंतनेन मुनिना प्रोक्ताः। भल्लुना प्रोक्ताः। भाल्लविनः। शाह्यनो येन शाह्यायनिनः। कल्पे। पिंगपैंगीकल्पः। पुराणेति किं।
याज्ञवल्क्यानि ब्राह्मणानि॥ आश्मरथः। कल्पः। अपि। आपत्यस्येति यलोपः। कठचरकाल्लुक्। आभ्यां प्रोक्तस्य
लुक्स्यात्। कठेन प्रोक्तमधीयते कठाः। चरकाः। कलापिनोण्। कलापिना प्रोक्तमधीयते कालापाः। नांतस्य टिलोपे स
ब्रह्मचारिपीठसर्पिकलापि[illegible] कौथुमितैतिलिजाजलिलांगलिशिलालिशिखंडिसूकरसद्मसुपर्वणामुपसंख्या
नमिति टिलोपः। छगलिनो ढिनुक्॥ छगलिना प्रोक्तमधीयते छागलेयिनः॥ पाराशर्यशिलालिभ्यां भिक्षुनटसू
त्रयोः॥ पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणः भिक्षवः। शैलालिनो नटाः। कर्मंदकृशाश्वादिनिः॥ भिक्षुनटसू

नः

सि० कौ० त॰ सूत्रयोरित्येव ॥ कर्मंदेन प्रोक्तमधीयते कर्मंदिनो भिक्षवः। कृशाश्विनः नटाः। तेनैकदिक्। सुदाम्ना अद्रिणा एकदिक्। सौ
दामनी। तसिश्च। स्वरादिपाठादव्ययत्वं। पीलुमूलेनैकदिक् पीलुमूलतः। उरसो यच्च। चात्तसिः। अणोपवादः। उरसा
एकदिक् उरस्यः। उरस्तः। उपज्ञाते। तेनेत्येव॥ पाणिनिनोपज्ञातं पाणिनीयं। कृते ग्रंथे। तेनेत्येव। वररुचिना कृ
तो ग्रंथो वाररुचः। संज्ञायां। तेनेत्येव। अग्रंथार्थमिदं। मक्षिकाभिः कृतं माक्षिकं। कुलालादिभ्यो वुञ्। कुलाले
न कृतं कौलालकं। वारुडकं। क्षुद्राभ्रमरवटरपादपादञ्। तेन कृते संज्ञायां। क्षुद्राभिः कृतं क्षौद्रं। भ्रामरं। वाट
रं। पादपं। तस्येदं। उपगोरिदं औपगवं। वहेस्तुरणिट् च। संवोढुः स्वं सांवहित्रं। अग्नीधः शरणे रण् भं च। अ
ग्निमिंधे। अग्नीत्। तस्य स्थानं आग्नीध्रं। तादर्थ्यात् सोप्याग्नीध्रः। समिधामाधाने षेण्यण्। सामिधेन्यो मंत्रः
सामिधेनी ऋक्। रथाद्यत्। रथ्यं। चक्रं। पत्रपूर्वादञ्। पत्रं वाहनं। अश्वरथस्येदमाश्वरथं। पत्राध्वर्युपरिष
दश्च। अञ्। पत्राद्वाह्ये। अश्वस्येदं वहनीयमाश्वं। आध्वर्यवं। पारिषदं॥ हलसीराट्ठक्। हालिकं। सैरिकं। १२३

स्रुघ्नं गच्छति स्रौघ्नः पंथाः। दूतो वा। अभिनिष्क्रामति द्वारं। तदित्येव। स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारं॥ तम
अधिकृत्य कृते ग्रंथे॥ तदित्येव। शारीरमधिकृत्य कृतो ग्रंथः शारीरकीयः। शारीरकं भाष्यमिति तु अभेदोपचारात्॥
शिशुक्रंदयमसभद्वंद्वेंद्रजननादिभ्यश्छः। शिशूनां क्रंदनं शिशुक्रंदः तमधिकृत्य कृतो ग्रंथः शिशुक्रंदीयः। यस्य स
भायमसभं। क्लीबत्वं निपातनात्। यमसभीयः। कीरातार्जुनीयं। इंद्रजननादिराकृतिगणः। इंद्रजननीयं। विरुद्ध
भोजनीयं॥ सोस्य निवासः। स्रुघ्नो निवासोस्य स्रौघ्नः। अभिजनश्च। स्रुघ्नोभिजनोस्य स्रौघ्नः। यत्र स्वयं वसति स
निवासः। यत्र पूर्वैरुषितं सोभिजन इति विवेकः। आयुधजीविभ्यश्छः पर्वते। पर्वतवाचिनः प्रथमांतादभिजनशब्दा
त्स्यादस्यर्थे छः स्यात्। हृद्गोलः पर्वतोभिजन एषां आयुधजीविनां ते हृद्गोलीयाः। आयुधेति किं। ऋक्षोदः पर्वतोभि
भिजन एषां ते आर्क्षोदाः द्विजाः। शंडिकादिभ्यो ञ्यः। शंडिकोभिजनोस्य शांडिक्यः। सिंधुतक्षशिलादिभ्योणञौ
सिंध्वादिभ्योण् तक्षशिलादिभ्योञ् स्यादुक्तेर्थे। सैंधवः। तक्षशिलानगराभिजनोस्य ताक्षशिलः। तूदी शाल

सि॰ कौ॰ त॰ आथर्वणिकस्येकलोपश्च॥ अण् स्यात्। आथर्वणिकस्यायं आथर्वणो धर्म आम्नायो वा॥ चरणाद्वुञोपवादः॥ समा
प्ताः शैषिकाः॥ तस्य विकारः॥ अश्मनो विकारे टिलोपो वक्तव्यः। अश्मनो विकारः आश्मः। भास्मनः। मार्त्तिकः। अवयवे च प्रा
ण्योषधिवृक्षेभ्यः। चाद्विकारे। मयूरस्यावयवो विकारो वा मायूरः। मौर्वं काण्डं भस्म वा। पैप्पलं। बिल्वादिभ्योऽण्॥ बैल्वः
कोपधाच्च॥ अण् अञोपवादः। तर्कु तार्कवं। तैत्तिरीयकं। त्रपुजतुनोः षुक्॥ आभ्यामण् स्याद्विकारे एतयोः षुगागमश्च॥
त्रापुषं। जातुषं। ओरञ्॥ दैवदारवं। अनुदात्तादेश्च। दाधित्थं। कापित्थं। पलाशादिभ्यो वा॥ पालाशं। कारीरं। शम्याष्ट्ल
ञ्॥ शामीलं भस्म। षित्वान्ङीष्। शामीली स्रुक्॥ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः॥ प्रकृतिमात्रान्मयड्वा स्याद्
विकारावयवयोः। अश्ममयं। आश्मनं। अभक्ष्येत्यादि किं। मौद्गः सूपः। कार्पासमाच्छादनं॥ नित्यं वृद्धशरा
दिभ्यः॥ आम्रमयं। शरमयं। एकाचो नित्यं॥ त्वङ्मयं। वाङ्मयं। कथं तर्हि आप्यमम्मयंमिति। तस्येदमित्यणतात्त्वा मृ
र्थेष्यञ्॥ गोश्च पुरीषे॥ गोः पुरीषं॥ गोमयं। पिष्टाच्च॥ मयट् स्यात्[illegible]द्विकारे। पिष्टमयं। भस्म। कथं तर्हि पैष्टी चिदंबर
सुरेति। सामान्यविवक्षायां तस्येदमित्यण्॥ संज्ञायां कन्॥ पिष्टादित्येव। पिष्टस्य विकारविशेषः पिष्टकः॥ १२४

पूपोऽपूपः। पिष्टकः स्यात्॥ व्रीहेः पुरोडाशे॥ मयट् स्यात्। बिल्वाद्यणोपवादः॥ व्रीहिमयपुरोडाशः। व्रैहमन्यत्॥ असंज्ञायां तिलय
वाभ्यां॥ तिलमयं॥ यवमयं। संज्ञायां तु तैलं। यावकः॥ तालादिभ्योऽण्॥ अञ्मयटोरपवादः॥ तालाद्धनुषि॥ तालं धनुः। अन्यत्तालम
यं॥ ऐन्द्रायुधं॥ जातरूपेभ्यः परिमाणे। अण्। बहुव[illegible]चनात्पर्यायग्रहणं। हाटकं॥ तापनीयं। सौवर्णो वा निष्कः। परिमा
णे किं। हारकमयी यष्टिः॥ प्राणिरजतादिभ्योऽञ्॥ शौकं। बाकं। राजतं॥ जितश्च तत्प्रत्ययात्॥ जिद्यो विकारावयवप्रत्ययस्त
दन्तादञ् स्यात्। तयोरेवार्थयोः। मयटोपवादः॥ शामीलस्य शामीलं। दाधित्थं। जितः किं। बैल्वमयं। क्रीतवत्परिमाणात्॥
प्राग्वहतेष्ठगित्यारभ्य क्रीतार्थे ये प्रत्यया येनोपा[illegible]धिना परि[illegible]माणाद्विहितास्ते तथैव विकारेतिदिश्यन्ते। अणादीना
मपवादः। निष्केण क्रीतं नैष्किकं। एवं निष्कस्य विकारो नैष्किकः। शातस्य विकारः शत्यः। शातिकः॥ उष्ट्राद्वुञ्॥ प्राण्यञोरपवादः।
औष्ट्रकः॥ उमोर्णयोर्वा॥ औमं। औमकं॥ और्णं॥ और्णकं। उञ्भावे यथाक्रममणञौ॥ एण्या ढञ्॥ ऐणेयं। एणस्य तु ऐणं॥
गोपयसोर्यत्॥ गव्यं। पयस्यं। द्रोश्च॥ द्रुर्वृक्षः। तस्य विकारोऽवयवो वा द्रव्यं। माने वयः॥ द्रोरित्येव। द्रुवयं। योतर्द्रुवयं म
व्यं पा[illegible]मितिमानार्थत्वं। फले लुक्॥ विकारावयवप्रत्ययस्य लुक् स्यात् फले। आमलक्याः फलं। आमलकं॥ प्लक्षादिभ्य
रा

सि०कौ०त० न्योण्॥ विधानसामर्थ्यान्न लुक्॥ प्लाक्षं॥ न्यग्रोधस्य च केवलस्य। अस्य न वृद्धिः ऐजागमश्च॥ नैयग्रोधं॥ जंब्वा वा॥ जंबूशब्दात्फले
ण्वा स्यात्। जांबवं। पक्षे ओरञ्॥ तस्य लुक्। जंबु। लुप्। जंब्वाः फलप्रत्ययस्य लुब्वा स्यात्। लुपि युक्तवद्व्यक्तिवचने। जंब्वाः फ
लं जंबूः॥ फलपाकशुषामुपसंख्यानं॥ व्रीहयः। मुद्गाः। पुष्पमूलेषु बहुलं। मल्लिकायाः पुष्पं मल्लिका। जात्याः पुष्पं जा
ती॥ विदार्याः मूलं विदारी। बहुलग्रहणान्नेह॥ पाटलानि पुष्पाणि। साल्वानि मूलानि। बाहुलकात्क्वचिल्लुक्॥ अशो
कं। करवीरं। हरीतक्यादिभ्यश्च। एभ्यः फलप्रत्ययस्य लुप्स्यात्। हरीतक्यादीनां लिंगमेव प्रकृतिवत्। हरीतक्याः फला
नि हरीतक्यः॥ कंसीयपरशव्ययोर्यञञौ लुक् च॥ कंसीयपरशव्यशब्दाभ्यां यञञौ स्तः छयतोश्च लुक्। कंसाय हितं कं
सीयं॥ तस्य विकारः कांस्यं॥ परशवे हितं परशव्यं। तस्य विकारः पारशवः॥ प्राग्दीव्यतीयाः समाप्ताः॥ प्राग्वहतेष्ठक्॥
तद्वहतीत्यतः प्राक् ठगधिक्रियते। तदाहेति माशब्दादिभ्य उपसंख्यानं। माशब्दः कौरि इति य आह स माशब्दिकः। स्वा ९
गतादीनां च। ऐच् न स्यात्॥ स्वागतमित्याह स्वागतिकः। स्वाध्वरिकः। स्वंगस्यापत्यं स्वांगिः। व्यांगिः। व्याडस्यापत्य १२५

द्वंद्वाद्वुन्वैरमैथुनिकयोः। कांकोलिका। कुत्सकुशिकिका। द्वंद्वे देवासुरादिभ्यः प्रतिषेधः। देवासुरं। दैवासुरं। गोत्रचरणाद्वुञ्॥
औपगवं। चरणाद्धर्माम्नाययोरिति वक्तव्यं। काठकं। संघांकलक्षणेष्वञ्यञिञामण्॥ घोषग्रहणमपि कर्तव्यं। अंग॥
बेदः। संघोंको घोषो वा। बैदलक्षणं। यञ्। गार्गः। गार्गं। इञ्। दाक्षाः। दाक्षं। परंपरासंबंधोंकः। दाक्षात् लक्षणं। शाक
लाद्वा। अण्वोक्तेऽर्थे पक्षे चरणाद्वुञ्। शकलेन प्रोक्तमधीयते शाकलाः। तेषां संघोंको घोषो वा। शाकलः। शाकल
कः। लक्षणे क्लीबत्वं। छंदोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः॥ छंदोगानां धर्म आम्नायो वा छांदोग्यं। औक्थिक्यं। याज्ञि
क्यं। बाह्वृच्यं। चरणाद्धर्माम्नाययोरित्युक्तं। तत्साहचर्यान्नटशब्दादपि तयोरेव। नाटं। दंडमाणवांतेवासिषु॥ दंडप्रधा
ना माणवा दंडमाणवास्तेषु शिष्येषु च वुञ् न स्यात्। दाक्षाः। दंडमाणवाः शिष्या वा। रैवतिकादिभ्यश्छः॥ तस्येद
मित्यर्थे वुञोऽपवादः। रैवतीकीयः। बैजवापीयः। कौपिंजलहास्तिपदादण्वक्तव्यः॥ कुपिंजलस्यापत्यं कौपिं
इहैव निपातनादण्। तदंतात्पुनरण्। कौपिंजलः। गोत्रवुञोऽपवादः। तस्यायं हास्तिपदः। चरणवुञोऽपवा

सि॰कौ॰त॰ पत्यं श्वाफल्किः। श्वादेरिञि॥ तदादिविधिश्चैतदेव ज्ञापकं। इकारादाविति वाच्यं। श्वगणेन चरति श्वागणिकः। श्वागणि
की। श्वगणिकः। श्वगणिकी। पदान्तस्यान्यतरस्यां। श्वादेरंगस्य पदशब्दांतस्यैज्वा। श्वपदस्येदं श्वापदं। शौवाप
दं। वेतनादिभ्यो जीवति। वेतनेन जीवति वैतनिकः। धानुष्कः। वस्नक्रयविक्रयाट्ठन्। वस्नेन मूल्येन जीवति वस्निकः।
क्रयविक्रयग्रहणं संघातविगृहीतार्थं। क्रयविक्रयिकः। क्रयिकः। विक्रयिकः। आयुधाच्छ च। चाट्ठन्। आयुधेन जी
वति आयुधीयः। आयुधिकः। हरत्युत्संगादिभ्यः। उत्संगेन हरति औत्संगिकः। भस्त्रादिभ्यः ष्ठन्। भस्त्रया हरति
भस्त्रिकः॥ षित्वाद्भस्त्रिकी। विभाषा विवधात्। विवधेन हरति विवधिकः। पक्षे ठक्। वैवधिकः। एकदेशस्य विकृतस्यानन्य
त्वाद्वीवधादपि ष्ठन्। वीवधिकः। वीवधिकी। विवधवीवधशब्दौ उभयतो बद्धशिक्ये स्कंधवाह्ये काष्ठे वर्तेते॥ चिदंबर
अण् कुटिलिकायाः। कुटिलिका व्याधानां गतिविशेषः। कर्मारोपकरणभूतं लोहं च। कुटिलिकया हरति मृगान्
अंगारान्वा कौटिलिकः। व्याधः। कर्मारश्च। निर्वृत्तेऽक्षद्यूतादिभ्यः। अक्षद्यूतेन निर्वृत्तं आक्षद्यूतिकं। वैरं। क्त्रेर्मम॰ १२६

नित्यं। क्त्रिप्रत्ययांतप्रकृतिकात्तृतीयांतान्निर्वृत्तेऽर्थे मप् स्यान्नित्यं। कृत्या निर्वृत्तं कृत्रिमं। पाक्त्रिमं। भावप्रत्ययांता
दिमब्वक्तव्यः। पाकेन निर्वृत्तं पाकिमं। त्यागिमं। अपमित्ययाचिताभ्यां कक्कनौ। अपमित्येति ल्यबंतं। अपमित्य नि
र्वृत्तमापमित्यकं। याचितेन निर्वृत्तं याचितकं। संसृष्टे। दध्ना संसृष्टं दाधिकं। चूर्णादिनिः। चूर्णैः संसृष्टाः चूर्णि
नोऽपूपाः। लवणाल्लुक्। लवणेन संसृष्टो लवणः सूपः। लवणं शाकं। मुद्गादण्। मौद्ग ओदनः। व्यंजनैरुपसिक्ते। दध्ना
उपसिक्तं दाधिकं॥ ओजःसहोम्भसा वर्तते। ओजसिकः शूरः। साहसिकश्चोरः। आंभसिको मत्स्यः। तत्प्रत्यनु
पूर्वमीपलोमकूलं॥ द्वितीयांतादस्माद्वर्तत इत्यर्थे ठक् स्यात्। क्रियाविशेषणत्वाद्द्वितीया। प्रतीपं वर्तते प्रातीपिकः।
आन्वीपिकः। प्रातिलोमिकः। आनुलोमिकः। प्रातिकूलिकः। आनुकूलिकः। परिमुखं च। परिमुखं वर्तते पारिमुखि
कः। पारिपार्श्विकः। प्रयच्छति गर्ह्यं। द्विगुणार्थं द्विगुणं। तत्प्रयच्छति द्वैगुणिकः। त्रैगुणिकः॥ वृद्धेर्वृधुषिभावो
वक्तव्यः। वार्धुषिकः। कुसीददशैकादशात् ष्ठन्ष्ठचौ। गर्ह्यार्थाभ्यामेताभ्यां प्रयच्छत्यर्थे। कुसीदं वृद्धिः तदर्थं द्रव्यं कु

सिधा०त सीदं॥ तत्प्रयच्छति कुसीदिकः। कुसीदिकी। एकादशार्थत्वादेकादशा। तेवंतेवस्तुते दशाचेतिविग्रहे। अकारः समासांतश्चेहे
वनिपात्यते दशैकादशिकः। दशैकादशिकी। दशैकादशान्प्रयच्छतीत्यक्तमर्णएवेह। पितृधितार्थः। उञ्छति। बद
राण्युञ्छति बादरिकः। रक्षति। समाजं रक्षति सामाजिकः। शब्ददर्दुरं करोति। शब्दं करोति शाब्दिकः। दार्दुरिकः। पक्षि
मत्स्यमृगान्हंति। स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणं। मत्स्यपर्यायेषु मीनस्यैव। पक्षिणो हंति पाक्षिकः। शा
कुनिकः। मायूरिकः। मात्स्यिकः। मैनिकः। शाकुलिकः। मार्गिकः। हारिणिकः। सारंगिकः। परिपंथं च तिष्ठति। अ
स्माद्द्वितीयान्तात्तिष्ठति हंति चेत्यर्थे ठक् स्यात्। पंथानं वर्जयित्वा व्याप्य चातिष्ठति पारिपंथिकश्चौरः। परिपंथं हंति
पारिपंथिकः। मथोत्तरपदं [illegible] थः। दंडमाथं धावति दांडमाथिकः। पाद
विकः। आनुपदिकः। आक्रंदाट्ठञ्च॥ अस्माट्ठञ् स्यात्। चाट्ठक्। धावतीत्यर्थे। आक्रंदं दुःखिनां रोदनं स्था
नं धावति आक्रंदिकः। पदोत्तरपदं गृह्णाति। पूर्वपदं गृह्णातीति पौर्वपदिकः। औत्तरपदिकः। प्रतिकंठार्थ ३२८

का:
ब्याडिः॥ व्यवहारेण चरति व्यावहारिकः॥ स्वपतौ साधु स्वापतेयं॥ आहौ प्रभूतादिभ्यः। प्रभूतमाह प्राभूतिकः। पार्याप्तिकः। पृ
स्मा च्छतौ सुस्नातादिभ्यः। सुस्नातं पृच्छति सौस्नातिकः। सौखशायनिकः। अनुशतिकादिः। गच्छतौ परदारादिभ्यः। पारदारिकः। गौरु
तल्पिकः। तेन दीव्यति खनति जयति जितं॥ आक्षैर्दीव्यति आक्षिकः। अभ्र्या खनति आभ्रिकः। अक्षैर्जयति आक्षिकः। अ
क्षैर्जितमाक्षिकं॥ संस्कृतं। दध्ना संस्कृतं दाधिकं। मारीचिकं। कुलत्थकोपधादण्। ठकोपवादः। कुलत्थैः संस्कृतं कौलत्थं॥
तैंतिडिकं। तरति। उडुपेन तरति औडुपिकः। गोपुच्छाट्ठञ्। गोपुच्छिकः। नौद्व्यचष्ठन्। नाविकः। घटिकः। बाहुभ्यां तर
ति बाहुकाः स्त्री॥ चरति। तृतीयान्ताद्गच्छति भक्षयतीत्यर्थयोष्ठक् स्यात्। हस्तिना चरति हास्तिकः। शाकटिकः। दध्ना
चरति दाधिकः। आकर्षात्ष्ठल्। आकर्षो निकषोपलः। आकर्षादिति पठांतरं। तेन चरति आकर्षिकः। षित्वात् ङी
ष्। आकर्षिकी। पर्पादिभ्यः ष्ठन्॥ पर्पेण चरति पर्पिकः। पर्पिकी। येन पीठेन पंगवश्चरंति स पर्पः। आश्विकः। रथ
थिकः। पर्प अश्व रथ जाल न्याय व्याल पाद पञ्च। श्वगणाट्ठञ्च॥ चात्ष्ठन्। श्वादेरिञि ऐच् न स्यात्॥ श्वभस्त्रस्य।

सि॰कौ॰त॰ रिकी। किसर। उशीर। नलद इत्यादि किसरादयः। स्रगंधिद्रव्यवाचिनः। शलालुनोऽन्यतरस्यां। ष्ठन्। पक्षे ठक्। श
लालुकः। शलालुकी। शालालुकः। शालालुकी। शलालु स्रगंधिद्रव्यविशेषः। शिल्पं मृदंगवादनं शिल्पमस्य मार्दंगि
कः। मड्डुकझर्झरादणन्यतरस्यां। मड्डुकवादनं शिल्पमस्य माड्डुकः। झार्झरः। माड्डुकिकः। झार्झरिकः। प्रहरणं
तदस्येव। असिः प्रहरणं अस्यासिकः। धानुष्कः। परश्वधाट्ठञ्च। पारश्वधिकः। शक्तियष्ट्योरीकक्। शाक्तीकः। या
ष्टीकः। अस्तिनास्तिदिष्टं मतिः। तदस्येत्येव। अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः। नास्तीति मतिर्यस्य स
नास्तिकः। दिष्टमिति मतिर्यस्य स दैष्टिकः। शीलं। अपूपभक्षणं शीलमस्य आपूपिकः। छत्रादिभ्यो णः। गुरोर्दोषाणां स
मावरणं छत्रं तच्छीलमस्य छात्रः। कार्मस्ताच्छील्ये। कामं इति ताच्छील्ये णे टिलोपो निपात्यते। कर्मशीलः कार्मः।
नस्ताच्छिल्ये इत्येव सिद्धे णकार्यता ताच्छीणेपि। नेन चौरी तापसीत्यादि सिद्धं॥ ताच्छील्ये किं। कार्मणः। कर्माध्य चिदंबर
यने वृत्तं। प्रथमां तास ष्ठ्यर्थे ठक्स्याद ध्ययने वृत्ताया क्रिया सा चेत्प्रथमा तस्यार्थः। ऐकान्यिकः। यस्याध्यय ३२८

ने प्रवृत्तस्य परीक्षाकाले विपरीतोच्चारणं रूपं द स्खलितमेकं जातं सः। द्व्यकच्पूर्वपदाट्ठच्। प्राग्विषये। द्वाश द
य न्यानिक र्माणि अध्ययने वृत्तानि द्वादशान्यिकः। द्वांशापठा जस्य जाता इत्यर्थः। हितं भक्षाः। अपूपभक्षणं हितं
मस्मै आपूपिकः। तदस्मै दीयते नियुक्तं। अग्रभोजनं नियतं दीयते ऽस्मै आग्रभोजनिकः। श्राणामांसौदनाट्टि
ठन्। श्राणा नियुक्तं दीयते ऽस्मै। श्राणिकः। श्राणिकी। मांसौदनं ग्रहणं संघातविगृहीतार्थं। मांसौदनिकः। मां
सिकः। औदनिकः। भक्तादणन्यतरस्यां। ठञ्स्यात्। भक्तमस्मै नियुक्तं दीयते भाक्तः। भाक्तिकः। तत्र नियुक्तः
आकारे नियुक्तः। आकारिकः। अगारान्ताट्ठन्॥ देवागारे नियुक्तो दैवागारिकः। अध्यायिन्यदेशकालात्। नि
षिद्धदेशकालवाचकाट्ठक्स्यात् अध्येतरि। श्मशाने ऽधीते श्माशानिकः। चतुर्दश्याम धीते चातुर्द
शिकः। कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति। तत्रेत्येव। वंशकठिने व्यवहरति वांशकठिनिकः। संस्थानि
कः। निकटे वसति। नैकटिको भिक्षुः। वंशा वेणव यस्मिन्देशे स वंशकठिनः। तस्मिन्देशे या क्रिया यथा

सि॰कौ॰त नुष्ठेयात्तांत । यात्नुष्ठतितीत्यर्थः । प्रास्तारिकः । सांस्थानिकः । निकटेवसति । नैकटिको भिक्षुः । आवसथात्ष्ठल् । आवस
थेवसति आवसथिकः । षित्वान्ङीष् । आवसथिकी । आकर्षात्सर्पादेर्भस्त्रादिभ्यः । कुसीदसूत्राच्च । आवसथा
त्किसरादेः षितः षडेते ठकाधिकारे । षडिति स्वच षड्भिन विहिताइत्यर्थः ॥ प्रत्ययास्तु सप्त ॥ ठकोवधिः समाप्तः ।
प्राग्घिताद्यत् । तस्मै हितमित्यतः प्राग्यदधिक्रियते । तद्वहति रथयुगप्रासंगं । रथंवहवति । रथ्यः । युग्यः । वत्सा
र्वं नांदमनकाले स्कंधे काष्ठं आसज्यते स प्रासंगः । तंवहति प्रासंग्यः । धुरोयड्ढकौ । हलिचेति दीर्घप्राप्ते । नभकुर्छुरां
मित्यकुर्छुरोश्चोपधायादीर्घोनस्यात् । धुर्यः । धौरेयः । खः सर्वधुरात् । सर्वधुरंवहति सर्वधुरीणः । एकधुरा
ल्लुक्च । एकधुरीणः । एकधुरः । शकटादण् । शकटंवहति शाकटोगौः । हलसीराट्ठक् । हलंवहति हालिकः । सैरिकः
संज्ञायांजन्या । जननीवधूस्तांवहति प्रापयति जन्या । विध्यत्यधनुषा । द्वितीयांतात् विध्यतीत्यर्थे यत्स्यान्नचेत्तत्र द
धनुः करणं । पादौविध्यंति पद्याः शर्कराः । धनगणंलब्धा । तृतीयांतमेतत् । धनंलब्धाधन्यः । गणंलब्धागण्यः । अन्ना चिदंबर
णः । अन्नंलब्धा आन्नः । वशंगतः । वश्यः । परेच्छानुचारी । पदमस्मिन्दृश्यं । पद्यः कर्दमः । नातिशुष्क इत्यर्थः । मू १२९

लकर्मन् । एष्योगृण्हात्यर्थेठक्स्यात् । प्रतिकंठंगृण्हाति प्रातिकंठिकः । आर्थिकः । लालामिकः । धर्मंचरति । धार्मिकः ।
अधर्माच्चेति वक्तव्यं । आधर्मिकः । प्रतिपथमेति ठंश्च । प्रतिपथमेति प्रातिपथिकः । समवायान्समवैति । साम
वायिकः । सामूहिकः । परिषदोण्यः । परिषदंसमवैति पारिषद्यः । सेनायावा । ण्यस्यात् । पक्षे ठक् । सैन्याः । सैनि
ॐ काः । संज्ञायांललाटकुक्कुट्यौ पश्यति । ललाटंपश्यति लालाटिकः । सेवकः । कुक्कुटीशब्देनतत्पातार्हः । स्वल्पोदेशो
लक्ष्यते कौक्कुटिको भिक्षुः । तस्यधर्म्यं । आपणस्यधर्म्यं आपणिकं । अण्महिष्यादिभ्यः । महिष्याः धर्म्यं माहि
षं । याजमानं । ऋतोञ् । यातुर्धर्म्यं यात्रं । नराच्चेति वक्तव्यं । नरस्यधर्म्यं नारं । विशसितुरिड्लोपश्चाञ्चवक्तव्यः
विशसितुर्धर्म्यं वैशस्त्रं । विभाजयितुर्णिलोपश्चाञ्चवक्तव्यः । विभाजयितुर्धर्म्यं वैभाजित्रं । अवक्रयः । षष्ठ्यं
ताट्ठक्स्यादवक्रयेर्थे । आपणस्यावक्रय आपणिकः । राजग्राह्यमवक्रयः । तदस्यपण्यं । अपूपाः पण्यमस्य
आपूपिकः । लवणाट्ठञ् । लावणिकः । किसरादिभ्यः ष्ठन् । किसरंपण्यमस्य किसरिकः । षित्वान्ङीष् । किस

सि० कौ० त थिकाः। गुडादिभ्यष्ठञ्। गुडे साधुर्गौडिकः इक्षुः। सक्तु कौ यवः। पथ्यतिथिवसतिस्वपतेर्ढञ्। पथि साधु पाथेयं। आतिथे
यं। वसनं वसतिः तत्र साधुः वासतेयी रात्रिः। स्वापतेयं धनं। सभाया यः। सभ्यः। समानतीर्थे वासी। साधुरिति निवृत्तं। वस
तीति वासी। समानतीर्थे गुरौ वसति सतीर्थ्यः। समानोदरे शयित ओ चोदात्तः। समाने उदरे शयितः स्थितः समा
नोदर्यो भ्राता। सोदराद्यः। सोदर्यः। अर्थप्राग्वत्॥ इति प्राग्घितीयाः समासाः। प्राक्क्रीताच्छः। तेन क्रीतमित्यतः प्रा
क्छोऽधिक्रियते॥ उगवादिभ्यो यत्। प्राक्क्रीतादित्येव॥ उवर्णान्ताद्गवादिभ्यश्च यत्स्यात् छस्यापवादः। नाभि नभं च।
नाभ्योक्षः। नभ्यमंजनं। रथनाभावेवेदं। शुनः संप्रसारणं वा च दीर्घः। शून्यं। शुन्यं। ऊधसोऽनङ्। ऊधन्यः। कंबला
च्च संज्ञायां। यत्स्यात्। कंबल्यमूर्णापलशतं। संज्ञायां किं। कंबलीया ऊर्णा। विभाषा हविरपूपादिभ्यः। आमिक्ष्यं
दधि। आमिक्षीयं। पुरोडाश्यास्तंडुलाः पुरोडाशीयाः। अपूप्यं। अपूपीयं। तस्मै हितं। वत्सेभ्यो हितो वत्सीयो गो
धुक्। शंकव्यं दारु। गव्यं। हविष्यं। शरीरावयवाद्यत्। दंत्यं। कंठ्यं। नाभ्यं। नासिकाया नस् यत्तस् क्षुद्रेषु। न चिदंबर
स्यं। ये च तद्धिते। यादौ तद्धिते परे शिरसः शीर्षन्नादेशः स्यात्। शीर्षण्यः। तद्धिते किं। शिर इच्छति शिरस्यति ३३०

वाकेशेषु। शीर्षण्याः शिरस्याः केशाः। अचि शीर्ष इति वाच्यं। अजादौ तद्धिते शिरसः शीर्षादेशः। स्थू[illegible] शिरसे इदं स्थौल ल
शीर्षं। खलयवमाषतिलवृषब्रह्मणश्च। खलाय हितं। खल्यं। यव्यं। माष्यं। तिल्यं। वृष्यं। ब्रह्मण्यं। चारथ्या। अजा त
विभ्यां थ्यन्। अजथ्या यूथी। अविथ्या। आत्मन्विश्वजनभोगोत्तरपदात्खः। आत्माध्वानौ खे। एतौ खे प्रकृत्या स्तः
आत्मने हितं। आत्मनीनं। विश्वजनीनं। कर्मधारयादेवेष्यते। षष्ठीतत्पुरुषाद्बहुव्रीहेश्च छ एव। विश्वजनीयं। पंच
जनादुपसंख्यानं। पंचजनीनं। सर्वजनाट्ठञ्खश्च। सार्वजनिकः। सर्वजनीनः। महाजनाट्ठञ्। माहाजनिकः।
श्री मातृभोगीणः। पितृभोगीणः। राजभोगीनः। आचार्यादणत्वं च। आचार्यभोगीनः। सर्वपुरुषाभ्यां णढञौ। सर्वाणो
वेति वक्तव्यं। सर्वस्मै हितं सार्वं। सार्वीयं। सर्वीयं। पुरुषाद्वधविकारसमूहतेनकृतेषु। भाष्यकारप्रयोगात्तेनेत्य र
स्य हृद्दुमध्ये निवेशः। पुरुषस्य वधः पौरुषेयः। तस्येदमित्यणि प्राप्ते पुरुषस्य विकारः पौरुषेयः। प्राणिरजता
दिभ्योऽञि प्राप्ते समूहे त्वणि प्राप्ते। एकाकिनोऽपि परितः पौरुषेयवृत्ता इवेति माघः। तेन कृते तु ग्रंथे। णि प्राप्ते
व अग्रंथे तु प्रासादो भवति पौरुषेय इति विवेकः। माणवचरकाभ्यां खञ्। माणवाय हितं माणवीनं। चारकीणं। तदर्थं विकृ

।सि०कौ०त तेः प्राक् ततो। विकृतिवाचकाच्चतुर्थ्यन्तात्तदर्थोयं प्रकृतौ वाच्यायां प्रत्ययः स्यात्। अंगारेभ्य एतानि अंगारीयाणि काष्ठानि।
प्राकारीया इष्टकाः। शंकव्यं दारु। छदिरुपधिबलेर्ढञ्। छादिषेयाणि। तृणानि। बालेयास्तंडुलाः। उपधिशब्दात्स्वार्थे
इष्यते। उपधीयत इत्युपधिः रथांगं। तदेव औपधेयं। ऋषभोपानहोर्ञ्यः। छस्यापवादः। आर्षभ्यो वत्सः। औपान
ह्यो मुंजः। चर्मण्ययमेव पूर्वविप्रतिषेधेन। औपानह्यं॥ चर्म। चर्मणोञ्। चर्मणो या विकृतिस्तद्वाचकादञ् स्यात्। व
र्ध्र्यै इदं वार्ध्रं चर्म। तदस्य तदस्मिन्स्यादिति। प्राकार आसां इष्टकानां स्यात्प्राकारीया इष्टकाः। प्रासादीयं दा
रु। प्राकारोस्मिन्स्यात्प्राकारीयो देशः। इतिशब्दो लौकिकीं विवक्षामनुसारयति। तेनेह न। प्रासादो देवदत्त
स्य स्यादिति॥ परिखाया ढञ्॥ पारिखेयी भूमिः॥ ॥छयतोः पूर्णोवधिः॥ ॥प्राग्वतेष्ठञ्। तेन तुल्यमिति
वक्ष्यति ततः प्राक् ठञधिक्रियते। आर्हाद्गोपुच्छसंख्यापरिमाणाट्ठक्। तदर्हतीत्येतदभिव्याप्य ठगधि शंकर
कारमध्ये ठञोपवादष्ठगधिक्रियते गोपुच्छादीन्वर्जयित्वा। असमासे निष्कादिभ्यः। अर्हादित्येव तदस्ति न १२१

लमस्याबार्हिः। आबर्हणमाबर्हः। उत्पाटनं तदस्यास्ति साबार्हि मूलमाबार्हियेषां ते मूल्याः मुद्गाः। संज्ञायां धेनुष्या॥ धेनुश
ब्दस्य युगागमो यत्प्रत्ययश्च। स्वार्थे निपात्यते संज्ञायां। धेनुष्या बंधके स्थिता। गृहपतिना संयुक्तो ञ्यः। गृहपतिर्यज
मानस्तेन संयुक्तो गार्हपत्योग्निः। नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमस
मितसंमितेषु। नावा तार्यं नाव्यं। वयसा तुल्यो वयस्यः। धर्मेण प्राप्यं धर्म्यं। विषेण वध्यो विष्यः। मूलेनानाम्यं मू
ल्यं। मूलेन समो मूल्यः। सीतया संमितो सीत्यं क्षेत्रं॥ तुल्या संमितं तुल्यं॥ धर्मपथ्यर्थन्यायादनपेते॥ धर्मादनपेतं
धर्म्यं। पथ्यं। अर्थ्यं॥ न्याय्यं। छंदसो निर्मिते। छंदसा निर्मितं छंदस्यं। इच्छया कृतमित्यर्थः। उरसोण् च। चाद्यत्।
उरसा निर्मित औरसः। पुत्रः। उरस्यः। हृदयस्य प्रियः। हृद्यो देशः। हृदयबधनेदृचः। वशीकरणमंत्रः। मतजनह
लात्करणजल्पकर्षेषु। मतं ज्ञानं तस्य करणं भावः साधनं वा मत्यं। जनस्य जल्पो जन्यः। हलस्य कर्षो हल्यः। तत्र सा
धुः। अग्र्यः। सामसु साधुः सामन्यः। ये चाभावकर्मणोरिति प्रकृतिभावः। कर्मण्यः। शरण्यः। प्रतिजनादिभ्यः
खञ्। प्रतिजने साधुः प्रातिजनीनः। सांयुगीनः। सार्वजनीनः। वैश्वजनीनः। भक्ताण्णः। भक्ते साधवो भाक्ताः
शालयः। परिषदो ण्यः। पारिषद्यः। परिषद इति योगविभागाण्णोपि। पारिषदः। कथादिभ्यष्ठक्। कथायां साधुः का
गो

क्रीतमितियावत्तमद्धात्सूच्यामनुवर्त्तते।निष्कादिभ्यः समासेठक्स्यादार्हीयेष्वर्थेषु।नैष्किकं।समासेत्तुठञ्।।परिमाणांत
स्यासंज्ञाशाणयोः।।उत्तरपदवृद्धिस्यात्तञ्जिदादौ।।परमनैष्किकिं।।असमासग्रहणंज्ञापकंभवतीतःप्राक्तदंतविधिरिति
तेनसूगव्यंयवापूप्यमित्यादि।इतउर्ध्वंतुसंख्यापूर्वपदानांतदंतग्रहणंप्राग्वतेरिष्यतेतच्चालुकि।पारायणिकः।द्वे
रा पारायणिकः।अलुकीतिकिं।द्वाभ्यांशूर्पाभ्यांक्रीतंद्विशूर्पं।द्विशूर्पेणक्रीतंशूर्पादञ्माभूत्।किंतुठञ्।द्विशौर्पिकं।अर्ध
त्परिमाणस्यपूर्वस्यतुवा।अर्धात्परिमाणवाचकात्स्योत्तरपदस्यादेरचोवृद्धिःपूर्वपदस्यतुवाञ्णितिकितिच।।अर्ध
द्रोणेनक्रीतमर्धद्रोणिकं।आर्धद्रोणिकं।नातःपरस्य।अर्द्धात्परस्यपरिमाणाकारस्यवृद्धिर्नपूर्वस्यतुवाञ्जिदादौ।
अर्धप्रस्थिकं।आर्धप्रस्थिकं।अतःकिं।आर्धकौडविकं।तपरःकिं।अर्धखार्यांभवाअर्धखारी।अर्धखाराभार्यइत्व
ध्विनिमित्तस्येतिपुंवद्भावनिषेधोनस्यात्।शताच्चठन्यतावशते।तेनक्रीतंशतिकं।शत्यं।अशतेकिं।शतंपरिमा
णमस्यशतकःसंघः।इहप्रत्ययार्थेवस्त्वतःप्रकृत्यर्थान्नभिद्यते।तेनठन्यतोन।किंतुकन्नेव।असमासइत्येव।।

श्री

द्विशतेनक्रीतंद्विशतकं। संख्याया अतिशदंतायाः कन्। संख्यायाः कन्स्यादार्हीयेऽर्थे। ननु त्वंशदंतायाः। पंचभिःक्रीतः त
पंचकः। बहुकः। त्यंतायास्तु साप्ततिकः। शदंतायाः चात्वारिंशत्कः। वतोरिड्वा। वतंतात्कनइड्वा। तावतिकः। तावत्कः। विंश
तित्रिंशद्भ्यांड्वुन्नसंज्ञायां। योगविभागः कर्तव्यः। आभ्यांकन्स्यात्। असंज्ञायांतुड्वुन्स्यात्कनोपवादः। विंशकः। त्रिंश
कः। संज्ञायांतुविंशतिकः। त्रिंशत्कः। कंसाट्टिठन्। टोऽङीबर्थः। इकारउच्चारणार्थः। कंसिकः। कंसिकी। अर्धाच्चेतिवक्त
व्यं। अर्धिकः। अर्धिकी। कार्षापणाट्टिठन्वक्तव्यः। कार्षापणिकः। कार्षापणिकी। प्रतिरादेशश्चवा। प्रतिकः। प्रतिकी।
शूर्पादञन्यतरस्यां॥ शौर्पं। शूर्पिकं। शतमानविंशतिकसहस्रवसनादण्॥ एभ्योण्स्यात्ठञ्ठकोनामपवादः। शा
तमानेनक्रीतं शातमानं। विंशतिकेनक्रीतंवैंशतिकं। साहस्रं। वासनं॥ अध्यर्धपूर्वद्विगोर्लुगसंज्ञायां। अध्यर्धपूर्वा पूर्वात्
द्विगोश्चपरस्यार्हीयप्रत्ययस्यलुक्स्यात्॥ अध्यर्धकंसं। द्विकंसं। संज्ञायांतु पांचकलापिकं। विभाषाकार्षापण
सहस्राभ्यां॥ लुग्वास्यात्। अध्यर्धकार्षापणं। अध्यर्धकार्षापणिकं। द्विकार्षापणं। द्विकार्षापणिकं। औपसंख्या १३२

सि०कौ०त तस्यनिमित्तंसंयोगोत्पातौ॥ संयोगः संबंधः। उत्पातः शुभाशुभसूचकः। शतिकः शत्योवा। धनपतिसंयोगः। शत्यं। शतिकं।
दक्षिणाक्षिस्पंदनं॥ शतस्यनिमित्तमित्यर्थः। वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानं॥ वातस्यशमनंकोपनंवा
वातिकं। पैत्तिकं। श्लैष्मिकं। सन्निपाताच्चेतिवक्तव्यं। सान्निपातिकं। गोद्व्यचोसंख्यापरिमाणाश्वादेर्यत्॥ गोर्निमित्तंसं
योगउत्पातोवागव्यः। द्व्यचः। धन्योयशस्यःस्वर्ग्यः। गोद्व्यचः किं। विजयस्यवैजयिकः॥ असंख्येत्यादि किं। पंचानांपं
चकं। सप्तकं। प्रास्थिकं। खारीकं। अश्वादि आश्विकं। आश्मिकं। ब्रह्मवर्चसाद्उपसंख्यानं॥ ब्रह्मवर्चस्यं। पुत्राच्छच। चा
द्यत्। पुत्रीयः॥ पुत्र्यः। सर्वभूमिपृथिवीभ्यामणञौ॥ सर्वभूमेर्निमित्तंसंयोगउत्पातोवासार्वभौमः। पार्थिवः। सर्वभूमि
शब्दोनुशतिकादिषुपठ्यते। तस्येश्वरः। तत्रविदितइतिच। सर्वभूमेरीश्वरः सर्वभूमौविदितोवासार्वभौमः। पा
र्थिवः। लोकसर्वलोकाट्ठञ्। तत्रविदितइत्यर्थेलौकिकः। अनुशतिकादित्वादुभयपदवृद्धिः। सार्वलौकिकः। तस्यवापः चिदंबर
उप्यतेऽस्मिन्निवापः। क्षेत्रं। प्रस्थस्यवापः प्रास्थिकं। द्रौणिकं। खारीकं। पात्रात्ष्ठन्। पात्रवापः क्षेत्रंपात्रिकं। पा १३३
पद

त्रिकीक्षेत्रभक्तिः॥ तदस्मिन्वृद्ध्यायलाभशुल्कोपदादीयते॥ वृद्धिर्दीयतइत्यादिक्रमेणसंबंधादेकवचनं। पंचास्मिन्वृ
द्धिः आयः लाभः शुल्कं उपदावादीयते पंचकः॥ शतिकः। शत्यः। साहस्रः। उत्तमर्णेनमूलातिरिक्तंग्राह्यंवृद्धिः। ग्रामादि
षुस्वामिग्राह्यः भागआयः। विक्रेतामूल्यादधिकंग्राह्यंलाभः। रक्षानिर्वेशोराजभागः शुल्कं। उत्कोचउपदा॥ चतु
र्थ्यामुपसंख्यानं। पंचास्मैवृद्ध्यादिर्दीयते पंचकोदेवदत्तः। समम्ब्राह्मणेदानमितिवदधिकरणविवक्षावा। पूर
णार्धाट्ठन्। यथाक्रमंठक्ष्ठनोरपवादः। द्वितीयोवृद्ध्यादिरस्मिन्दीयतेद्वितीयिकः। अर्धिकः। अर्धशब्दोरूपकं
स्यार्धेरूढः। भागाद्यच्च। चाट्ठन्। भागशब्दोपिरूपकार्धे। भागोवृद्ध्यादिरस्मिन्दीयते। भाग्यंशतं। भागिकं
भाग्याभागिकाविंशतिः। तद्धरतिवहत्यावहतिभाराद्वंशादिभ्यः॥ वंशादिभ्यःपरोयोभारशब्दस्तदंतंयत्प्राति
पदिकंतस्मात्ष्ठन्निकान्द्वितीयांतादित्यर्थः। वंशभारंहरतिवहतिवावांशभारिकः। ऐक्षुभारिकः। भाराद्वंशादि
भ्यइत्यस्यव्याख्यांतरं। भारभूतेभ्योवंशादिभ्यइति। भारभूतान्वंशान्हरतिवांशिकः। ऐक्षुकः। वस्नद्रव्याहि

सि॰कौ॰त स्याठन्कनौ। यथासंख्यंस्तः। वस्नंहरतिवहतिआवहतिवावास्निकः। द्रव्यकः। संभवत्यवहरतिपचति। प्रस्थंसंभवतिप्रास्थि
कः। कटाहः। प्रस्थंस्वस्मिन्समावेशयतीत्यर्थः। प्रास्थिकीब्राह्मणी। प्रस्थमुपसंहरतिपचतिवेत्यर्थः॥ तत्पचतीतिद्रोणाद
ण्च। द्रोणंपचतिद्रौणी॥ द्रौणिकी॥ आढकाचितपात्रात्खोन्यतरस्यां॥ पक्षेठञ्। आढकंसंभवतिअवहरतिपचतिवा॥ आढ
कीना। आढकिकी। आचितीना। आचितिकी। पात्रीणा॥ पात्रिकी। द्विगोष्ठंश्च। आढकाचितपात्राद्दित्येव। आढकाद्यंतात्द्विगोःसं
भवत्यादिष्वर्थेषुठन्खौवास्तः। पक्षेठञ्॥ तस्याध्यर्धेतिलुक्॥ षित्वान्ङीष्। द्व्याढकिकी॥ द्व्याढकीना। द्विगोरितिङीप्। द्व्याढकी। द्व्या
चिकीति॥ द्व्याचितीना। अपरिमाणेतिङीप्निषेधः। द्व्याचिता। द्विपात्रिकी॥ द्विपात्रीणा॥ द्विपात्री। कुलिजाल्लुक्खौच॥ कुलिजा
त्द्विगोःसंभवत्यादिष्वर्थेलुक्खौवास्तः। चात्ष्ठंश्च। लुगभावेठञःश्रवणं॥ द्विकुलिजी। द्विकुलिजीना। द्विकुलिजिकी। द्वैकु
लिजिकी। सोस्यांशवस्नभृतयः। अंशोभागः। वस्नोमूल्यं। भृतिर्वेतनं। पंचअंशोवस्नोभृतिर्वास्यपंचकः। तदस्यप चिदंबर
रिमाणं। प्रस्थंपरिमाणमस्यप्रास्थिकोराशिः। संख्यायाःसंज्ञासंघसूत्राध्ययनेषु। पूर्वसूत्रमनुवर्त्तते। तत्रसंज्ञा
यांस्वार्थेप्रत्ययोवाच्यः। यद्वाद्येकयोरितिवत्संख्यामात्रवृत्तेःपरिमाणिनिप्रत्ययः। पंचैवपंचकाः। शकुनयः। पंचप १३७

नि५

निकस्यठिठनोलुक्। पक्षेअध्यर्धशतिकं। अध्यर्धसहस्रं। अध्यर्धसाहस्रं। द्विसहस्रं। द्विसाहस्रं। द्वित्रिपूर्वान्निष्कात् ३३३
लुग्वास्यात्। द्विनिष्कं। द्विनैष्किकं। त्रिनिष्कं। त्रिनैष्किकं। बहुपूर्वाच्चेतिवक्तव्यं। बहुनिष्कं। बहुनैष्किकं। बिस्ताच्च। द्वित्रिबहु त्रि
पूर्वाद्बिस्तादार्हीयस्यलुग्वा। द्विबिस्तं। द्विबैस्तिकं। इत्यादि। विंशतिकात्खः। अध्यर्धपूर्वाद्द्विगोरित्येव। अध्यर्धविंश
तिकीनं। खार्याईकन्। अध्यर्धखारीकं। द्विखारीकं। केवलायाश्चेतिवक्तव्यं। खारीकं। काकिण्याश्चोपसंख्यानं।
अध्यर्धकाकिणीकं। पणपादमाषशताद्यत्। अध्यर्धपण्यं। द्विपण्यं। अध्यर्धपाद्यं। द्विपाद्यं। इहपादःपदितिनय
स्य स्येतिलोपस्यस्थानिवद्भावात्। पद्यत्यतदर्थइत्यपिन। प्राण्यंगार्थस्यैवतत्रग्रहणात्॥ शाणाद्वा। यत्स्यात्। पक्षेठञ्। त
स्यलुक्। अध्यर्धशाण्यं। अध्यर्धशाणं। द्वित्रिपूर्वादण्च। शाणाद्दित्येव। चाद्यत्। तेनत्रैरूप्यं। परिमाणांतस्यासंज्ञा
शाणयोरितिपर्युदासाद्वादिवृद्धिरेव। द्वैशाणं। द्विशाण्यं। द्विशाणं। इहठञादयःस्त्रयोदशप्रत्ययाःप्रकृतास्तेषां
समर्थविभक्तयोर्थाश्चाकांक्षितास्तइदानीमुच्यंते। तेनक्रीतं। ठञ्। गोपुच्छेनक्रीतंगोपुच्छिकं। साप्ततिकं। प्रास्थि
कं। ठन्। नैष्किकं। इद्गोण्याः। गोण्याइत्स्यात्तद्धितलुकि। लुकोपवादः। पंचभिर्गोणीभिःक्रीतःपटः। पंचगोणिः।

सि॰कौ॰न स्थालीबिलात्।स्थालीबिलंअर्हतिस्थालीबिलीयाःस्तंडुलाः।स्थालीबिल्याः।पाकयोग्याइत्यर्थः।यज्ञर्त्विग्भ्यांघखञौ।यथा ग्र
संख्यंस्तः।यज्ञंऋत्विजंवाअर्हतियज्ञियः।आर्त्विजीनोयजमानः॥यज्ञर्त्विग्भ्यांतत्कर्मार्हतीत्युपसंख्यानं।यज्ञियोदे
शः।आर्त्विजीनोऋत्विक्।आर्हीयाणांठगादीनांद्वादशानांपूर्णोवधिः।अतःपरंठञेव॥पारायणतुरायणचांद्रायणंव
र्तयति॥पारायणिकः छात्रः।तुरायणंयज्ञविशेषः।तंवर्तयतितौरायणिकः।यजमानः।चांद्रायणिकः।संशयमापन्नः
संशयविषयीविषयीभूतोर्थः।सांशयिकः।योजनंगतोभिगमनमर्हतीतिवाच्यं॥क्रोशशतादभिगमनमर्हतिक्रो
शशतिकोभिक्षुः।×यौजनंगच्छतियोजनिकः।क्रोशशतंयोजनशतयोरुपसंख्यानं।क्रोशशतंगच्छतिक्रोशशति
कः।योजनशतिकः।×५योजनशतिकआचार्यः॥पथःष्कन्।षोडीबर्थः।पथानंगच्छतिपथिकः।पथिकी।पंथोणनि
पथांनंनित्यंगच्छतिपांथः।पांथी।उत्तरपथेनाहृतंच।उत्तरपथेनाहृतमौत्तरपथिकं।उत्तरपथंगच्छतिऔत्त चिदंबर
रपथिकः।आहृतप्रकरणेवारिजंगलस्थलकांतारपूर्वादुपसंख्यानं।वारिपथिकमित्यादि।कालात्।व्युष्टा ३३५

दिभ्योणित्यतःप्रागकारोयं।तेननिर्वृत्तं।अह्नानिर्वृत्तमाह्निकं।तमधीष्टोभृतोभूतोभावी।अधीष्टःसत्कृत्यव्यापारि
तः।भृतोवेतनेनक्रीतः।भूतःस्वसत्तयाव्याप्तकालः।भावीतादृशएवानागतः।मासमधीष्टःमासिकोध्यापकः
मासंभृतोमासिकः।कर्मकरः।मासंभूतःमासिकोव्याधिः।मासंभावीमासिकउत्सवः।मासाद्वयसियत्खञ
ञौ मासंभूतःमास्यः।मासीनः।द्विगोर्यप्।मासाद्वयसीत्यनुवर्तते।द्वौमासौभृतोद्विमास्यः।षण्मासाण्ण्यच्च।
वयसीत्येव।यबप्यनुवर्तते।चाट्ठञ्।षाण्मास्यः।षण्मास्यः।षाण्मासिकः।अवयसिठंश्च।चाण्यत्।षण्मा
सिकोव्याधिः।षाण्मास्यः।समायाःखः।समामधीष्टोभृतोभूतोभावीवासमीनः।द्विगोर्वा।समायाःखइत्येव।
तेनपरिजय्येत्यतः प्राक्द्विगोर्वृत्ताष्टदिशु पंचस्वर्थेषुप्रत्ययाः।द्विसमीनः।द्वैसमीकः।रात्र्यहःसंवत्सराच्च।द्वि
द्विगोरित्येव।द्विरात्रीणः।द्वैरात्रिकः।द्व्यहीनः।द्वैयह्निकः।समांतविधेरनित्यत्वान्नटच्।द्विसंवत्सरीणः।संख्यायाः
संवत्सरसंख्यस्यच।संख्यायाउत्तरपदवृद्धिःस्यात्ञिदादौपरे।द्विसांवत्सरिकः।द्वेषष्ठीभृतोद्विषाष्टिकः।

सि०कौ०त० परिमाणांतास्येत्येवं सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थं। तेनेह न समिकइत्यत्र पदवृद्धिर्न। वर्षाल्लु
क्। वर्षशब्दांताद्द्विगोर्वा खः। पक्षे ठञ्। वा च लुक्। त्रीणि रूपाणि द्विवर्षीणो व्याधिः। द्विवर्षः। वर्षस्याभविष्यति। उत्तरपद
स्य वृद्धिः स्यात्। द्विवार्षिकः। भविष्यति तु द्वैवर्षिकः। त्रीणि वर्षाणि भावि त्रैवर्षिकं। अधीष्टभृतयोरभविष्यतीति प्रति
षेधो न। गम्यते हि तत्र भविष्यत्ता न तु तद्धितार्थः। द्वे वर्षे अधीष्टो भृतो भूतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः। परि
माणांतस्यासंज्ञाशाणयोः। द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः। द्वाभ्यां सुवर्णाभ्यां क्रीतो द्विसौवर्णिकः। द्वैनैष्कि
कं। असंज्ञेति किं। पञ्चकलायाः परिमाणमस्य पांचकलापिकं। तद्धितांतः संज्ञा। द्वैशाणं। कुलिजशब्दमपि केचि
त्पठंति। द्वैकुलिजिकः। चित्तवति नित्यं। वर्षशब्दांताद्द्विगोः प्रत्ययस्य नित्यं लुक् स्यात् चेतनेन प्रत्ययार्थो द्विव
र्षो दारकः। षष्टिकाः षष्टिरात्रेण पच्यंते। बहुवचनमतंत्रं। षष्टिको धान्यविशेषः। तृतीयांतात्कन् रात्रशब्द चिदंबर
स्य लोपो निपात्यते तेन परिजय्यलभ्यकार्यसुकरं। मासेन परिजय्यो जेतुं शक्यो मासिको व्याधिः। मासेन ल
भ्यं कार्यं सुकरं वा मासिकं। तदस्य ब्रह्मचर्यं। द्वितीयांतात्कालवाचिनोऽस्येत्यर्थे प्रत्ययः स्यात्। अत्यंतसंयोग ३३६

रिमाणमेषामिति वा। संघे पंचकः। सूत्रे अष्टकं। पाणिनीयं। संघशब्दस्य प्राणिसमूहे रूढत्वात्सूत्रं पृथगुपादानं। पंचकमध्यय
नं। स्तोमे डविधिः। पंचदशमंत्राः परिमाणमस्य पंचदशः। सप्तदशः। एकविंशः स्तोमः। सोमयागेषु छंदोगैः क्रियमाणा स्तु
त्यादिः स्तुतिः स्तोमः। पंक्तिविंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशीतिनवतिशतं। एते रूढशब्दाः निपात्यंते पंच
दशतौ वर्गे वा। पंच परिमाणमस्य पंचद्वर्गः। दशत्। पक्षे पंचकः। दशकः। त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण्। त्रिंश
द्ध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि। चात्वारिंशानि। तदर्हति। लब्धुं योग्यं भवतीत्यर्थे द्वितीयांताट्ठञादयः स्युः। द
श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः। छेदादिभ्यो नित्यं। नित्यमाभीक्ष्ण्ये छेदं नित्यमर्हति छैदिको वेतसः। छिन्नप्ररूढत्वात्
विरागं विरंगं च। विरागं नित्यमर्हति वैरंगिकः। शीर्षच्छेदाद्यच्च। शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः। शैर्षच्छेदिकः।
यठ्ठकोः संनियोगेन शिरसः शीर्षभावो निपात्यते। दंडादिभ्यो यः। एभ्यो यत्। दंडमर्हति दंड्यः। अर्घ्यः। वध्यः। पा
त्राद्घंश्च। चाद्यत्। तदर्हतीत्यर्थे। पात्रियः। पात्र्यः। कडंकरदक्षिणाच्छ च। चाद्यत्। कडंकरोति विग्रहे अत एव निपात
नात्सत्वं च। कडंकरं माषमुद्गादिकाष्ठमर्हतीति कडंकरीयो गौः। कडंकर्यः। दक्षिणामर्हतीति दाक्षिणीयः। दक्षिण्यः। णी

द्वितीया।मासब्रह्मचर्यमस्यंसमासिकोब्रह्मचारी।आर्धमासिकः।यद्वाप्रथमांतादस्येत्यर्थेप्रत्ययः।मासोस्येतिमासिकं
ब्रह्मचर्यं॥महानाम्न्यादिभ्यः षष्ठ्यंतेभ्यउपसंख्यानं।महानाम्न्योनामविदामघवन्नित्याद्यास्ऋचः तासांब्रह्मचर्यमस्य
महानाम्निकः।हरदत्तस्तुभस्याढ्ढेइतिपुंवद्भावान्माहानामिकइत्याह।चतुर्मासाण्ण्योयज्ञे।तत्रभवइत्यर्थे।चतुर्मा
सेषुभवंतिचातुर्मास्यानियज्ञाः।संज्ञायामण्वक्तव्यः।चतुर्षुमासेषुभवतिचातुर्मासी।अणंतत्वान्ङीप्।पौर्ण
मासी॥आषाढी।तस्येन्चदक्षिणायज्ञाख्येभ्यः।द्वादशाहस्यदक्षिणाद्वादशाहिकी।आख्याग्रहणादकालादपि।
आग्निष्टोमिकी॥वाजपेयिकी।तत्रचदीयतेकार्यंभववत्।प्रावृषिदीयतेकार्यं।प्रावृषेण्यं।शारदं।इतिकालाधिकारस्य
पूर्णोवधिः॥ ॥ ॥व्युष्टादिभ्योऽण्।व्युष्टेदीयतेकार्यंवावैयुष्टं।व्युष्ट।तीर्थ।संग्राम।प्रवासमित्यादि।तेनयथाकथाचहस्ता
भ्यांणयतो॥यथाकथा।चेत्यव्ययसंघातात्तृतीयांताद्धस्ताच्छब्दाच्चयथासंख्यंणयतोस्तः।अर्थाभ्यांयथासंख्यनेष्यते।तु
यथाकथाचदीयतेकार्यंवायथाकथाचं।अनादरेणदेयंकार्यंचेत्तदित्यर्थः।हस्तेनदीयतेकार्यंवाहस्त्यं।सम्पादिनि।
तेनेत्येव।कर्णवेष्टकाभ्यांसंपादिकार्णवेष्टकिकं।मुखं।कर्णालंकाराभ्यामवश्यंशोभतइत्यर्थः।कर्मवेषाद्यत्।क

आ

सि॰कौ॰त॰ र्मणासं॰पादिकर्मण्यं।शौर्यं।वेषेणसं॰पादितोवेष्योनटः।वेषःकृत्रिमाकारः।तस्मैप्रभवतिसंतापादिभ्यः।संतापायप्रभव
तिसांतापिकः।सांग्रामिकः।योगाद्यच्च।चाट्ठञ्।योगायप्रभवतियोग्यः॥यौगिकः।कर्मणउकञ्।कर्मणेप्रभवतिकार्मुकं।
समयस्तदस्यप्राप्तं।समयःप्राप्तोस्यसामयिकं।ऋतोरण्।ऋतुःप्राप्तोस्यआर्तवं।कालाद्यत्।कालःप्राप्तोस्यका
ल्यं।शीतं।प्रकृष्टेठञ्।कालादित्येव॥तदस्येतिच।प्रकृष्टोदीर्घःकालोस्येतिकालिकंवैरं।प्रयोजनं।तदस्येत्येव
इंद्रमहःप्रयोजनमस्यऐंद्रमहिकं।प्रयोजनंफलंकारणंच।प्रकृष्टोदीर्घःकालोस्येतिकालिकं।विशाखाषाढादण्मं
थदंडयोः।आभ्यामण्स्यात्प्रयोजनमित्यर्थे।क्रमान्मंथदंडयोरर्थयोः।विशाखाप्रयोजनमस्यवैशाखोमंथः।आ
षाढोदंडः।चूडादिभ्यउपसंख्यानं।चूडा।चौडं।श्रद्धा।श्राद्धं॥अनुप्रवचनादिभ्यश्छः।अनुप्रवचनंप्रयोजनमस्य
अनुप्रवचनीयं।समापनात्सपूर्वपदात्।व्याकरणसमापनंप्रयोजनमस्यव्याकरणसमापनीयः।ऐकागारिक
ट्चौरे।एकमसहायमगारंप्रयोजनमस्यमुमुषिषोःसऐकागारिकश्चौरः।आकालिकडाद्य
न्तवचने।समानकालावाद्यंतावस्याआकालिकः।समानकालस्याकालादेशः।आशुविनाशी १२७

स्यर्थः। पूर्वदिवसे मध्याह्नादौ वृत्तस्य दिनांतरे तत्रैव नक्षत्र इति वा॥ अकालाट्ठञ्च॥ आकालिका विद्युत्। ठञः पूर्णो व
धिः॥ तेन तुल्यं क्रिया चेद्वतिः॥ ब्राह्मणेन तुल्यं ब्राह्मणवधीते। क्रिया चेत्किं। गुणैस्तुल्ये मा भूत्। पुत्रेण तुल्यः स्थूलः॥ तत्र तस्ये
व। मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः॥ चैत्रस्येव चैत्रवत् मैत्रस्य गावः। तदर्हं। विधिमर्हति विधिवत् पूज्यते॥
क्रियाग्रहणं मंडूकप्लुत्यानुवर्तते। तेनेह न। राजानमर्हति छत्रं। तस्य भावस्त्वतलौ। प्रकृतिजन्यबोधे प्रकारो भावः॥ गो
र्भावः गोत्वं। गोता। त्वांतं क्लीबं। तलंतं स्त्रियां। आत्वत्वात्। ब्राह्मणस्त्वत्व इत्यतः प्राक् त्वतलावधिक्रियेते। अपवादैः सह स
मावेशार्थं गुणवचनादिभ्यः कर्मणि विधानार्थं चेदं। चकारो नञ्स्नञ्भ्यामपि समावेशार्थः। स्त्रिया भावः स्त्रैणं। स्त्री
त्वं। स्त्रीता। पौंस्नं। पुंस्त्वं। पुंस्ता। नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटयुधकतरसलसेभ्यः। इतः परं ये भा
व[illegible]प्रत्यया यास्ते नञ्तत्पुरुषान्न स्युः चतुरादीन्वर्जयित्वा। अपतित्वं। नञ्पूर्वात्किं॥ बार्हस्पत्यं। नास्य पटवः संति ई तत्पुरुषात्किं
तीत्यपटुस्तस्य भावः आपटवं। अचतुरेति किं। आचतुर्यं। आसंगत्यं। आलवण्यं। आवट्यं। आयुध्यं। आकत्यं। आ टु:
रस्यं। आलस्यं॥ पृथ्वादिभ्य इमनिज्वा। वावचनं अणादिसमावेशार्थं। रक्तेतो हलादेर्लघोः। इष्टेमेयस्सु। दे

सि०कौ०त टेर्लोपः स्यादिष्टेमेयस्सु। पृथोर्भावः प्रथिमा। पार्थवं। म्रदिमा। मार्दवं। वर्णदृढादिभ्यः ष्यञ्च। चादिमनिच्। शौ
क्ल्यं। शुक्लिमा॥ दार्ढ्यं। पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वं। द्रढिमा। षोडशीवर्थः। आनृतं। यथाकामी। गुणवच
नब्राह्मणादिभ्यः कर्मणि च। चाद्भावे। जडस्य भावः कर्म वा जाड्यं। मौढ्यं ब्राह्मण्यं अर्हतो नुम् च। अर्हतो भावः
कर्म वा आर्हन्त्यं आर्हन्ती ब्राह्मणादिराकृतिगणः। यथातथायथापुरयोः पर्यायेण नञ्पूर्वयोः पूर्वोत्तरपदयो
पर्यायेणादेरचो वृद्धिर्भिदादौ अयथातथाभावः आयथातथ्यं। अयाथातथ्यं आयथापुर्यं। अयाथापु
र्यं आ पदपरिसमाप्तेर्भाककमाधिकारः। चतुर्वर्णादीनां स्वार्थ उपसंख्यानं चत्वारो वर्णाः चातुर्वर्ण्यं चातुरा
श्रम्यं त्रैस्वर्यं षाड्गुण्यं सैन्यं सान्निध्यं सामीप्यं औपम्यं त्रैलोक्यमित्यादि सर्ववेदाः सर्ववेदाः तानधीते
सर्ववेदः। सर्वादेरिति लुक् सर्ववे ऐ सार्ववैद्यः। चतुर्वेदस्योभयपदवृद्धिश्च। चतुरो वेदानधीते चतुर्वेदः। स ए
व चातुर्वैद्यः चतुर्विद्यस्येति पाठान्तरं। चतुर्विद्य एव चातुर्वैद्यः स्तेनाद्यन्नलोपश्च नेति संघातग्रहणं
स्तेनचौर्ये पचाद्यच् स्तेनभावः कर्म वा स्तेयं स्तेनादिति योगं विभज्य तेन स्तैन्यमिति ष्यञंतमपि के ३३८

 णी प्राप्तः अवगतवान्वा गार्गिकया श्लाघते गार्ग्यत्वेन विकत्थन इत्यर्थः गार्गिकयात्या कुरुते गार्गिकामन्वेत ॥ एवं
काठिकया श्लाघते इत्यादि बोध्यं होत्राभ्यश्छः होत्राशब्दः ऋत्विग्वाची स्त्रीलिंगः बहुवचनाद्विशेषग्रहणं । अ
छावाकस्य भावः कर्म वा आच्छावाकीयं मैत्रावरुणीयं ब्रह्मणस्त्वः होत्रवाचिनो ब्रह्मशब्दात्त्वः स्यात् छस्या
पवादः ब्रह्मत्वं नेति वाच्ये त्व वचनं तलो बाधनार्थं ब्राह्मणपर्यायाद्ब्रह्मन्शब्दात्तु तत्तलौ ब्रह्मत्वं ब्रह्मता नञ्स्न
ञोरधिकारः समाप्तः धान्यानां भवने क्षेत्रे खञ् भवत्यस्मिन्निति भवनं मुद्गानां भवनं क्षेत्रं मौद्गीनं
य व्रीहिशाल्योर्ढक् व्रैहेयं शालेयं यवयवकषष्टिकाद्यत् यवानां क्षेत्रं भवनं यव्यं यवक्यं षष्टिक्यं विभाषा तिल
माषोमाभंगाणुभ्यः यद्वा स्यात् पक्षे खञ् तैल्यं तैलीनं माष्यं माषीणं उम्यं औमीनं भंग्यं भांगीनं अणव्यं
आणवीनं सर्वचर्मणः कृतः खखञौ असामर्थ्ये निपातनात्समासः सर्वचर्मणा कृतः सर्वचर्मीणः सार्व
चर्मीणः यथामुखसंमुखस्य दर्शनः खः मुखस्य सदृशं यथामुखं प्रतिबिंबं निपातनात्सादृश्येव्ययीभा
वः समं सर्वं मुखं संमुखं समशब्दस्यान्तलोपो निपात्यते यथामुखं दर्शनः यथामुखीनः सर्वस्य मुख १३९

स्य दर्शः संमुखीनः तत्सर्वादेः पथ्यंगकर्मपत्रपात्रं व्याप्नोति सर्वादेः पथ्यादंताद्द्वितीयांतात्खः स्यात् सर्वपथा
न्व्याप्नोति सर्वपथीनः सर्वांगीणः सर्वकर्मीणः सर्वपत्रीणः सर्वपात्रीणः आप्रपदं प्राप्नोति पादस्याग्रं प्रपदं
तन्मर्यादीकृत्य आप्रपदं आप्रपदीनः पटः अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु अनुरायामे साद
श्येवा अनुपदं बद्धा अनुपदीना उपानत् सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः आयानयः स्थलविशेषः
परं तन्नेयः अयानयीनः शारः परोवरपरंपरपुत्रपौत्रमनुभवति पारांश्च अवारांश्च अनुभवति परोवरीणः अव
रस्योत्वं निपात्यते परांश्च परतरांश्चानुभवति परंपरीणः प्रकृतेः परंपराभावो निपात्यते पुत्रपौत्रमनुभव
ति पुत्रपौत्रीणः परंपराशब्दस्तु अव्युत्पन्नं शब्दांतरं स्त्रीलिंगं तस्मादेव स्वार्थे ष्यञि पारंपर्यं कथं पारावर्यं
विदिति असाधुरेवायं खप्रत्ययसंनियोगेनैव परोवरेति निपातनात् अवारपारात्यंतानुकामं गामी अवार
पारंगामी अवारपारीणः अवारीणः पारीणः पारावारीणः अत्यंतगामी अत्यंतीनः भृशंगंतेत्यर्थः अनुका
मंगामी अनुकामीनः यथेष्टं गंता समां समां विजायते । यलोपो वशिष्टविभक्तेश्चालुक्पूर्वपदे निपात्यते समां

सि॰कौ॰ समीना गौः समांसमीना सायेव प्रतिवर्षं प्रसूयते खप्रत्ययानुत्पत्तौ यलोपो वाचवक्तव्यः समांसमां विजायते स
मायां समायां वा अद्यश्वीनावष्टब्धे अद्यश्वो वा विजायते अद्यश्वीना वडवा आसन्नप्रसवेत्यर्थः केचित्तु विजायत
इति नानुवर्तयंति अद्यश्वीनं मरणं आसन्नमरणमित्यर्थः आगवीनः आङ्पूर्वाद्गोः कर्मकरे खप्रत्ययो नि
पात्यते गोः प्रत्यर्पणपर्यंतं कर्म करोति स आगवीनः अनुग्वलंगामी अनुगु गोः पश्चात्सयालं गच्छति अनुगवी
नो गोपालः। अध्वनो यत्खौ अध्वानमलं गच्छति अध्वन्यः अध्वनीनः येचाभावकर्मणोः आत्माध्वानौ खे इ
ति प्रकृतिभावः अभ्यमित्राच्छ च चाद्यत्खौ अभ्यमित्रीयः अभ्यमित्र्यः अभ्यमित्रीणः अमित्राभिमुखं सु
ष्ठु गच्छतीत्यर्थः गोष्ठात्खञ् भूतपूर्वे गोष्ठो भूतपूर्वो गौष्ठीनो देशः अश्वस्यैकाहगमः एकाहेन गम्यते
इत्येकाहगमः आश्वीनोध्वा शालीनकौपीने अधृष्टाकार्ययोः शालाप्रवेशमर्हतीति शालीनः अधृष्टः कूपपतनम चिदंबर
६ र्हतीति कौपीनं पापं तत्साधनत्वात्तद्गोप्यत्वाद्वा पुरुषलिंगवचनमपि संबधात्तदाच्छादनमपि व्रातेनजी २५०

विंदिच्छंति सख्युर्यः। सख्युर्भावः कर्म वा सख्यं दूतवणिग्भ्यां च दूतस्य भावः कर्म वा दूत्यं वाणिज्यं इति काशिका॥
माधवस्तु वणिज्या शब्दः स्वभावात्स्त्रीलिंगः भाव एव चात्र प्रत्ययो न तु कर्मणीत्याह॥ भाष्ये तु दूतवणिग्भ्यां च ना
स्त्येव ब्राह्मणादित्वाद्वाणिज्यमपि॥ कपिज्ञात्योर्ढक् कापेयं ज्ञातेयं पत्यंतपुरोहितादिभ्यो यक्॥ सैनापत्यं॥ पौरोहि
त्यं राजासे॥ राजशब्दो समासे यक् लभत इत्यर्थः॥ राज्ञो भावः कर्म वा राज्यं समासे तु ब्राह्मणादित्वात्ष्यञ् आ
धिराज्यं प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योञ् प्राणभृत्तजाति आश्वं॥ औष्ट्रं वयोवचन॥ कौमारं कैशो
८ रं औद्गात्रं॥ औन्नेत्रं सौष्टवं दौष्टवं हायनांतयुवादिभ्योण्॥ द्वैहायनं त्रैहायनं पौरवतं स्थाविरं॥ श्रोत्रियस्य
यलोपश्च॥ श्रौत्रं कुशलचपलनिपुणपिशुनकुतूहलक्षेत्रज्ञाः युवादिषु ब्राह्मणादिषु पठ्यंते॥ कौशलं कौशल्यमित्या च
दि इगंताच्च लघुपूर्वात्॥ शुचेर्भावः कर्म वा शौचं॥ मौनं॥ कथं काव्यं कविशब्दस्य ब्राह्मणादित्वात्॥ योपधाद्गुरू
पोत्तमाद्वुञ् रामणीयकं॥ आभिधानीयकं॥ सहायाद्वा साहाय्यं साहायकं॥ द्वंद्वमनोज्ञादिभ्यश्च॥ शैष्योपाध्यापि
यिका॥ मानोज्ञकं॥ गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु अत्याकारो धिक्षेपः॥ तदवेतः। ते गोत्रचरणयोर्भावः कर्म

गोयुगं॥ षट्त्वे षड्गवच्॥ अश्वषड्गवं स्नेहे तैलच्॥ तिलतैलं॥ सर्षपतैलं॥ भवनक्षेत्रे शाकटशाकिनौ॥ इक्षुशाकटं॥ इक्षु
शाकिनं॥ अवात्कुटारच्च॥ चात्कटच्॥ अर्वाचीनः। अवकुटारः। अवकटः। नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्राटचः।
अवात्येव नतं नमनं नासिकाया नतं अवटीटं। अवनाटं॥ अवभ्रटं। तद्योगान्नासिका अवटीटा॥ पुरुषो वावटीटः
नेर्बिडज्बिरीसचौ॥ निबिडं। निबिरीसं॥ इनच्पिटच्चिकचि च। नेरित्येव। नासिकानतेऽभिधेये इनच्पिटचौ प्रकृते
श्चिक चि इत्यादेशौ स्तः॥ कप्रत्ययचिकादेशौ च वक्तव्यौ॥ चिकिनं। चिपिटं। चिक्कं। क्लिन्नस्य चिल्पिल्लश्चास्य च
क्षुषी। क्लिन्ने च क्षुषी अस्य चिल्लः। पिल्लः। चुल्लच। चुल्लः। उपाधिभ्यां त्यकन्नासन्नारूढयोः। संज्ञायामित्यनुवर्तते॥
पर्वतस्यासन्नस्थलं उपत्यका॥ आरूढं स्थलमधित्यका। कर्मणि घटोऽठच्। घटते इति घटः। पचाद्यच्। कर्मणि
घटते कर्मघटते कर्मठः। पुरुषः। तदस्य संजातं तारकादिभ्य इतच्॥ तारकाः संजाता अस्य तारकितं नभः। आकृति
गणोयं। प्रमाणे द्वयसज्दघ्नञ्मात्रचः। तदस्येत्यनुवर्तते। उरू प्रमाणमस्य उरुद्वयसं उरुदघ्नं। उरुमात्रं प्र

माणेलः। शमः। दिष्टिः। वितस्तिः। द्विगोर्नित्यं। द्वौ शमौ प्रमाणमस्य द्विशमं। प्रमाणपरिमाणाभ्यां संख्यायाश्च संशये मा
त्रज्वक्तव्यः। शममात्रं। प्रस्थमात्रं। पंचमात्रं। वत्वंतात्स्वार्थे द्वयसज्मात्रचौ॥ तावदेव तावद्द्वयसं। तावन्मात्रं। पुरुष द्
हस्तिभ्यामण् च। पुरुषः प्रमाणमस्य पौरुषं। पुरुषद्वयसं। यत्तदेतेभ्यः परिमाणे वतुप्। यत्परिमाणमस्य यावा
वान्। तावान्। एतावान्। किमिदंभ्यां वो घः। आभ्यां वतुप् स्यात् वस्य घः। कियान्। इयान्। इदंकिमोरीश्की। किमः
संख्यापरिमाणे डति च। चाद्वतुप् तस्य घेन्वे स्यात्। का संख्या येषां ते कति। कियंतः। संख्याया अवयवे तयप्।
पंच पंचावयवा अस्य पंचतयं। द्वित्रिभ्यां तयस्यायज्वा। द्वयं। द्वितयं। त्रयं। त्रितयं। उभादुदात्तो नित्यं। उभशब्दात्तयपोयज् स्या
त्स चाद्युदात्तः। उभयं। तदस्मिन्नधिकमिति दशान्ताड्डः। एकादश अधिका अस्मिन्नेकादशं। शतसहस्रयोरेवेष्यते नेह
एकादशाधिका अस्यां विंशत्यां प्रकृतिप्रत्ययार्थयोः समानजातीयत्वमेवेष्यते। नेह। एकादश माषा अधिका अ
स्मिन् कार्षापणशते। शदंतविंशतेश्च। डः स्यादुक्तेर्थे त्रिंशदधिका अस्मिन्नेकादशं। त्रिंशं शतं। विंशं शतं। संख्याया गु

णस्यनिमानेमयट् ॥ भागस्यमूल्येवर्त्तमानात्प्रथमांतात्संख्यावाचिनः षष्ठ्यर्थेमयट्स्यात् । यवानांद्वौभागौनिमान
मस्योदश्विद्भागस्यद्विमयमुदश्विद्यवानां । गुणस्येतिकिं । द्वौव्रीहियवौनिमानमस्योदश्वितः निमानेकिं । द्विगुणोक्षी
रस्यएकस्तैलस्यद्विगुणंतैलंपच्यतेक्षीरेण । तस्यपूरणेडट् । एकादशानांपूरणएकादशः । नांतादसंख्यादेर्म
मट् । डटोमडागमः । पंचानांपूरणः पंचमः । नांतात्किं । विंशः । असंख्यादेः किं । एकादशः । षट्कतिकतिपय
चतुरांथुक् । एषांथुगागमस्यात् डटि । षण्णांपूरणः षष्ठः । कतिथः । कतिपयशब्दस्यासंख्यात्वेऽपिअतएवज्ञा
पकाड्डट् । कतिपयथः । चतुर्थः । चतुरश्छयतावाद्यक्षरलोपश्च । तुरीयः । तुर्यः । बहुपूगगणसंघस्यतिथुक् ॥
डटीत्येव । पूगसंघयोरसंख्यात्वेऽपिअतएवडट् । बहुतिथः । इत्यादि । वतोरिथुक् ॥ डटीत्येव । यावतिथः । द्वेस्ती तिद्धतः
यः । डटोऽपवादः । द्वयोःपूर्णोद्वितीयः । त्रेःसंप्रसारणंच । तृतीयः । विंशत्यादिभ्यस्तमडन्यतरस्यां । एभ्योड
टस्तमडागमोवास्यात् । विंशतितमः । विंशः । एकविंशतितमः । एकविंशः । नित्यंशतादिमासार्धमाससंव १४२

वति आतेनशरीरायासेनजीवतिनतुबुद्धिवैभवेन सव्रात्तीनः ॥ साप्तपदीनंसख्यं ॥ सप्तभिः पदैरवाप्यतेसाप्तपदीनं
हैय्यंगवीनंसंज्ञायां ॥ ह्योगोदोहस्यहियंगुरादेशः ॥ विकारार्थेखञ्निपात्यते । ह्यस्तनइतिदोहः क्षीरं ॥ ह्योगोदोहस्य
विकारः हैयंगवीनं ॥ नवनीतं ॥ तस्यपाकमूलेपील्वादिकर्णादिभ्यः कुणब्जाहचौ । पीलूनांपाकः पीलुकुणः । कर्ण
मूलंकर्णजाहं । पक्षात्तिः ॥ मूलग्रहणमात्रमनुवर्तते ॥ पक्षस्यमूलंपक्षतिः ॥ तेनवित्तश्चुंचुप्चणपौ ॥ यकारप्रत्ययौय
रादेर्लुप्तनिर्दिष्टः ॥ तेनेत्यस्यनेत्संज्ञा । विद्ययावित्तः विद्याचंचुः ॥ विद्याचणः । विनञ्भ्यांनानाञौनसह ॥ असहार्थे
पृथग्भावेवर्तमानाभ्यांस्वार्थेप्रत्ययौ ॥ विना । नाना । वेःशालच्छंकटचौ । क्रियाविशिष्टसाधनवाचकात्स्वार्थे ॥ वि
स्तृतंविशालंविशंकटं ॥ संप्रोदश्चकटच् संकटं ॥ प्रकटं ॥ उत्कटं । चाद्विकटं । अलाबुतिलोमाभंगाभ्योरजस्युपसं
ख्यानं ॥ अलाबूनांरजः । अलाबूकटं ॥ तिलकटं । उमाकटं ॥ भंगाकटं । गोष्ठजादयः स्थानादिषुपशुनामभ्यः । गवां
स्थानंगोगोष्ठं ॥ संघातेकटच् ॥ अवीनांसंघातोऽविकटः ॥ विस्तारेपटच् ॥ अविपटः । द्वित्वेगोयुगच् । द्वावुष्ट्रौउष्ट्र

त्सराच्च। शतस्य पूरणः शततमः। एकशततमः। मासादेरत एवडट्। मासतमः। संवत्सरतमः। इत्यादि। षष्ट्यादेश्चासं
ख्यादेः। षष्टितमः। संख्यादेस्त्वाति विंशत्यादिभ्य इति विकल्प एव। एकषष्टः। एकषष्टितमः। मतौ छः सूक्तसाम्नोः। मत्व
र्थे छ स्यात्। अच्छावाक शब्दोऽस्मिन्नस्ति अच्छावाकीयं। सूक्तं। वारवंतीयं साम। अध्यायानुवाकयोर्लुक्। मत्वर्थस्य छस्य
अत एव ज्ञापकात्तत्र छः। विधानसामर्थ्याच्च विकल्पेन लुक्। गर्दभांडः। गर्दभांडीयः। विमुक्तादिभ्योऽण्। मत्वर्थेऽण् स्या
द् ध्यायानुकयोः। विमुक्त शब्दोऽस्मिन्नस्ति वैमुक्तः। दैवासुरः। गोषदादिभ्यो वुन्। मत्वर्थे ध्यायानुवाकयोः। गोष
दकः इषेत्वकः। तत्र कुशलः पथः। वुन् स्यात्। पथिकुशलः। पथकः। आकर्षादिभ्यः कन्। आकर्षकः। आकषादि
ष्य इति रेफरहितो मुख्यः पाठः। आकषो निकषोपलः। धनहिरण्यात्कामे। कामइच्छा। धनेकामः। धनकः। देवदत्त
स्य। हिरण्यकः। स्वांगेभ्यः प्रसिते। केशेषु प्रसितः। केशकः। तद्रचनायां तत्पर इत्यर्थः। उदराट्ठगाद्यूने। अविजिगी
षो ठक् स्यात् कनोपवादः। बुभुक्षयात्यंतपीडितः। उदरे प्रसित औदरिकः। आद्यूने किं। उदरकः। उदरपरिमा

सि०कौ०त॰ जनादौ प्रसक्तः॥ इत्यर्थः। सस्येन परिजातः। कन्स्वर्यतेन तुठक्। सस्यशब्दो गुणवाची न तु धान्यवाची। शस्येनेति
पाठांतरं। शस्येन गुणेन परिजातः संबद्धः शस्यकः। साधुः। अंशहारी। हारीत्यावश्यके णिनिः। अत एव तद्योगे
षष्ठी न। अंशको दायादः। तंत्रादचिरापहृते। तंत्रकः पटः। प्रत्यग्र इत्यर्थः। ब्राह्मणकोष्णिके संज्ञायां। आयुध
जीविनो ब्राह्मणा यस्मिन्देशे स ब्राह्मणकः। अल्पमन्नं यस्यां सा उष्णिका यवागूः। अन्नशब्दस्योष्णादेशो [illegible]
निपात्यते। शीतोष्णाभ्यां कारिणि। शीतं करोतीति शीतकः। अलसः। उष्णकः। आशुप्रकारी। अधिकं। अध्यारूढ
शब्दात्कन्। उत्तरपदलोपश्च। अनुकाभिकाभीकः कमिता। अन्वभिभ्यां कन्। अभेः पाक्षिको दीर्घश्च। अनुका
मयते अनुकः। अभिकामयते अभिकः। अभीकः। पार्श्वेनान्विच्छति। अनृजुरुपायः पार्श्वं। तेनान्विच्छति पा
र्श्वकः। आयःशूलदंडाजिनाभ्यां ठक्ठञौ। तीक्ष्ण उपायो यः शूलं। तेनान्विच्छति आयःशूलिकः। साहसिकः।
दंडाजिनं दंभः। तेनान्विच्छति दांडाजिनिकः। तावतिथं ग्रहणमिति लुग्वा। कन्स्यात्तत्पूरणप्रत्ययस्य च वा लुक्। १४६

सि॰कौ॰त नन्याय्यः। अनुपद्यन्वेष्टा। अनुपदमन्वेष्टा अनुपदीनगवां॥ साक्षाद्द्रष्टरि संज्ञायां साक्षाद्द्रष्टा साक्षी। क्षेत्रियच्परक्षेत्रे चि
कित्स्यः। क्षेत्रियो व्याधिः। शरीरांतरे चिकित्स्यः। अप्रतीतकार्यमित्यर्थः। इंद्रियमिंद्रलिंगमिंद्रदृष्टमिंद्रसृष्टमिंद्रजु
ष्टमिंद्रदत्तमिति वा। इंद्र आत्मा तस्य इति वा लिंगं करणेन कर्तुरनुमानात्। इतिकरणः प्रकारार्थः। इंद्रेण दुर्जयमिंद्रि
स्त्य यं। तदस्यास्त्यस्मिन्निति मतुप्। गावो ऽस्मिन् अस्य वा संति। गोमान्। भूमनिंदाप्रशंसासु नित्ययोगेतिशायने संबंधे
स्ति विवक्षायां भवंति मतुबादयः। । रसादिभ्यश्च। मतुप्। रसवान्। अन्यमत्वर्थीयनिवृत्त्यर्थं वचनं रसरूप
वर्ण गंध स्पर्श। शब्द। स्नेह। गुणात्। एकाचः। स्ववान्। गुणग्रहणं रसादीनां विशेषणं॥ तसौ मत्वर्थे। तांतसांतौ
भसंज्ञौ स्तो मत्वर्थे प्रत्यये। वसोः संप्रसारणं च। विदुष्मान्। गुणवचनेभ्यो मतुपो लुगिष्टः। शुक्लो गुणो ऽस्यास्तीति
शुक्लः पटः। कृष्णः। मादुपधायाश्च मतोर्वो ऽयवादिभ्यः। मवर्णावर्णांतान्मवर्णावर्णोपधाच्च यवादिवर्ज्यात् विदंबर
परस्य मतुपो मस्य वः स्यात्। किंवान्। ज्ञानवान्। विद्यावान्। लक्ष्मीवान्। यशस्वान्। यवादेस्तु यवमान्। भूमि ३५८

मान्॥ झयः। झयंतान्मतोर्मस्य वः स्यात्। अपदांतान्नजस्त्वं। विद्युत्वान्। संज्ञायां। मतोर्मस्य वः स्यात्। अहीवती।
मुनीवती। शरीरादित्वाद्दीर्घः। आसंदीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती। एते षट् संज्ञायां निपा
त्यंते। आसन्नशब्दस्यासंदीभावः। आसंदीवान् ग्रामः। अन्यत्र आसन्नवान्। अस्थिशब्दस्याष्ठीभावः। अष्ठी
वान्। अस्थिमानन्यत्र। चक्रशब्दस्य चक्रीभावः। चक्रीवान्नाम राजा। चक्रवानन्यत्र। कक्ष्यायाः संप्रसारणं। क
क्षीवान्नाम ऋषिः। कक्ष्यावानन्यत्र। लवणशब्दस्य रुमण्भावः। रुमण्वान्नाम पर्वतः। लवणवानन्यत्र। चर्मणो
नलोपाभावो णत्वं च। चर्मण्वती नाम नदी। चर्मवत्यन्यत्र। उदन्वानुदधौ च। उदकस्य उदन्भावो मतौ। उदधौ
संज्ञायां च। उदन्वान्समुद्रः। ऋषिश्च। राजन्वान्सौराज्ये। राजन्वती भूमिः। राजवानन्यत्र। प्राणिस्थादातो ल
जन्यतरस्यां॥ चूडालः। प्राणिस्थात्किं। शिखावान्दीपः। आतः किं। हस्तवान्। प्राण्यंगादेव। नेह। मेधावान्।
नत्ययस्वरेणैव सिद्धे अंतोदात्तत्वे चूडालो ऽसीत्यादौ स्वरितो वा पदादौ विति स्वरितबाधनार्थश्च कारः। सिध्मादिभ्यः। र्थ

सि॰कौ॰ तश्च। लज्वा स्यात्। सिध्मलः। सिध्मवान्। अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थं। न तु प्रत्ययविकल्पार्थं। तेन अकारान्तेभ्यः
इनिठनौ न। वातदंतबलललाटानां मूङ्च। वातूलः। वत्सांसाभ्यां कामबले। आभ्यां लज्वा स्यात्। यथासंख्यं। काम
वति बलवति चार्थे। वत्सलः। अंसलः। फेनादिलच्च। चाल्लुच्। अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थमनुवर्तते। फेनिलः
फेनलः। फेनवान्॥ लोमादिपामादिपिच्छादिभ्यः शनेलचः। लोमादिभ्यः शः। लोमशः। लोमवान्। रोमशः। रोमवा
न्। पामादिभ्यो नः। पामनः। अंगात्कल्याणे। अंगना। लक्ष्म्या अच्च। लक्ष्मणः। विषुगित्यन्तरपदलोपश्चाकृतसंधेः
विषुणः। पिच्छादिभ्य इलच्। पिच्छिलः। पिच्छवान्। उरसिलः। उरस्वान्। प्रज्ञाश्रद्धार्चाभ्यो णः। प्राज्ञो व्याकरणं॥
प्राज्ञा। श्राद्धः। आर्च्चः। वृत्तेश्च। वार्त्तः। तपःसहस्राभ्यां विनीनी। विनीन्योरिकारो नकारपरित्राणार्थः। तपस्वी
सहस्री। असंतत्वाददंतत्वाच्च सिद्धे पुनर्वचनमणा बाधा माभूदिति। सहस्रात्तु ठनो बाधनार्थं। अण्च। यो
गविभाग उत्तरार्थः। तापसः। साहस्रः। ज्योत्स्नादिभ्य उपसंख्यानं। ज्योत्स्नः। तामिस्रः। वसिकताशर्कराभ्यां च १४५

द्वितीयकं। द्विकं वा ग्रहणं देवदत्तस्य। द्वितीयेन रूपेण ग्रहणमित्यर्थः। तावतिथेन गृह्णातीति कन्वक्तव्यः। नित्यं च लुक्। षष्ठेन
स रूपेण गृह्णातीति षट्को देवदत्तः। पंचकः। एषां ग्रामणीः। देवदत्तो मुख्यो येषां ते देवदत्तकाः। त्वत्काः। मत्काः। शृंखलमस्य
बंधनं करभे। शृंखलकः। करभः। उत्क उन्मनाः। उद्गतमनस्कप्रवृत्तेरुच्छ्वासात्स्वार्थे कन्। उत्क उत्कंठितः। कालप्रयोजनाद्रो
गे। कालवाचकात्प्रयोजनवाचनाच्च कन्स्याद्रोगे। द्वितीयेह्नि भवो द्वितीयकः ज्वरः। प्रयोजनं कारणं रोगस्य फलं वा। वि
षपुष्पैर्जनितो विषपुष्पकः। उष्णं कार्यमस्य उष्णकः। रोगे किं। द्वितीयो दिवसोऽस्य। तदस्मिन्नन्नं प्राये संज्ञायां। प्रथमां
तात्सप्तम्यर्थे कन्स्यात्। यत्प्रथमांतं अन्नं चेत्प्रायविषयं। गुडापूपाः प्रायेणान्नमस्यां गुडापूपिका। पौर्णमासी।
वटकेभ्य इनिर्वाच्यः। वटकिनी। कुल्माषादञ्। कुल्माषाः प्रायेणान्नमस्यां कौल्माषी। श्रोत्रियंश्छंदोऽधीते। श्रोत्रियः। वे
त्त्यनुवृत्तेः छांदसः। श्राद्धमनेन भुक्तमिनिठनौ। श्राद्धी। श्राद्धिकः। पूर्वादिनिः। पूर्वं कृतमनेन पूर्वी। सपूर्वाच्च। कृतपू
र्वी। इष्टादिभ्यश्च। इष्टमनेन इष्टी। अधीती। छंदसि परिपंथिपरिपरिणौ पर्यवस्थातरि। लोके तु परिपंथिशब्दो

सिं॰कौ॰ त॰ त्रुवलः। शत्रुवलः। वल इत्यत्र संज्ञायामित्यनुवृत्तेर्नेह दीर्घः। दंतशिखात्संज्ञायां। दंतावलो हस्ती। शिखावलः केकी।
ज्योत्स्नातमिस्राशृंगिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः। मत्वर्थे निपात्यंते। ज्योतिष उपधालोपो नप्र-
त्ययश्च। ज्योत्स्ना। तमस उपधाया इत्वं रश्च। तमिस्रा। स्त्रीत्वमतंत्रं। तमिस्रं। शृंगादिनच्। शृंगिणः। उर्जसो वलच्।
तेन बाधा मा भूदिति विनिरपि। उर्जस्वी। उर्जस्वलः। उर्जोसुगागम इति वृत्तिः। सत्तु चिंत्यः। उर्जस्वतीरिति वृत्तअसन्न-
तेनैवोपपत्तेः। गोशब्दान्मिनिः। गोमी। मलशब्दादिनच्। मलिनः। ईमसच्च। मलीमसः। अतइनिठनौ। दंडी। दंडिकः। व्री-
ह्यादिभ्यश्च। व्रीही। व्रीहिकः। न च सर्वेभ्यो व्रीह्यादिभ्य इनिठनाविष्येते। किं तर्हि। शिखामालासंज्ञादिभ्य इनिः।
यवखदादिभ्यष्ठन्। अन्येभ्य उभयं। तुंदादिभ्य इलच्च। चादिनिठनौ मतुप्। तुंदी। तुंदिकः। तुंदवान्। उदर। पि-
चंड। यव। व्रीहि। स्वांगाद्विवृद्धौ। विवृद्धौ कर्णावस्य कर्णिलः इत्यादि। एकगोपूर्वाट्ठञ् नित्यं। एकशतमस्यास्ति
ऐकशतिकः। ऐकसहस्रिकः। गौशतिकः। गौसहस्रिकः। शतसहस्रांताच्च निष्कात्। निष्कात्परो यौ शतसहस्र-

शब्दौ तदंतात्प्रातिपदिकाट्ठञ् स्यात्। मत्वर्थे। नैष्कशतिकः। नैष्कसहस्रिकः। रूपादाहतप्रशंसयोर्यप्। आहतं रूपमस्या-
स्तीति रूप्यः। कार्षापणः। प्रशस्तं रूपमस्यास्तीति रूप्यो गौः। आहतेति किं। रूपवान्। अन्येभ्योपि दृश्यते। हिम्याः प-
र्वताः। गुण्याः ब्राह्मणाः। अस्मायामेधास्रजो विनिः। यशस्वी। यशस्वान्। मायावी। मायाया व्रीह्यादिपाठादिनि-
ठनौ। मायी। मायिकः। स्रिन्नंतत्वात्कुः। स्रग्वी। आमयस्योपसंख्यानं दीर्घश्च। आमयावी। शृंगवृंदाभ्यामा-
रकन्। शृंगारकः। वृंदारकः। फलबर्हाभ्यामिनच्। फलिनः। बर्हिणः। हृदयाच्चालुरन्यतरस्यां। हृदयालुः। हृद-
यवान्। शीतोष्णतृप्रेभ्यस्तदसहने। शीतं न सहते शीतालुः। उष्णालुः। स्फायितंचीतिरकु। तृप्रः पुरोडाशा-
शः। तं सहते तृप्रालुः। तृप्रं दुःखमिति माधवः। हिमाच्चेलुः। हिमं न सहते हिमेलुः। बलादूलः। बलं न सहते बलाब-
लूलः। वातात्समूहे च। वातं न सहते। तस्य समूहो वा वातूलः। तप्पर्वमरुद्भ्यां। पर्वतः। मरुतः। उर्णाया युस्। य-
स्येति न। सिवासदेव। उर्णायुः। अत्र छंदसीति केचित् अनुवर्तयंति। युक्तं चैतत्। अन्यथा हि। अहंशुभमोर्यु

सि॰कौ॰त सूत्रे त्यैव वा योगग्रहणं कुर्यात्। वाचो ग्मिनिः। वाग्मी। आलजाटचौ बहुभाषिणि। कुत्सित इति वक्तव्यं। कुत्सितं बहुभा
षते वाचालो वाचाटः। यस्तु सम्यग्बहु वदति तत्र वाग्मीत्येव। स्वामिन्नैश्वर्ये। ऐश्वर्यवाचकात्स्वशब्दान्मत्वर्थे आमिनच्। स्वा
मी। अर्शआदिभ्योच्। अर्शांस्यस्य विद्यंते अर्शसः। आकृतिगणोयं। द्वंद्वोपतापगर्ह्यात्प्राणिस्थादिनिः। द्वंद्वः। कटक
वलयिनी। शंखनूपुरिणी। उपतापो रोगः। कुष्ठी। किलासी। गर्ह्यं। निंद्यं। ककुदावर्ती। काकतालुकी। प्राणिस्थात्किं। पु
ष्पफलवान्घटः। प्राण्यंगान्न। पाणिपादवती। अतइत्येव। चित्रकललाटिकावती। सिध्मे प्रत्यये पुनर्वचनं ठना
दिबाधार्थं। वातातीसाराभ्यां कुक् च। चादिनिः। वातकी। अतीसारकी। रोगे चायमिष्यते। नेह वातवती गुहा। पि
शाचाच्च। पिशाचकी। वयसि पूरणात्। पूरणप्रत्ययांतान्मत्वर्थे इनिः स्याद्वयसि वाच्ये। मासः संवत्सरो वा अ चिदंबर
पंचमोस्यास्तीति। पंचमी। उष्ट्रः। ठन्बाधनार्थमिदं। वयसि किं। पंचकाग्रामः। सुखादिभ्यश्च। इनिमत्वर्थे।
सुखी। दुःखी। मालाक्षेपे। माली। धर्मशीलवर्णांताच्च। धर्मादंतादिनिर्मत्वर्थे। ब्राह्मणधर्मी। ब्राह्मणशी ३४७

सिकतो घटः। शार्करः। देशे लुबिलचौ च। चादणू। मतुप् च। सिकताः संत्यस्मिन्देशे सिकताः। सिकतिलः। सिकतावान्।
एवं शर्करेत्यादि। दंतउन्नतउरच्। उन्नता दंताः संत्यस्य दंतुरः। ऊषसुषिमुष्कमधोरः। ऊषरः। सुषिरः। मुष्क
रः। मधुमाधुर्ये। मधुरः। प्रकरणे खमुखकुंजेभ्यउपसंख्यानं। खरः। मुखरः। कुंजो हस्तिहनुः। कुंजरः। नगपा
सुपांडुभ्यश्च। नगरं। पांडुरः। पांसुरः। पांडुरशब्दस्तु अव्युत्पन्न एव। कच्छ्वा। ह्रस्वत्वं च। कच्छुरः। द्युद्रुभ्यां मः। द्यु
मः। द्रुमः। केशाद्वोन्यतरस्यां। प्रकृतेनान्यतरस्यांग्रहणेन मतुपि सिद्धे पुनर्ग्रहणं मिनिठनोः समावेशार्थं।
केशवः। केशी। केशिकः। केशवान्। अन्येभ्योपि दृश्यते। मणिवो नागविशेषः। हिरण्यवो निधिविशेषः। अर्णसो
लोपश्च। अर्णवः। गांड्यजगात्संज्ञायां। ह्रस्वदीर्घयोः समाहारद्वंद्वेनैकवच्चित्रेण निर्देशः। गांडिवं। गांडीवं। अर्जुन
स्य धनुः। अजगवं पिनाकः। काण्डांडादीरन्नीरचौ। कांडीरः। आंडीरः। रजःकृष्यासुतिपरिषदो वलच्। रजस्वला। स्त्री
ष कृषीवलः। वले इति दीर्घः। आसुतीवलः। शौंडिकः। परिषद्वलः। पर्षदिति पाठांतरं। पर्षद्वलः। अन्येभ्योपि दृश्यते। भ्रा

सि॰कौ॰त तः॥ ॥इति मत्वर्थीयाः॥ ॥प्राग्दिशो विभक्तिः। दिक्‌शब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः॥ अ
थ स्वार्थिकाः प्रत्ययाः। समर्थानां प्रथमादिति च निवृत्तं। वेत्यनुवर्तत एव। किंसर्वनामबहुभ्योऽद्व्यादिभ्यः। किमः
सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधिक्रियते इदम इश्। प्राग्दिशीये परे। एतेतौ रथोः। इदमशब्दस्य एत इत इत्या
देशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे। इशोऽपवादः। एतदोऽन्। योगविभागः कर्तव्यः। एतदः। एतेतौ स्तो रथोः।
अन्। एतर्हि इत्येव। अनेकाल्त्वात्सर्वादेशः। नलोपः प्रातिपदिकान्तस्य। सर्वस्य सोऽन्यतरस्यां दि। प्राग्दिशीये द
कारादौ प्रत्यये परे सर्वस्य सो वा स्यात्। पञ्चम्यास्तसिल्। पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल् वा स्यात्। कु तिहोः॥
किमः कुः स्यात्तादौ हादौ विभक्तौ परतः। कुतः। कस्मात्। यतः। ततः। इतः। अतः। अमुतः। बहुतः। द्व्यादेस्तु। द्वाभ्यां। तसे
श्च। किम् सर्वनाम बहुभ्यः परस्य तसेस्तसिलादेशः स्यात्॥ स्वरार्थं विभक्त्यर्थं च वचनं। पर्यभिभ्यां च। आभ्यां त

सिल् स्यात्। सर्वोभयार्थाभ्यामेव। परितः सर्वत इत्यर्थः। अभितः। उभयत इत्यर्थः। सप्तम्यास्त्रल्। कुत्र। यत्र। तत्र। बहुत्र
इदमो हः। त्रलोऽपवादः। इशादेशः। इह। किमोऽत्। वाग्रहणमनुवर्तते। सप्तम्यन्तात्किमः अद्वा स्यात्। पक्षे त्रल्। क्वाति॥
किमः क्वादेशः स्यादति। क्व। कुत्र। वा ह च छन्दसि॥ कुह स्थः। कुह जग्मथुः। एतदस्त्रतसोस्त्रतसौ चानुदात्तौ। अन्वादेश
विषये एतदो अश् स्यात्स चानुदात्तस्त्रतसोः परतः तौ चानुदात्तौ स्तः। एतस्मिन्ग्रामे सुखं वसामः। अथो अत्र धीमहे।
अतो न गन्तास्मः। इतराभ्योऽपि दृश्यन्ते। पञ्चमीसप्तमीतरविभक्त्यन्तादपि तसिलादयो दृश्यन्ते। दृशिग्रहणाद्भवदा
दियोग एव। स भवान्। ततो भवान्। तत्र भवान्। तं भवन्तं। ततो भवन्तं। तत्र भवन्तं। एवं दीर्घायुः। देवानांप्रियः। आ
युष्मान्। सर्वैकान्यकिंयत्तदः काले दा। सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे दा स्यात्। सर्वस्मिन्काले सर्वदा। सदा।
एकदा। अन्यदा। कदा। यदा। तदा। काले किं। सर्वत्र देशे। इदमो र्हिल्। सप्तम्यन्तात्काल इत्येव। हस्यापवादः। अ
स्मिन्काले एतर्हि। काले किं। इह देशे। अधुना। इदमः सप्तम्यन्तात्कालवाचिनः स्वार्थे धुना प्रत्ययः स्यात्॥ इ

सि॰कौ॰त॰ शः। यस्येतिलोपः। अधुना। दानींच। इदानीं। तदोदाच। तदा। तदानीं। तदो दावचनं मनर्थकं। विहितत्वात्। अनद्यतने र्हि
लन्यतरस्यां। कर्हि। कदा। यर्हि। यदा। तर्हि। तदा। एतस्मिन्काले एतर्हि॥ सद्यः परुत्परार्यैषमः परेद्यव्यद्यपूर्वेद्युरन्ये
द्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः। एते निपात्यंते। समानस्य सभावो द्यश्चाहनि। समानेऽहनि स
द्यः। पूर्वपूर्वतरयोः परउदारौ च संवत्सरे। पूर्वस्मिन्वत्सरे परुत्। पूर्वतरे वत्सरे परारि। इदम इश्। समसण्प्रत्य
यश्च संवत्सरे। अस्मिन्संवत्सरे ऐषमः। परस्मादेद्यव्यहनि। परस्मिन्नहनि परेद्यवि। इदमो द्यश् च। अस्मिन्न
हनि अद्य। पूर्वादिभ्यो ष्टभ्यो हन्येद्युस्। पूर्वस्मिन्नहनि पूर्वेद्युः। अन्यस्मिन्नहनि अन्येद्युः। उभयोरह्नोरुभयेद्युः। द्य
श्चोभयाद्वक्तव्यः। उभयद्युः। इत्यादि। प्रकारवचने थाल्। प्रकारवृत्तिभ्यः किमादिभ्यः थाल्स्यात्स्वार्थे। तेन प्रका
त रेण तथा। यथा। इदमस्थमुः। थालोपवादः। एतदोपि वाच्यः। अनेन एतेन प्रकारेण इत्थं। किमश्च। केन प्रकारेण चिदंबर
कथं॥ ॥इति प्राग्दिशीयानां विभक्तिसंज्ञानां पूर्णोऽवधिः॥ ॥दिक्छब्देभ्यः सप्तमीपंचमीप्रथमाभ्यो दि १४९

नी। ब्राह्मणवर्णी। हस्ताज्जातौ। हस्ती। जातौ किं। हस्तवान्पुरुषः। वर्णाद्ब्रह्मचारिणि। वर्णी। पुष्करादिभ्यो देशे। पुष्क
रिणी। पद्मिनी। पुष्करवान्हस्ती। देशे किं। बाहूरुपूर्वपदाद्बलात्। बाहुबली। ऊरुबली। सर्वादेश्च। सर्वधनी। सर्व
त बीजी। अर्थाच्चासंनिहिते। अर्थी। संनिहिते तु अर्थवान्। तदंताच्च। धान्यार्थी। हिरण्यार्थी। बलादिभ्यो मतुबन्यत
रस्यां। बलवान्। बली। उत्साहवान्। उत्साही॥ संज्ञायां मन्माभ्यां। मन्नंतान्मांताच्चेनिर्मत्वर्थे। प्रथिमिनी। दामिनी।
महोमिनी। सोमिनी। संज्ञायां किं। सोमवान्। कंशंभ्यां बभयुस्तितुतयसः। कमिति शमिति मांतौ। कमित्युदकसुखयोः॥
शमिति सुखे। आभ्यां सप्त प्रत्ययाः स्युः। युस्यसोः सकारः पदत्वार्थः। कंवः। कंभः। कंयुः। कंतिः। कंतुः। कंतः। कंयः। शं
वः। शंभः। शंयुः। शंतिः। शंतुः। शंतः। शंयः। अनुस्वारस्य वैकल्पिकः परसवर्णः। वकारयकारपरस्य अनुनासिकश्च
यौ। तुंदिवलिवटेर्भः। वृद्धानाभिः स्तुंदिः। मूर्धन्योपधोयमिति माधवः। तुंदिभः। वलिभः। पामादित्वाद् लिनोपि।
अहंशुभमोर्युस्। अहमिति मांतमव्ययमहंकारे। शुभमिति शुभे। अहंयुः। अहंकारवान्। शुभंयुः। शुभान्वि

।सि०कौ०त॰ णादातिः। उत्तरात्। अधरात्। दक्षिणात्॥ एनबन्यतरस्यामदूरेपंचम्याः। उत्तरादिभ्यः एनब्वास्यादवध्यवधिमतोः॥
सामीप्ये पंचम्यतं विना। उत्तरेण। अधरेण। दक्षिणेन। पक्षे यथास्वं प्रत्ययाः। इह केचिदुत्तरादीनेनुवर्त्तयदिक्छब्दा
मात्रादेनपमाहुः। पूर्वेण ग्रामं। अपरेण ग्रामं। अपरेण ग्रामं। दक्षिणादाच्। अस्तातेर्विषये। दक्षिणा वसति। अ
पंचम्या इत्येव। दक्षिणादागतः। आहि च दूरे। दक्षिणादूरे आहि च स्याच्चादाच्। दक्षिणाहि। दक्षिणा। उत्तराच्च।
उत्तराहि। उत्तरा। संख्याया विधार्थे धा। क्रियाप्रकारे वर्त्तमानात् संख्याशब्दात् स्वार्थे धा स्यात्। चतुर्धा। पंचधा
धा। अधिकरणविचाले च। द्रव्यसंख्यान्तरापादने संख्याया धा स्यात्। एकं राशिं पंचधा कुरु। एकाद्धो ध्य
मुञन्यतरस्यां। ऐकध्यं। एकधा। द्वित्र्योश्च धमुञ्। आभ्यां धा इत्यस्य धमुञ् वा स्यात्। द्वैधं द्विधा त्रैधं। त्रिधा
धमुञन्तात् स्वार्थे डदर्शनं पथि। द्वैधानि। एधाच्च। आदेशोयं। द्वेधा। त्रेधा। याप्ये पाशप्। कुत्सितो भिषक् भिष ।चिदंबर
क्पाशः। पूरणाद्भागे तीयादन्। द्वितीयो भागो द्वितीयः। स्वरे विशेषः। तीयादीकक् स्वार्थे वाच्यः। द्वैतीयीकः। द्वि ३५०

तीयः। तार्तीयीकः। तृतीयः। न विद्यायाः। द्वितीयात्तृतीया विद्येत्येव। प्रागेकादशभ्योऽछंदसि। पूरणप्रत्ययान्ताद्भागेऽन्। चतुर्थः।
पंचमः। षष्ठाष्टमाभ्यां ञ च। चादन्। षष्ठो भागः षाष्ठः। षष्ठः। आष्टमः। अष्टमः। मानपश्वङ्गयोः कन्लुकौ च। षष्ठाष्टमशब्दा
भ्यां क्रमेण कन्लुकौ स्तो माने पश्वङ्गे च वाच्ये। षष्ठको भागः। [illegible] अष्टमो भागः पश्वङ्गं चेत्। अन्यत्र ञो वा लुक्।
नकारो यथाप्राप्तं। षष्ठः। षाष्ठः। अष्टमः। आष्टमः। महाविभाषया सिद्धे लुग्वचनं पूर्वत्र ञ ज्ञानो नित्यो विति ज्ञापयितुं॥
एकादाकिनिच्चासहाये। चाल्लुकौ। एकाकी। एककः। एकः। भूतपूर्वे चरट्। आढ्यो भूतपूर्वः। आढ्यचरः। षष्ठ्या रू
प्य च। षष्ठ्यन्ताद् भूतपूर्वेऽर्थे रूप्यः स्याच्चाच्चरट्। कृष्णस्य भूतपूर्वो गौः। कृष्णरूप्यः। कृष्णचरः। तसिलादिषु रूप्यः स्यात् परि
गणितत्वात्। न पुंवत्। शुभ्रायाः भूतपूर्वः शुभ्रारूप्यः। अतिशायने तमबिष्ठनौ। अतिशयविशिष्टार्थवृत्तेः स्वार्थे र्थ
तो स्तः। अयमेषामतिशयेनाढ्यः आढ्यतमः। लघुतमो लघिष्ठः। तिङश्च। तिङन्तादतिशये द्योत्ये तमप् स्यात्।
तरप्तमपौ घः। एतौ घसंज्ञौ स्तः। किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे। किमेत्तिङव्ययाच्च यो घस्तदन्तादा

मुः स्यान्न तु द्रव्यप्रकर्षे। किंतमां। प्राह्णेतमां। पचतितमां। उच्चैस्तमां। द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः। द्विवचनविभज्योपप
देतरबीयसुनौ। द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः। पूर्वयोरपवादः। अयमनयोरतिशा
येन लघुः। लघुतरो लघीयान्। रः। उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसः। अजादी गुणवचनादेव। इष्ठन्नीयसुनौ गु
णवचनादेव स्तः। नेह। पाचकतरः। पाचकतमः। तुश्छन्दसि। तृन्तृजन्तादिष्ठन्नीयसुनौ स्तः। तुरिष्ठेमेयःसु। तृश स्व
ब्दस्य लोपः स्यादिष्ठमेयःसु। आतिशायनेन कर्तोकरिष्ठः। दोहीयसी धेनुः। प्रशस्यस्य श्रः। अस्य श्रादेशः स्यादजाद्योः। स्य
प्रकृत्यैकाच्। इष्ठादिष्वेकाच् प्रकृत्या। श्रेष्ठः। श्रेयान्। ज्य च। प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः। ज्येष्ठः। ज्यादादी
यसः। आदेः परस्य। ज्यायान्। वृद्धस्य च। ज्यादेशः स्यादजाद्योः। ज्येष्ठः। ज्यायान्। अन्तिकबाढयोर्नेदसाधौ। अजा
द्योः। नेदिष्ठः। नेदीयान्। साधिष्ठः। साधीयान्। स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः। एषां यणा
दिपरं लुप्यते पूर्वस्य च गुणः इष्ठादिषु। स्थविष्ठः। दविष्ठः। यविष्ठः। ह्रसिष्ठः। क्षेपिष्ठः। क्षोदिष्ठः। एवमीयसुन्। ह्रस्व पिदवर
क्षिप्रक्षुद्राणां पृथ्वादित्वाद्ध्रसिमा॥ क्षेपिमा। क्षोदिमा। प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारका ३५१

दिग्देशकालेष्वस्तातिः। सप्तम्यन्तेभ्यो दिशिरूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थेऽस्तातिप्रत्ययः। पूर्वाधरावराणामसि पु
र धव् चैषां। एभ्योऽस्तात्यर्थे असिप्रत्ययः स्यात्। तद्योगे क्रमादेषां पुर् अध् अव् इत्यादेशाः स्युः। अस्ताति च। अस्तातौ परे
पूर्वादीनां पुरादयः स्युः। पूर्वस्यां पूर्वस्याः पूर्वा वा दिक् पुरः। पुरस्तात्। अधः। अधस्तात्। अवः। विभाषावरस्य। अवरस्या
स्तातौ परेऽव् स्याद्वा। अवस्तात्। अवरस्तात्। एवं देशे काले च। दिशिरूढेभ्यः किं। ऐन्द्र्यां वसति॥ सप्तम्यन्तेभ्यः किं
पूर्वं ग्रामं गतः। दिगादिवृत्तिभ्यः किं। पूर्वस्मिन् गुरौ वसति। अस्ताति चेति ज्ञापकादसिरस्तातिं न बाधते। दक्षिणोत्तराभ्यां
मतसुच्। अस्तातेरपवादः। दक्षिणतः। उत्तरतः। विभाषा परावराभ्यां। परतः। अवरतः। परस्तात्। अवरस्तात्। अञ्चेर्लु
क्। अञ्चत्यन्ताद्दिग्शब्दादस्तातेर्लुक् स्यात्। लुक्तद्धितलुकि। प्राच्यां प्राच्याः प्राची वा दिक्। प्राक्। उदक्। एवं देशे काले च
उपर्युपरिष्टात्। अस्तातेर्विषये ऊर्ध्वशब्दस्योपादेशः स्यात् रिल्रिष्टातिलौ प्रत्ययौ। उपरि उपरिष्टाद्वा वसति॥
आगत्य रमणी। आगत्य रमणीयं वा। पश्चात्। अपरस्य पश्चभावः। आति च। प्रत्ययोऽस्ताति विषये उत्तराधरदक्षि

णां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृंदाः। प्रियादीनां क्रमात्प्रादयस्युरिष्ठादिषु। प्रेष्ठः। स्थेष्ठः। स्फेष्ठः। वरिष्ठः। बं
हिष्ठः। गरिष्ठः। वर्षिष्ठः। त्रपिष्ठः। द्राघिष्ठः। वृंदिष्ठः। एवमीयसुन्। प्रियोरुबहुलगुरुदीर्घाणां पृथ्वादित्वात्प्रेमा इत्या
दि। बहोर्लोपो भू च बहोः। बहोः परयोरिमेयसोर्लोपः स्याद्बहोश्च भूरादेशः स्यात्। भूमा। भूयान्। इष्ठस्य यिट् च। बहोः
परस्य इष्ठस्य लोपः स्यात् यिडागमश्च। भूयिष्ठः। युवाल्पयोः कनन्यतरस्यां। एतयोः कनादेशो वा स्यादिष्ठेय
सोः। कनिष्ठः। कनीयान्। पक्षे यविष्ठः। मल्पिष्ठइत्यादि। विन्मतोर्लुक्। विनो मतुपश्च लुक्स्यादिष्ठेयसोः। अति
शयेन स्रग्वी स्रजिष्ठः। स्रजीयान्। अतिशयेन त्वग्वान् त्वचिष्ठः। त्वचीयान्। प्रशंसायां रूपप्। सुबंतात्तिङंता
च्च। प्रशस्तः पटुः पटुरूपः। प्रशस्तं पचति पचतिरूपं। ईषदसमाप्तौ कल्पब्देश्यदेशीयरः। ईषदूनो विद्वान् वि
द्वत्कल्पः। यशस्कल्पं। यजुष्कल्पं। विद्वद्देश्यः। विद्वद्देशीयः। पचतिकल्पं। विभाषा सुपो बहुच्पुरस्तात्तु। ईष
दसमाप्तिविशिष्टे सुबंताद्बहुज्वा स्यात्। स च प्रागेव न तु परतः। ईषदूनः पटुः। बहुपटुः। पटुकल्पः। सुपः

सि॰कौ॰त॰ किं। यजतिकल्पं। प्रकारवचनेजातीयर्॥ प्रकारवतिचायं। थाल्तुप्रकारमात्रे। पटुः प्रकारः पटुजातीयः। प्रागिवा
ति त्कः॥ इवे प्रतिकृतावित्यतः प्राक्काधिकारः। अव्ययसर्वनाम्नामकच्प्राक्टेः॥ तिङश्चेत्यनुवर्तते। कस्यच दः॥ कांताव्ययस्य
स्य दकारोंतादेशः स्यादकच्च। अज्ञाते। कस्यायमश्वोऽश्वकः। उच्चकैः। नीचकैः। सर्वके। विश्वके। अकारसकारभका
रादौ सुपि सर्वनाम्न टेः प्रागकच्। युवकयोः। आवकयोः। युष्मकासु। अस्मकासु। युष्मकाभिः। अस्मकाभिः।
ओकारेत्यादि किं। त्वयका। मयका। अकच्प्रकरणे तूष्णीमः काम्वक्तव्यः। मित्वादंत्यादचः परः। तूष्णीकाम
स्ते। शीले कामलोपश्च। तूष्णीशीलः तूष्णीकः। पचतकि। जल्पतकि। धकित्। हिरकुत्। कुत्सिते। कुत्सि
तोऽश्वोऽश्वकः। संज्ञायां कन्। कुत्सिते कन्स्यात् दंतेन चेत्संज्ञा गम्यते। शूद्रकः। राधकः। स्वरार्थवचनं। अनुकं
पायां। पुत्रकः। अनुकंपितः पुत्र इत्यर्थः। नीतौ च तद्युक्तात्। सामदानादिरूपायो नीतिस्तस्यां गम्यमाना चिदबर
यामनुकंपायुक्तात्प्रत्ययः स्यात्। हंत ते धानकाः। केयाः। गुडकः। एहकि। अध्यकि। पूर्वेणानुकंपमाते ना १५२

सि॰कौ॰त॰ उपिलः। उपेंद्रदत्तकः। षट् रूपाणि। जातिनाम्नः कन्। मनुष्यनाम्न इत्येव। जातिशब्दो यो मनुष्यनामधेयं तस्मात्कन्
अनुकंपायां नीतौ च। सिंहकः। शरभकः। द्वितीयं संध्यक्षरं चेत्तदादेर्लोपो वक्तव्यः। कहोडः। कहिकः। एकाक्षरपू
र्वपदानामुत्तरलोपो वक्तव्यः। वागाशीर्दत्तः। वाचिकः। कथं षडंगुलिदत्तः। षडिक इति। षषष्ठाजादिवचनात्सिद्धं
शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात्। एषां मनुष्यनाम्न ठाजादौ परे तृतीयादचः ऊर्ध्वं लोपः स्यात्॥
पूर्वस्यापवादः। अनुकंपितः शेवलदत्तः। शेवलिकः। सुपरिकः। विशालिकः। वरुणिकः। अर्यमिकः। अजिनांतस्
स्योत्तरपदलोपश्च॥ अजिनांतान्मनुष्यनाम्नो नुकंपायां ताल्कन्॥ तस्य चोत्तरलोपः। अनुकंपितो व्याघ्राजिनो
व्याघ्रकः। सिंहकः। अल्पे। अल्पं तैलं। तैलकं। ह्रस्वे॥ ह्रस्वो वृक्षो वृक्षकः। संज्ञायां कन्। ह्रस्वे तु कायां संज्ञा
तस्यां गम्यमानायां कन्। पूर्वस्यापवादः। वंशकः। वेणुकः। कुटीशमीशुण्डाभ्यो रः। ह्रस्वा कुटी कुटीरः। शमी
रः। शुंडारः। कुत्वा डुपच्। ह्रस्वा कुतूः कुतुपः। कुतूः कृत्तेः स्नेहपात्रं॥ ह्रस्वा सा कुतुपः प्रमान्। कासूगोणीभ्यां ष्ट १५३

रच्॥ आयुधविशेषः कासूः॥ ह्रस्वा सा कासूतरी॥ गोणीतरी। वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे। वत्सतरः। द्वितीयं वयः प्राप्तः।
उक्षतरः। अश्वतरः। ऋषभतरः। प्रवृत्तत्वेति निमित्ततनुत्वे एवायं॥ किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच्। अनयोः करते
वैष्णवः। यतरः। ततरः। महाविभाषयाकः। यः सः। वा बहूनां जातिपरिप्रश्ने डतमच्। बहूनां मध्ये निर्धारणे डतमच्
वा स्यात्। जातिपरिप्रश्न इति विषये डतरजपि। कतरः। एकाच्च प्राचां। डतरच् डतमच् स्यात्॥ अनयोरेकतरो मैत्रः
एषामेकतमः। अवक्षेपणे कन्। व्याकरणकेन गर्वितः। येनेतरः कुत्स्यते स इहोदाहरणं॥ स्वतः कुत्सितं कुत्सिते
इत्यस्य॥ प्रागिवीयानामपूर्णविधिः॥ इवे प्रतिकृतौ। कन् स्यात्। अश्व इव प्रतिकृतिरश्वकः। प्रतिकृतौ किं। गोर
व गवयः। संज्ञायां च। इवार्थे कन् स्यात्समुदायश्चेत्संज्ञा। अप्रतिकृत्यर्थ आरंभः। अश्वसदृशस्य संज्ञा। अश्वकः। उ
ष्ट्रकः। लुम्मनुष्ये। संज्ञायां विहितस्य कनो लुप् स्यात् मनुष्ये वाच्ये। चंचा तृणमयः पुमान्। चंचेव मनुष्यः। चंच
ा। वर्धिका। जीविकार्थे चापण्ये। जीविकार्थं यद्विक्रयणं तस्मिन्वाच्ये कनो लुप् स्यात्। वासुदेवः। शिवः। स्क

सि॰ कौ॰ त॰ दः। देवलकानां जीविकार्थे देवप्रतिकृतिष्विदं। अपण्ये किं। हस्तिकान्विक्रीणीते। देवपथादिभ्यश्च। कनो लुप् स्यात्।
देवपथः। हंसपथः। आकृतिगणोयं। वस्तेर्ढञ्। इवेत्यनुवर्तते। प्रतिकृतावितिनिवृत्तं। वस्तिरिव वास्तेयं। वास्तेयी।
शिलाया ढः। शिलाया इति योगविभागाद्ढञ् पाक्षिके। शिलेव शिलेयं। शाखादिभ्यो यः। शाखेव शाख्यः। जघ
न्यः। आद्यः। शरण्यः। द्रव्यं च भव्ये। द्रव्यमयं ब्राह्मणः। कुशाग्राच्छः। कुशाग्रमिव कुशाग्रीया बुद्धिः। समासाच्च तद्वि
षयात्। इवार्थविषयाच्छः स्यात्। काकतालीयो देवदत्तस्य वधः। इह काकतालसमागमसदृशश्चौरसमागम
इति समासार्थः। तत्संयुक्तः काकमरणसदृशस्त प्रत्ययार्थः। अजाकृपाणीयः। अतर्कितोपनत इति फलितो
शर्करादिभ्योण्। शार्करेव शार्करं। अंगुल्यादिभ्यष्ठक्। अंगुलीवांगुलिकः। भरुजेव भारुजिकः। एकशालायाष्ठ चिदंवर
जन्यतरस्यां। एकशाला दिवार्थे ठज्वा। पक्षे ठक्। एकशालेव ऐकशालिकः। एकशालिकः। कर्कलोहितादीकक्। क
र्कः शुक्लोश्वः स इव कार्कीकः। लोहितीकः। स्फटिकः। पूगाञ्ञ्यो ग्रामणीपूर्वात्। इवार्थो निवृत्तः। नानाजाती १५४

त्ययः स्यात्। अनेन तु परंपरासंबंधेपीति विशेषः। बह्वचो मनुष्यनाम्नष्ठज्वा। पूर्वसूत्रद्वयविषये। घनिलौच। तत्रैव। प्र
ना दाबूर्ध्वं द्वितीयादचः। अस्मिन्प्रकरणे यष्ठोजादिप्रत्ययश्च तस्मिन्परे प्रकृतेर्द्वितीयादचऊर्ध्वं सर्वं लुप्यते॥
अनुकंपितो देवदत्तः देविकः। देवियः। देविलः। देवदत्तकः। अनुकंपितो वायुदत्तः वायुकः। ठग्रहणमुकाद्वितीयस्य
कविधानार्थं। पितृकः। चतुर्थादनजादौ च लोपो वाच्यः। अनुकंपितो बृहस्पतिदत्तो बृहस्पतिकः। अनजादौ च वि
भाषा लोपो वक्तव्यः। देवदत्तकः। देवकः। लोपः पूर्वपदस्य च। दत्तिकः। दत्तियः। दत्तिलः। दत्तकः। विनापि प्रत्य
यं पूर्वोत्तरपदयोर्वा लोपो वाच्यः। देवदत्तः। दत्तः। देवः। सत्यभामा। भामा। सत्या। उवर्णात्ल इलस्य च। भानु
दत्तः। भानुलः। ऋवर्णादपि। सवितृयः। सवितृलः। चतुर्थादनजादौ च लोपः पूर्वपदस्य च। अप्रत्यये तथैवेष्ट
उवर्णाल्ल इलस्य च। लइति लोपसंज्ञा प्राच्यां। प्राचामुपादेरडज्वुचौ वा। उपशब्दपूर्वात्प्रातिपदिकात्सर्वविषयेअडू
वुचौ एतौ स्तः। चाद्यथाप्राप्तं। प्राग्ग्रहणं पूजार्थं। अनुकंपितः उपेंद्रदत्तः। उपडः। उपकः। उपिकः। उपियः॥

 पार्श्वादियौधेयादिभ्यामणञौ ॥ आयुधजीविसंघवाचिभ्यः एभ्यः क्रमादणञौ स्तः । स्वार्थे । पार्श्वः पार्शवः । पार्शवौ । पर्शवः । यौधेयः ।
यौधेयौ । यौधेयाः । अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् ॥ अभिजिदादिभ्योऽणन्तेभ्यः स्वार्थे यञ् स्यात् ॥
१५५ अभिजितोऽपत्यमाभिजित्यः । वैदभृत्यः । शालावत्यः । शैखावत्यः । शामीवत्यः । और्णावत्यः । श्रौमत्यः । ञ्यादयस्तद्राजाः ॥ पूगाञ्
ञ्यो इत्यारभ्योक्ता एवंसंज्ञाः स्युः । तेनास्त्रियां बहुषु लुक् । लौहितध्वजाः । कपोतपाकाः । कौञ्जायनाः । ब्राध्नायन इ
त्यादि । पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च ॥ लोपवचनमनैमित्तिकत्वार्थं ॥ अतो न स्थानिवत्त्वम् ॥ पादः पत् । तादि
तार्थ इति समासे कृते प्रत्ययः । वुन्नन्तं स्त्रियामेव । द्वौ द्वौ पादौ ददाति द्विपदिकां ॥ पादशतग्रहणमनर्थकमन्यत्रा
पि दर्शनात् ॥ द्विमोदकिकां ॥ दण्डव्यवसर्गयोश्च ॥ वुन् स्यात् ॥ अवीप्सार्थमिदं ॥ द्वौ पादौ दण्डितः ॥ द्विपदिकां व्यवसृजति
ददातीत्यर्थः ॥ स्थूलादिभ्यः प्रकारवचने कन् । जातीयरोऽपवादः । स्थूलप्रकारः स्थूलकः । अणुकः । चञ्चद्बृहतोरुपसंख्या
नं । चञ्चत्कः । बृहत्कः । सुराया अहौ । सुरावर्णोऽहिः । सुरकः । अनत्यन्तगतौ क्तात् । छिन्नकं । भिन्नकं । न सामिव
चने । सामिपर्याय उपपदे क्तान्तान्न कन् । सामिकृतं । अर्धकृतं । अनत्यन्तगते रिह प्रकृत्यैवाभिधानात् । पूर्वेण क कृ५४

न्प्राप्तः । इदमेव निषेधसूत्रमत्यन्तस्वार्थिकमपि कनं ज्ञापयति । बहुतरकं । बृहत्या आच्छादने । कन् स्यात् । द्वौ प्रावारोत्तरा
संगौ समौ बृहतिका स्मृतौ ॥ आच्छादने किं । बृहती छन्दः । अषडक्षाशितंग्वलंकर्मालंपुरुषाध्युत्तरपदात्खः । स्वार्थे ॥
अषडक्षीणो मन्त्रः । द्वाभ्यामेव कृत इत्यर्थः । आशितो गावोऽस्मिन्नित्याशितंगवीनमरण्यं । निपातनात्पूर्वपदस्य मुम् ।
अलंकर्मणे अलंकर्मीणः । अलंपुरुषीयः । ईश्वराधीनः । नित्योऽयं खः । उत्तरसूत्रे विभाषाग्रहणात् । अन्येऽपि केचि
त्स्वार्थिका नित्या इष्यन्ते । तमबादयः प्राक्कनः । ञ्यादयः प्राग्वुनः । आमादयः प्राङ्मयटः । बृहतीजात्यन्ताः समा
सान्ता इति । विभाषाञ्चेरदिक्स्त्रियां । अदिक्स्त्रीवृत्तेरञ्चत्यन्तात्प्रातिपदिकात्खः स्यात्स्वार्थे । प्राक् । प्राचीनं । प्र
त्यक् । प्रतीचीनं । अवाक् । अवाचीनं । निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः इति कोशान्निकृष्टपर्याये
१२२ ष्वर्वन्शब्दपाठादर्वन्निकृष्टमित्यर्थः । अर्वन्तमञ्चतीति अर्वाचीनं । अर्वाक् । अदिक्स्त्रियां किं । इति प्राची दि
क् । उदीची दिक् । दिग्ग्रहणं किं । प्राचीना ब्राह्मणी । स्त्रीग्रहणं किं । प्राचीनं ग्रामादाम्राः । जात्यन्ताच्छ बन्धुनि ।

सि॰कौ॰त॰ ब्राह्मणजातीयः। बंधुनि किं। ब्राह्मणजातिः शोभना॥ जातेर्व्यंजकं द्रव्यं बंधु॥ स्थानांताद्विभाषा सस्थानेनेति चेत्॥ सस्थानेन तुल्येन चे

१५६ त्स्थानांतमर्थवदित्यर्थः॥ पितृस्थानीयः। पितृस्थानः। सस्थानेन किं। गोःस्थानं॥ अनुगादिनष्ठक्॥ अनुगदतीत्यनुगादी॥ स एवानु

गादिकः॥ णचः स्त्रियामञ्॥ णच्प्रत्ययांतात्स्वार्थे अञ् स्यात् स्त्रियाम्॥ न कर्मव्यतिहारे॥ अत्र ऐच् न स्यात्। व्यावक्रोशी। अणिनुणः॥ नु

णंतादण् स्यात् स्वार्थे॥ इनण्यनपत्ये॥ सांराविणं॥ विसारिणो मत्स्ये। अण् स्यात्॥ वैसारिणः। मत्स्ये किं। विसारी देवदत्तः॥ संख्या॰

याः क्रियाभ्यावृत्तिगणने कृत्वसुच्॥ अभ्यावृत्तिर्जन्म॥ क्रियाजन्मगणनवृत्तेः संख्याशब्दात्स्वार्थे कृत्वसुच् स्यात्॥ पंचकृत्वो भुंक्ते॥

संख्यायाः किं॥ भूरिवारान्भुंक्ते॥ द्वित्रिचतुर्भ्यः सुच्॥ कृत्वसुचोपवादः॥ द्विर्भुंक्ते॥ त्रिः॥ रात्सस्य॥ चतुः॥ एकस्य

सकृच्च॥ सकृदित्यादेशः स्याच्चात्सुच्॥ सकृद्भुंक्ते। संयोगांतस्येति सुचो लोपः॥ ननु हल्ङ्याबिति॥ अभैत्सीदि

त्यत्र सिच इव सुचोपि तद्योगात्॥ विभाषा बहोर्धाविप्रकृष्टकाले॥ अविप्रकृष्ट आसन्नः॥ बहुधा बहुकृत्वो दि

वसस्य भुंक्ते॥ आसन्नकाले किं॥ बहुकृत्वो मासस्य भुंक्ते॥ तत्प्रकृतवचने मयट्॥ प्राचुर्येण प्रस्तुतं तस्य वच १५६

ताद्धितेषु स्वार्थिकप्रकरणम्

या अनियतवृत्तयोऽर्थकामप्रधानाः संघाः पूगाः॥ तद्वाचकात्स्वार्थे ञ्यः स्यात्। लोहितध्वज्यः। अग्रामणीपूर्वादिति

किं। देवदत्तो ग्रामणीर्येषां ते देवदत्तकाः। स एव ग्रामणीरिति कन्। व्रातच्फञोरस्त्रियां। व्रातः। कापोतपाक्यः॥

च्फञ्। कौंजायन्यः। ब्राध्नायन्यः। आयुधजीविसंघाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात्। वाहीकेष्वायुधजी

विसंघः तद्वाचिनः स्वार्थे ञ्यट्। क्षौद्रक्यः। मालव्यः। टित्वान्ङीप्। क्षौद्रकी। मालवी। आयुध किं। मल्लाः। संघेति

किं। सम्राट्। वाहीकेषु किं। शबराः। अब्राह्मणेति किं। गोपालवाः। शालंकायनाः। ब्राह्मणे तद्विशेषग्रहणं। राज

न्यस्वरूपग्रहणं। वृकाट्टेण्यण्। आयुधजीविसंघवाचकात्स्वार्थे। वार्केण्यः। आयुधेति किं। जातिशब्दान्मा

भूत्। दामन्यादित्रिगर्तषष्ठाच्छः। दामन्यादिभ्यस्त्रिगर्तषष्ठेभ्यश्चायुधजीविसंघवाचिभ्यः स्वार्थे

छः स्यात्। त्रिगर्तः षष्ठो वर्गो येषां ते त्रिगर्तषष्ठाः। आहुः त्रिगर्तषष्ठास्तु कौंडोपरथदांडकी। क्रोष्टुकिर्जाल

मानिर्ब्रह्मगुप्तोथ जानकिः। दामनीयः। दामनीयौ। दामनीयाः। औलपीयः। त्रिगर्त्ते। कौंडोपरथीयः। दांडकी

५४ लः परस्मैपदं। आदेशाः परस्मैपदसंज्ञाः स्युः। तङानावात्मनेपदं। तङ् प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः।

श्रीगणेशाय नमः॥ शंकराय नमः। श्रीत्राहंतीचरणैर्गुण्यैर्मदृग्भिर्भिरहर्दिवं। नोद्धूय्यमानो प्युयो विष्णुर्विजयतेतरां॥१॥ पूर्वार्धे
कथितास्तूर्यपंचमाध्यायवर्तिनः। प्रत्ययाअथकथ्यंते तृतीयाध्यायगोचराः॥२॥ तत्रादौ दशलकाराः प्रदर्श्यन्ते॥ लट्। लिट्। लुट्। ल य
लृट्। लेट्। लोट्। लङ्। लिङ्। लुङ्। लृङ्॥ एषु पंचमो लकारश्छंदोमात्रगोचरः। वर्तमाने लट्। वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात्।
अटावितौ। लः कर्मणि च भावे चाकर्मकेभ्यः। लकाराः सकर्मकेभ्यः कर्तरि कर्मणि च स्युः अकर्मकेभ्यो भावे कर्तरि च॥ लस्य
ब्र अधिकारोयं। तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्। एतेष्टादश लस्यादेशाः स्युः। पूर्व
संज्ञाप्रचारः। अनुदात्तङित आत्मनेपदं। अनुदात्तेत उपदेशे यो ङित् तदंताच्च धातोर्लस्य स्थाने आत्मनेपदं स्यात्। स्व
रितञितः कर्त्रभिप्राये क्रियाफले। स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्। तिङस्त्रीणि त्रीणि प्रथममध्यमोत्त
माः। तिङ उभयोः पदयोस्त्रयस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः। तान्येकवचनद्विवचनबहुवचनान्येकशः। लब्धप्रथमादिवचन
संज्ञानि तिङस्त्रीणि त्रीणि वचनानि प्रत्येकमेकवचनादिसंज्ञानि स्युः। युष्मद्युपपदे समाधिनोकरणे स्थानिन्यपि

x शेषात्कर्तरि परस्मैपदं। आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात्॥

मध्यमः। तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः स्यात्। प्रहासे च मन्योपपदे मन्यतेरुत्तम
एकवच्च। मन्युधातुरूपपदं यस्य धातोस्तस्मिन् प्रकृतिभूते सति मध्यमः स्यात् परिहासे गम्यमाने मन्यतेस्तूत्तमः स्यात् स चैका
स्य र्थवाचकः स्यात्। अस्मद्युत्तमः। तथाभूते सति अस्मद्युत्तमः स्यात्। शेषे प्रथमः। मध्यमोत्तमयोरविषये प्रथमः स्यात् धो
भूसत्तायां। कर्तृविवक्षायां भू तिङ् इति स्थिते। तिङ्शित्सार्वधातुकं। तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः। कर्तरि श
प्। कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यात्। शपावितौ। सार्वधातुकार्धधातुकयोः। अनयोः परयोरिगन्तांगस्य गुणः स्यात्।
अवादेशः। भवति। भवतः। झोन्तः। प्रत्ययावयवस्य झस्य अन्तादेशः स्यात्। भवंति। भवसि। भवथः। भवथ। अतो दीर्घो
यञि। अतोंगस्य दीर्घः स्यात् यञादौ सार्वधातुके परे। भवामि। भवावः। भवामः। इत्यादि। एहि मन्ये ओदनं भोक्ष्यसे। सुन्न
स्यातिथिभिः। एत्तं एत्त वा मन्ये ओदनं भोक्ष्येथे॥ भोक्ष्यध्वे। ओदनं भोक्ष्ये। भोक्ष्यावहे। इत्यादि मन्यसे मन्येथे इत्यादिर
र्थः। युष्मद्युपपदे इत्याद्यनुवर्तते। तेनेह न। एतु भवान्मन्यते ओदनं भोक्ष्ये इति। प्रहासे किं। यथार्थकथने माभून्॥ प

अतोगुणे।

हि मन्यसे। ओदनं भोक्ष्ये। इत्यादि। परोक्षे लिट्। भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात्। लस्य तिबादयः। लिट् च। लिडा
देशस्तिङ् आर्धधातुकसंज्ञ एव स्यात् न तु सार्वधातुकसंज्ञः तेन शबादयो न। परस्मैपदानां णलतुसुस्थलथुसणल्वमाः। ति
बादीनां नवानां णलादयो नव स्युः। भू अ इति स्थिते। भुवो वुग्लुङ्लिटोः। भुवो वुगागमः स्याल्लुङ्लिटोरचि। नित्यत्वा
द्वुक् गुणवृद्धी बाधते॥ एकाचो द्वे प्रथमस्य। अजादेर्द्वितीयस्येत्यधिकृत्य। लिटि धातोरनभ्यासस्य। लिटि परे अनभ्या
सस्य धात्ववयवस्यैकाचः प्रथमस्य द्वे स्त आदिभूतादचः परस्य तु द्वितीयस्य। भूव् भूव् अ इति स्थिते। पूर्वोभ्यासः। अ
त्र ये द्वे विहिते तयोः पूर्वोभ्याससंज्ञः स्यात्। हलादिः शेषः। अभ्यासादिर्हल् शिष्यते अन्ये लुप्यंते॥ इति वलोपः। ह्रस्वः। अभ्या
सस्याचो ह्रस्वः स्यात्॥ भवतेरः। भवतेरभ्यासोकारस्य अः स्याल्लिटि। अभ्यासे चर्च। अभ्यासे झलां चरः स्युः जशश्च। झ
शां जशः खयां चरः। तत्रापि प्रकृतिजश्चां प्रकृतिजशः। प्रकृतिचरां प्रकृतिचर इति विवेकः॥ आंतरतम्यात्॥ असिद्धवद शंकर
त्राभात्॥ इत ऊर्ध्वमापादपरिसमाप्तेराभीयं। समानाश्रये तस्मिन्कर्तव्ये तदसिद्धं स्यादिति वुको सिद्धत्वादुवङ् प्रा २

सिद्धांतकौमुदी तिङंतउत्तरार्धारंभः॥

ते॥ वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ। बभूव। बभूवतुः। बभूवुः। आर्धधातुकस्येड्वलादेः। वलादेरार्धधातुकस्येडागमः
स्यात्। बभूविथ। बभूवथुः। बभूव। बभूव। बभूविव। बभूविम॥ अनद्यतने लुट्॥ भविष्यत्यनद्यतने धातोर्लुट् स्यात्॥ स्य
तासी लृलुटोः॥ लृ इति लृङ्लृटोर्ग्रहणं॥ धातोः स्यतासी एतौ प्रत्ययौ स्तो लृलुटोः परतः। शबाद्यपवादः। आर्धधातु
कं शेषः। तिङ्शिझ्नोन्यो धातोरिति विहितः प्रत्यय एतत्संज्ञः स्यात्॥ इट्। लुटः प्रथमस्य डारौरसः। डारौरस एते क्रमात्स्युः।
डित्वसामर्थ्यादभस्यापि टेर्लोपः। पुगन्तलघूपधस्य च॥ पुगन्तस्य लघूपधस्य चांगस्येको गुणः स्यात्सार्वधातुकार्धधातुकयोः।
येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात्। तेन भिनत्तीत्यादौ नेकव्यवहितस्येको न गुणः। भवित् आ इत्यत्रेको गु
णे प्राप्ते। दीधीवेवीटां॥ दीधीवेव्योरिटश्च गुणवृद्धी न स्तः। भविता। तासस्त्योर्लोपः। तासेरस्तेश्च लोपः स्यात्सादौ प्रत्यये परे॥
रि च। रादौ प्रत्यये परे प्राग्वत्। भवितारौ। भवितारः। भवितासि। भवितास्थः। भवितास्थ। भवितास्मि। भवितास्वः। भवि
स्मः। लृट् शेषे च। भविष्यदर्थाद्धातोर्लृट् स्यात्क्रियायामसत्यां सत्यां च। स्यः। इट्। भविष्यति। भविष्यतः। भविष्यंति॥

भविष्यसि। भविष्यथः। भविष्यथ। भविष्यामि। भविष्यावः। भविष्यामः। लोट्च। विध्यादिष्वर्थेषु लोट् स्यात्। आशिषि लिङ्
लोटौ। एरुः। लोट इकारस्य उः स्यात्। भवतु। तुह्योस्तातङाशिष्यन्यतरस्यां। आशिषि तुह्योस्तातङ् वा स्यात्। अनेकाल्त्वात्स
र्वादेशः। यद्यपि ङिच्चेत्ययमपवादस्तथाप्यनन्यार्थङित्वं अनङादिषु चरितार्थं इति गुणवृद्धिप्रतिषेधसंप्रसारणाद्यर्थत्त
यासंभवत्वयोजनङ्कारेतातङ् मंथरं प्रवृत्तः परेण बाध्यते। इहोत्सर्गापवादयोरपि समबलत्वात्। भवतात्। लोटो लङ्वत्॥
लोटो लङ इव कार्यं स्यात्। तेन तामादयः सलोपश्च। तथाहि। तस्थस्थमिपां तांतंतामः। ङितश्च तुर्णां तामादयः क्रमात्स्युः
नित्यं ङितः। सकारांतस्य ङिदुत्तमस्य नित्यं लोपः स्यात्। अलोंत्यस्येति सस्य लोपः। भवतां। भवंतु। सेर्ह्यपिच्च। लोटः से
र्हिः स्यात्सोऽपिच्च। अतो हेः। अतः परस्य हेर्लुक् सार्वधातुके। भव। भवतात्। भवतं। भवत। मेर्निः। लोटो मेर्निः स्यात्।
आडुत्तमस्य पिच्च। लोडुत्तमस्याट् आगमः स्यात् स पिच्च। हिन्योरुत्वं न। इकारोच्चारणसामर्थ्यात्। भवानि। भवाव॥ शंकर
भवाम। अनद्यतने लङ्। अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात्। लुङ्लङ्लृङ्क्ष्वडुदात्तः। एष्वंगस्याडागमः स्यात्
ङ् परे

त्र

सचोदात्तः॥ इतश्च। ङितो लकारस्य परस्मैपदमिकारांतं यत्तस्य लोपः स्यात्। अभवत्। अभवताम्। अभवन्। अभवः। अ
भवतं। अभवत। अभवं। अभवाव। अभवाम। विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्। एष्वर्थेषु द्योत्येषु वा
च्येषु वा धातोर्लिङ् स्यात्। विधिः प्रेरणं। भृत्यादेर्निकृष्टस्य प्रवर्तनं। निमंत्रणं नियोगकरणं। आवश्यके श्राद्धादौ दौहि
त्रादेः प्रवर्तनं। आमंत्रणं कामचारानुज्ञा। अधीष्टः सत्कारपूर्वको व्यापारः। प्रवर्तनायां लिङ् इत्येव सुवचं। चतुर्णां पृथगु
पादानं प्रपंचार्थं। यासुट् परस्मैपदेषूदात्तो ङिच्च। लिङः परस्मैपदानां यासुडागमः स्यात् स चोदात्तो ङिच्च। ङित्वोक्तेर्ज्ञाय
ते क्वचिदनुबंधकार्येप्यनल्विधावितिसप्रतिषेधइति। स्यादेशस्य ज्ञापनं च। शित्वमपीह लिंगं। सुट् तिथोः। लिङस्तका
रथकारयोः सुट् स्यात्। सुटा यासुट् न बाध्यते। लिङो यासुट् तकारथकारयोः सुडिति विषयभेदात्। लिङः
सलोपोऽनंत्यस्य। सार्वधातुकलिङोऽनंत्यस्य सस्य लोपः स्यात्। इति सकारद्वयस्य निवृत्तिः। सुटः श्रवणं त्वार्द्ध
लिङि। सुटस्तत्र तु तत्रात्मनेपदे। अतो येयः। अतः परस्य सार्वधातुकावयवस्य या इत्यस्य इय् स्यात्। गुणः।

यलोपः। भवेत्। सार्वधातुके किं। चिकीर्ष्यात्। मध्येऽपवादन्यायेनातो लोप एव बाध्यते। भवेदित्यादौ तु परत्वाद्दीर्घः स्यात्।
भवेतां। झेर्जुस्। लिङो झेर्जुस् स्यात्। जइत्। उस्यपदान्तात्। अपदान्तादवर्णादुसि परे पररूपमेकादेशः स्यात्। इति प्राप्ते। परत्वा
न्नित्यत्वाच्चातो येय इति प्राप्तः। यद्यप्यंतरंगत्वात्पररूपं न्याय्यं तथापि यासुट इत्येतस्य इय स्थो इत्येव व्याख्येयं। एवं च सलोप तू
स्यापवाद इयुट्। अतो येय इत्यत्र तु संधिरार्षः। भवेयुः। भवेः। भवेतम्। भवेत। भवेयं। भवेव। भवेम॥ लिङाशिषि। आशि
षि लिङ् स्तिङार्धधातुकसंज्ञः स्यात्। किदाशिषि। लिङो यासुट् कित् स्यात्। स्कोरिति सलोपः॥ क्ङिति च। कित् ङित् ङि
न्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः। भूयात्। भूयास्तां। भूयासुः। भूयाः। भूयास्तं। भूयास्त। भूयासं। भूयास्व। भूयास्म। लु
ङ्। भूतेऽर्थे धातोर्लुङ् स्यात्। माङि लुङ्। सर्वलकारापवादः। स्मोत्तरे लङ् च॥ स्मोत्तरे माङि लङ् स्याल्लुङ् च। च्लि लुङि। च्लाव
ध्यपवादः। च्लेः सिच्। इचावितौ। गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु। एभ्यो सिचो लुक्। गापाविहेणादेशापिबती ग्र
ह्येते॥ भूसुवोस्तिङि। भूसुवोः एतयोः सार्वधातुके तिङि परे गुणो न स्यात्। अस्तिसिचोपृक्ते। सिचश्च अस्तेश्चेति समाहारद्वंद्वः। ४

सिच्छब्दस्य सोत्रं भवं। अस्तीत्यव्ययेन कर्मधारयः। ततः पंचम्याः सोत्रो लुक्। विद्यमानात्सिचोस्तेश्च परस्यापृक्तस्य
हल ईडागमः स्यात्॥ इति ईण्नेह। सिचो लुप्तत्वात्॥ अभूत्। हलः किं। रेधिषि॥ अभूतां। सिजभ्यस्तविदिभ्यश्च। सि
चोभ्यस्ताद्विदेश्च परस्य ङित्संबंधिनो झेर्जुस् स्यात्। इति प्राप्ते। आतः। सिजि लुकि आदंतादेव झेर्जुस् स्यात्। अभूव
अभूम न्। अभूः। अभूतं। अभूत। अभूवं। अभूव। न माङ्योगे। अडाटौ न स्तः। मा भवान् भूत्। मा स्म भवत्। मा स्म भूत्। लिङ्
निमित्ते लृङ् क्रियातिपत्तौ॥ हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमा
नायां अभविष्यत् अभविष्यतां। अभविष्यन्। अभविष्यः। अभविष्यतं। अभविष्यत॥ अभविष्यम्। अभविष्या
व। अभविष्याम। ते प्राग्धातोः। ते गत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्याः। आनि लोट्॥ उपसर्गस्थान्निमित्तात्परस्य लो
डादेशस्य आनीत्यस्य नस्य णः स्यात्॥ प्रभवाणि। दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः। दुःस्थितिः। दुर्भवा
नि। अंतःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यं। अंतर्धा॥ अंतर्धिः। अंतर्भवाणि॥ शेषे विभाषाकखादावषां

सि॰ कौ॰ ति॰ तउपदेशे। उपदेशेकादिखादिषांतवर्जेगदनदद्दादेरस्मिन्धातौपरेउपसर्गस्थान्निमित्तात्परस्यनेर्णत्वंवास्यात्॥ प्रणि
भवति। प्रनिभवति॥ इहोपसर्गाणामसत्त्वेपिसंहितानित्या॥ तदुक्तं॥ संहितैकपदेनित्यानित्याधातूपसर्गयोः॥ नि
त्यासमासेवाक्येतुसाविवक्षामपेक्षतइति॥ सत्ताद्यर्थनिर्देशउपलक्षणं॥ यागात्स्वर्गोभवतीतीत्यादावुत्पद्य
तइत्याद्यर्थात्॥ उपसर्गास्त्वर्थविशेषस्यद्योतकाः। प्रभवति। पराभवति। संभवति॥ अनुभवति। अभिभव
ति॥ उद्भवति॥ परिभवतीत्यत्रविलक्षणार्थावगतेः॥ उपसर्गेणधात्वर्थोबलादन्यत्रनीयते॥ प्रहाराहारसंहारवि
हारपरिहारवत्॥१॥ इति॥ एधवृद्धौ॥ कृत्यंताः षट्त्रिंशदनुदात्तेतः॥ टितआत्मनेपदानांटेरे॥ टितोलस्यात्मनेपदानां
टेरेत्वंस्यात्॥ एधते। सार्वधातुकमपित्॥ अपित्सार्वधातुकंङिद्वत्स्यात्॥ आतोङितः। अतःपरस्यङितामाकारस्य
इय्स्यात्॥ एधेते। एधंते। थासस्से। टितोलस्यथासःसेस्यात्। एधसे। एधेथे। एधध्वे। अतोगुणे। एधे। एधावहे
एधामहे। इजादेश्चगुरुमतोनृच्छः॥ इजादिर्योधातुर्गुरुमानृच्छत्यन्यस्ततआमस्याल्लिटि। आमोमकारस्य ६

नेत्वं ॥ आसकासोराम्विधानात्ज्ञापकात् ॥ आमः ॥ आमः परस्य लुक् स्यात् ॥ कृञ्चानुप्रयुज्यते लिटि ॥ आमंतात् लिट्पराः कृ
भ्वस्तयोऽनुप्रयुज्यंते ॥ आम्प्रत्ययवत्कृञोऽनुप्रयोगस्येति सूत्रे कृञ्ग्रहणसामर्थ्या दनुप्रयोगोन्यस्यापीति ज्ञायते ।
तेन कृभ्वस्तियोगः कृञो द्वितीयेति सूत्रे ञकारेण प्रत्याहाराश्रयणात् कृभ्वस्तिलाभः ॥ तेषां क्रियासामान्यवाचित्वादाम्प्र
कृतीनां विशेषवाचित्वात्तदर्थयोरभेदान्वयः । संपदिस्तु प्रत्याहारेंतर्भूतोप्यनन्वितार्थत्वान्न प्रयुज्यते ॥ कृञस्तु क्रिया
फले परगामिनि परस्मैपदं मा भे ॥ आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य ॥ आम्प्रत्ययो यस्मादित्यतद्गुणसंवि
ज्ञानबहुव्रीहिः ॥ आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात्कृञोप्यात्मनेपदं स्यात् ॥ इह पूर्ववदित्यत्र तृतीयावाक्यभेदेन संब नु
ध्यते ॥ पूर्ववदेवात्मनेपदं न तु तद्विपरीतमिति ॥ तेन कर्तृगेपि क्रियाफले उद्वांचकारेत्यादौ न तङ् ॥ लिटस्तझयो
रेशिरेच् ॥ लिडादेशयोस्तझयोरेशइरेचौ एतौ स्तः । एकारोच्चारणं ज्ञापकं । तङादेशानां टेरेत्वं नेति ॥ तेन ड्योरेरसा
नांत ॥ इरइति च्छिन्ने ॥ असंयोगाल्लिट् कित् ॥ असंयोगात्परोपि लिट् कित् स्यात् । क्ङिति चेति निषेधात्सार्व

सि॰कौ॰नि॰ धातुकार्धधातुकयोरितिगुणोन॥ द्वित्वात्परत्वाद्यणि प्राप्ते॥ द्विर्वचनेचि॥ द्वित्वनिमित्तेअचिपरेअचआदेशोनस्या
द्द्वित्वेकर्त्तव्ये।उरत्।अभ्यासस्यऋवर्णस्यअत्स्यात्प्रत्ययेपरे।रपरत्वं।हलादिःशेषः।प्रत्ययेकिं।चक्रुश्च॥कुहो
धांच श्चुः।अभ्यासकवर्गहकारयोश्चवर्गादेशःस्यात्॥एधांचक्रे।एधांचक्राते।एधांचक्रिरे॥एकाचउपदेशेनुदात्तात्।उपदेशे रा
योधातुरेकाच्अनुदात्तश्चवलादेःस्यात्ततःपरस्यार्धधातुकस्येण्नस्यात्॥उपदेशइत्युक्तेरन्वयि।एकाचइतिकिं।
रा यऊर्णुञ्व्याप्तौर्थथास्यात्॥स्मरंतिहि।तिपाशपानुबंधेननिर्दिष्टंयद्गणेनच।यत्रैकाज्ग्रहणंचैवपंचैतानिनयङ्
लुकीति॥एतस्मैहवैकाज्ग्रहणेनज्ञाप्यते॥अनुवृत्त्यैवैकत्वविवक्षयातद्वतोग्रहणेनचसिद्धेएकग्रहणसामर्थ्यादनेका
च्कोपदेशोव्याव्यर्त्यते॥तेनवधेरीत्यकृपदेरेकाचोपिननिषेधः।आदेशोपदेशोऽनेकाच्त्वात्॥अनुदात्ताभ्यानुपदमे
वसंगृहीष्यंते।एधांचकृषे।एधांचक्राथे।इणःषीध्वंलुङ्लिटांधोंगात्॥इणंतादंगात्परेषांषीध्वंलुङ्लिटोंधस्यमू ६
र्धन्यादेशःस्यात्।एधांचकृढ्वे।एधांचक्रे।एधांचकृवहे।एधांचकृमहे।एधांबभूव।इत्यादि।अनुप्रयोगसाम

स

र्थादस्तेर्भूभावो न॥ अन्वयादिकृञ्चानुप्रयुज्यते इति कविर्वा ब्रूयात्। अत आदेः। अभ्यासस्यादेरतो दीर्घः स्यात्॥ पर
रूपापवादः। एधामास। एधामासतुरित्यादि। एधिता। एधितारौ। एधितारः। एधितासे। एधितासाथे। धि च। धादौ प्रत्य
यपरे सलोपः स्यात्। एधिताध्वे। ह एति। तासस्त्योः सस्य हः स्यात् एति परे। एधिताहे। एधितास्वहे। एधितास्महे॥
एधिष्यते। एधिष्येते। एधिष्यंते॥ इत्यादि॥ आमेतः॥ लोट् एकारस्य आम् स्यात्। एधतां। एधेतां। एधंतां। सवाभ्यां वामौ। सवाभ्यां
परस्य लोडेतः क्रमाद्व अम् एतौ स्तः। एधस्व॥ एधेथां। एधध्वं॥ एत ऐ॥ लोडुत्तमस्य एत ऐ स्यात् आमोऽपवादः॥ एधै॥ एधावहै॥ ए
धामहै॥ आडजादीनां॥ अजादीनामाट् स्याल्लुङादिषु॥ अटोऽपवादः॥ आटश्च॥ ऐधत। ऐधेतां। ऐधंत॥ ऐधथाः। ऐधेथां॥ ऐधध्वं
ऐधे। ऐधावहि॥ ऐधामहि॥ लिङः सीयुट्॥ लिङादेशानां सीयुडागमः स्यादात्मनेपदे॥ सलोपः॥ एधेत। एधेयातां। ~~एधेरन्~~
झस्य रन्॥ लिङो झस्य रन् स्यात्॥ एधेरन्। एधेथाः। एधेयाथाम्॥ एधेध्वम्॥ इटोऽत्॥ लिङादेशस्य इटोऽत् स्यात्॥ एधेय॥ एधे
वहि॥ एधेमहि॥ आशीर्लिङि। आर्धधातुकत्वात् लिङः सलोपो न॥ सीयुट्सुटोः प्रत्ययावयवत्वात् षत्वं॥ एधिषीष्ट। एधि
षीयास्तां। एधिषीरन्। एधिषीष्ठाः॥ एधिषीयास्थाम्॥ एधिषीढ्वं। एधिषीय॥ एधिषीवहि॥ एधिषीमहि॥ ऐधिष्ट। ऐधि

षातां ॥ आत्मनेपदेष्वनतः ॥ अनकारात्परस्यात्मनेपदस्यँ अत इत्यादेशः स्यात् ॥ ऐधिषत ॥ ऐधिष्ठाः ॥ ऐधिषाथाम् ॥ इणः षीध्वं झस्य
लुङ्लिटां धोऽङ्गात् ॥ इण्णन्तादङ्गात्परेषां ॥ ऐधिढ्वं ॥ इङ्किन्न एव इ[ण्] ग्रृह्यते इति मतेन ॥ ऐधिध्वम् ॥ दधयोर्धस्य मस्य न द्वित्ववि-
कल्पात्षोडशरूपाणि ॥ ऐधिषि । ऐधिष्वहि ॥ ऐधिष्महि ॥ ऐधिष्यत । ऐधिष्येतां । ऐधिष्यंत ॥ ऐधिष्यथाः ॥ ऐधिष्येथां । ऐधि-
ष्यध्वम् । ऐधिष्ये । ऐधिष्यावहि ॥ ऐधिष्यामहि ॥ उदात्तत्वादिडादेरिट् ॥ प्रसंगादनुदात्ताः संगृह्यंते ॥ ऊदृदंतैर्यौतिरुक्ष्णु-
शीङ्स्नुनुक्षुश्विडीङ्श्रिभिः । वृङ्वृञ्भ्यां च विनैकाचोऽजंतेषु निहताः स्मृताः ॥ १ ॥ शक्लृपच्मुच्रिच्वच्विच्सिच्प्रच्छित्यज्-
निजिर्भजः ॥ भंज्भुज्भ्रस्ज्मस्जियज्युज्रुज्रंज्विजिर्स्वंजिसंज्सृजः ॥ २ ॥ अद्क्षुद्खिद्छिद्तुदिनुदः पद्यभिद्विद्यतिर्वि-
नद् । शद्सदीस्विद्यतिः स्कंदिहदी क्रुध्क्षुधिबुध्यती ॥ ३ ॥ बंधिर्युधिरुधी राधिव्यधशुधः साधिसिध्यती ॥ मन्यहन्ना
प्क्षिप्छुप्तप्तिपस्तृप्यतिदृप्यती ४ [illegible] लिप्लुप्वप्शप्स्वप्सृपि यभ्रभ्लभ्गम्नम्यमो रमिः ॥ क्रुशिर्दंशिदिशि-
दृश्मृश्रिश्रुश्लिश्विशस्पृशः कृषिः ॥ ५ ॥ त्विषतुषद्विषदुष्पुष्यपिष्विष्शिष्शुष्श्लिष्यतयो घसिः ॥ वसतिर्दहदिहि-
घू मुन

गदाशि

दुहोनस्निहुरुहुलिहुवहिस्तथा ८ अनुदात्ताहलंतेषुधातवोद्व्यधिकंशतं ॥ तुदादौसतभेदेनास्छितोयोनचुरादिषु ॥ ७ ॥
तपदपौतौवारयितुंश्यनानिर्देशआहतः ॥ किंच ॥ स्विद्यपद्यौसिध्यबुध्यौमन्यपुष्यश्लिषः श्यना ९ वसिः शपालुकायो
तिनिर्दिष्टोन्यनिवृत्तये निजिर्विजिरःशाकृइतिसानुबंधाअमीतथा ॥ ९ ॥ विंदतिश्चांद्रदौर्गादेरिष्टोभाष्येपिदृश्यते ॥ व्या
घ्रभूत्यादयस्त्वेनंनेहपेठुरितिस्थितं १० रंजिमस्जीअदिपदीतुदक्षुद्रशःषिपुषीशिषिः ॥ भाष्यानुक्तानचेहोक्ताव्याघ्र
भूत्यादिसंमतेः ॥ ११ ॥ स्पर्धसंघर्षे ॥ संघर्षःपराभिभवेच्छा ॥ धात्वर्थेनोपसंगृहीतादकर्मकः । स्पर्धते । शर्पूर्वाःखयः ॥
अभ्यासस्यशर्पूर्वाःखयःशिष्यंते ॥ हलादिःशेषइत्यस्यापवादः ॥ पस्पर्धे ॥ स्पर्धिता ॥ स्पर्धिष्यते ॥ स्पर्धतां । अस्पर्धत ॥
स्पर्धेत ॥ स्पर्धिषीष्ट ॥ अस्पर्धिष्ट ॥ अस्पर्धिष्यत इति ॥ ३ ॥ गाधृप्रतिष्ठालिप्सयोर्ग्रंथेच ॥ गाधते । जगाधे ॥ ४ ॥ बाधृलोड
ताप ने । लोडनंप्रतिघातः ॥ बाधते । ५ ॥ नाथृनाधृयाच्ञोपऐश्वर्याशीःषु ॥ आशिषिनाथइतिवाच्यं ॥ अस्याशिष्येवात्मनेपदं
स्यात् । नाथते । अन्यत्रनाथति । नाधते ॥ ७ ॥ दधधारणे ॥ दधते ॥ अतएकहल्मध्येनादेशादेर्लिटि ॥ लिण्निमित्तादेशा

द्विकं न भवति यदं गं तदव यवस्या संयुक्तहल्मध्यस्थस्याकारस्य एकारः स्यादभ्यासलोपश्चाकिति टि लि ॥ थलि च सेटि ॥
आगुक्तं स्यात् ॥ आदेशश्चेह वैरूप्यसंपादक एवाश्रीयते। शसिदद्योः प्रतिषेधवचनाज्ज्ञापकात् ॥ तेन प्रकृतिजश्वरांतेषु
सत्स्वपि एत्वाभ्यासलोपौ स्त एव ॥ देधे। देधाते। देधिरे ॥ अतः किं। दिदिवतुः ॥ तपरः किं। ररासे ॥ एकेत्यादि किं। तत
रतुः। अनादेशादेः किं ॥ चकयातुः। लिट आदेशविशेषणादिह स्यादेव ॥ नेमिथ ॥ सेहे ॥ ८ ॥ स्कुदि आप्रवणे ॥ आप्रव
णमुत्प्लवनमुत्सरणं च। इदितो नुम् धातोः ॥ स्कुंदते। चुस्कुंदे ॥ ९ ॥ श्विदि श्वैत्ये ॥ अकर्मकः ॥ श्विंदते। शिश्विंदे ॥ १०
वदि अभिवादनस्तुत्योः ॥ वंदते। ववंदे ॥ ११ ॥ भदि कल्याणे सुखे च ॥ भंदते। बभंदे ॥ १२ ॥ मदि स्तुतिमोदमदस्वप्न
कांतिगतिषु ॥ मंदते। ममंदे ॥ १३ ॥ स्पदि किंचिच्चलने। स्पंदते। पस्पंदे। १४ ॥ क्लिदि परिदेवने। शोक इत्यर्थः। सक
र्मकः ॥ क्लिंदते चैत्रं। चिक्लिंदे ॥ १५ ॥ मुद हर्षे। मोदते। मुमुदे ॥ १६ ॥ दद दाने ॥ ददते ॥ न शसददवादिगुणानां। शसेर्द
देर्वकारादीनां गुणशब्देन भावितस्य च योऽकारस्तस्य एत्वाभ्यासलोपौ न ॥ दददे ॥ ददाते ॥ दददिरे। १७ ॥ ष्वदस्व द ८

सि॰कौ॰ति॰ परस्मैपदिनः॥ अत सातत्यगमने॥ अतति। अत आदेः। आत। आततुः। आतुः। लुङि। आतिसुई दिं स्थिते। इट ईटि॥ इटः ति
परस्य सस्य लोपः स्यादीटि परे॥ सिचो लोप एकादेशे सिद्धो वाच्यः। आतीत्। आतिष्टां। आतिषुः। २॥ वदव्रजहलन्तस्या
चः॥ वदेर्व्रजेर्हलन्तस्य चाचः स्थाने वृद्धिः स्यात्परस्मैपदेषु॥ इति प्राप्ते। नेटि। इडादौ सिचि प्रागुक्तं न स्यात्॥ मा भवा
न् अतीत्॥ अतिष्टां। अतिषुः॥ चिती संज्ञाने। चेतति। चिचेत। अचेतीत्। अचेतिष्टाम्॥ अचेतिषुः॥ ३८॥ च्युतिर् आसेचने
आसेचनं आर्द्रीकरणं॥ आङ् ईषदर्थे अभिव्याप्तौ च॥ इर् इत्संज्ञा वाच्या॥ च्योतति। चुच्योत। इरितो वा। इरितो धातोश्च्ले
रङ् वा स्यात्परस्मैपदे परे॥ अच्युतत्। अच्योतीत्॥ ३९॥ श्च्युतिर् क्षरणे॥ श्च्योतति। चुश्च्योत। अश्च्युतत्। अश्च्योती
त्। यकाररहितोप्ययं॥ श्चोतति॥ ४०॥ मन्थ विलोडने॥ यासुटः कित्वादनिदितामिति नलोपः। मथ्यात्। ४१॥ कुथि
पुथि लुथि मथि मन्थ हिंसासंक्लेशनयोः। इदित्वान्न लोपो न। कुंथ्यात्॥ ४६॥ षिध गत्यां। सेधति। सिषेध॥ सेधि
ता। सिधिष्यति। सेधतु। असेधत्। सेधेत्। सिध्यात्। असेधीत्॥ सात्पदाद्योरिति निषेधे प्राप्ते। उपसर्गात्सुनो

ति सुवति स्यति स्तौति स्तोभति स्थासेनयसेधसिचसञ्जस्वञ्जां॥ उपसर्गस्थान्निमित्तादेषां सस्य षः स्यात्॥ स
दिरप्रतेः। प्रतिभिन्नादुपसर्गात्सदेः सस्य षः स्यात्॥ स्तम्भेः। स्तम्भेः सौत्रस्य सस्य षः स्यात्॥ सदिरप्रतेः। योगवि ति
भाग उत्तरार्थः। किंच। अप्रतेरिति नानुवर्तते॥ बाढं प्रतिष्टंभ विष्टब्धमस्तु॥ अवाच्चालंबनाविदूर्ययोः॥ अवात्स्तं
भेरेतयोरर्थयोः षत्वं स्यात्॥ वेश्च स्वनो भोजने॥ व्यवाभ्यां स्वनतेः षः स्यात् भोजने॥ परिनिविभ्यः सेवसितसय
सह सिवुसहसुट्स्तुस्वञ्जां॥ परिनिविभ्यः परेषामेषां सस्य षः स्यात्॥ निषेधति॥ प्राक्सितादड्व्यवायेपि॥ स्यात्॥ न्यषे
धीत्॥ न्यषेधिष्यत्॥ सेवसितेत्यत्र सितशब्दात्प्रागये सुनोत्यादयस्तेषामड्व्यवायेपि षत्वं स्यात्॥ न्यषेधीत्॥ न्यषेधिष्यत्॥
स्थादिष्वभ्यासेन चाभ्यासस्य॥ प्राक्सितात्स्थादिष्वभ्यासेन व्यवायेपि षत्वं स्यात् एषामेव चाभ्यासस्य न तु सुनोत्यादीनाम्॥
निषिषेध। निषिषिधतुः। निषिषिधुः। सेधतेर्गतौ॥ गत्यर्थस्य सेधतेः षत्वं न स्यात्॥ गंगां विसेधति॥ ४७॥ षिधू शास्त्रे मां

गल्येच॥शास्त्रंशासनं॥स्वरतिसूतिसूयतिधूञूदितोवा॥स्वरत्यादेरूदितश्चपरस्यवलादेरार्धधातुकस्येड्वास्यात्॥झषस्त
थोर्धोधः॥झषःपरयोस्तथयोर्धःस्यान्नतुदधातेः॥जघ्रस्त्वं॥सिषेद्ध।सिषेधिथ॥सेद्धा।सेधिता॥सेत्स्यति।सेधिष्यति॥
असैत्सीत्॥झलोझलि॥झलःपरस्यसस्यलोपःस्याज्झलि॥असैद्धां।असैत्सुः॥असैत्सीः॥असैद्धं।असैद्ध।असैत्सं
असैत्स्व।असैत्स्म॥पक्षे।असेधीत्।असेधिष्टामित्यादि॥४८॥खादृभक्षणे।ऋकारइत्।खादति।४९॥खदस्थैर्येहिंसा
यांच।चाद्भक्षणे॥स्थैर्येऽकर्मकः।खदति।अतउपधायाः।उपधायाअतोवृद्धिःस्यात्ञितिणितिचप्रत्ययेपरे॥चखाद॥ण
लुत्तमोवा॥उत्तमोणल्वाणित्स्यात्।चखाद।चखद॥अतोहलादेर्लघोः।हलादेर्लघोरकारस्यइडादौपरस्मैपदेसिचिवृ
द्धिर्वास्यात्।अखादीत्।अखदीत्॥५०॥बदस्थैर्ये।पवर्गीयादिः।बदति।बबाद॥बेदतुः।बेदिथ।बबाद।बबद।अबादीत्॥
अबदीत्॥५१॥गदव्यक्तायांवाचि।नेर्गदनदपतपदघुमास्यतिहंतियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोति
देग्धिषुच॥उपसर्गस्थान्निमित्तात्परस्यनेर्णःस्याद्गदादिषुपरेषु।प्रणिगदति।जगाद॥५२॥रदविलेखने।विलेखनं॥ १०

ईआस्वादने।अयमनुभवेसकर्मकः॥रुचावकर्मकः॥धात्वादेःषःसः।धातोरादेःषस्यसःस्यात्॥सात्पदाद्योरितिषत्वनिषे
धः।अनुस्वदते॥अनुसस्वदे॥स्वर्दते।सस्वर्दे॥१८॥उर्दमानेक्रीडायांच।उपधायांच।धातोरुपधाभूतयोरेफवकारयोर्ह
ल्परयोःपरतइकोदीर्घःस्यात्।ऊर्दते।ऊर्दांचक्रे॥१९॥कुर्दखुर्दगुर्दगुदक्रीडायामेव॥कूर्दते।चुकूर्दे॥खूर्दते।गूर्दते॥२२॥
गोदते।जुगुदे॥२३॥षूदक्षरणे॥सूदते।सुषूदे॥सेक्सृप्सृस्तृसृजस्तृस्त्यान्येदंत्यादंत्यसादयः॥एकाचःषोपदेशाः
ष्मङ्।स्विदस्वदस्वंदस्वंजस्वपःस्मिङः।दंत्यःकेवलदंत्यः।नतुदंतोष्ठजोपि॥ष्वष्कादीनांपृथग्ग्रहणात्॥२४॥ह्रादअ
व्यक्तेशब्दे।ह्रादते॥जह्रादे॥२५॥ह्लादीसुखेच।चादव्यक्तेशब्दे॥ह्लादते।जह्लादे॥२६॥स्वादआस्वादने॥स्वाद
ते।२७॥पर्दकुत्सितेशब्दे।गुदरवेत्यर्थः।पर्दते।२८॥यतीप्रयत्ने।यतते।येते॥२९॥युतृजुतृभासने।योतते॥यु
युते॥जोतते।जुजुते॥३१॥विथृवेथृयाचने।वेथते।विविथे॥वेथते।विवेथे॥३३॥श्रथिशैथिल्ये।श्रंथते॥३४॥
ग्रथिकौटिल्ये।ग्रंथते॥३५॥कत्थश्लाघायां॥कत्थते।एधादयोअनुदात्तेतोगताः॥ ॥अथाष्टत्रिंशत्तवर्गीयांताः। थां

सि०कौ०ति० दयः पंचैतेन तिङ्विषयाः॥ इति काश्यपः। अन्ये तु तिङमपीच्छंति॥ णिदि कुत्सायां॥ निंदति॥ प्रणिंदति॥ ६७॥ टुनदि समृ
द्धौ॥ आदिर्ञिटुडवः॥ उपदेशे धातोराद्या एते इतः स्युः॥ नंदति॥ इदित्वान्नलोपो न॥ नंद्यात्॥ ६८॥ चदि आह्लादे॥ चचंद॥ ६९
त्रदि चेष्टायां॥ तत्रंद॥ ७०॥ कदि क्रदि क्लदि आह्वाने रोदने च॥ चकंद। चक्रंद॥ चक्लंद॥ ७३॥ क्लिदि परिदेवने। चिक्लिंद॥ ७४
शुंध शुद्धौ। शुशुंध। नलोपः। शुध्यात्॥ ७५॥ अथ कवर्गीयांता अनुदात्तेतो द्विचत्वारिंशत्॥ ॥शीकृ सेचने। ताल
व्यादिः॥ दंत्यादिरित्येके॥ शीकते। शिशीके। अशीकिष्ट॥ ७६॥ लोकृ दर्शने॥ लोकते। लुलोके॥ ७७॥ श्लोकृ संघाते॥
संघातो ग्रंथः। सचेह ग्रंथ्यमानस्य व्यापारो ग्रंथकर्तुर्वा॥ आद्येऽकर्मको द्वितीये सकर्मकः॥ श्लोकते॥ ७८॥ द्रेकृ ध्रे
कृ शब्दोत्साहयोः। उत्साहो वृद्धिरौद्धत्यं च॥ दिद्रेके॥ ८०॥ रेकृ शंकायां। रेकते॥ ८१॥ सेकृ स्रेकृ स्रकि श्रकि श्लकि
गतौ॥ त्रयो दंत्यादयः। द्वौ तालव्यादी। अषोपदेशत्वान्न षः। सिसेके॥ ८६॥ शकि शंकायां॥ शंकते। शशंके॥ ८७॥

अकि लक्षणे। अंकते। आनंके॥ ८८॥ वकि कौटिल्ये॥ वंकते। ८९॥ मकि मंडने॥ मकंते॥ ९०॥ कक लौल्ये। लौल्यं गर्वश्चापल्यं
च।ककते। चकके॥ ९१॥ कुक वृक आदाने॥ कोकते। चुकुके। वर्कते। ववृके॥ कित्वं पथेभ्यो लिटः किन्वं गुणात्पूर्वविप्रतिषेधेन॥
॥ ९३॥ चकतृप्तौ प्रतीघाते च॥ चकते। चेके॥ ९४॥ ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ तिकृ तीकृ रघि लघि
बृ गत्यर्थाः॥ कंकते। डुढौके। तुत्रौके॥ सस्थानत्वं ष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः॥ ष्वष्कते। अत्र तृतीयो दंत्यादिरित्येके॥ ल
घिर्भोजननिवृत्तावपि॥ १०८॥ अघि वघि मघि गत्याक्षेपे। आक्षेपो निंदा॥ गतौ गत्यारंभे चेत्यन्ये। अंघते। आनंघे॥ वंघ
ते। मंघते। मघि कैतवे च॥ १०११॥ राघृ लाघृ द्राघृ सामर्थ्ये॥ राघते॥ ध्राघृ इत्यपि केचित्॥ द्राघृ आयामे च॥ ११६॥ श्लाघृ क
त्थने॥ श्लाघते॥ ११७॥ अथ परस्मैपदिनः पंचाशत्॥ ॥फक्क नीचैर्गतौ। नीचैर्गतिर्मंदगमनं। असद्व्यवहारश्च॥ फक्कति॥
तक हसने। तकति। तकि कृच्छ्रजीवने। तंकति। बुक्क भषणे। भषणं श्वरवः। बुक्कति। कख हसने। प्रनिकखति॥ ओखृ
राखृ लाखृ द्राखृ ध्राखृ शोषणालमर्थयोः॥ शाखृ श्लाखृ व्याप्तौ॥ शाखति॥ उख उखि वख वखि मख मखि णख

णखिरखिरखिलखलखिडुखडुखिडुखचल्लारगिलगि अगिवगिमगितगित्वगिश्रगिश्लगिइगिरिगिलिगिगत्यर्थाः
॥ द्वितीयांताः पंचदश तृतीयांतास्त्रयोदश। इह खांतेषु रिखत्रखत्रिखिशिखि इत्यपि चतुरः केचित्पठंति॥ अभ्या
सस्यासवर्णे॥ अभ्यासस्य वर्णो वर्णयोरियङुवङौ स्तोऽसवर्णेऽचि॥ उवोख। संनिपातपरिभाषयाऽजादेरित्याम्
न॥ उखतुः॥ ऊखुः॥ इह सवर्णदीर्घस्याभ्यासेन ग्रहणात् ह्रस्वः प्राप्तो न भवति॥ सकृत्प्रवृत्तत्वात्॥ आंगत्वाद्धि पर्जन्यवल्ल
ण क्षणप्रवृत्त्याऽकृतेऽपि कृतेन तस्तो दीर्घः॥ वारणादांगं बलीय इति न्यायात्। परत्वाच्च। उंखति। ववखतुः॥ वंखति। मेखतुः॥ व
गि कंपने च। युगि जुगि वुगि वर्जने॥ युंगति॥ घघ हसने। घघति। जघाघ॥ मघि मंडने॥ मंघति॥ शिघि आघ्राणे॥ शिं
घति॥ अथ चवर्गीयांताः॥ तत्रानुदात्तेत एकविंशतिः॥ वर्च दीप्तौ॥ वर्चते। षच सेचने सेवने च। सचते। सेचे॥ लोचृ दर्श
ने॥ लोचते। लुलोचे॥ शच व्यक्तायां वाचि॥ शेचे। श्वच श्वचि गतौ॥ श्वचते। श्वंचते॥ कच बंधने॥ चकचे। कचि काचि
दीप्तिबंधनयोः॥ चकंचे। चकांचे॥ मच मुचि कल्कने। कल्कनं दंभः॥ कत्थनमित्यन्ये॥ मेचे। ममुंचे॥ मचि धारणोछ्र ३२

मेदनं॥ रराद। ५३॥ णद अव्यक्ते शब्दे॥ णोनः। धातोरादेर्णस्य नः स्यात्॥ णोपदेशास्त्वनर्द्दनाटिनाथ्नाध्नंदनक्कनृनृतः॥ नादेर्दीर्घाहे
स्य पर्युदासात् घटादिर्णोपदेश एव। तवर्गचतुर्थांतनाधतेर्नृनं ध्योष्वके चिणोपदेशतामाहुः॥ उपसर्गादसमासेऽपिणोप
देशस्य॥ उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात्समासेऽसमासेऽपि॥ प्रणदति॥ प्रणिनदति॥ ५४॥
अर्द गतौ याचने च॥ अत आदेः। तस्मान्नुड् द्विहलः। द्विहलो धातोर्दीर्घीभूतादकारात्परस्य नुट् स्यात्॥ आनर्द। आर्दीत्॥
नर्द गर्द शब्दे। णोपदेशत्वाभावान्न णः। प्रनर्दति॥ ५६॥ गर्दति। जगर्द। तर्द हिंसायां। तर्दति॥ ५७॥ कर्द कुत्सिते शब्दे। कु
त्सिते कोष्ठे। कर्दति॥ ५९॥ खर्द दंदशूके। दंशहिंसादिरूपायां दंदशूकक्रियायामित्यर्थः॥ खर्दति। चखर्द। ६०॥ अति अ
दि बंधने। अंतति। आनंत। ६१॥ अंदति। आनंद॥ ६२॥ इदि परमैश्वर्ये॥ इंदति। इंदांचकार। ऐंदीत्॥ ६३॥ बिदि अवयवे
पवर्गीयादिः। बिंदति। अवयवं करोतीत्यर्थः॥ ६४॥ भिदीति पाठांतरं॥ ६५॥ गडि वदनैकदेशे। गंडति। ६६॥ अत्या

यभूजनेषु॥ममंचे।पचिव्यक्तीकरणे।पंचते।ष्टुच प्रसादे।स्तोचते।तुष्टुचे।ऋज गतिस्थानार्जनोपार्जनेषु॥अर्जते॥तु
तुर्विर्थौकारेकदेशोरेफोहल्त्वेन गृह्यते॥तेन द्विहल्त्वान्नुट्॥आनृजे॥ऋजि भर्जने॥ऋंजते।उपसर्गादृतीतिवृद्धिः॥प्रा ऋजी
र्जते।ऋंजांचक्रे।आर्ञ्जिष्ट।भर्जते।बभृजे॥अभर्जिष्ट।एजृ भ्रेजृ दीप्तौ भ्राजृ।एजांचक्रे।ईज गतिकुत्सनयोः।ईजांचक्रे।
अथ द्विसप्ततिर्व्रज्यंताः परस्मैपदिनः।शुच शोके॥शोचति॥कुच शब्दे तारे॥कोचति॥कुंच क्रुंच कौटिल्याल्पीभावयोः।
ताभि अनिदितांनलोपः।कुच्यात्।क्रुच्यात्।लुंच अपनयने।लुंचति॥अंचु गतिपूजनयोः॥अंचति।अच्यात्।गतौनलोपः।
पूजां [illegible] यांतु॥नांचेः पूजायां॥अंच्यात्।वंचु चंचु तंचु त्वंचु म्रुंचु म्लुंचु म्रुचु म्लुचु गत्यर्थाः॥वच्यात्॥चच्यात्।तच्यात्॥त्वच्या
त्॥अम्रुंचीत्।अम्लुंचीत्।जृस्तंभु म्रुचु म्लुचु ग्रुचु ग्लुचु ग्लुंचु श्विभ्यश्च॥एभ्यश्च्लेरङ्वास्यात्।अम्रुचत्।अम्रोचीत्॥अ
म्लुचत्॥अम्लोचीत्॥ग्रुचु ग्लुचु कुजु खुजु स्तेयकरणे॥जुग्रोच।अग्रुचत्॥अग्रोचीत्॥अग्लोचीत्।अग्लुचत्॥अग्लो

सि०कौ०ति चीत्। अकोजीत्। अखोजीत्। ग्लुंचु षस्ज गतौ। अट्। अग्लुचत्। अग्लुंचीत्॥ सस्यश्चुत्वेन शः। जश्त्वेन जः। सज्जति। ससज्ज
अयमात्मनेपद्यपि। सज्जते। गुजि अव्यक्ते शब्दे। गुंजति। गुंज्यात्॥ अर्च पूजायां। आनर्च॥ म्लेछ अव्यक्ते शब्दे। अस्फुटे अप
शब्दे चेत्यर्थः॥ म्लेछति॥ मिम्लेछ। लच्छ लाच्छि लक्षणे॥ ललच्छ। ललांच्छ। वाच्छि इच्छायां। वाञ्छति। आछि आयामे॥ आं
त्म छति। अत आदेः। इति तपरकरणं स्वाभाविकह्रस्वपरिग्रहार्थं। तेन दीर्घाभावान्न नुट्॥ आंछ। तपरकरणं सुखमुखा
र्थमिति मते तु पक्षे नुट्। आनांछ॥ ह्रीछ लज्जायाम्॥ जिह्रीछ। हुर्छा कौटिल्ये॥ कौटिल्यमपसरणमिति मैत्रेयः॥ उप
धायां चेति दीर्घः॥ हूर्छति। मुर्छा मोहसमुच्छ्राययोः॥ स्फुर्छा विस्तृतौ॥ स्फूर्छति॥ युछ प्रमादे॥ युछति॥ उछि उंछे॥
उंछः कणश आदानं कणिशाद्यर्जनं शिलमिति यादवः॥ उंछति। उंछांचकार। उछी विवासे॥ विवासः समाप्तिः।
प्रायेणायं विपूर्वः। व्युच्छति। ध्रज ध्रजि धृज धृजि ध्वज ध्वजि गतौ। ध्रजति। ध्रंजति। धर्जति। धृंजति। ध्वजति। ध्वंज
ति। कूज अव्यक्ते शब्दे। चुकूज। अर्ज षर्ज अर्जने॥ अर्जति। आनर्ज॥ सर्जति। ससर्ज। गर्ज शब्दे। गर्जति। तर्ज भर्त्सने ३३

नर्जति॥ कर्ज व्यथने॥ खर्ज पूजने। चखर्ज। चकर्ज। अज गतिक्षेपणयोः॥ अजति। अजेर्व्यघञपोः॥ अजेर्वी इत्ययमादेशः स्यादा
र्धधातुकविषये घञमपं च वर्जयित्वा॥ वलादावार्धधातुके वेष्यते॥ विवाय। विव्यतुः। अत्र वकारस्य हल्परत्वादुपधायां चेति दीर्घे
प्राप्ते। अचः परस्मिन्निति स्थानिवद्भावेनाच्परत्वं॥ न च न पदान्तेति निषेधः। स्वरदीर्घयलोपेषु लोपादेश एव न स्थानिवदि
इति त्युक्तेः॥ थलि एकाचो निषेधे प्राप्ते। कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि॥ एभ्यो लिट इण् न स्यात्॥ क्रादीनां च तु यौ ग्रहणं नियमा खु
र्थं॥ प्रकृत्याश्रयः प्रत्ययाश्रयो या वा नित्यनिषेधः स लिटि चेत्तर्हि क्रादिभ्य एव नान्येभ्य इति॥ न तस्य तु यौ थलि भारद्वा
जनियमप्रापितस्य च मादिषु क्रादिनियमप्रापितस्य चेटो निषेधार्थं॥ अचस्तास्वत्थल्यनिटो नित्यं। उपदेशेऽजन्तो धातु
स्तासौ नित्यानिट् ततः परस्य थल इण् न स्यात्। उपदेशेऽत्वतः। उपदेशेऽकारवतस्तासौ नित्यानिटस्ततः परस्य थल
इण् न स्यात्॥ ऋतो भारद्वाजस्य॥ तासौ नित्यानिट ऋदन्तादेव थलो नेट् भारद्वाजस्य मतेन। तेनान्यस्य स्यादेव॥ अ
यमत्र संग्रहः। अजन्तोकारवान्वा यस्तास्यनिट् थलि वेडयं॥ ऋदन्त ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत्॥१॥ न च स्त

द्वादीनामपि थलि विकल्पः। त्रास्यः। अब्रस्तास्वदिति उपदेशेत्वत इति च योगद्वयमपि तस्यैव हि प्रतिषेधस्य भारद्वाजनियमो
निवर्तकः॥अनंतरस्येतिन्यायात्।विवयिथ।विवेथ।आजिथ।विव्यथुः।विव्य।विवाय।विवय।विव्यिव।विव्यिम॥आजि
व।आजिम॥वेता।अजिता।वेष्यति।अजिष्यति।अजतु।आजत्॥अजेत्।वीयात्।सिचिवृद्धिः परस्मैपदेषु।इगंतांगस्य
वृद्धिः स्यात्परस्मैपदे सिचि।अवैषीत्।आजीत्॥अवेष्यत्।आजिष्यत्॥तेज पालने॥तेजति॥खज मंथे खजति॥ख
जि गतिवैकल्ये॥खंजति।एजृ कंपने।एजांचकार॥टुओस्फूर्जा वज्रनिर्घोषे।स्फूर्जति।पुस्फूर्जे।क्षि क्षये।अकर्मकः॥अं
तर्भावितण्यर्थस्तु सकर्मकः।क्षयति।चिक्षाय।चिक्षियतुः।चिक्षियुः।चिक्षयिथ।चिक्षेथ॥चिक्षियिम॥क्षेता।अ
कृत्सार्वधातुकयोर्दीर्घः॥अजंतांगस्य दीर्घः स्याद्यादौ प्रत्यये परे न तु कृत्सार्वधातुकयोः॥क्षीयात्॥अक्षैषीत्॥क्षीज अ
व्यक्ते शब्दे॥कूजिना सहायं पठितुं युक्तः।चिक्षीज॥लज लजि भर्जने।लाज लाजि भर्त्सने।जज जजि युद्धे॥तुज हिंसा
याम्॥तोजति।तुतोज।तुजि पालने।गज गजि गृज गृजि मुज मुजि शब्दार्थाः।गज मदने च।वज व्रज गतौ॥वद्व्रजेति

वृड्ः॥अव्राजीत्॥ ॥अथटवर्गीयांताःशाड्यंता अनुदात्तेतःषट्त्रिंशत्॥ ॥अट्टअतिक्रमहिंसनयोः।दोपधोपयं॥तोपधइत्ये
के॥अट्टते।आनट्टे।वेष्टवेष्टने।विवेष्टे।चेष्टचेष्टायाम्॥अचेष्टिष्ट।गोष्टलोष्टसंघाते॥जुगोष्टे।लुलोष्टे।घट्टचलने।जघट्टे॥स्फुट
विकसने।स्फोटते।पुस्फुटे।अठिगतौ॥अंठते।आनंठे।वठिएकचर्यायां॥ववंठे।मठिकठिशोके।शोकइहाध्यानं।मंठते
कंठते॥मुठिपालने।मुंठते॥हेठविबाधायाम्॥जिहेठे।एठच॥एठांचक्रे॥हिडिगत्यनादरयोः॥हिंडते।जिहिंडे॥हुडि
संघाते॥जुहुंडे॥कुडिदाहे॥चुकुंडे॥वडिविभाजने॥गडिच॥भडिपरिभाषणे॥परिहासःसनिंदोपालंभश्चपरिभाषणं
पिडिसंघाते॥मुडिमार्जने॥मार्जनंशुद्धिर्न्यग्भावश्च॥मुंडते।तुडितोडने।तोडनंदारणंहिंसनंच॥तुंडते।हुडिवरणे॥
वरणंस्वीकारः॥हरणइत्येके।चडिकोपे।शडिरुजायाम्।तडिताडने।पडिगतौ॥कडिमदे।खडिमंथे॥हेडृहोडृअनाद
रे॥जिहेडे।जुहोडे॥बाडृआप्लाव्ये।बशादिः।आप्लाव्यमाप्लवः।बाडते।द्राडृधाडृविशरणे॥शाडृश्लाघायाम्॥ ॥अ
थाटवर्गीयांतसमाप्तेःपरस्मैपदिनः॥ ॥शौटृगर्वे॥शुशौट॥यौटृबंधे॥यौटति॥म्लेटृम्रेडृउन्मादे॥द्वितीयोडांतः।टांत

तमध्येपाठस्तुअर्थसाम्यान्नाथतिवत्॥ म्लेटति। म्लेडति। कटेवर्षावरणयोः। चटेइत्येके॥ चकाट॥ सिचिअतोहलादेरितिवृ
द्धिर्भाषायां॥ ह्म्यंतक्षणश्वसजागृणिश्व्येदितां। ह्मयांतस्यक्षणादेर्ण्यंतस्यश्वयतेरेदितश्चवृद्धिर्नस्यादिडादौसिचि॥ अ
कटीत्॥ अटपटगतौ॥ आट। आटतुः। आटुः। पपाट। पेटतुः। पेटुः। रटपरिभाषणे॥ लटबाल्ये। शटरुजाविशरणग
त्यवसादनेषु। वटवेष्टने॥ ववाट। ववटतुः॥ ववटिथ॥ किटखिटत्रासे॥ शिटषिटअनादरे॥ शेटति। शिशेट। सेटति। सि
षेट॥ जटझटसंघाते॥ भटभृतौ॥ तटउच्छ्राये। खटकांक्षायाम्। णटनृत्तौ॥ पिटशब्दसंघातयोः॥ हटदीप्तौ। षटअवय
वे॥ लुटविलोडने॥ डांतोयमित्येके। चिटपरप्रैष्ये। विटशब्दे। बिटआक्रोशे। वज्ञादिः॥ हिटइत्येके॥ इटकिटकटीगतौ॥
एटति। केटति। कटति॥ ईकारःश्वीदितोनिष्ठायामितिइण्निषेधार्थः॥ केचित्तुइदितंमत्वानुमिकृते कंटतीत्यादि
वदंति॥ अंतेरत्वउईदितिप्रश्लिष्य। अयति। इयाय। इयतुः। इयुः। इययिथ। इयेथ। इयाय। इयय। दीर्घस्यतुआमिकृते
अयांचकारेत्याद्युदाहरंति। मडिभूषायां। कुडिवैकल्ये। कुण्डति। कुंडतइतितुदाहेगतं॥ मुटमर्दने। चुडिअल्पीभावे। ३५

डिवदनैकदेशे॥ गंडति॥ ॥इति टवर्गीयांताः॥ ॥अथ पवर्गीयांताः॥ तत्रानुदात्तेतः स्तोभत्यंताः षट्त्रिंशत्॥ तिपृ तेपृ ष्टिपृ ष्टेपृ
क्षरणार्थाः॥ आद्योनुदात्तः। क्षीरस्वामी त्वयं सेडिति बभ्राम॥ तेपते। तितिपे॥ क्रादिनियमादिट्॥ तितिपिषे। तेप्ता। तेप्स्यते। लिङ्सिचा
वात्मनेपदेषु॥ उक्तसमीपाद्धलः परौ झलादी लिङ् आत्मनेपदपरः सिच् चेत्येतौ कितौ स्तः। कित्त्वान्न गुणः। तिप्सीष्ट॥ तिप्सीयास्ताम्॥
तिप्सीरन्॥ अतिप्त। अतिप्साताम्॥ अतिप्सत॥ तितेपे॥ तिष्टिपे। तिष्टिपाते। तिष्टिपिरे॥ तिष्टेपे। तिष्टेपाते। तिष्टेपिरे॥ तेपृ कंपने च॥
ग्लेपृ दैन्ये। ग्लेपते॥ टुवेपृ कंपने॥ वेपते। केपृ गेपृ ग्लेपृ च। चात्कंपने गतौ च। सूत्रविभागादिति स्वामी। मैत्रेयस्तु चकारमंतरेण
पठित्वा कंपन इत्यपेक्ष्यत इत्याह। ग्लेपेरर्थभेदात्पुनः पाठः। मेपृ रेपृ लेपृ गतौ॥ त्रपूष् लज्जायाम्॥ त्रपते। तॄफलभजत्रपश्च॥
एषामत एकारोऽभ्यासलोपश्च स्यात्किति लिटि सेटि थलि च॥ त्रेपे। त्रेपाते। त्रेपिरे॥ ऊदित्वादिड्वा॥ त्रपिता। त्रप्ता। त्रपिषीष्ट। त्र
प्सीष्ट। कपि चलने॥ कंपते। चकंपे॥ रबि लबि अबि शब्दे। रंबते। लंबते॥ आनंबे॥ लबि अवस्रंसने॥ कबृ वर्णे॥ चकबे। क्लीबृ लंबनं
अधार्ष्ट्ये। चिक्लीबे॥ क्षीबृ मदे। क्षीबते। शीभृ कत्थने। शीभते। चीभृ च। रेभृ शब्दे। रिरेभे। अभि रभी क्वचित्पठ्यते। अ १६८

भने॥ रंभते। ष्टभि स्कभि प्रतिबंधे॥ स्तम्भते। उत्तम्भते॥ उदः स्थास्तंभोरिति पूर्वसवर्णः॥ विष्टंभते॥ स्तन्भेरिति षत्वं॥ स्तुविधौ नि
र्दिष्टस्य सौत्रस्यैव ग्रहणात्॥ तद्बीजं तु स्कुस्तंभोरिति पवर्गीयोपधपाठः स्तन्भेरिति तवर्गीयोपधपाठश्चेति माधवः। केचिदस्य
टकार औपदेशिक इत्याहुः स्तम्भते। स्कंभते। टष्टंभे॥ जभी जृभि गात्रविनामे॥ रधिजभोरचि। एतयोर्नुमागमः स्यादचि।
जंभते। जजंभे॥ जंभिता। अजंभिष्ट॥ जृंभते। जजृंभे। शल्भ कत्थने॥ शशल्भे। वल्भ भोजने। दंत्योष्ठ्यादिः। ववल्भे॥ गल्भ धार्ष्ट्ये
गल्भते। श्रंभु प्रमादे। तालव्यादिर्दंत्यादिश्च। श्रम्भते। स्रंभते। ष्टुभु स्तंभे॥ स्तोभते। विष्टोभते। तुष्टुभे। व्यष्टोभिष्ट॥ ॥अथ प
रस्मैपदिनः॥ गुपू रक्षणे। गुपूधूपविच्छिपणिपनिभ्य आयः। एभ्य आयः प्रत्ययः स्यात्स्वार्थे॥ पुगंतेति गुणः। सनाद्यंता धातवः
सनादयः कमेर्णिङंताः प्रत्यया अंते येषां ते धातुसंज्ञाः स्युः॥ धातुत्वाल्लडादयः। गोपायति। आयादय आर्धधातुके वा। आर्ध
धातुकविवक्षायामायादयो वा स्युः॥ कास्प्रत्ययादाममंत्रे लिटि। कास्धातोः प्रत्ययांतेभ्यश्चाम् स्याल्लिटि न तु मंत्रे॥ का
स्यनेकाच्ग्रहणं कर्तव्यं। सूत्रे प्रत्ययग्रहणमपनीय तत्स्थानेऽनेकाच इति वाच्यमित्यर्थः। अतो लोपः। आर्धधातुकोपदे

सिं॰कौ॰ति॰ शकालेयदकारांतं तस्याकारस्यलोपः स्यादार्धधातुके परे॥ गोपायांचकार। गोपायांबभूव। गोपायामास। जुगोप। जुगुपतुः। ऊदित्वा
इट्। जुगोप्थ। जुगोपिथ। गोपायिता। गोपिता। गोप्ता॥ गोपाय्यात्। गुप्यात्। अगोपायीत्। अगोपीत्। अगौप्सीत्। धूपसंतापे।
धूपायति। धूपायांचकार। दुधूप। धूपायितासि। धूपितासि। जपजल्पव्यक्तायांवाचि। जपमानसेच। चपसांत्वने। षपसमवाये॥
धो समवायः संबंधः सम्यगवबोधो वा॥ सपति। रपलपव्यक्तायांवाचि। चुपमंदायांगतौ॥ चोपति। चुचोप। चोपिता। तुपतुम्पतुपतु
म्पतुफतुम्फतुफतुम्फहिंसार्थाः। तोपति। तुतोप। तुंपति। तुम्पेतु। तुतुम्पतुः। संयोगात्परस्यलिटः कित्वाभावान्नलोपः॥
किदाशिषीतिकित्वान्नलोपः। तुप्यात्। प्रातुम्पतोगविकर्त्तरीतिपारस्करादिगणेपाठात्सुट्॥ प्रस्तुम्पतिगौः। क्तिपानि
र्देशात्। यङ्लुकिन। प्रतोतुम्पीति॥ त्रोपति॥ त्रुम्पति। तोफति। तुम्फति। त्रोफति। त्रुम्फति॥ उहाद्योर्द्वौ पंचमषष्ठौनीरेफाः।
अन्येसरेफाः॥ आद्याश्चत्वारः प्रथमांताः। ततोद्वितीयांताः। अथवपुकारवंतः। पर्परफ। रफिअर्बपर्बलर्बबर्बमर्बकर्ब
खर्बगर्बशर्बषर्बचर्बगतौ॥ आद्यः प्रथमांतः। ततोद्वौद्वितीयांतौ। ततएकादश तृतीयांताः। द्वितीयतृतीयौमुक्ता सर्वे ९७

मुडिखंडने। मुंडति। पुडिचेत्येके॥ पुंडति॥ रुटिलुटिस्तेये। रुंटति। लुंटति॥ रुठिलुठिइत्येके॥ रुडिलुडीत्यपरे॥ स्फुटिर्विशर
णे। इरित्वादङ्वा। अस्फुटत्। अस्फोटीत्। स्फुटीत्येके॥ इदित्वान्नुम्॥ स्फुण्टति॥ पठव्यक्तायांवाचि। पेठतुः। पेठिथ॥ अप
ठीत्॥ अपाठीत्॥ वठस्थौल्ये॥ ववठतुः। ववठिथ॥ मठमदनिवासयोः॥ कठकृच्छ्रजीवने॥ रठपरिभाषणे। हठप्लुतिशठत्वयोः
बलात्कारइत्येके। हठति। जहाठ॥ रुठलुठउपघाते॥ ओठति॥ ऊठइत्येके॥ ऊठति। ऊठांचकार॥ पिठहिंसासंक्लेशनयोः॥ शठकै
तवेच॥ शुठप्रतीघाते॥ शोठति॥ शुशोठेतिस्वामी। शुंठति॥ कुठिच। कुण्ठति॥ लुठिआलस्येप्रतीघातेच॥ शुठिशोषणे। रुठिलु
ठिगतौ। चुडुभावकरणे॥ भावकरणमभिप्रायसूचनं॥ चुड्डति॥ चुचुड्ड॥ अड्डअभियोगे॥ अड्डति। आनड्ड। कड्डकार्कश्ये॥ कडुनि
चुडादयः स्त्रयोदोपधाः। तेनक्विपिचुत्। अत्। कत्॥ इत्यादि॥ क्रीडृविहारे॥ चिक्रीड। तुडृतोडने॥ तोडति। तुतोड। तूडइत्येके। हुडृ
हूडृहोडृगतौ। हूड्यायात्॥ हूड्यात्॥ होड्यात्। रौडृअनादरे॥ रोडृलोडृउन्मादे॥ अडउद्यमने॥ अडति। आड। आडतुः॥ आडुः॥ ल
डविलासे। लडति। लडयोरभेदः डलयोश्चैकत्वस्मरणाल्ललतीतिस्वाम्यादयः॥ कडमदे। कडति। कडिइत्येके। कण्डति॥ ग

रेपधाः॥ पर्पति। पपर्प। रफति। रम्फति॥ अर्बति। आनर्ब। पर्वति। लर्बति। बर्ब। पवर्गीयादिरयं॥ मर्बति। कर्बति। खर्बति। गर्बति॥
शर्बति॥ सर्बति। चर्बति। कुबि आच्छादने॥ कुम्बति। लुबि तुबि अर्दने। लुंबति। तुंबति। चुबि वक्त्रसंयोगे। चुम्बति॥ षृभु षृंभु हिं
सार्थौ॥ सर्भति। ससर्भ॥ सर्भिता। सृम्भति। ससृंभ। सृभ्यात्॥ षिभु षिंभु इत्येके॥ सेभति। सिंभति। शुभ शुंभ भाषणे॥
भासन इत्येके॥ हिंसायामित्यन्ये॥ ॥अथानुनासिकान्ताः॥ तत्र कम्यन्ता अनुदात्तेतोदश॥ ॥घिणि घुणि घृणि ग्रहणे॥ नु
म्॥ घृत्वं। घिण्णते। जिघिणे। घुण्णते। जुघुणे॥ घुण घूर्ण भ्रमणे॥ घोणते। घूर्णते। इमौ तुदादावपि परस्मैपदिनौ। पण व्यवहारे स्तु
तौ च। पनन्च। स्तुतावित्येव संबध्यते॥ पृथङ्निर्देशात्। पनिसाहचर्यात्पणेरपि स्तुतावेवायप्रत्ययः॥ व्यवहारे तु। पणते।
पेणे। पणिता॥ इत्यादि॥ स्तुतावनुबन्धस्य केवलेचरितार्थत्वादायप्रत्ययान्तान्नात्मनेपदं॥ पणायति। पणायांचकार॥
पेने॥ भाम क्रोधे॥ भामते। बभामे॥ क्षमूष सहने॥ क्षमते। चक्षमे। चक्षमिषे॥ चक्षंसे। चक्षमिध्वे। चक्षन्ध्वे। चक्षमिवहे। च
क्षण्वहे॥ म्वोश्च॥ मान्तस्य धातोर्नकारादेशः स्यान्मकारे वकारे च परे॥ यात्वं। चक्षण्वहे। चक्षमिमहे। चक्षण्महे। क्षमिष्य

ते।क्षंस्यते।क्षसेत।आशिषि।क्षमिषीष्ट।क्षंसीष्ट।अक्षमिष्ट॥अक्षंस्त॥कमु कान्तौ।कांतिरिच्छा।कमेर्णिङ्।स्वार्थे।ङित्वात्तङ्
कामयते।कायामंता।ल्वाय्येल्विष्णिषु॥आम् अंत आलु आय्य इत्नु इष्णु एषु णेरयादेशः स्याइस्यमायलोपापवादः॥का
मयांचक्रे।आयादः·वा।चकमे।कामयिता।कमिता॥कामयिष्यते।कमिष्यते॥णिश्रिद्रुस्रुभ्यः कर्तरि चङ्॥ण्यंतात्
श्र्यादिभ्यश्च च्लेश्चङ् स्यात्कर्त्रर्थे लुङि परे॥कामृ इ अत इति स्थिते।णेरनिटि।अनिडादावार्धधातुके परे णेर्लोपः स्या
त्॥परत्वादेरनेकाच इति यणि प्राप्ते।ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेनेति वार्तिकं।णिलोपस्य
तु पाल्वयतेः पाल्विरित्यादिक्तिन्नतमवकाशः इति भावः।वस्तुतस्त्वनिटीति वचनसामर्थ्यादार्धधातुकमात्रमस्य विषयः
तथा च यङादेरपवाद एवायम्।इयङ्।अततक्षत्।यण्।आटिटत्।गुणः।कारणा।वृद्धिः।कारकः।दीर्घः।कार्यते।णौ चङ्यु
पधाया ह्रस्वः।चङ्परे णौ यदंगं तस्योपधाया ह्रस्वः स्यात्॥चङि।चङि परे नभ्यासस्य धातोरवयवस्यैकाचः प्रथमस्
य द्वे स्तोऽजादेस्तु द्वितीयस्य॥सन्वल्लघुनि चङ्परेऽनग्लोपे।चङ्परे इति बहुव्रीहिः।सन्वांगस्येति च द्वयमप्यावर्तते॥ ९८

संघाते। श्रोणति॥ श्लोणृ च॥ शोणादयस्त्रयोमीताल्व्योष्मादयः। पैणृगतिप्रेरणश्लेषणेषु। पैणति। पिपैण। ध्रण शब्दे॥ उप
देशेनात्वोयं। रषाभ्यामितिणत्वं॥ ध्रणति। नोपदेशेफलंतुयङ्लुकि। दन्ध्रन्ति। बणेत्यपिकेचित्॥ बेण तुः। बेणिथ॥ कनीदीप्तिकां
तिगतिषु॥ चकान। ष्टन वन शब्दे॥ स्तनति। वनति। वनषण संभक्तौ॥ वनेरर्थभेदात्पुनः पाठः। सनति। ससान॥ सेनतुः॥ येविभा
षा॥ जनसनखनामात्वंस्याद्वायादौक्ङिति। सायात्। सन्यात्॥ अमगत्यादिषु॥ कनीदीप्तिकांतिगतीत्यत्रगतेःपरयोःशब्दसंभ
क्त्योरादिशब्देन संग्रहः॥ अमति॥ आम। द्रमहम्ममीमृगतौ। द्रमति। दद्राम॥ ह्म्यंतेतिनवृद्धिः। अद्रमीत्। हम्मति। जहम्म॥ मीम
ति॥ मिमीम। अयंशब्देच। चमुछमुजमुझमुअदने। ष्ठिवुक्लमुचमांशिनि॥ एषामचोदीर्घः स्यात्। ष्ठीति। आङिचमइतिवक्तव्यं
आचामति। आङिकिं। चमति। विचमति। अचमीत्। जिमिंकेचित्पठंति। जेमति। क्रमुपादविक्षेपे॥ वाभ्राशभ्लाशभ्रमुक्रमु
श्री क्लमुत्रसित्रुटिलषः। एभ्यः श्यन्वास्यात्कर्थे सार्वधातुकेपरे॥ क्रमः परस्मैपदेषु॥ क्रमेर्दीर्घः स्यात्परस्मैपदेपरेशिति॥ क्राम्य
ति। क्रामति॥ चक्राम॥ क्राम्यातु॥ स्नुक्रमोरनात्मनेपदनिमित्ते॥ अत्रैवेट्॥ अक्रमीत्॥ अथरेवंत्यंताअनुदात्तेतः॥ ॥ १९

नियमार्थमिदं तयोरुदात्तत्वात्सिद्धेः

अयवयपयमयचयतयणयगतौ। अयते। दयायासश्च। दयअयआसएभ्यआम्स्याल्लिटि। अयांचक्रे। अयेत। अयिषीष्ट॥ विभा
षेटः॥ इणः परोयइट्ततः परेषांषीध्वंलुङ्लिटांधस्यमूर्धन्यादेशः स्यात्॥ अयिषीढ्वं॥ अयिषीध्वम्। आयिष्ट। आयिढ्वंम्॥ उ
पसर्गस्यायतौ॥ अयतिपरस्योपसर्गस्ययोरेफस्तस्यलत्वंस्यात्॥ प्लायते। पलायते। निसदुसोरुत्वस्यासिद्धत्वान्नलत्वम्॥
निरयते। दुरयते। निरदुरोस्तुनिलयते॥ दुलयते॥ प्रत्ययइतियोरूपम्॥ अथकथमुदयतिविततोर्ध्वरश्मिरज्जाविति मा
घः॥ इट्किट्कटीत्यत्रप्रश्लिष्टस्यस्सविद्यति। यद्वाअनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्। चक्षिङोङित्करणात्ज्ञापका
त्॥ नादित्वात्॥ ववये। पेये। मेये। चेये। तेये। प्रणयते। नेये। दयदानगतिरक्षणहिंसादानेषु। आदानंग्रहणम्। दयांचक्रे॥
रयगतौ॥ ऊयीतंतुसंताने॥ ऊयांचक्रे॥ पूयीविशरणेदुर्गंधेच। पूयते। पुपूये। क्नूयीशब्देउन्देच। चुक्नूये। क्ष्मायीविधूनने। चक्ष्माये।
स्फायीओप्यायीवृद्धौ॥ स्फायते। पस्फाये। प्यायते। लिड्यङोश्च। लिटियङिचप्यायःपीभावःस्यात्॥ पुनःप्रसंगविज्ञानात्सिद्धस्य
द्वित्वम्॥ एरनेकाचइतियण्। पिप्ये। पिप्याते। पिप्यिरे। दीपजनबुधपूरितायिप्यायिभ्योन्यतरस्यां॥ एभ्यः च्लेश्चिण्स्याद्वादेकव

चनेतत्रादेपरे। चिणोलुक्। चिणः परस्य लुक् स्यात्। अप्यायि। अप्यायिष्ट। तायृ संतानपालनयोः। सन्तानः प्रबंधः। तायते। तताये॥
अतायि। अतायिष्ट। शल चल संवरणयोः। शेले। वल वल्ल संवरणे संचरणे च॥ ववले। ववल्ले। मल मल्ल धारणे। मेले। मल्ले। भल भ
ल्ल परिभाषणहिंसादानेषु। बभले। बभल्ले। कल शब्दसंख्यानयोः। कलते। चकले। कल्ल अव्यक्ते शब्दे। कल्लते। चकल्ले॥ अशब्द इति
स्वामी। अशब्दस्तूष्णींभाव इति च। तेवृ देवृ देवने। तितेवे। दिदेवे॥ षेवृ गेवृ ग्लेवृ पेवृ मेवृ म्लेवृ सेवने। परिनिविभ्य इति षत्वं॥ परि
षेवते। सिषेवे। अयं षोपदेशो यी तिन्यासकारादयः। तद्भाष्यविरुद्धं। गेवते। जिगेवे। जिग्लेवे। पिपेवे। मेवते। मिमेवे। म्लेवते॥
शेवृ खेवृ क्लेवृ इत्यप्येके। रेवृ प्लवगतौ। प्लवगतिः प्लुतगतिः। रेवते॥ ॥अथावत्यन्ताः परस्मैपदिनः॥ ॥मव्य बंधने। ममव्य। सूर्क्ष्य
ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः। हय गतौ। अहयीत्॥ यान्तत्वान्न वृद्धिः। शुच्य अभिषवे। अवयवानां शिथिलीकरणं सुरायाः संधानं वा अ
भिषवः। स्नानं च। शुशुच्य॥ चुच्य इत्येके॥ हर्य गतिकांत्योः॥ जहर्य्य। अल भूषणपर्याप्तिवारणेषु॥ अलति। आल॥ अतो ल्रां
तस्य॥ ल्वेति लुप्तषष्ठीकं॥ अतः समीपो यो ल्वौ तदंतस्यांगस्यातो वृद्धिः स्यात्परस्मैपदे परे सिचि। नेटीति निषेधस्यातो हल २०

अंगनिमित्तं यत्तङ् परं णिरितियावत्। तस्मिन्परे यल्लघु तत्परो योऽक् तस्याभ्यासस्य सनीव कार्यं स्याणावग्लोपे सति॥ अंगस्येति ना
वर्तते॥ चङ्परेणो यदंगं तस्य योऽभ्यासो लघुपरस्तस्येति प्राग्वत्॥ सन्वतः। अभ्यासस्याल इकारः स्यात्सनि॥ दीर्घो लघोः। लघोरभ्या स्या
सस्य दीर्घः स्यात्सन्वद्भावविषये॥ अचीकमत्। णिङ्भावपक्षे। कमेश्चङ् वक्तव्यः। णेरभावान्न दीर्घसद्भावो। अचकमत॥ ज्ञा सं
याः कार्यकालत्वादंगं यत्तद्द्विरुच्यते॥ तेनैव दीर्घः सन्वच्चनानेकाक्षि तिमाधवः॥१॥ चकास्त्यर्थोपयत्सूर्णोत्यादो नागं द्विरुच्य
यो ते। किंतु स्यावयवः किंचित्तस्मादेकाक्षि दंडयं॥ वस्तुतोगस्यावयवोऽभ्यास इतिवर्णनात्॥ उर्णोर्दीर्घर्योपयतोड्यं स्यादितिम
न्महे॥२॥ चकास्तोत्तभयमिदं न स्यात्स्यान्नव्यवस्थया॥ णे विशिष्यं सन्निहितं लघु नीत्यं गमेत्तथा। इति व्याख्या विकल्पस्य
कृत्यदेनैव वर्णनात्। णेरग्लोपेपि संबंधस्त्वगितामपि सिद्धये॥ ॥अथ कम्यंतास्त्रयस्त्रिंशात्परस्मैपदिनः॥ ॥अण
रण वण भण मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः॥ अणति। वणति। बाहित्वादेत्वाभ्यासलोपौ न। ववणतुः। ववणिथ॥ ध
णिर पिके श्रिस्तठ्यन्ते। धणति। ओणृ अपनयने। ओणति। ओणांचकार॥ शोणृ वर्णगत्योः। शोणति॥ शोश्रुण॥ श्रोणृ

सि·कौ·ति· समीपत्वाभावान्नवृद्धिः। ष्ठिवुनिरसने। ष्ठिवुक्लमिचमां शितीतिदीर्घः। ष्ठीवति। अस्यद्वितीयस्थकार ष्ठकारोवेतिद्वृत्तिः। तिष्ठेव। तिष्ठिव
२१ तुः। तिष्ठिवुः। टिष्ठेव। टिष्ठिवतुः। टिष्ठिवुः। हलिचेतिदीर्घः। ष्ठीव्यात्। जिजये। अयमजंतेषुपठितुंयुक्तः। जयउत्कर्षप्राप्तिः।
अकर्मकोयं। जयति। सन्लिटोर्जेः। जयतेः सनिलिटिनिमित्तोयोभ्यासस्ततः परस्यकुत्वंस्यात्॥ जिगाय। जिग्यतुः। जिग्युः।
जिगयिथ। जिगेथ। जिगाय। जिगय। जिग्यिव। जिग्यिम॥ जेता। जीयात्। अजैषीत्। जीवप्राणधारणे। जिजीव। पीवमीव
तीवनीवस्थौल्ये॥ पिपीव। मिमीव। तितीव। निनीव॥ क्षिवुक्षेवुनिरसने। उर्वीतुर्वीथुर्वीदुर्वीधुर्वीहिंसार्थाः। ऊर्वान्त्यकार॥ उप
धायांचेतिदीर्घः। तूर्वति। तुतूर्व। गुर्वीउद्यमने॥ गुर्वति। मुर्वीबन्धने॥ पुर्वपर्वमर्वपूरणे। चर्वअदने। भर्वहिंसायाम्॥ कर्व
खर्वगर्वदर्पे। अर्वशर्वषर्वहिंसायां। आनर्व। शर्वति॥ सर्वति॥ इवि व्याप्तौ। इन्वति। इन्वाञ्चकार॥ पिविमिविणिविसेचने॥
त्ये तृतीयोमूर्धन्योष्मादिरिंके। सेवनइतिनरंगिण्यां। पिन्वति। पिपिन्व। हिविदिविधिविजिविप्रीणनार्थाः। हिन्वति। दिन्व
ति। धिन्विकृण्व्योरच। अनयोरकारोंतादेशः स्यादुप्रत्ययश्चशब्विषये। अतोलोपः। तस्यस्थानिवद्भावाल्लघूपधगु २१

णोन। उप्रत्ययस्यापित्वाद्गुणः। धिनोति। धिनुतः। धिन्वंति। लोपश्चास्यान्यतरस्यांम्वोः॥ असंयोगपूर्वोयः प्रत्ययउकारस्तदंतस्यां
गस्यलोपोवास्यान्म्वोः परयोः। धिन्वः। धिनुवः। धिन्मः। धिनुमः॥ मिपित्तुपरत्वाद्गुणः। धिनोमि। उतश्चप्रत्ययादसंयोगपूर्वात्। असं ग
योगपूर्वोयः प्रत्ययोकारस्तदंतांगात्परस्यहेर्लुक्स्यात्॥ धिनु। नित्यत्वादुकारलोपात्पूर्वमाट्। धिनवानि। धिनवाव। धिनवाम॥ जिन्व
तीत्यादि। रिविरविधविगत्यर्थाः। रिण्वति। रण्वति। धन्वति। कृविहिंसाकरणयोश्च। नकाराइत्। कृणोतीत्यादिधिनोवत्॥
अयंस्वादौच॥ मवबंधने। मेवतुः। मेवुः। अमवीत्। अमावीत्। अवरक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाच
नक्रियेच्छादीप्त्यवाप्त्यालिंगनहिंसादानभागवृद्धिषु। अवति। आव। मावानवीत्। धावुगतिशुद्ध्योः। स्वरितेत्। धावति। धावते
दधाव। दधावे॥ ॥अथोष्मांता आत्मनेपदिनः॥ ॥धुक्षधिक्षसंदीपनक्लेशनजीवनेषु। धुक्षते। दुधुक्षे। धिक्षते। दिधिक्षे॥ वृक्ष
वरणे। वृक्षते। ववृक्षे। शिक्षविद्योपादाने। शिक्षते। भिक्षभिक्षायामलाभेलाभेच। भिक्षते। क्लेशअव्यक्तायांवाचि। [illegible]
बाधनइत्यन्ये। दुर्गः। क्लेशते। चिक्लेशे। दक्षवृद्धौशीघ्रार्थेच। दक्षते। ददक्षे। दीक्षमौण्ड्येज्योपनयननियमव्रतादेशेषु। दीक्षते। ददी

सि·कौ·ति· क्षे।ईक्षदर्शने।ईक्षांचक्रे।ईषगतिहिंसादर्शनेषु॥ईषांचक्रे॥भाषव्यक्तायांवाचि।भाषते।वर्षस्नेहने।दंत्यौष्ठ्यादिः।ववर्षे।गेषृअन्वि
च्छायां।ग्लेषृइत्येके।अन्विच्छाअन्वेषणं।जिगेषे।येषृप्रयत्ने।जेषृणेषृएषृप्रेषृगतौ।जेषते।नेषते।एषांचक्रे।पिप्रेषे।रेषृहेषृह्रेषृ
अव्यक्तेशब्दे।आद्योवृकशब्दे।ततोद्वौअश्वशब्दे।रेषते।हेषते।ह्रेषते।कासृशब्दकुत्सायां।कासांचक्रे।भासृदीप्तौ।बभासे।णा
सृरासृगतौ।नासते।प्रणासते।णसकौटिल्ये।नसते।भ्यसभये।भ्यसते।बभ्यसे।आङःशसिइच्छायां॥आशंसते।आशशंसे
।ग्रसुग्लसुअदने।जग्रसे।जग्लसे।ईहचेष्टायां।ईहांचक्रे।बहिमहिवृद्धौ॥बंहते।बबंहे।मंहते।अहिगतौ।अंहते।आनंहे।
गर्हगल्हकुत्सायां।जगर्हे।जगल्हे।बर्हबल्हप्राधान्ये।ओष्ठ्यादी।वर्हवल्हपरिभाषणहिंसाछादनेषु।दंत्यौष्ठ्यादी।केचित्तु
पूर्वयोर्दंत्यौष्ठ्यादित्वमनयोरोष्ठ्यादित्वंचाहुः।प्लिहगतौ।पिप्लिहे।वेहृजेहृबाहृप्रयत्ने।आद्योदंत्यौष्ठ्यादिः।अंत्यःकेव
लौष्ठ्यादिः।उभावप्योष्ठ्यादीइत्येके।दंत्यौष्ठ्यादीत्यपरे।जेहतिर्गत्यर्थोपि।बबाहे।द्राहृनिद्राक्षये।निक्षेपेत्यपरे॥का
शृदीप्तौ।चकाशे।ऊहवितर्के।ऊहांचक्रे।गाहूविलोडने।गाहते।जगाहे।जगाहिषे।जघाक्षे।जगाहिढ्वे।जगाहिध्वे।जघा २२

देरितिविकल्पस्यचापवादः।माभवानालीत्।अयंस्वरितेदित्येके।तन्मतेअलतेइत्याद्यपि।ञिफलाविशरणे।तृफलेत्येत्वं।फेलतुः।फे
लुः।अफालीत्।मीलश्मीलस्मीलक्ष्मीलनिमेषणे।निमेषणंसंकोचः।द्वितीयस्तालव्यादिः।तृतीयोदंत्यादिः।पीलप्रतिष्टंभे।प्रति
ष्टम्भोरोधनं।नीलवर्णे।निनील।शीलसमाधौ॥शीलति।कीलबन्धने।कूलआवरणे।शूलरुजायांसंघोषेच।तूलनिष्कर्षे॥नि
ष्कर्षोनिष्कोषणं।तन्त्रांतर्गतस्यबहिर्निःसारणं।तुतूल।पूलसंघाते।मूलप्रतिष्ठायाम्॥फलनिष्पत्तौ।फेलतुः।फेलुः।चुल्लभावकरणे
भावकरणमभिप्रायाविष्कारः।फुल्लविकसने।चिल्लशैथिल्ये।भावकरणेच।तिलगतौ।तेलति।तिल्लेत्येके।तिल्लति।वेल्लचेल्लके
वेल्लु ल्लखेल्लृक्ष्वेल्लँचलने।पञ्चमऋदितः।षष्ठोलोपधः।पेल्लृफेल्लृशेल्लृगतौ।पेल्लइत्येके।स्खलसञ्चलने।चस्खाल।अस्खालीत्।ख
लसंचये।गलअदने।गलति।अगालीत्।षलगतौ।सलति।दलविशरणे।श्वलश्वल्लआशुगमने।शश्वाल।अश्वालीत्।शश्व
ल्ल।अश्वल्लीत्।खोलृखोर्ऋगतिप्रतीघाते।खोलति।खोरति।धोर्ऋगतिचातुर्ये।धोरति।त्सरछद्मगतौ।तत्सार।अत्सारी
त्।क्मरहूर्छने।चक्मार।अभ्रवभ्रमभ्रचरगत्यर्थाः।चरतिर्भक्षणेपि॥अभ्रति।आनभ्र।माभवानभ्रीत्।अंगांतरेफस्यातः

क्षीत्। आष्टां। आक्षुः। तक्षू त्वक्षू तनूकरणे। तनूकरणे तक्षः श्नुः स्याद्वाचाविषये। तक्ष्णोति। तक्षति काष्ठं। ततक्षिथ। ततष्ठ। अतक्षीत्।
अतक्षिष्टां। अतक्षिषुः। अताक्षीत्। आष्टां। अताक्षुः। तनूकरणे किं। वाग्भिः संतक्षति॥ भर्त्सयतीत्यर्थः। उक्ष सेचने। उक्षांचकार।
रक्ष पालने। णिक्ष चुंबने। प्रणिक्षति। तृक्ष ष्टृक्ष णक्ष गतौ। तृक्षति। स्तृक्षति। नक्षति। वक्ष रोषे। संघात इत्येके। मृक्ष संघाते। म्रक्ष इ-
त्येके। तक्ष त्वचने॥ त्वचनं संवरणं त्वचो ग्रहणं च। पक्ष परिग्रहे इत्येके। सूर्क्ष आदरे। सुसूर्क्ष। अनादर इति तु क्वाचित्कोऽपपाठः॥
अवज्ञावहेलनमसूर्क्षणमित्यमरः। काक्षि वाक्षि माक्षि कांक्षायां। द्राक्षि ध्राक्षि ध्वाक्षि घोरवासिते च। चूष पाने। तूष तुष्टौ। पूष वृद्धौ।
मूष स्तेये। लूष रूष भूषायां। शूष प्रसवे। प्रसवोऽभ्यनुज्ञानं॥ तालव्योष्मादिः। यूष हिंसायां। जूष च। भूष अलंकारे। भूषति॥
ऊष रुजायां। ऊषांचकार। ईष उंछे। कष खष शिष जष झष शष वष मष रुष रिष हिंसार्थाः। तृतीयषष्ठौ तालव्योष्मादी। सप्तमो-
ऽन्त्योष्ठ्यादिः। चकाष। चखाष। शिशेष। शिशेषिथ। शेष्टा। क्सः। अशिक्षत्। अशेक्ष्यत्। जेषतुः। जझेष। झेषतुः। ववषतुः। मेष तुः
तुः। तीषसहलुभरुषरिषः। इच्छत्यादेः परस्य तादेरार्धधातुकस्येड्वा स्यात्। रोषिता। रोष्टा। रोषिष्यति। रेषिता। रेष्टा॥

ति रेषिष्यँ। भष भर्त्सने। इह भर्त्सनं श्वरवः। भषति। बभाष। उष दाहे। ओषति। उषविदजागृभ्योऽन्यतरस्यां। एभ्यो लिट्याम् वा स्यात्।
ओषांचकार॥ उवोष। ऊषतुः। उवोषिथ। जिषु विषु मिषु सेचने। जिजेष। क्रादिनियमादिट्। विवेषिथ। विविषिव। वेष्टा। वेक्ष्यति
अविक्षत्॥ पुष पुष्टौ। पोषति। पोषिता। पोषिष्यति। अपोषीत्। अनिट्केषु पुष्येति श्यना निर्देशादयं सेट्। अतो न क्सः। अङ्वि-
धौ दैवादिकस्य ग्रहणान्नाङ्। श्रिषु श्लिषु प्रुषु प्लुषु दाहे। श्रेषति। शिश्रेष। श्रेषिता। श्लेषति। शिश्लेष। श्लेषिता। अयमपि सेट्।
अनिट्सु दैवादिकस्य ग्रहणमिति कैयटादयः। यत्त्वनिट्कारिकान्यासे द्वयोर्ग्रहणमित्युक्तं। तत्स्वोक्तिविरोधाद्ग्रन्थान्त-
रविरोधाच्चोपेक्ष्यं। पुप्रोष। पुप्लोष। पृषु वृषु मृषु सेचने। मृषु सहने च। इतरौ हिंसासंक्लेशनयोः। पर्षति। पपर्ष। पृष्या। त्व
घृषु संघर्षे। हृषु अलीके। तुस ह्रस ह्लस रस शब्दे। तुतोस। जह्रास। जह्लास। ररास। लस श्लेषणक्रीडनयोः। अ घस्लृ अदने।
अयं न सार्वत्रिकः। लिट्यन्यतरस्यामित्यदेर्घस्लादेशविधानात्॥ ततश्च यत्र लिंग वचनं वास्ति तत्रैवास्य प्रयोगः। अत्रैव
पाठः शपि परस्मैपदे लिंगं। लृदित्करणमङ्। अनिट्कारिकास्वपाठो वलाद्यार्धधातुके। क्मरच्चि विशिष्योपादानं॥ घस

ति॥घस्ता॥सस्यार्धधातुके।सस्य तः स्यात्सादावार्धधातुके परे।घत्स्यति।घसतु।अघसत्।घसेत्।लिंगाद्यभावादाशिष्यस्याप्रयो
गः।पुषादिद्युताद्य्लृदितः परस्मैपदेषु॥श्यन्विकरणपुषादेर्द्युतादेर्लृदितश्च परस्य च्लेरङ् स्यात्परस्मैपदेषु।अघसत्।जर्ज चर्च
झर्झ परिभाषणहिंसनतर्जनेषु।पिस्र पेस्र गतौ।पिपिसतुः।पिपेसतुः।हसे हसने।एदित्वान्न वृद्धिः।अहसीत्।णिश समाधौ
तालव्योष्मान्तः।प्रणेशति।मिश मश शब्दे रोषकृते च।तालव्योष्मान्तौ।शव गतौ।दन्त्योष्ठ्यान्तः।तालव्योष्मादिः।शवति।अशावी
त्।अशवीत्।शश प्लुतगतौ।तालव्योष्माद्यन्तः।शशाश।शेशतुः।शेशुः।शेशुः।शेशिथ।शसु हिंसायां।दन्त्योष्मान्तः।न
शसददेत्येत्वं न।शशसतुः।शशसुः।शशंसिथ।शंसु स्तुतौ।अयं दुर्गतावपीति दुर्गः।नृशंसो घातुकः क्रूरः इत्यमरः।शा
शंस्।आशिषि नलोपः।शस्यात्॥चह परिकल्कने।कल्कनं शाठ्यं।अचहीत्।मह पूजायां।अमहीत्॥रह त्यागे।रहि गतौ
रंहति।रंह्यात्।दृह दृहि वृह वृहि वृद्धौ।दर्हति।ददर्ह।ददृहतुः।दृंहति।ददृंह।वर्हति।वृंहति।वृहि शब्दे च।वृंहितं क
रिगर्जितं।वृहिर् इत्येके।अवृहत्।अवर्हीत्।तुहिर् दुहिर् उहिर् अर्दने।तोहति।तुतोह।अतुहत्।अतोहीत्।दोहति।अ

ढे।गाहिता।ढो ढे लोपः।ढस्य लोपः स्याड्ढे।गाढा।गाहिष्यते।घाक्ष्यते।गाहिषीष्ट।घाक्षीष्ट।अगाहिष्ट।अगाढ।अघाक्षातां।अघा
क्षत।अगाढाः।अघाढ्वं।अघाक्षि।गृहू ग्रहणे।गर्हते।जगृहे।जगृहिषे।जघृक्षे।जघृढ्वे।गर्हिता।गर्ढा।गर्हिष्यते।घर्क्ष्यते।गर्हिषी
ष्ट।घृक्षीष्ट।अगर्हिष्ट।लुङि।इडभावे।शल इगुपधादनिटः क्सः।इगुपधो यः शलन्तस्तस्मादनिटश्च्लेः क्सादेशः स्यात्।अघृ
क्षत।क्सस्याचि।अजादौ तङि क्सस्य लोपः स्यात्।अलोऽन्त्यस्य।अघृक्षातां।अघृक्षंत।ग्लह च।ग्लहते।घुषि कान्तिकरणे।घुंषते
जुघुंषे।केचिद्घुषेत्यनुपधं पठन्ति॥ ॥अथार्हत्यन्ताः परस्मैपदिनः॥ ॥घुषिर विशब्दने।विशब्दनं प्रतिज्ञानं ततोन्यस्मिन्नर्थे इत्येके
शब्द इत्यन्ये पेठुः॥घोषति।जुघोष।घोषिता।इरित्वादङ् वा।अघुषत्।अघोषीत्।अक्षू व्याप्तौ।अक्षोन्यतरस्यां।अक्षेर्वा श्नुप्रत्ययः
स्यात्कर्त्रर्थे सार्वधातुके परे।पक्षे शप्।अक्ष्णोति।अक्ष्णुतः।श्नुप्रत्ययान्तत्वादुवङ्।अक्ष्णुवन्ति।अक्षति।अक्षतः।अक्षन्ति।आनक्ष।
आनक्षिथ।आनष्ठ।अक्षिता।अष्टा।अक्षिष्यति।स्कोरिति कलोपः।षढोः कसि।अक्ष्यति।अक्ष्णोतु।अक्ष्णुहि।अक्ष्णवानि।आ
क्ष्णोत्।आक्ष्णवं।अक्ष्णुयात्।अक्ष्णुयुः।अक्ष्यात्।ऊदित्वाद्वेट्।नेटि।मासवानक्षीत्।अक्षिष्टां।अक्षिषुः।इडभावे।मासवाना

सि·कौ·ति· ग्रैवं रघुकाव्ये। ध्वंशइत्यपि केचित् पेठुः। अचन्त्यतीयएव तालव्यांतइत्यन्ये। ध्वंश भ्रंश भ्रश अधःपतन इति दिवादौ॥ स्रंभु विश्वासे।
२५ अस्रभत्। अस्रंभिष्ट। दंत्यादिरयं। तालव्यादिस्तु प्रमादेन। वृतु वर्तने। वर्तते। ववृते। वृद्भ्यः स्यसनोः। वृतादिभ्यः परस्मै
पदं वा स्यात् स्ये सनि च। न वृद्भ्यश्चतुर्भ्यः। एभ्यः सकारादेरार्धधातुकस्येण् न स्यात्तङानयोरभावे। वर्त्स्यति। वर्तिष्यते
अवृतत्। अवर्तिष्ट। अवर्त्स्यत्। अवर्तिष्यत। वृधु वृद्धौ। शृधु शब्दकुत्सायां। इमौ वृतुवत्। स्यंदू प्रस्रवणे। स्यंदते। सस्यंदे। सस्यं
दिषे। सस्यंत्से। सस्यंदिध्वे। सस्यंध्वे। स्यंदिता। स्यंत्ता। वृद्भ्यः स्यसनोरिति परस्मैपदे कृते ऊदित्त्वलक्षणमन्तरंगमपि विकल्पं
बाधित्वा चतुर्ग्रहणसामर्थ्यान्न वृद्भ्यश्चतुर्भ्य इति निषेधः। स्यंत्स्यति। स्यंदिष्यते। स्यंत्स्यते। स्यंदिषीष्ट। स्यन्त्सीष्ट। द्युद्भ्यो
लुङि इति परस्मैपदपक्षे अङ्। नलोपः। अस्यदत्। अस्यंदिष्ट। अस्यन्त। अस्यन्त्साताम्। अस्यन्त्स्यत्। अस्यंदिष्यत। अस्यन्त्स
वि त। अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु। एभ्यः परस्याप्राणिकर्तृकस्य स्यन्दतेः सस्य षो वा स्यात्। अनुष्यंदते। अनुस्यंदते
वा जलं। अप्राणिषु किं। अनुस्यंदते हस्ती। अप्राणिष्विति पर्युदासान्मत्स्योदके अनुष्यंदते। इत्यत्रापि पक्षे षत्वं भवत्येव। प्राणिषु नेत्यु २५

कौ न स्यात्। कृपू सामर्थ्ये॥ कृपो रो लः। कृप उ छेदः। कृपेति लुप्तषष्ठीकं पदं। तच्चावर्तते। कृपो यो रेफस्तस्य लः स्यात्। ऋकारस्यावय
वो यो रेफसदृशस्तस्य च लकारसदृशः स्यात्। कल्पते। चक्लृपे। चक्लृपिषे। चक्लृप्से। इत्यादि स्यंदिवत्। लुटि च कृपः। लुटि स्यसनोश्च कृपेः
परस्मैपदं वा स्यात्॥ तासि च क्लृपः। कृपेः परस्य तासेः सकारादेरार्धधातुकस्य चेण् न स्यात्तङानयोरभावे। कल्प्तासि। कल्प्तास्थः
कल्पितासे। कल्प्तासे। कल्प्स्यति। कल्पिष्यते। कल्प्स्यते। कल्पिषीष्ट। क्लृप्सीष्ट। अक्लृपत्। अकल्पिष्ट। अक्लृप्त। अकल्प्स्यत्॥ अ क
कल्पिष्यत॥ अकल्प्स्यत। वृत्। वृतः। संपूर्णो द्युतादिर्वृतादिश्चेत्यर्थः॥ ॥अथ त्वरत्यंतास्त्रयोदशानुदात्तेतः॥ ॥षितश्च॥
घट चेष्टायां। घटते। जघटे। घटादयो मितः इति वक्ष्यमाणेन मित्संज्ञा। तत्फलं तु णौ मितां ह्रस्वः इति चिण्णमुलोर्दीर्घोऽन्यतरस्या
मिति च वक्ष्यते। घटयति॥ विघटयति। कथं तर्हि कमनोद्घाटनं कुर्वते ये। प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिवेत्या
दि। शृणु। घटसंघातस्येदं। न च तस्यैवार्थविशेषे मित्त्वार्थमनुवादोऽयमिति वाच्यम्। नान्ये मितोऽहेताविति निषेधात्। अहेतौ
स्वार्थे णिचि ज्ञपादिभिन्ना इति चौरादिकं चर्च्यत्व्यतिरिक्ताश्चुरादयो मितो नेत्यर्थः। व्यथ भयसंचलनयोः। व्यथते। व्यथो लिटि। व्य

सि०कौ०ति० थ्यासस्यसंप्रसारणंस्याल्लिटि।हलादिःशेषापवादः।थस्यहलादिःशेषेणनिवृत्तिः।विथ्यथे॥प्रथप्रख्याने।प्रथते।पप्रथे।प्रसविस्ता
२९६ रे।पप्रसे।म्रदमर्दने।स्खदस्खदने।स्खदनंविद्रावणं॥क्षिजिगतिदानयोः।मित्वसामर्थ्यादनुपधात्वेपिचिण्णमुलोरितिदीर्घविकल्पः
अक्षञ्जि।अक्षाञ्जि।क्षञ्जिम्।क्षञ्जम्।क्षाञ्जं।क्षाञ्जं।दक्षगतिहिंसनयोः।योयंवृद्धिशीघ्र्ययोरनुदात्तेत्सुपठितस्येहार्थवि
शेषेमित्वार्थोनुवादः।क्रपकृपायांगतौ।कदिक्रदिक्लदिवैक्लव्ये।वैक्लव्यइत्येके।त्रयोप्यनिदितइतिनंदी।इदितइतिस्वामी।कदि
क्रदीइदितौ।क्लदक्लुदेतिचानिदितावितिमैत्रेयः।कदिक्रदिक्लदीनामाह्वानरोदनयोःपरस्मैपदेषु क्तानांपुनरिहपाठोमित्वा
र्थआत्मनेपदार्थश्च।ञित्वरासंभ्रमे।घटादयःषितः।षित्वादङ्गवक्ष्यते॥ ॥अथफणांताःपरस्मैपदिनः॥ ॥ज्वररोगे।
ज्वरति।जज्वार।गडसेचने।गडति।जगाड।हेडवेष्टने।हेडअनादरे इत्यात्मनेपदेषुगतः।सएवोत्सृष्टानुबंधोनूद्यतेअर्थवि परि
शेषेमित्वार्थं।परस्मैपदिभ्योज्वरादिभ्यःप्रागेवअनुवादेकर्तव्येएतन्मध्येनुवादसामर्थ्यात्परस्मैपदम्॥हेडति।जिहेड॥
हिडयति।अहिडि॥अहीडि।अनादरेतुहेडयति।वटभटपरिभाषणे।वटवेष्टनेभटभृतावितिपठितयोःपरिभाषणेमित्वा २९६

रिका उदूहत्।अदोहीत्॥अनिट्कास्वस्यउदूहेर्ग्रहणंनेच्छन्ति।ओहति।उवोह।ऊहतुः।ओहिता।माभवानुहत्।औहीत्।अर्हपूजायाम्॥
आनर्ह॥ ॥ऊहपर्यंताअनुदात्तेतः॥ ॥द्युतदीप्तौ।द्योतते।द्युतिस्वाप्योःसंप्रसारणं।अनयोरभ्यासस्यसंप्रसारणंस्यात्।दिद्युते
।दिद्युताते।दिद्युतिरे।द्योतिता।द्युद्भ्योलुङि।द्युतादिभ्योलुङःपरस्मैपदंवास्यात्।पुषादीतिसूत्रेणपरस्मैअङ्।अद्युतत्।अद्यो परे
तिष्ट।श्वितावर्णे।श्वेतते।शिश्विते।अश्वितत्।अश्वेतिष्ट।ञिमिदास्नेहने।मेदते।मिदेर्गुणः।मिदेरिकोगुणःस्यादित्संज्ञकेश
शाकारादौ।एत्वआदिशेवाधान्नानेनगुणः।मिमिदे।अमिदत्।अमेदिष्ट।ञिष्विदास्नेहनमोचनयोः।मोहनयोरित्येके।स्वेदते।सि
ष्विदे।अस्विदत्।अस्वेदिष्ट।ञिक्ष्विदाचेत्येके।अक्ष्विदत्।अक्ष्वेदिष्ट।रुचदीप्तौ।अभिप्रीतौच।रोचतेसूर्यः।हरयेरोचतेभक्तिः॥
अरुचत्।अरोचिष्ट।घुटपरिवर्तने।घोटते।जुघुटे।अघुटत्।अघोटिष्ट।रुटलुटलुठप्रतीघाते।अरुटत्।अरोटिष्ट।शुभदीप्तौ॥
क्षुभसंचलने।णभतुभहिंसायां।आद्योभावेपि।नभंतामन्यकेसमे।माभूवन्नन्यकेसर्वेइतिनिरुक्तं।अनभत्।अनभिष्ट।अतुभत् नि
अतोभिष्ट।उभौदिवादौक्र्यादौच।स्रंसुध्वंसुभ्रंसुअवस्रंसने।ध्वंसुगतौच।अङिनलोपः।अस्रसत्।अस्रंसिष्ट।नाशंकारिणां स

सि०कौ०ति० मित्वविकल्पोवक्ष्यते॥ ज्वलदीप्तौ॥ णिप्रत्ययार्थपठिष्यमाण एवायंमित्वार्थमनूद्यते। प्रज्वलयति। ह्वल ह्मल चलने। प्रह्मलयति॥
२७ प्रह्वलयति। स्मृ आध्याने। चिंतायांपठिष्यमाणस्याध्यानेमित्वार्थोऽनुवादः। आध्यानमुत्कंठापूर्वकंस्मरणं। दॄ भये। दॄ विदारणेइ
तिक्र्यादेरयमनुवादः। दरणंतंप्रेरयति। दरयति। भयादन्यत्रदारयं। धात्वंतरमेवेदमितिमतेतुदरतीत्यादि। केचित्तुघटादौज्व ति
स्मृदृत्वरइति सूत्रेण दॄ इति दीर्घस्थाने ह्रस्वंपठंति। तन्नेतिमाधवः। नॄ नये। क्र्यादिषुपठिष्यमाणस्यानुवादः। नयादन्यत्रना
रयति। श्रा पाके। श्रा इति रूपत्वावस्यश्रा इत्यदादिकस्यचसामान्येनानुकरणं। लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य॥
लक्षणप्रतिपदोक्तयोःप्रतिपदोक्तस्येतिपरिभाषाभ्याम्। श्रपयति। विक्लेदयतीत्यर्थः। पाकादन्यत्रश्रापयति। स्वेदयती
त्यर्थः। मारणतोषणनिशामनेषुज्ञा। निशामनंचाक्षुषंज्ञानमितिमाधवः। ज्ञापनेमात्रमित्यन्ये। निशानेष्वितिपाठांतरं॥ नि
शानंतीक्ष्णीकरणं। एष्वर्थेषुजानातिर्मित्। ज्ञपमिच्चेतिचुरादौ। ज्ञापनमारणादिकंचतत्स्यार्थः॥ कथंविज्ञापनाभर्तृषुसि
द्धिमेतीति। तज्ज्ञापयत्याचार्य इतिच। शृणु। माधवमतेचाक्षुषज्ञानेमित्वाभावात्॥ ज्ञापनमात्रेमित्वमितिमतेतुज्ञा २७

नियोगइतिचौरादिकस्य। धातूनामनेकार्थत्वात्। निशानेष्वितिपठतांहरदत्तादीनांमतेतुनकाप्युपपत्तिः। कंपनेचलिः। चलइतिज्व
लादिः। चलयतिशाखां। कंपनादन्यत्रतुशीलंचालयति। अन्यथाकरोतीत्यर्थः। हरतीत्यर्थइतिस्वामी। सूत्रंचालयति। क्षिपतीत्य
र्थः। छदि रूर्जने। छद अपवारण इतियोजादिकस्य। स्वार्थेणिजभावेमित्वार्थोयमनुवादः। अनेकार्थत्वादूर्जेरर्थेवृत्तिः। छदं
तंप्रेरयतिछदयति। बलवंतंप्राणवंतंवाकरोतीत्यर्थः। अन्यत्रछादयति। अपवारयंतंप्रयुंक्त इत्यर्थः। स्वार्थणिचितुछाद
यति। बलीभवति। प्राणीभवति। अपवारयति वेत्यर्थः। जिह्वोन्मथनेलडिः। लडविलासइतिपठितस्यमित्वार्थोऽनुवादः। उन्म
थनंज्ञापनं। जिह्वाशब्देनषष्ठीतत्पुरुषः। लडयतिजिह्वां। तृतीयातत्पुरुषोवा। लडयतिजिह्वया। अन्येतुजिह्वाशब्देनतद्व्याप
रोलक्ष्यते। समाहारद्वंद्वोयं। लडयतिशत्रुं। लडयतिदधि। अन्यत्रपुत्रम्। मदीहर्षग्लेपनयोः। ग्लेपनंदैन्यं। दैवादिकस्यमित्वा लाडयति
र्थोयमनुवादः। मदयति। हर्षयति। ग्लेपयतिवेत्यर्थः। अन्यत्रमादयति। चित्तविकारमुत्पादयतीत्यर्थः। ध्वनशब्दे। भाव्य
यंमित्वार्थमनूद्यते। ध्वनयतिघंटां। अन्यत्रध्वानयति। अस्पष्टाक्षरमुच्चारयतीत्यर्थः। अत्रभोजः। दलि वलि स्खलि रणि ध्व

नित्रपिक्षपयश्चेति पपाठ। तत्र ध्वनिरणीउदाहृतौ। दल विदारणे। वल संवरणे। स्वल संचलने। त्रपूष् लज्जायाम्। मितिगताः। तेषां दो
दयति। वलयति। स्वलयति। त्रपयति। क्षेक्ष्ये इति वक्ष्यमाणस्य कृतात्वस्य पुकानिर्देशः। क्षपयति। स्वन अवतंसने। शब्द इति पठि
ष्यमाणस्यानुवादः। स्वनयति। अन्यत्र स्वानयति। घटादयो मितः। मित्संज्ञा इत्यर्थः। जनीजृष्क्नसुरंजोऽमंताश्च। मित इत्यनुवर्त्त
ते। जॄषिति षित्निर्देशाज्जीर्यतेर्ग्रहणं। जॄणातेरन्ये। जारयति। केचित्तु जनीजृष्णसु इति पठित्वा ष्णसु निरसने इति दैवादिक
मुदाहरंति। ज्वलह्वलह्मलनमामनुपसर्गाद्वा। एषां मित्वं वा। प्राप्तविभाषेयं। ज्वलयति। ज्वालयति। उपसृष्टे तु नित्यं मित्वं।
प्रज्वलयति। कथं तर्हि प्रज्वालयति। उन्नामयतीति। घञंतान्नत्करोतीति णौ। कथं संक्रामयतीति। मितां ह्रस्व इति सूत्रे वा
चित्तविरागे इत्यतो वेत्यनुवर्त्य व्यवस्थितविभाषाश्रयणादिति निर्वृत्ते। एतेन रंजो विश्रामयन्नाज्ञां। धुर्यान्विश्रामयेति सः
इत्यादि व्याख्यातं। ग्लास्नावनु वमां च। अनुपसर्गादेषां मित्वं वा स्यात्। आद्ययोरप्राप्ते इतरयोः प्राप्ते विभाषा। न कम्यमिचमां
च। अमंतत्वात्प्राप्तं मित्वमेषां न स्यात्। कामयति। कामयति। आमयति। चामयति। शमो दर्शने। शाम्यतिर्दर्शने मित्वं स्यात्॥ २६

र्थेनुवादः। णट नृत्तौ। इत्थमेव पूर्वं पठितं। तत्रायं विवेकः। पूर्वं पठितस्य नाट्यमर्थः। यत्कारिषु नटव्यपदेशः। वाक्यार्थाभिनयो नाट्यं। घट
दौ तु नृत्यं नृत्तं चार्थः। यत्कारिषु नर्तकव्यपदेशः। पदार्थाभिनयो नृत्यं। गात्रविक्षेपमात्रं नृत्तं। केचित्तु घटादौ न नटनर्तौ चेति पठंति। गतौ
वित्यन्ये। णोपदेशपर्युदासवाक्ये भाष्यकृता नाटीति दीर्घपाठात् घटादिर्णोपदेश एव। ष्टक प्रतीघाते। स्तकति। चक तृप्तौ। तृप्तिप्रति
घातयोः पूर्वं पठितस्य तृप्तिमात्रे मित्वार्थोऽनुवादः। आत्मनेपदिषु पठितस्य परस्मैपदिष्वनुवादात्परस्मैपदं। कखे हसने। एदित्वान्न
वृद्धिः। अकखीत्॥ रगे शंकायां। लगे संगे। ह्रगे ह्लगे षगे ष्टगे संवरणे। कगे नोच्यते। अस्यायमर्थ इति विशिष्य नोच्यते। क्रियासामा
न्यार्थत्वात्। अनेकार्थत्वादित्यन्ये। अक अग कुटिलायां गतौ। कण रण गतौ। चकाण। रराण। चण शण श्रण दाने। शण गतावि
त्यन्ये॥ श्रथ क्नथ क्रथ क्लथ हिंसार्थाः। जासिनिप्रहणेति सूत्रे क्राथेति मित्वेपि वृद्धिर्निपात्यते। क्राथयति। मित्वं तु परत्वान्निपातनाच्चिण
मुलोरिति सूत्रेण दीर्घे चरितार्थं॥ अक्रथि। आक्राथि। क्रथं। क्रथं॥ क्राथं। क्राथं। वन च। हिंसायामिति शेषः। वनु च नोच्यते॥ वनु इति अ ति
पूर्व एवायं धातुर्ननु तनादिकस्यानुवादः। उदित्करणसामर्थ्यात्। तेन क्रियासामान्ये वनतीत्यादि। प्रवनयति। अनुपसृष्टस्य॥

सि॰कौ॰ति॰ जे। रराजे। अत्र इत्यनुवृत्तावपि विधानविसामर्थ्यादात एवमुक्तं। टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ। अनुदात्तेतः। भ्राजतेरिह पाठः फणादि
कार्यार्थः। पूर्वपाठस्तु अभ्राजीदित्याद्यर्थः। तत्रहि राजिसाहचर्यात्फणादेरेव ग्रहणं। भ्रेजते। बभ्राजे। वा भ्राशेति श्यन्वा। भ्राश्यते। भ्राशते
२९ भ्रेशे। बभ्राशे। भ्लाश्यते। भ्लाशते। भ्लेशे। बभ्लाशे। द्वावपीमौ तालव्यान्तौ। स्यमु स्वन ध्वन शब्दे। स्यमादयः क्षरन्त्यन्ताः परस्मैपदिनः। स्येम
तुः। सस्यमतुः। अस्यमीत्। स्वेनतुः। सस्वनतुः। अस्वानीत्। अस्वनीत्। विष्वणति। अवष्वणति। सशब्दं भुङ्क्ते इत्यर्थः। वेश्च स्वन एत्वं। इति
फणादयो गताः। दध्वनतुः। षम ष्टम अवैक्लव्ये। ससाम। तस्ताम। ज्वल दीप्तौ। अतो ल्यान्तस्य। अज्वालीत्। चल कम्पने। जल घातने। घात
नं तैक्ष्ण्यं। जलति। टल ट्वल वैक्लव्ये। ष्ठल स्थाने। हुल विलेखने। णल गन्धे। बन्धन इत्येके। पल गतौ। पलति। बल प्राणने धान्यावरोधने च। ने
बेलतुः। बेलुः। पुल महत्त्वे। पोलति। कुल संस्त्याने बन्धुषु। संस्त्यानं संघातः। बंधुशब्देन तद्व्यापारो गृह्यते। कोलति। चुकोल। शल हुल
पत्लृ गतौ। शशाल। जुहोल। पपात। पेततुः। पेतुः। पतिता। पतः पुम्। अङि परे। अपप्तत्। नेर्गदेति णत्वं। प्रण्यपतत्। क्वथे
निष्पाके। क्वथति। चक्वाथ। अक्वथीत्। पथे गतौ। अपथीत्। मथे विलोडने। मेथतुः। अमथीत्। टुवमु उद्गिरणे। इह वनिपातनाट्ट २९

तइत्त्वमिति सुधाकरः। ववाम। ववमतुः। वादित्वादेत्त्वाभ्यासलोपौ न। भागवृत्तौ तु वेमतुरित्याद्युदाहृतं। तद्भाष्यादौ न दृष्टम्॥ भ्रमु
चलने। वा भ्राशेति श्यन्वा। भ्राम्यति। भ्रमति। भ्राम्यतीति तु दिवादौ वक्ष्यते। वा जॄभ्रमुत्रसां। एषामेत्त्वाभ्यासलोपौ वा स्तः किति लिटि सेटि
थलि च। भ्रेमतुः। बभ्रमतुः। अभ्रमीत्। क्षर सञ्चलने। अक्षारीत्। अथ द्वावनुदात्तेतौ। षह मर्षणे। परिनिविभ्य इति षत्वं। परिषहते
सेहे। सहिता। तीषसहेति वेट्। इडभावे ढत्वधत्वष्टुत्वढलोपाः। सहिवहोरोदवर्णस्य॥ अनयोरवर्णस्य ओत्स्यात् ढलोपे सति। सोढः।
सोढः परस्य सस्य षत्वं न स्यात्। परिसोढा। सिवादीनां वाड्व्यवायेपि। परिनिविभ्यः परेषां सिवादीनां सस्य षो वा स्यादड्व्यवायेपि। पर्य
षहत। पर्यसहत। रमु क्रीडायां। रेमे। रेमिषे। रन्ता। रंस्यते। रंसीष्ट। अरंस्त॥ अथ कसन्ताः परस्मैपदिनः॥ षद्लृ विशरणगत्यवसाद
नेषु। पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः। पादीनां पिबादयः स्युरित्सं
ज्ञकशकारादौ प्रत्यये परे। सीदति। ससाद। सेदतुः। सेदिथ। ससत्थ। सत्ता। सत्स्यति। लृदित्वादङ्। असदत्। सदिरप्रतेः। नीषीद
ति। न्यषीदत्। सदेः परस्य लिटि। संदेरभ्यासात्परस्य षत्वं न स्याल्लिटि। निषसाद। निषेदतुः। शद्लृ शातने। विशीर्णतायामयं। शा

सि·कौ·ति· तनं तु विषयत्वयानि … ह्रियते। शदेः शितः। शिद्भाविनो स्मादात्मनेपदं स्यात्। शीयते। शशाद। शेदतुः। शेदुः। शेदिथ। शशत्थ। शत्ता
।अशदत्। क्रुश आह्वाने रोदने च। क्रोशति। क्रोष्टा। क्रुशः क्सः। अक्रुक्षत्। कुच संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु। कोचति। चुकोच।
३० बुध अवगमने। बोधति। बोधिता। बोधिति … ष्य। रुह बीजजन्मनि प्रादुर्भावे च। रोहति। रुरोह। रुरोहिथ। रोढा। रोक्ष्यति। अरुक्षत्। कस ग
तौ। अकसीत्। अकासीत्। वृत्। ज्वलादिगणः समाप्तः॥ ॥नि॰ अथ गूहत्यन्ताः स्वरितेतः॥ ॥हिक्क अव्यक्ते शब्दे। हिक्कति। हिक्कते
अंचु गतौ याचने च। अंचति। अंचते। अचुइत्येके। अचिइत्यपरे॥ टुयाचृ याच्ञायां। याचति। याचते। रेटृ परिभाषणे। रेटति। रेटते। चते
चदे याचने। चचात। चेते। अचतीत्। चचाद। चेदे। अचदीत्। प्रोथृ पर्याप्तौ। पुप्रोथ। पुप्रोथे। मिदृ मेदृ हिंसनयोः। मिमेद। मिमिदे। मि
मेदे। थांता … वि मो वि ति स्वामी। ननामि मिमेथ। थांता विति न्यासः। मिधृ संगमने। मेधति। मिमेध॥ मिमेधे। णिदृ णेदृ कुत्सासंनिकर्षयोः
निनेद। निनिदतुः। निनिदे। निनेदतुः। निनेदे। शृधु मृधु उन्दने। उन्दनं क्लेदनं। शर्धति। शर्धते। शर्धिता। मर्द्धति। मर्धते। बुधिर् बोध
ने। बोधति। बोधते। इरित्वाद्वा। अबुधत्। अबोधीत्। अबोधिष्ट। दीपजनेति चिण् न … बति। पूर्वोत्तरसाहचर्येण देवादिकस्यैव ३०

निशामयति॥ रूपं। अन्यत्र प्रणुयिनो निशामय्य वधूकथाः। कथं तर्हि निशामयतदुत्पत्तिं विस्तराद्गदतो मम मेति। शम आलोचने इति चौरादि
कस्य। धातूनां नेकार्थत्वाछूद्दीतिः। शाम्यतिवत्। यमोपरिवेषणे। यच्छति र्भोजनतोन्यत्र मित्वं स्यात्। आयामयति। डायति। व्यापार य
तिवेत्यर्थः। परिवेषणे तु यमयति। ब्राह्मणान्भोजयतीत्यर्थः। पर्यवसितं नियमयन्नित्यादि तु नियमवच्छद्मा नवक्रोतादिर्णो बोध्यम्॥
स्खदिर् अवपरिभ्यां च। मित्त्वे वेत्येव। अवस्खादयति। परिस्खादयति। अपावपरिभ्य इति न्यासकारः। स्वामी तु न कमी तिनत्र मुत्तर विस
र्ष्यामनुवर्त्य शमअदर्शन इति चिच्छेद। यमस्तु अपरिवेषणे मित्वमाह। तन्मते पर्यवसितं नियमयन्नित्यादि सम्यगेव। उपसृष्ट
स्य स्खदेरप्येद वाहिपूर्वस्येति नियमात्। प्रस्खादयतीत्याहु। तस्मात्सूत्र इये उदाहरणप्रत्युदाहरणयोर्व्यत्यासः। फलितः। इदं
च मतं वृत्तिन्यासादिविरोधादुपेक्ष्यं॥ फणगतौ। नेति निवृत्तं। असंभवात्। निषेधात्सूर्वमसौ न पठितः। फणादिकार्यानु धात्व॥ रा
फणां च सप्तानां। एषां वा एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च। फेणतुः। फेणुः। फेणिथ। पफणतुः। पफणिथ। फणयति
वृत्। घटादिः समाप्तः। फणेः प्रागेव वृदित्येके। तन्मते। फाणयतीत्येव। राजृ दीप्तौ। स्वरितेत्। राजति। राजते। रेजतुः। रराजतुः। रे

अघुसंज्ञावद्दि॥ अथाजंता उभयपदिनः॥ श्रिञ् सेवायां। श्रयति। श्रयते। शिश्राय॥ शिश्रियतुः। श्रयिता॥ णिश्रीति चङ्। अशिश्रि
यत्। भृञ् भरणे। भरति। बभार। बभ्रतुः। बभर्थ। बभृव। बभृषे। भर्ता। ऋद्धनोः स्ये। ऋतो हन्तेश्च स्यस्येट् स्यात्। भरिष्यति। रिङ् शय
ग्लिङ्क्षु। शयक्रियादावार्धधातुके लिङि च ऋतो रिङादेशः स्यात्। रीङि प्रकृते रिङ् विधानसामर्थ्याद्दीर्घो न॥ भ्रियात्। उश्च। ऋवर्णा
त्परो झलादी लिङ् तङ् परः सिच्चेत्येतौ कितौ स्तः। भृषीष्ट। भृषीयास्तां। अभार्षीत्। अभार्ष्टां। अभार्षुः। ह्रस्वादङ्गात्। सिचो लोपः स्या
ज्झलि। अभृत। अभृषातां। अभरिष्यत्। हृञ् हरणे। हरणं प्रापणं स्वीकारः स्तेयं नाशनं च। जहर्थ। जहृव। जहृषे। हर्ता। हरिष्य
ति। धृञ् धारणे। धरति। अधार्षीत्। अधृत। णीञ् प्रापणे॥ निनयिथ। निनेथ। निन्यिषे॥ अथाजंताः परस्मैपदिनः॥ धेट् पाने॥ ध
यति। आदेच उपदेशेऽशिति। उपदेशे एजंतस्य धातोरात्वं स्यान्न तु शिति। आत औ णलः। आदन्ताद्धातोर्णल औरादेशः स्यात्॥ द
धौ। आतो लोप इटि च। अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोरातो लोपः स्यात्। द्वित्वात्परत्वाल्लोपे प्राप्ते। द्विर्वचनेऽचि। निषे
धः। द्वित्वे कृते आतो लोपः। दधतुः। दधुः। दधिथ। दधाथ। दधिव। धाता। दाधाघ्वदाप्। दारूपा धारूपाश्च धातवो घुसं

ज्ञाः स्युर्दाप्दैपौ विना। एर्लिङि। घुसंज्ञानां मास्थादीनां च एत्वं स्यादार्धधातुके लिङि किति। धेयात्। धेयास्तां। धेयासुः। विभाषा धे
ट्श्व्योः। आभ्यां च्लेश्चङ् वा स्यात् कर्तृवाचिनि लुङि परे। चङि इति द्वित्वं। अदधत्। अदधतां। विभाषा घ्राधेट्शाच्छासः। एभ्यो सिचो लु
ग्वा स्यात् परस्मैपदे परे। अधात्। अधातां। अधुः। यमरमनमातां सक् च। एषां सक् स्यादेभ्यः सिच इट् स्यात् परस्मैपदेषु। अधासीत्॥ अ
धासात्॥ अधासिष्टां। अधासिषुः। ग्लै म्लै हर्षक्षये। हर्षक्षयो धातुक्षयः। ग्लायति। जग्लौ। जग्लिथ। जग्लाथ। वान्यस्य संयोगादेः।
घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्वं वा स्यादार्धधातुके किति लिङि। ग्लायात्। ग्लेयात्। अग्लासीत्। म्लायति। द्यै न्यक्करणे
न्यक्करणं तिरस्कारः। द्रै स्वप्ने। ध्रै तृप्तौ। ध्यै चिन्तायां। रै शब्दे। स्त्यै ष्ट्यै शब्दसंघातयोः। स्त्यायति। षोपदेशस्यापि सत्त्वे कृते रूपं
तुल्यं॥ षोपदेशफलं तु तिष्ट्यासति। अतिष्ट्यपत् इत्यत्र षत्वं। खै खदने। क्षै जै षै क्षये। क्षायति। जायति। जजौ। जाता। सा
यति। ससौ। साता। घुमास्थेत्यत्र विभाषा घ्राधेट् इत्यत्र च स्यतेरेव ग्रहणं न त्वस्य। तेन एत्वसिज्लुकौ न। सायात्। असासीत्।
कै गै शब्दे। श्रै पाके। पै ओवै शोषणे। पायात्। अपासीत्। घुमास्थेति ईत्वं तु तदपवाद एर्लिङीत्येत्वं। गातिस्थेति सिज्लुक् न॥ पा स्त्येति

३२ पस्यलाक्षणिकत्वात्।ष्टैवेष्टने।स्तायति।ष्णैवेष्टने।शोभायांचेत्येके।स्नायति।दैप्शोधने।दायति।अघुत्वादेत्वसिज्लुकौन।दायात्।
अदासीत्।पापाने।पाघ्राध्मेतिपिबादेशः।तस्यादन्तत्वान्नोपधागुणः।पिबति।पेयात्।अपात्।घ्रागंधोपादाने।जिघ्रति।घ्राया
त्।घ्रेयात्।अघ्रासीत्।अघ्रात्।ध्माशब्दाग्निसंयोगयोः।धमति।ष्ठागतिनिवृत्तौ।तिष्ठति।स्थादिष्वभ्यासेनेतिषत्वं।अधित
ष्ठौ।उपसर्गादितिषत्वं।अधिष्ठाता।स्थेयात्।म्नाअभ्यासे।मनति।दाण्दाने।प्रणियच्छति।देयात्।अदात्।ह्वृकौटिल्ये।ह्वर
ति।ह्वरतः।ह्वरंति।ऋतश्चसंयोगादेर्गुणः।ऋदंतस्यसंयोगादेरंगस्यगुणःस्याल्लिटि।किदर्थमपीदंपरत्वाणल्यपिभवति।रप
रत्वं।उपधावृद्धिः।जह्वार।जह्वरतुः।जह्वरुः।जह्वर्थ।ह्वर्ता।ऋद्धनोःस्ये।ह्वरिष्यति।गुणोर्तिसंयोगाद्योः।अर्तेःसंयोगादेर्ऋदंत
स्यचगुणःस्यात्।यकियादावार्धधातुकेलिङिच।ह्वर्यात्।अह्वार्षीत्।अह्वार्ष्टां।स्वृशब्दोपतापयोः।स्वरतीतिवेट्।सस्वरिथ।
सस्वर्थ।वमयोस्तु।श्र्युकःकिति।श्रिञ्एकाचउगंताच्चपरयोर्गित्कितोरिण्नस्यात्।परमपिस्वरत्यादिविकल्पंबाधित्वा
पुरस्तात्प्रतिषेधकाण्डारंभसामर्थ्यादनेननिषेधेप्राप्तेक्रादिनियमान्नित्यमिट्।सस्वरिव।सस्वरिम।परत्वादड्नोर ३२

तत्त्वग्रहणात्।उंबुदिर्निशामने।निशामनंज्ञानं।बुबुंद।बुबुन्दे।अबुदत्।अबुंदीत्।वेणृगतिज्ञानचिंतानिशामनवादित्रग्रहणेषु।वे
णते।नांतोप्ययं।खनु अवदारणे।खनति।खनते।गमहनजनखनघसांलोपःक्ङित्यनङि।एषामुपधायालोपःस्यादजादौक्ङितिन
त्वङि।चखनतुः।येविभाषा।खायात्।खन्यात्।चीवृआदानसंवरणयोः।चिचीव।चिचीवे।चायृपूजानिशामनयोः।व्ययगतौ।अ
व्ययीत।दाशृदाने।ददाश।ददाशे।भेषृभये।गतावित्येके।भेषति।बिभेष।भ्रेषृभ्लेषृगतौ।असगतिदीप्त्यादानेषु।असति।असते।आ
से।आसे।अयंषांतोपि।स्पशबाधास्पर्शनयोः।स्पर्शनंग्रंथनं।स्पशति।स्पशते।लषकान्तौ।कांतिरिच्छा।वाभ्राशेतिश्यन्वा।लष्य
ति।लषति।लेषतुः।लेषे।चषभक्षणे।छषहिंसायां।चछषतुः।चछषे।झषआदानसंवरणयोः।भ्रक्षम्लक्षअदने।दासृदाने।
माहृमाने।गुहूसंवरणे।ऊदुपधायागोहः।गुहेरुपधायाऊत्स्याद्गुणहेतावजादौप्रत्यये।गूहति।गूहते।ऊदित्वादिड्वा।गूहिता।गो
ढा।गूहिष्यति।घोक्ष्यति।गूहेत्।गुह्यात्।अगूहीत्।इड्भावेक्सः।अघुक्षत्।लुग्वादुहदिहलिहगुहामात्मनेपदेदन्त्ये।एषांक्सस्यलुग्वा प रं
स्यादन्त्येतङि।ढत्वधत्वष्टुत्वढलोपदीर्घाः।अगूढ।अघुक्षत।क्सस्याचीत्यंतलोपः।अघुक्षातां।अघुक्षंत।अघुह्वहि।अघुक्षावहि।।

र्वधातुके। जुहोतेः श्नुप्रत्ययांतस्यानेकाचोऽसंयोगपूर्वस्य यण् स्यादजादौ सार्वधातुके। उवङोऽपवादः। शृणोमि। शृण्वः।
शृणुवः। शृण्मः। शृणुमः। शुश्रोथ। शुश्रुव। शृणु। शृणवानि। शृणुयात्। श्रूयात्। अश्रौषीत्। ध्रु स्थैर्ये। ध्रवति। अयं कुटादौ ग
त्यर्थोऽपि। दु द्रु गतौ। दुदोथ। दुदविथ। दुदुविव। दुद्रोथ। दुद्रुव। णिश्रीति चङ्। अदुद्रुवत्। जि जि अभिभवे। अभिभवो न्यूनीक
रणं न्यूनीभवनं च। आद्ये सकर्मकः। शत्रून् जयति। द्वितीये त्वकर्मकः। अध्ययनात्पराजयते। अध्येतुं ग्लायतीत्यर्थः। विपराभ्यां
जेरिति तङ्। पराजेरसोढ इत्यपादानत्वं।। अथ ङीङन्ता ङितः। ष्मिङ् ईषद्धसने। स्मयते। सिष्मिये। सिस्मियिढ्वे। सिष्मियिध्वे।
गुङ् अव्यक्ते शब्दे। गवते। जुगुवे। गाङ् गतौ। गाते। गाते। गाते। इट एत्त्वे कृते वृद्धिः। गे। लङि इटि अगे। अत्र गुणो जातः। गेत।
गेयातां। गेरन्। गासीष्ट। गासीयास्तां। गासीरन्। गाङ्कुटादिसूत्रे इङादेशस्यैव गाङो ग्रहणं न त्वस्य। तेनाङित्वाद्घुमास्थेतीत्वं
न। अगास्त। अदादिकोऽयमिति हरदत्तादयः। फले तु न भेदः। कुङ् घुङ् उङ् ङुङ् शब्दे। अन्ये तु उङ् कुङ् खुङ् गुङ् घुङ् ङुङ् इत्या
हुः। कवते। चुकुवे। घवते। अवते। ऊवे। वार्णादांगं बलीय इत्युवङ्। ततः सवर्णदीर्घः। ओता। ओष्यते। ओषीष्ट। ओष्ट। ङ

वते। ङुहोश्नुः। जुङुवे। ङोता। च्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ। क्रुङ् इत्येके। रुङ् गतिरेषणयोः। रेषणं हिंसा। रुरुवे। रविता। से। धृङ् अव
ध्वंसने। धरते। दध्रे। मेङ् प्रणिदाने। प्रणिदानं विनिमयः। प्रत्यर्पणं च। प्रणिमयते। नेर्गदेति णत्वं। तत्र घुप्रकृतिमाङिति पठित्वा
ङितो माप्रकृतेरपि ग्रहणस्येष्टत्वात्। देङ् रक्षणे। दयते। दयतेर्दिगि लिटि। दिग्यादेशेन द्वित्वबाधनमिष्यत इति वृत्तिः। दिग्ये। दि
ग्याते। दिग्यिरे। स्थाघ्वोरिच्च। अनयोरिदादेशः स्यात्सिच्च कित्स्यात्। अदित। अदिथाः। अदिषि। श्यैङ् गतौ। श्यायते। शश्ये। प्यै
ङ् वृद्धौ। प्यायते। पप्ये। प्याता। त्रैङ् पालने। त्रायते। तत्रे। पूङ् पवने। पवते। पुपुवे। पविता। मूङ् बंधने। डीङ् विहायसा गतौ। डयते
डिड्ये। डयिता। तॄ प्लवनतरणयोः। ॠत इद्धातोः। ॠदन्तस्य धातोरंगस्येत्स्यात्। उत्त्वेताभ्यां गुणवृद्धी विप्रतिषेधेन। तरति। ऋच्छ
त्यॄतामिति गुणः। तॄफलेत्येत्वं। तेरतुः। तेरुः। वृतो वा। वृङ् वृञ्भ्यामॄदन्ताच्चेटो दीर्घो वा स्यान्न तु लिटि। तरिता। तरीता। अलिटीति
किं। तेरिथ। हलि चेति दीर्घः। तीर्यात्। सिचि च परस्मैपदेषु। अत्र वृत इटो दीर्घो न। अतारिष्टां। अथाष्टावनुदात्तेतः। गुप गोपने।
तिज निशाने। मान पूजायां। बध बंधने। गुप्तिज्किद्भ्यः सन्। मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य। सूत्रद्वयोपात्तेभ्यः सन्स्या

न्मानादीनामभ्यासस्येकारस्य दीर्घश्च। गुपेर्निंदायां। तिजेः क्षमायां। कितेर्व्याधिप्रतीकारे निग्रहेऽपनयने नाशने संशये च। माने
जिज्ञासायां। बधेश्चित्तविकारे। दानेरार्जवे। शानेर्निशाने। सनाद्यंता धातवइति धातुत्वं। सन्यङोः। सन्नंतस्य यङंतस्य च प्रथमैका
चोद्वे स्तोजादेर्द्वितीयस्य। अभ्यासकार्यं। गुपिप्रभृतयः कित भिन्नानिंदाद्यर्थका एवानुदात्तेतो दानशानौ च स्वरितेतो। एतेति
भ्यं सन्नंताः। अर्थांतरे त्वननुबंधकाश्चुरादयः। अनुबंधस्य केवलेऽचरितार्थत्वात्सन्नंतान्नतङ्। धातोरित्यविहितत्वात्सनोत्र नार्ध
धातुकत्वं। नेनेड्गुणेन। जुगुप्सते। जुगुप्सांचक्रे। तितिक्षते। मीमांसते। भष्भावः। चर्त्वं। बीभत्सते। रभराभस्य। आरभते। आरेभे। र
भ्या। रप्स्यते। डुलभष् प्राप्तौ। लभते। ष्वंज परिष्वंगे। दंशसंजस्वजां शपि। रंजेश्च। एषां शपि नलोपः। स्वजते। परिषजते। श्रंथिग्रं
थिदंभिस्वंजीनां लिटः कित्वं वेति व्याकरणांतरं। देभतुः। सस्वजइति भाष्योदाहरणादेकदेशानुमत्याउदाहाप्याश्रीयते। सदेः
परस्यलिटीतिसूत्रे स्वंजेरुपसंख्यानं। अतोभ्यासात्परस्य षत्वं न। परिषस्वजे। परिषस्वंजे। सस्वजिषे। सस्वंजिषे। स्वंक्ता
स्वंक्ष्यते। स्वजेत। स्वंक्षीष्ट। प्रत्यष्वंक्त। प्राक्सितादिति षत्वं। परिनिविभ्यः स्तुसिवादीनां वेति विकल्पः। एतदर्थमेवोपसर्गा २४

तिनित्यमिट्। स्वरिष्यति। स्वर्यात्। अस्वारीत्। अस्वारिष्टां। अस्वार्षीत्। अस्वारिष्टां। स्मर्यते। स्मृ चिंतायां। दृ संवरणे। सृ गतौ। क्रादि
त्वान्नेट्। ससर्थ। सस्रिव। रिङ्। स्रियात्। असार्षीत्। असार्ष्टां। सर्तिशास्त्यर्तिभ्यश्च। एभ्यश्च्लेरङ् स्यात्कर्त्रर्थे लुङि परे। इहलुग्विकरणशा
सिना साहचर्यात्सर्त्यर्ती जौहोत्यादिकावेव गृह्येते। तेन भ्वाद्योरङ् न। शीघ्रगतौ तु पाघ्राध्मेति शिति धौरादेशः। धावति। ऋ गतिप्रापण
योः। ऋच्छति। ऋच्छत्यॄतां। तौदादिक ऋच्छेर्ऋधातोॠतां च गुणः स्याल्लिटि। णलि प्राग्वदुपधावृद्धिः। आर। आरुः। आरतुः। इडत्यर्ति
व्ययतीनां। अड्ऋव्येञ्भ्यस्थलो नित्यमिट्। आरिथ। अर्ता। अरिष्यति। अर्यात्। आर्षीत्। आर्ष्टाम्। गृ घृ सेचने। गरति। जगार
जगर्थ। जग्रिव। रिङ्। ग्रियात्। अगार्षीत्। ध्वृ हूर्छने। स्रु गतौ। सुस्रोथ। सुस्रुव। स्रूयात्। णिश्रीति चङ्। लघूपधगुणादंतरंग
त्वादुवङ्। असुस्रुवत्। षु प्रसवैश्वर्ययोः। प्रसवोऽभ्यनुज्ञानं। सुषोथ। सुषविथ। सुषुविव। [illegible] सोता। स्तुसुधूञ्भ्यः परस्मैप
देषु। एभ्यः सिच इट् स्यात्परस्मैपदे। असावीत्। पूर्वोत्तराभ्यां त्रिभ्यां साहचर्यात्सुनोतेरेव ग्रहणपक्षे। असौषीत्। श्रु श्रवणे
श्रुवः शृ च। श्रुवः शृ इत्यादेशः स्यात् श्नुप्रत्ययश्च शपोपवादः। श्नोर्ङित्वाद्धातोर्गुणेन। शृणोति। शृणुतः। हुश्नुवोःसा

सि॰ को॰ उ॰

३५

सर्पति। ससर्प। अनुदात्तस्यचर्दुपधस्यान्यतरस्याम्। उपदेशेऽनुदात्तोयऋदुपधस्तस्य अम्वास्याज्झलादावकितिपरे। स्रप्ता। सर्प्ता।
स्रप्स्यति। सर्प्स्यति। असृपत्। यमउपरमे। यच्छति। येमिथ। ययंथ। यंता। अयंसीत्। अयंसिष्टां। तपसंतापे। तप्ता। अताप्
सीत्। निसस्तपतावनासेवने। षः स्यात्। आसेवनं पौनःपुन्यं। ततोऽन्यस्मिन्विषये। निष्टपति। त्यजहानौ। तत्यजिथ। तत्यक्थ
त्यक्ता। अत्याक्षीत्। षंजसंगे। दंशसंजेतिन्लोपः। सजति। संक्ता। दृशिर्प्रेक्षणे। पश्यति। विभाषासृजिदृशोः। आभ्यांथलइ
ड्वास्यात्। सृजिदृशोर्झल्यमकिति। अनयोरमागमः स्याज्झलादावकिति। दद्रष्ठ। ददर्शिथ। द्रष्टा। द्रक्ष्यति। दृश्यात्। इरितो
दृङ्वा। ऋदृशोऽङिगुणः। ऋवर्णांतानांदृशेश्चगुणः स्यादङि। अदर्शत्। अङभावे। नदृशः। दृशश्क्सो न। अद्राक्षीत्

११२ दंशदंशने। दशनं दंष्ट्राव्यापारः। पृषोदरादित्वादनुनासिकलोपः। अत एव निपातनादित्येके। नस्याप्यत्रैव तात्पर्यं। अर्थनिर्दे
शस्याधुनिकत्वात्। दंशसंजेति नलोपः। दशति। ददंशिथ। ददंष्ठ। दंष्टा। दंक्ष्यति। दशेत्। दश्यात्। अदांक्षीत्। कृषविले
खने। विलेखनमाकर्षणं। क्रष्टा। कर्ष्टा। क्रक्ष्यति। कर्क्ष्यति। स्पृशमृशकृषतृपदृपांच्लेः सिज्वावक्तव्यः। अक्राक्षीत्। अका

ष्टां। अकार्क्षीत्। अकार्ष्टां। अकार्क्षुः। पक्षेक्सः। अकृक्षत्। आकृक्षातां। अकृक्षन्। दहभस्मीकरणे। देहिथ। ददग्ध। दग्धा। धक्ष्यति। ३५
अधाक्षीत्। अदाग्धां। अधाक्षुः। मिहसेचने। मिमेहिथ। मिमिहिव। मेढा। मेक्ष्यति। अमिक्षत्। कितनिवासे रोगापनयनेच। चिकि
त्सति। संशयेप्रायेणविपूर्वः। विचिकित्सातुसंशये इत्यमरः। अस्यानुदात्तेत्त्वमाश्रित्य विचिकित्सते इत्यादि केचिदुदाजहार। नि
वासेकेतयति। दानखंडने। शानतेजने॥ इतोऽवहत्यंताः स्वरितेतः॥ दीदांसति। दीदांसते। शीशांसति। शीशांसते। अर्थविशेषेसन्।
अन्यत्रदानयति। शानयति। डुपचष्पाके। पचति। पचते। पेचिथ। पपक्थ। पेचे। पक्ता। पक्षीष्ट। षचसमवाये। सचति। सचते।
सचिता। सचिष्यति। भजसेवायां। बभाज। भेजतुः। भेजिथ। बभक्थ। भक्ता। भक्ष्यति। भक्ष्यते। अभाक्षीत्। अभक्त। अभक्षातां।
अभक्षत। रंजरागे। नलोपः। रजति। रजते। रज्यात्। रंक्षीष्ट। अरांक्षीत्। अराक्तां। अरांक्षुः। अरंक्त। अरंक्षातां। शपआक्रोशे। आक्रो
विरुद्धानुध्यानं। शशाप। शेपे। शप्ता। अशाप्सीत्। अशप्त। त्विषदीप्तौ। त्वेषति। त्वेषते। तित्वेष। त्वेक्ष्यति। त्विष्यात्। त्विक्षीष्ट। अत्विक्ष
त्। अत्विक्षतां। अत्विक्षत। अत्विक्षातां। अत्विक्षंत। यजदेवपूजासंगतिकरणदानेषु। यजति। यजते। लिट्यभ्यासस्योभयेषां। वच्या
दीनांग्रह्यादीनांचाभ्यासस्यसंप्रसारणंस्याल्लिटि। यजिवपिवहिश्वेववसिर्व्येञ्व्यञ्हुञ्त्यापि। केचिद्वदीश्वयतिश्चेचयजाद्यासु

रिमेनव। इयाज। वचिस्वपियजादीनां किति। वचिस्वप्योर्यजादीनां च संप्रसारणं स्यात्किति। पुनः प्रसंगविज्ञानाद्द्वित्वं। ईजतुः। ईजुः। त
इयजिथ। इयष्ठ। ईजे। यष्टा। यक्ष्यति। यक्ष्यते। इज्यात्। यक्षीष्ट। अयाक्षीत्। अयष्ट। डुवपबीजसंताने। बीजसंतानं क्षेत्रे विकिरणं ग
र्भाधानं च। अयं छेदनेपि। केशान्वपति। वपते। उवाप। ऊपे। वप्ता। उप्यात्। वप्सीष्ट। अवाप्सीत्। अवप्त। वहप्रापणे। उवाह। उ
वहिथ। सहिवहोरोदवर्णस्य। उवोढ। ऊहे। वोढा। वक्ष्यति। वक्ष्यते। अवाक्षीत्। अवोढां। अवाक्षुः। अवोढ। अवक्षातां। अवक्षत।
अवोढाः। अवोढ्वं। वसनिवासे। परस्मैपदी। वसति। उवास। शासिवसिघसीनां च। इण्कुभ्यां परस्यैषां सस्य षः स्यात्। ऊषतुः। ऊ
षुः। उवसिथ। उवस्थ। वस्ता। सस्यार्द्धधातुके। वत्स्यति। उष्यात्। अवात्सीत्। अवात्तां। वेञ्तंतुसंताने। वयति। वयते। वेञो वयिः
वास्याल्लिटि। इकार उच्चारणार्थः। उवाय। ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च। एषां किति ङिति
च संप्रसारणं स्यात्। यकारस्य प्राप्ते। लिटि वयो यः। वयो यस्य संप्रसारणं न स्यात् लिटि। ऊयतुः। ऊयुः। वश्चास्यान्यतरस्यां
किति। वयो यस्य वो वा स्यात् किति लिटि। ऊवतुः। ऊवुः। वयेस्तासावभावात् थलि नित्यमिट्। उवयिथ। स्थानिवद्भावेन जि ३६

क्नोतीत्येव सिद्धे स्कस्कंजोः परिनिवृत्त्यर्थं पुनरुपादानं॥ पयबंक्त। ह्रद पुरीषोत्सर्गे। हदते। जहदे। हत्ता। हत्स्यते। हदेत। हत्सीष्ट।
अहत्त॥ अथ परस्मैपदिनः। ञिष्विदा अव्यक्ते शब्दे। स्कंदिर् गतिशोषणयोः। चस्कंदिथ। चस्कंथ। स्कंत्स्यति। नलोपः। स्कद्यात्॥
इरित्वादङ् वा। अस्कदत्। अस्कांत्सीत्। अस्कांतां। अस्कांत्सुः। वेः स्कंदेरनिष्ठायां। षत्वं वा स्यात्। कृत्येवेदं। अनिष्ठायामिति पर्यु
दासात्। विष्कंत्ता। विस्कंत्ता। निष्ठायां तु विस्कन्नः। परेश्च। अस्मात्परस्य स्कंदेः सस्य षो वा स्यात्। योगविभागादनिष्ठायामिति न सं
बध्यते। परिष्कंदति॥ परिस्कंदति। परिष्कण्णः। परिस्कन्नः। षत्वपक्षे णत्वं। नन्वपदद्वयाश्रयतया बहिरंगतया षत्वस्यासिद्धत्वं॥
धातूपसर्गयोः कार्यमंतरंगमित्यभ्युपगमात्। पूर्वं धातुरुपसर्गेण युज्यते ततः साधनेनेति भाष्यं। पूर्वं साधनेनेति मतांत
रे तु न णत्वं। यभ मैथुने। येभिथ। ययब्ध। यब्धा। यप्स्यति। अयाप्सीत्। णम प्रह्वत्वे शब्दे च। नेमिथ। ननंथ। नंता। अनंसीत्।
अनंसिष्टां। गम्लृ सृप्लृ गतौ। इषुगमियमां छः। एषां छः स्यात् शिति। गच्छति। जगाम। जग्मतुः। जगमिथ। जगंथ। गंता। गमेरि
ट्परस्मैपदेषु। गमेः परस्य सकारादेरिट् स्यात्। गमिष्यति। लृदित्वादङ् वा। अनङीति पर्युदासान्नोपधागुणः। लोपः। अगमत्॥

सि·कौ·ति श्वयेत्।शूयात्।जृस्तंभ्विस्त्वयङ्वा।श्वयतेरः।श्वयतेरिकारः स्यादङि।पररूपं।अश्वत्।अश्वतां।अश्वन्।विभाषाधेट्श्व्योरिति
चङ्।उपयङ्।अशिश्वियत्।अशिश्वियतां।ह्म्यंतक्षणेति न वृद्धिः।अश्वयीत्।अश्वयिष्टां।दृत्।यजादयो वृत्ताः।श्वादिस्त्वा
कृतिगणः।तेन नुलुंपतीत्यादिसंग्रहः॥ ॥इति श्वादयः॥ ॥ऋतेरीयङ्।ऋतिः सौत्रः।तस्मादीयङ्।स्वार्थे।जुगुप्सायामयंधा
तुरिति बहवः।कृपायां चेत्येके।सनाद्यंता धातव इति धातुत्वं।ऋतीयते।ऋतीयांचक्रे।आयादय आर्धधातुके वेतीङ्भावे शे
षात्कर्तरि परस्मैपदं।आनर्त।अर्तिष्यति।आर्तीत्।इत्यादि।अद भक्षणे।द्वौ परस्मैपदिनौ।अदिप्रभृतिभ्यः शपः।लुक्स्यात्।
अत्ति।अत्तः।अदंति।लिट्यन्यतरस्यां।अदो घस्लृ वा स्याल्लिटि।जघास।गमहनेत्युपधालोपः।तस्य च विधिं प्रति स्थानिव
त्वनिषेधाद्धस्य चर्त्वं।शासिवसीति षत्वं।जक्षतुः।जक्षुः।घसः स्वासाभावात्थलि नित्यमिट्।जघसिथ।आद।आदतुः।इडत्य
र्त्तीति नित्यमिट्।आदिथ।अत्ता।अत्स्यति।हुझल्भ्यो हेर्धिः।होर्झलंतेभ्यश्च हेर्धिः स्यात्।अद्धि।अत्तात्।अदानि।अदः स
र्वेषां।अदः परस्यापृक्तसार्वधातुकस्य अडागमः स्यात्सर्वमतेन।आदत्।आत्तां।आदन्।आदः।आत्तं।आत्त।आदं।आ

द्व।आद्म।अद्यात्।अद्यातां।अद्युः।अद्यास्तां।अद्यासुः।लुङ्सनोर्घस्लृ।अदो घस्लृ वा स्याल्लुङि सनि च।लृदित्वादङ्।अघसत्।
हन हिंसागत्योः।प्रणिहंति।अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति।अनुनासिकेति लुप्तषष्ठीकं पदं॥
वनतीतरेषां विशेषणं।अनुनासिकांतानामेषां वनतेश्च लोपः स्याज्झलादौ क्ङिति परे।यमिरमिनमिगमिहनिमंतयोनुदात्तोपदेशाः। न्य
तनुपणुक्षणुक्षिणुऋणुतृणुघृणुवनुमनुतनोत्यादयः।हतः।घ्नंति।वमोर्वा॥उपसर्गस्थान्निमित्तात्परस्य हंतेर्हस्य णो वा स्याद्वम
योः परतः।प्रहण्मि।प्रहन्मि।प्रहण्वः।प्रहन्वः।होहंतेरिति कुत्वं।जघान।जघ्नतुः।जघ्नुः।अभ्यासाच्च।अभ्यासात्परस्य हंतेर्ह
स्य कुत्वं स्यात्।जघनिथ।जघंथ।हंता।ऋद्धनोरितीट्।हनिष्यति।हंतु।हतात्।घ्नंतु।हंतेर्जः।हौ परे।आभीयतया जस्यासिद्धत्वा
द्धेर्लुङ्न।जहि।हनानि।हनाव।हनाम।अहन्।अहतां।अघ्नन्।अहन्।अहतं।आर्धधातुके।इत्यधिकृत्य।हनो वध लिङि
लुङि च।वधादेशोऽदंतः।आर्धधातुक इति विषयसप्तमी।तेनार्धधातुकोपदेशे अकारांतत्वादतो लोपः।वध्यात्।वध्यास्तां॥आर्ध
धातुके इति किं।विध्यादौ हन्यात्॥हंतेरिति णत्वं।प्रहण्यात्।अतो लोपस्य स्थानिवत्त्वादतो हलादेरिति न वृद्धिः।अवधीत्।अथन्व

त्वारः स्वरितेन॥ ॥द्विष अप्रीतौ॥द्वेष्टि।द्विष्टे।द्वेष्टा।द्वेक्ष्यति।द्वेक्ष्यते।द्वेष्टु।द्विष्टात्।द्विड्ढि।द्वेषाणि।द्विषे।द्वेषावहै।द्वेषामहै।अ
द्वेट्।द्विषश्च।लङो झेर्जुस्स्याद्वा।अद्विषुः।अद्विषन्।अद्वेषं।द्विषीत।द्विष्यात्।द्विक्षीष्ट।अद्विक्षत्।दुह प्रपूरणे।दोग्धि।दु
ग्धः।धोक्षि।दुग्धे।धुक्षे।धुग्ध्वे।दोग्धु।दुग्धि।दोहानि।धुक्ष्व।धुग्ध्वं।दोहै।अधोक्।अदोहं।अदुग्धं।अधुक्षत्।अधुक्षत।दु
ग्धा दुहेति लुक् पक्षे।न थास्।धुग्ध्वं वहि पुलङ्वदपि।दिह उपचये।प्रणिदेग्धि।दिग्धे।लिह आस्वादने।लेढि।लीढः।लिहंति॥
लेक्षि।लीढे।लिक्षे।लीढ्वे।लेढु।लीढि।लेहानि।अलेट्।अलिक्षत।अलीढ।अलिक्षावहि।अलिह्वहि।चक्षिङ् व्यक्तायां वाचि।अयं
दर्शनेपि।इकारोनुदात्तः।युजर्थः।विचक्षणः।प्रथयन्।नुमूतुन।अंते इदितइतिव्याख्यानात्।ङकारस्त्वनुदात्तेत्वप्रयुक्तेमा
त्मनेपदमनित्यमितिज्ञापनार्थः।तेन स्फायन्निर्मोकसंधिरित्यादि सिध्यति।चष्टे।चक्षाते।आर्धधातुके।चक्षिङः ख्याञ्।वालि
टि।अत्र भाष्ये ख्शादिरयमादेशः।असिद्धकांडे शस्य यो वेति स्थितं।त्रिपात्पदद्वयं।चख्यौ।चख्ये।चक्शौ।चक्शे॥चयोर्द्वि
तीयाः शरिपुन।चर्त्वासिद्धत्वात्।चचक्षे।ख्याता।क्शाता।ख्यास्यति।ख्यास्यते।क्शास्यति।क्शास्यते।अचष्ट।चक्षीष्ट। ३८

तान्तङ्।ऊये।ऊवे।वयादेशाभावे।वेञः।वेञः संप्रसारणं न स्याल्लिटि।ववौ।ववतुः।ववुः।वविथ।ववाथ।ववे।ववाते।वाता।ऊया
त्।वासीष्ट।अवासीत्।अवासिष्टां।व्येञ् संवरणे।व्ययति।व्ययते।न व्यो लिटि।व्येञ आत्वं न स्याल्लिटि।ह्टिङ्गःपरमपिहलादिः
शेषं वा धित्वा यस्य संप्रसारणं।उभयेषां ग्रहणसामर्थ्यात्।अन्यथा वच्यादीनां ग्रह्यादीनां चानुवृत्त्यैव सिद्धेः किं तेन।विव्याय।वि
व्यतुः।विव्युः।इडत्यर्तिव्ययतीनामिति नित्यमिट्।विव्ययिथ।विव्याय।विव्यय।विव्ये।विव्याते।व्याता।वीयात्।व्यासीष्ट।अव्या
सीत्।अव्यास्त।ह्वेञ् स्पर्धायां शब्दे च।अभ्यस्तस्य च।अभ्यस्तीभविष्यतः ह्वेञः संप्रसारणं स्यात्।ततो द्वित्वं।जुहाव।जुहुवतुः
वि जुहुवुः।जुहविथ।जुहोथ।जुहुवे।ह्वाता।हूयात्।ह्वासीष्ट।लिपिसिचिह्वश्च।एभ्यश्च्लेरङ् स्यात्।आत्मनेपदेष्वन्यतरस्यां।आतो लो
पः।अह्वत्।अह्वतां।अह्वन्।अह्वत।अह्वास्तां॥अथ द्वौ परस्मैपदिनौ।वद व्यक्तायां वाचि।अघ्वदति।उवाद।ऊदतुः।उवदिथ
वदिता।उद्यात्।वदव्रजेति वृद्धिः।अवादीत्।टु ओ श्वि गतिवृद्ध्योः।श्वयति।विभाषा श्वेः।श्वयतेः संप्रसारणं स्याल्लिटि यङि च।शु
शाव।शुशुवतुः।श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधः।तेन लिट्यभ्यासस्येति संप्रसारणं न।शिश्वाय।शिश्वियतुः।श्वयिता।

सि॰कौ॰ति॰ पर्चने। षूङ् प्राणिगर्भविमोचने। सूते। सुषुवे। सोता। सविता। श्र्युकः किति इति गुणनिषेधः। सुषुवे। सविषीष्ट। सोषीष्ट। असविष्ट। अ
सोष्ट। शीङ् स्वप्ने। शीङः सार्वधातुके गुणः। क्ङिति चेत्यस्यापवादः। शेते। शयाते। शीङो रुट्। शीङः परस्य झादेशस्यातो रुडागमः स्या
त्। शेरते। शेषे। शेध्वे। शये। शेवहे। शिश्ये। शयिता। अशयिष्ट॥ अथ कौत्यंताः परस्मैपदिनः॥ ऊर्णुस्तूभयपदी। यु मिश्रणे अमि
स्वा श्रणे च। उतो वृद्धिर्लुकि हलि। लुग्विषये उकारस्य वृद्धिः पिति हलादौ सार्वधातुके तु न त्वभ्यस्तस्य॥ यौति। युतः। युवन्ति। युयाव।
यविता। युयात्। इह उतो वृद्धिर्न॥ भाष्ये पिच्च ङिन्न ङिच्च पिन्नेति व्याख्यानात्। विशेषविहितेन ङित्वेन पित्वस्य बाधनात्। यूयात्।
अयावीत्। रु शब्दे। तुरुस्तुशम्यमः सार्वधातुके। एभ्यः परस्य सार्वधातुकस्य हलादेस्तिङ ईड्वा स्यात्। नाभ्यस्तस्येत्यतो नु वृत्
त्विरसंभवे पुनः सार्वधातुकग्रहणमपित्यर्थं। रवीति। रौति। रुवीतः। रुतः। हलादेः किं। रुवंति। तिङः किं। शाम्यति। सार्वधातुके किं
आशिषि। रूयात्। विध्यादौ तु रुयात्। अरावीत्। अरविष्यत्। तु इति सौत्रो धातुर्गतिवृद्धिहिंसासु। अयं च लुग्विकरण इति स्मरं
ति। तवीति। तौति। तुवीतः। तुतः। तोता। तोष्यति। णु स्तुतौ। नौति। नविता। टुक्षु शब्दे। क्षौति। क्षविता। क्ष्णु तेजने। क्ष्णौति। क्ष्णविता वि

ष्णु प्रस्रवणे। स्नौति। सुष्णाव। स्नविता। स्नूयात्। स्नुयात्। ऊर्णुञ् आच्छादने। ऊर्णोतेर्विभाषा। वृद्धिर्वा स्याद् हलादौ पिति सार्वधातुके। ऊर्णौ
ति। ऊर्णोति। ऊर्णुतः। ऊर्णुवन्ति। ऊर्णुते। ऊर्णुवाते। ऊर्णुवते। ऊर्णोतेराम्नेति वाच्यं। नन्द्राः संयोगादयः। अचः पराः संयोगादयो नदराः
द्विर्न भवंति। नुशब्दस्य द्वित्वं। णत्वस्यासिद्धत्वात्। पूर्वत्रासिद्धीयमद्विर्वचने इत्युक्तत्वान्नित्यं। उभौ साभ्यासस्येति लिंगात्। ऊर्णुनाव। ऊ
र्णुनुवतुः। ऊर्णुनुवुः। विभाषोर्णोः। इडादिप्रत्ययो वा ङिद्वत्स्यात्। ऊर्णुनुविथ। ऊर्णुनविथ। ऊर्णुविता। ऊर्णविता। ऊर्णोतु। ऊर्णौतु। ऊर्णव
नि। ऊर्णवै। गुणोऽपृक्ते। ऊर्णोतेर्गुणः स्यादपृक्ते हलादौ सार्वधातुके परे। वृद्ध्यपवादः। और्णोत्। और्णोः। ऊर्णुयात्। ऊर्णुयाः। इह वृ
द्धिर्न। ङिच्च पिन्नेति भाष्यात्। ऊर्णुयात्। ऊर्णविषीष्ट। ऊर्णुविषीष्ट। और्णुवीत्। और्णुविष्टां। और्णाविषुः। और्णवीत्। और्णविष्टां। द्यु अ
भिगमने। द्यौति। द्योता। षु प्रसवैश्वर्ययोः। प्रसवोऽभ्यनुज्ञानं। सोता। असौषीत्। कु शब्दे। कोता। ष्टुञ् स्तुतौ। स्तौति। स्तवीति। स्तुतः। स्तु
वीतः। स्तुते। स्तुवीते। स्तुसुधूञ्भ्य इतीट्। अस्तावीत्। प्राक्सितादिति षत्वं। अभ्यष्टौत्। सिवादीनां वा। पर्यष्टौत्। पर्यस्तौत्। ब्रूञ्
व्यक्तायां वाचि। ब्रुवः पंचानामादित आहो ब्रुवः। ब्रुवो लटः परस्मैपदानामादितः पंचानां णलादयः पंच वा स्युः ब्रुवश्च॥

हारेशः। अकारउच्चारणार्थः। आह। आहतुः। आहुः। आहस्थः झलिपरे। चर्त्वं। आत्थ। आहथुः। ब्रुवईट्। ब्रुवः परस्य हलादेः पित
ईट् स्यात्। आथेत्यत्र स्थानिवद्भावेनप्राप्तोयं झलीतिथत्वविधानान्नभवति। ब्रवीति। ब्रूतः। ब्रुवन्ति। ब्रूते। आर्धधातुकारेधिकारे॥
३९ ब्रुवोवचिः। उवाच। ऊचतुः। ऊचुः। उवचिथ। उवक्थ। ऊचे। वक्ता। ब्रूतात्। ङिच्चपिन्नेत्यपित्वादीण्न। ब्रवाणि। ब्रवै। ब्रूयात्। उच्यात्। अ
स्यतिवक्तिख्यातिभ्योङ्। वचउम्। अङिपरे। अवोचत्। अवोचत। अथशास्यंताः परस्मैपदिनः। इङ्वर्ज्यमात्मनेपदी। इणगतौ। एति।
इतः। इणोयण्। अजादौप्रत्ययपरे। इयङोपवादः। यंति। इयाय। दीर्घइणः किति। इणोभ्यासस्योदीर्घः स्यात्किति लिटि। ईयतुः। ईयुः।
इययिथ। इयेथ। ऐत्। ऐतां। आसीयत्वेनयणोसिद्धत्वात्। आट्। आयन्। इयात्। ईयात्। एतेर्लिङि। उपसर्गात्परस्येणोणोह्रस्वः
स्यादार्धधातुकेकितिलिङि। निरियात्। समियात्। उभयतआश्रयणे। नांतादिवत्। अभीयात्। अणः किं। समेयात्। समीयादि
दितिप्रयोगस्तुभौवादिकस्य। इणोगालुङि। गातिस्थेतिसिचोलुक्। अगात्। आगातां। अगुः। इङ् अध्ययने। नित्यमधिपूर्वः।
अधीते। अधीयाते। अधीयते। गाङ्लिटि। इङोगाङ् स्याल्लिटि। लावस्थायांविवक्षितेवा। अधिजगे। अधिजगाते। अधिजगि ३८

रव्यायात्। रव्येयात्। क्शायात्। क्शेयेयात्॥ अस्यतिवक्तिख्यातिभ्योङ्। ख्यश्चेरङ्। अख्यत्। अख्यातां। अक्शासीत्। अक्शा
स्त। वर्जनेक्शाञ्नेष्टः। समचक्षिष्टेत्यादि॥ अथप्रच्यंताअनुदात्तेतः॥ ईरगतौकंपनेच। ईर्ते। ईरांचक्रे। ईर्ता। ईर्ष्व। ईर्ध्वम्। ऐरिष्ट
ईडस्तुतौ। ईट्टे। ईशःसे। ईडजनोर्ध्वेच। ईशीडजनांसेध्वेशब्दयोः सार्वधातुकयोरिट् स्यात्। योगविभागोवैचित्र्यार्थः। ईडिषे। ई
डिध्वे। एकदेशविकृतस्यानन्यत्वात्। ईडिष्व। ईडिध्वं। विकृतग्रहणेनप्रकृतेरग्रहणात्। ऐट्ट। ईशऐश्वर्ये। ईष्टे। ईशिषे। ईशिध्वे॥
आसउपवेशने। आस्ते। आसांचक्रे। आस्व। आध्वं। आसिष्ट। आङः शासुइच्छायां। आशास्ते। आशासाते। आङःपूर्वत्वंप्रायिकं।
तेननमोवाकंप्रशास्महेइतिसिद्धं। वसआच्छादने। वस्ते। वस्से। वध्वे। ववसे। वसिता। कशिगतिशासनयोः। कंस्ते। कंसाते। कंसते। अयम
निदित्यके॥ कस्ते। ताल्व्यांतोप्ययंनिदित्। कष्टे। कशाते। कक्षे। कड्ढे। णिसिचुंबने। निंस्ते। दंत्यांतोयं। आसंद्यकारयंस्तुतालव्यांतइति
बभ्राम। णिजिशुद्धौ॥ निंक्ते। निंक्षे। निञ्जिता। शिजिअव्यक्तेशब्दे। शिंक्ते। पिजिवर्णे। संपर्चनइत्येके। उभयत्रेत्यन्ये। अवयवेत्यपर
रेअव्यक्तेशब्देइतीतरे। पिंक्ते। वृजिइत्येके। वृंक्ते। वृजीवर्जने। दंतोष्ठ्यादिः। इदित्। वृंक्ते। वृजाते। वृक्षे। इदिदित्यन्ये। वृंक्ते। वृजीसं

शाकटायनस्यैव ॥ आदन्तात्परस्य लङो झेर्जुस्वा स्यात् । अयुः । अयान् । यायात् । यायातां । यायास्तां । वा गतिगंधनयोः । भा दीप्तौ । ष्णा
शौचे । श्रा पाके । द्रा कुत्सायां गतौ । प्सा भक्षणे । पा रक्षणे । पायास्तां । अपासीत् । रा दाने । ला आदाने । दावपि दाने इति चंद्रः । दा
प्लवने । प्रणिद्राति । प्रनिदाति । दायास्तां । अदासीत् । ख्या प्रकथने । अयं सार्वधातुकविषयः । सस्थानत्वं नमः ख्यात्रे इति
वार्तिकं तद्भाष्यं चेह लिंगं । सस्थानो जिह्वामूलीयः स नेति । ख्शाञादेशस्य ख्शा भावे द्वित्वे न प्रयोजनमित्यर्थः । सम्
पूर्वस्य ख्यातेः प्रयोगो नेति न्यासकारः । प्रा पूरणे । मा माने । अकर्मकः । तनोमसुस्तत्र । उपसर्गवशेनार्थान्तरे सकर्मकः ॥
उदरं परिमाति मुष्टिनेति नैषधीये । नेर्गदेत्यत्र नास्य ग्रहणं । प्रणिमाति । प्रनिमाति । वच परिभाषणे । वक्ति । वक्तः । अय
मन्तिपरो न प्रयुज्यते । बहुवचनपर इत्यन्ये । झिपर इत्यपरे । वग्धि । वच्यात् । उच्यात् । अवोचत् । विद ज्ञाने । विदो लटो वा । वे
त्तेर्लटः परस्मैपदानां णलादयो वा स्युः । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षे । वेत्ति । वि
त्तः । इत्यादि । विवेद । विविदतुः । उषविदेत्याम्पक्षे विदेरत्यकारान्तत्वेन निपातनाल्लघूपधगुणो न । विदाञ्चकार । वेदिता । विदां

कुर्वन्त्वित्यन्यतरस्यां । वेत्तेर्लोट्याम् गुणाभावो लोटो लुक् लोटं च करोत्यन्तप्रयोगश्च निपात्यते । पुरुषवचने न विवक्षिते । इतिशब्दा
त् । तनादिकृञ्भ्य उः । तनादेः कृञश्च उ प्रत्ययः स्यात् । शपोपवादः । तनादित्वादेव सिद्धे कृञो ग्रहणं गणकार्यस्यानित्यत्वे लिंगम्
तेन न विश्वसेत् विश्वस्त इत्यादि सिद्धं । विदां करोतु । अत उत्सार्वधातुके । उप्रत्ययान्तस्य कृञो अकारस्य उत् स्यात् सार्वधातुके क्ङिति ।
उ इति तपरत्वसामर्थ्यान्न गुणः । विदांकुरुतात् । विदांकुरुतां । उतश्चेति हेर्लुक् । आभीयत्वेन लुकोऽसिद्धत्वादुत्वं । विदांकुरु । विदां
करवाणि । अवेत् । अवित्तां । सिजभ्यस्तविदिभ्यश्चेति झेर्जुस् । अविदुः । दश्च । धातोर्दस्य पदान्तस्य सिपि परे रुः स्याद्वा । अवेः । अवेत् । अस
भुवि । अस्ति । श्नसोरल्लोपः । श्नस्यास्तेश्चाकारस्य लोपः स्यात्सार्वधातुके क्ङिति । स्तः । संति । तासस्त्योरिति सलोपः । असि । स्थ
स्थ । अस्मि । स्वः । स्मः । आर्द्धधातुक इत्यधिकृत्य । अस्तेर्भूः । बभूव । भविता । अस्तु । स्तात् । स्तां । संतु । घ्वसोरेद्धावभ्यासलोप
श्च । घोरस्तेश्च एत्वं स्याद्धौ परे अभ्यासलोपश्च । आभीयत्वेन एत्वस्यासिद्धत्वाद्धेर्धिः । श्नसोरिति अलोपः । एधि । तातङ् पक्षे एत्वं
न । परेण तातङा बाधात् । सकृद्गतौ इति न्यायात् । स्तात् । स्तं । स्त । असानि । असाव । असाम । अस्तिसिचोपृक्ते इति ईट् । आ॰

सीत्। श्नसोरित्यल्लोपस्याभीयत्वेनासिद्धत्वादाट्। आस्ताम्। आसन्। स्यात्। स्याद्। भूयात्। अभूत्। सिचोस्तेश्च विद्यमानत्वे
न विशेषणादीण्न। उपसर्गप्रादुर्भ्यामस्तिर्यच्परः। उपसर्गेणः प्रादुसश्च परस्यास्तेः सस्य षः स्याद्यकारेऽचि च परे। निष्
ष्यात्। प्रादुःष्यात्। निषन्ति। प्रादुःषन्ति। यच्परः किं। अभिस्तः। मृजूष् शुद्धौ। मृजेर्वृद्धिः। मृजेरिको वृद्धिः स्याद्धातुप्रत्यये परे।
क्ङित्यजादौ वेष्यते। व्रश्चेति षः। मार्ष्टि। मृष्टः। मृजन्ति। मार्जन्ति। ममार्ज। ममार्जतुः। ममृजतुः। ममार्जिथ। ममार्ष्ठ। मार्जिता।
मार्ष्टा। मृड्ढि। अमार्ट्। अमार्जं। अमार्जीत्। अमार्क्षीत्। रुदिर् अश्रुविमोचने। रुदादिभ्यः सार्वधातुके। रुद् स्वप् श्वस् अन् जक्ष्
एभ्यो वलादेः सार्वधातुकस्येट् स्यात्। रोदिति। रुदितः। ह्रोपरत्वाद्दिटि धित्वं न। रुदिहि। रुदश्च पञ्चभ्यः। हलादेः पितः सार्व
धातुकस्यापृक्तस्येईट् स्यात्। अड्गार्ग्यगालवयोः। अरोदीत्। अरोदत्। अरुदितां। अरुदन्। अरोदीः। अरोदः। प्रकृतिप्रत्य
यविशेषाभ्यामाभ्यामडीड्भ्यामन्तरङ्गत्वाद्याट्। रुद्यात्। अरुदत्। अरोदीत्। ञिष्वप् शये। स्वपिति। स्वपितः। सुष्वा
प। सुषुपतुः। सुषुपुः। सुष्वपिथ। सुष्वप्थ। सुविनिर्दुर्भ्यः सुपिसूतिसमाः। एभ्यः सुप्यादेः सस्य षः स्यात्। दुर्षधा

ते। अध्येता। अध्येष्यते। अध्यये। गुणायादेशयोः कृतयोरुपसर्गस्य यण्। पूर्वं धातुरुपसर्गेणेति दर्शनेऽन्तरङ्गत्वाद्गुणात्पूर्वं सवर्णे
दीर्घः प्राप्तः। णेरध्ययने वृत्तमिति निर्देशान्न भवति। अध्येत। परत्वादियङ्। ततआट्। वृद्धिः। अध्येयातां। अध्येयत। अध्यैयि। अ
ध्येवहि। अधीयीत। अधीयीयातां। अधीयीध्वम्। अधीयीय। अध्येषीष्ट। विभाषा लुङ्लृङोः। इङो गाङ् स्यात्। गाङ्कुटादिभ्योऽञ्णि
न्ङित्। गाङादेशात्कुटादिभ्यश्च परेऽञ्णितः प्रत्यया ङितः स्युः। घुमास्थागापाजहातिसां हलि। एषामात ईत्स्यात् हलादौ क्ङिति आ
र्धधातुके परे। अध्यगीष्ट। अध्येष्ट। अध्यगीष्यत। अध्येष्यत। इक् स्मरणे। अयमप्यधिपूर्वः। अधीगर्थदयेशामिति लिङ्गात्॥
अन्यथा ह्यधीगर्थ एवं ब्रूयात्॥ इण्वदिक इति वक्तव्यं। अधियन्ति। अध्यगात्। केचित्तु आर्धधातुकाधिकारोक्तस्यैवातिदेशमाहुः। तन्म
ते यण् न। तथा च प्रसिद्धिः। ससीतयोराघवयोरधीयन्निति। वी गतिप्राप्तिप्रजनकान्त्यसनखादनेषु। प्रजनो गर्भग्रहणं। असनं क्षेप
णं। वेति। वीतः। वियन्ति। वेषि। वेमि। वीहि। अवेत्। अवीतां। अवीयन्। अडागमे सत्यनेकाच्त्वाद्यणिति केचित्। अव्ययन्। अत्र
इकारोऽपि धात्वन्तरं प्रश्लिष्यते। एति। इतः। इयन्ति। ईयात्। ऐषीत्। या प्रापणे। प्रापणमिह गतिः। प्रणियाति। यातः। यान्ति। लङः

सि॰कौ॰ति॰

तुक्गुणौ बाधते। तं सिचि वृद्धिः। तां जागर्तेर्गुणः। तत्र कृते हलन्तलक्षणा वृद्धिः प्राप्ता नेटीति निषेधः। ततो ऽतो हलादेरिति बाधित्वा ऽतो
ल्रान्तस्येति प्राप्तायां नेति निषिध्यते। नराङ्कः। गुणो वृद्धिर्गुणो वृद्धिः। प्रतिषेधो विकल्पनं। पुनर्वृद्धिर्निषेधो तो यण् पूर्वाः प्राप्तयो नवेति
॥१॥ दरिद्रा दुर्गतौ॥ दरिद्राति। इद्दरिद्रस्य। दरिद्रातेरिकारः स्याद्धलादौ क्ङिति सार्वधातुके। दरिद्रितः। श्नाभ्यस्तयोरातः। अनयोरातो
लोपः स्यात्क्ङिति सार्वधातुके। दरिद्रति। अनेकाच्त्वादाम्। दरिद्रांचकार। आत औ णल इत्यत्र औड् इत्येव सिद्धे औकारविधानं दरि
द्रातेरालोपे सति श्रवणार्थं। अत एव ज्ञापकाद्दाम्नेत्येके। ददरिद्रौ। ददरिद्रतुरित्यादि। यत्तु णलि ददरिद्रेति तन्निर्मूलं। दरिद्रातेरार्ध
धातुके विवक्षिते आतो लोपो वाच्यः। लुङि वा। सनि ण्वुलि ल्युटि च न। दरिद्रिता। अदरिद्रात्। अदरिद्रितां। अदरिद्रुः। दरि
द्रियात्। दरिद्यात्। अदरिद्रीत्। इट्सकौ। अदरिद्रासीत्। चकासृ दीप्तौ। अस्य अत्। चकासति। चकासांचकार। धि चेति
सस्य लोपः। सिच एवेत्येके। चकाद्धि। चकाधीत्येव भाष्यं। तिप्यनस्तेः। पदान्तस्य सस्य दः स्यात्तिपि न त्वस्तेः। अचकात्। अचका
द्। अचकासुः। सिपि धातो रुर्वा। पदान्तस्य धातोः सस्य रुर्वा स्यात्पक्षे दः। अचकाः। अचकात्। शासु अनुशिष्टौ। शास्ति॥

शास इदङ्हलोः। शास उपधाया इत्स्यादङि हलादौ क्ङिति च। शासिवसिघसीनां च। शिष्टः। शासति। शशास। शशासतुः। शास्तु॥
शिष्टात्। शिष्टम्। शासतु। शाद्धि। शा हौ। शास्तेः शादेशः स्याद्धौ परे। तस्याभीयत्वेनासिद्धत्वाद्धेर्धिः। शाधि। अशात्। अशिष्टाम्। अशासुः।
अशाः। अशात्। शिष्यात्॥ सर्तिशास्तीत्यङ्। अशिषत्। अशासिष्यत्। दीधीङ् दीप्तिदेवनयोः। एतदादयः पंच धातवश्छान्दसाः। दी
धीते। एरनेकाच इति यण्। दीध्याते। यीवर्णयोर्दीधीवेव्योः। एतयोरन्त्यलोपः स्याद्यकारे इवर्णे च परे। इति लोपं बाधित्वा नित्यत्वाट्टेरेत्वं।
दीध्ये। दीधीवेवीटामिति गुणनिषेधः। दीध्यांचक्रे। दीधिता। दीधिष्यते। वेवीङ् वेतिना तुल्ये। वी गतीत्यनेन तुल्येऽर्थे वर्तत इत्यर्थः॥ अथ
त्रयः परस्मैपदिनः॥ षस सस्ति स्वप्ने। सस्ति। सस्तः। ससन्ति। ससास। सेसतुः। सस्तु। सधि। पूर्वत्रासिद्धमिति सलोपस्यासिद्धत्वाद्
नो हेरिति लुङ्। असत्। असस्तां। असः। असत्। सस्यात्। असासीत्। अससीत्। सस्ति। सन्तः। संस्तंति। बहूनां समवाये द्वयोः संयो
गसंज्ञा नेत्याश्रित्य स्कोरिति लोपाभावात्। संस्ति। संस्तः। इत्येके। वश कान्तौ। कांतिरिच्छा। वष्टि। उष्टः। उशन्ति। वक्षि। उष्ठः। उवाश।
ऊशतुः। वशिता। वष्टु। उष्टात्। उष्टाम्। उड्ढि। अवट्। औष्टाम्। औशन्। अवशं। उश्यातां। उश्यास्ताम्। चर्करीतं च। यङ्लुगन्तम

दादीबोध्यम्। हुङ् अपनयने। ह्नुते। जुह्नुवे। ह्नुवीत। ह्नोषीष्ट। अह्नोष्ट॥ ७४॥ इत्यदादयः॥ हु दानादनयोः। आदाने चेत्येके। प्रीणनेऽपीति भाष्यम्।
दानं चेह प्रक्षेपः। स च वैधे आधारे। हविषश्चेति स्वभावाल्लभ्यते। इतः स्वरितः परस्मैपदिनः॥ जुहोत्यादिभ्यः श्लुः। शपः श्लुः स्यात्। श्लौ।
धातोर्द्वे स्तः। जुहोति। जुहुतः। अदभ्यस्तादिति अत्। हुश्नुवोरिति यण्। जुह्वति। भीह्रीभृहुवां श्लुवच्च। एभ्यो लिटि आम् वा स्यात् आमि
श्लाविव कार्यं च॥ जुहवांचकार। जुहाव। होता। होष्यति। जुहोतु। जुहुतात्। हेर्धिः। जुहुधि। आटि परत्वाद्गुणः। जुहवानि। परत्वाज्जुसि
चेति गुणः। अजुहवुः। जुहुयात्। हूयात्। अहौषीत्। ञिभी भये। बिभेति। भियोऽन्यतरस्याम्। इकारः स्याद्वा हलादौ सार्वधातुके क्ङिति।
बिभितः। बिभीतः। बिभ्यति। बिभयांचकार। बिभाय। भेता। ह्री लज्जायां। जिह्रेति। जिह्रीतः। जिह्रियति। जिह्रयांचकार। जिह्राय। पॄ पाल
नपूरणयोः। अर्तिपिपर्त्योश्च। अभ्यासस्य इकारः स्यात् श्लौ। उदोष्ठ्यपूर्वस्य। अंगावयवोष्ठ्यपूर्वो य ॠत् तदंतांगस्य उत् स्यात्॥ गु
णवृद्धी परत्वादिमं बाधेते। पिपर्ति। उत्वं। रपरत्वम्। हलि चेति दीर्घः। पिपूर्तः। पिपुरति। पपार। क्ङिति लिटि। ऋच्छत्यॄतामिति गुणे प्रा
प्ते। शॄदॄप्रां ह्रस्वो वा। एषां क्ङिति लिटि ह्रस्वो वा स्यात्। क्ङित्येव गुणः। पप्रतुः। पप्रुः। पपरतुः। पपरुः। परिता। परीता। अपिपः। अपिपूर्तां ५२

सुरुपसर्गेण युज्यते। क्ङिति लिटि परत्वात् संप्रसारणे षत्वे च कृते द्वित्वं। पूर्वत्रासिद्धीयमद्विर्वचने। सुषुपतुः। सुषुपुः। अक्ङिति तु द्वित्वे अ
भ्यासस्य संप्रसारणं। षत्वस्यासिद्धत्वात् पूर्वं हलादिःशेषः। नित्यत्वाच्च। ततः सुपिरूपाभावान्न षः। सुष्वाप। स्वप्ता। अस्वपी
त्। अस्वपत्। स्वप्यात्। सुप्यात्। सुषुप्यात्। अस्वाप्सीत्। श्वस प्राणने। श्वसिति। श्वसिता। अश्वसीत्। अश्वसत्। श्वस्यात्। श्व
स्यातां। श्वस्यासुः। ह्म्यन्तेति न वृद्धिः। अश्वसीत्। अन च। अनिति। आन। अनिता। आनीत्। आनत्। अनितेः। उपसर्गस्थान्निमित्ता
त्परस्यानितेर्नस्य णः स्यात्। प्राणिति। जक्ष भक्षहसनयोः। जक्षिति। जक्षितः। अदभ्यस्तात्। अस्य अत्वादंतापवादः। जक्षति। सि
जभ्यस्तेति जुस्। अजक्षुः। अयमंतस्थादिरिति उज्ज्वलदत्तो बभ्राम। रुदादयः पंच गताः। जागृ निद्राक्षये। जागर्ति। जागृतः। जाग्र
ति। उषविदेत्याम्वा। जागरांचकार। जजागार। जाग्रोऽविचिण्णल्ङित्सु। जागर्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योऽन्यस्मिन्परे वृद्धिविषये प्र
तिषेधविषये च। जजागरतुः। अजागः। अजागृतां। अभ्यस्तत्वाज्झेर्जुस्। जुसि च। अजादौ जुसि इगंतांगस्य गुणः स्यात्। अजागरुः।
अजादौ किं। जागृयुः। आशिषि तु। जागर्यात्। जागर्यास्तां। जागर्यासुः। लुङि। अजागरीत्। जागृइस इत्यत्र यण्प्राप्तः। नं सार्वधा

सि॰कौ॰ति॰ त।डुधाञ्‌धारणपोषणयोः।दानइत्येके।प्रणिदधाति।दधस्तथोश्च।द्विरुक्तस्यझषंतस्यधाञोबशोभष्स्यात्‌तथयोःस्ध्वोश्चपरतः।
वचनसामर्थ्यादालोपोनस्थानिवदितिवामनमाधवौ।वस्तुतस्तुपूर्वत्रासिद्धेनस्थानिवत्‌।धत्तः।दधति।धत्थः।दध्वः।धत्ते।धत्से।
धध्वे।धेहि।अधित।अथत्रयःस्वरितेतः।णिजिर्‌शौचपोषणयोः।णिजांत्रयाणांगुणःश्लौ।णिजविजविषामभ्यासस्यगुणःस्यात्‌।
श्लौ।नेनेक्ति।नेनिक्तः।निनेज।नेक्ता।नेक्ष्यति।नेनेक्तु।नेनिग्धि।नाभ्यस्तस्याचिपितिसार्वधातुके।लघूपधगुणोनस्यात्‌।नेनिजा
नि।अनेनेक्‌।अनेनिक्ताम्‌।अनेनिजुः।नेनिज्यात्‌।निज्यात्‌।अनिजत्‌।अनैक्षीत्‌।अनिक्त।विजिर्‌पृथग्भावे।वेवेक्ति।वेविक्ते।
विवेजिथ।अत्रविजइडितिङित्वंन।ओविजीइत्यस्यैवतत्रग्रहणात्‌।णिजिविजीरुधादावपि।विषॢ्व्याप्तौ।वेवेष्टि।वेविष्टे।लृदि
त्वादङ्‌।अविषत्‌।नङिक्सः।अजादौक्सस्यान्त्यलोपः।अविक्षत।अविक्षाताम्‌।अविक्षंत।अथआगणंताःपरस्मैपदिश्छां न
दसाश्च।घृक्षरणदीप्त्योः।जिघर्म्यग्निंहविषाघृतेन।भृञामित्‌।बहुलंछंदसीइत्वं।हृप्रसह्यकरणे।अयंस्रुवोभिजिहर्तिहोमा
न्‌।ऋसृगतौ।बहुलंछंदसीत्येवसिद्धेअर्तिपिपर्त्योश्चेतिचविधानादयंभाषायामपि।अभ्यासस्यासवर्णेइतीयङ्‌।इय

र्ति।इयृतः।इयर्ति।आर।आरतुः।उउत्यर्तीतिनित्यमिट्‌।आरिथ।अर्ता।अरिष्यति।इयराणि।ऐयः।ऐयृताम्‌।ऐयरुः।अर्यात्‌।इयृयात्‌।आर
त्‌।ससर्ति।भसभर्त्सनदीप्त्योः।बभस्ति।घसिभसोर्हलिचेत्युपधालोपः।झलोझलीतिसलोपः।बब्धः।दद्भिर्वनानिबप्सति।किज्ञाने।चिकेति।चि
कितः।चिकेष्यति।तुरत्वरणे।तुतोर्ति।तुतूर्तः।तुतुरति।धिषशब्दे।दिधेष्टि।दिधिष्टः।धनधान्ये।दधन्ति।दधन्तः।दधनति।जनजनने।ज
जंति।जनसनखनांसञ्झलोः।एषामाकारोंतादेशःस्याज्झलादौक्ङितिसनिच।जजातः।जंजन्ति।जजंसि।जजान।जजन्यात्‌।जजायात्‌॥
जन्यात्‌।जायात्‌।गास्तुतौ।देवाञ्जिगातिसुम्नयुः।जिगीतः।जिगाति॥२४॥इतिजुहोत्यादयः॥दिवुक्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमो
दमदस्वप्नकान्तिगतिषु।अथषंताःपरस्मैपदिनः॥दिवादिभ्यःश्यन्‌।शपोपवादः।हलिचेतिदीर्घः।दीव्यति।दिदेव।देविता।देविष्यति॥
दीव्यतु।दीव्य।अदीव्यत्‌।दीव्येत्‌।दीव्यात्‌।अदेवीत्‌।अदेविष्यत्‌॥षिवुतंतुसंताने।परिषीव्यति।परिषिषेव।न्यषेवीत्‌।न्यसेवीत्‌।स्रि
वुगतिशोषणयोः।ष्ठिवुनिरसने।केचिदिदंसेनपठन्ति।ष्णसुअदने।आदानइत्येके।अदर्शनेइत्यपरे।स्नस्यति।सस्नास।ष्णसुनिरस
ने।स्नस्यति।सस्नास।क्नसुह्वरणदीप्त्योः।ह्वरणंकौटिल्यं।चक्नास।व्युषदाहे।व्युव्योष।प्लुषच।नृतीगात्रविक्षेपे।नृत्यति।ननर्त।सेसि

सि०कौ०ति० विकृतचृतछृदतृदनृतः। एभ्यः परस्य सिज्भिन्नस्य सादेरार्धधातुकस्येड्वा स्यात्। नर्तिष्यति। नर्त्स्यति। नृत्येत्। नृत्यात्। अनर्तीत्। त्रसी उद्वेगे। वाभ्रा
त्रोतिश्यन्वा। त्रस्यति। त्रसति। त्रेसतुः। तत्रसतुः। कुथ पूतीभावे। पुथ हिंसायाम्। गुध परिवेष्टने। क्षिप प्रेरणे। क्षिप्यति। क्षेप्ता। पुष्प विकसने।
पुष्प्यति। पुपुष्प। तिम ष्टिम ष्टीम आर्द्रीभावे। तिम्यति। स्तिम्यति। स्तीम्यति। व्रीड चोदने लज्जायां च। व्रीड्यति। इष गतौ। इष्यति। षह षुह चक्य
र्थे। चक्यर्थस्तृप्तिः। सह्यति। सुह्यति। जॄष् झॄष् वयोहानौ। जीर्यति। जजरतुः। जेरतुः। जरिता। जरीता। जीर्येत्। जीर्यात्। जॄस्तम्भित्यङ्वा॥
ऋदृशोऽङि गुणः। अजरत्। अजारीत्। अजारिष्टाम्। झीर्यति। जझरतुः। अझारीत्। षूङ् प्राणिप्रसवे। सूयते। सुषुवे। स्वरतिसूतीति कृ
त्यं बाधित्वा श्र्युकः कितीति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट्। सुषुविषे। सुषुविवहे। सोता। सविता। दूङ् परितापे। दूयते। दीङ् क्षये॥
दीयते। दीङो युडचि क्ङिति। दीङः परस्याजादेः क्ङित आर्धधातुकस्य युट् स्यात्। वुग्युटावुवङ्यणोः सिद्धौ। दिदीये। मीनातिमिनोतिदीङां ल्य
पि च। एषामात्त्वं स्याल्ल्यपि चकारादशित्येज्निमित्ते। दाता। दास्यते। अदास्त। अदासत। डीङ् विहायसा गतौ। डीयते। धीङ् आधारे। धीयते। दि
ध्ये। धेता। मीङ् हिंसायां। हिंसात्र प्राणवियोगः। मीयते। रीङ् श्रवणे। रीयते। लीङ् श्लेषणे। विभाषा लीयतेः। लीयतेरिति यका निर्देशो न तु
श्यना। लीलोरात्त्वं वा स्यादेज्विषये ल्यपि च। लेता। लाता। लेष्यते। एज्विषये किं। लीयते। लिल्ये। व्रीङ् वृणोत्यर्थे। व्रीयते। विव्रिये। स्वादय ओ ४२

अपिपरुः। पिपूर्यात्। पूर्यात्। अपारीत्। अपारिष्टाम्। इकारान्तोयमिति केचित्। पिपर्ति। पिपृतः। पिप्रति। पिपृयात्। आशिषि प्रियात्।
अपार्षीत्। णाविनिमित्तेषु। नरोदसी पिपृतं सत्ववान्वम्। इत्यादौ छान्दसत्वं च्छारणम्॥ डुभृञ् धारणपोषणयोः। भृञामित्। भृञ्माङ्
ओहाङ् त्रयाणामभ्यासस्य इत्स्यात् श्लौ। बिभर्ति। बिभृतः। बिभ्रति। बिभृद्ध्वे। श्लुवद्भावाद्द्वित्वं। बिभरामास। बभार। बभर्थ। बभृव॥
बिभृहि। बिभराणि। अबिभः। अबिभृताम्। अबिभरुः। बिभृयात्। भ्रियात्। भृषीष्ट। अभार्षीत्। अभृत। माङ् माने शब्दे च। ईहल्य
घोः। श्नाभ्यस्तयोरात ईत्स्यात्सार्वधातुके क्ङिति हलि॥ मिमीते। श्नाभ्यस्तयोरातः इत्याल्लोपः। मिमाते। मिमते। अमास्त। ओहाङ् गतौ॥
जिहीते। जिहाते। जिहते। जहे। हाता। हास्यते। ओहाक् त्यागे। परस्मैपदी। जहाति। जहातेश्च। इत्स्याद्धलादौ क्ङिति वा सार्वधातुके। प
क्षे ईत्वम्। जहितः। जहीतः। जहति। जहौ। जहातु। जहितात्। जहीतात्। आ च हौ। जहातेर्हौ परे आत्स्याच्चादिदीतौ॥ जहाहि। जहि
हि। जहीहि। अजहात्। अजहुः। लोपो यि। जहातेरालोपः स्याद्यादौ सार्वधातुके। जह्यात्। एर्लिङि। हेयात्। अहासीत्। डुदाञ् दाने।
प्रणिददाति। दत्तः। ददति। दत्ते। ददौ। घ्वसोरित्येत्वाभ्यासलोपौ। देहि। अदात्। अदत्ताम्। अददुः। दद्यात्। देयात्। अदात्। अदि

ले। ववाशे। कपिंजलोभिववाशाइति निरुक्तं। अथ पंचस्वरितेतः। मृष तितिक्षायाम्। मृष्यति। मृष्यते। ममर्ष। ममृषे। ईशुचिर् पूतीभावे।
पूतीभावः क्लेदः। शुच्यते। शुच्यति। शुशोच। शुशुचे। अशुचत्। अशोचीत्। अशोचिष्ट। णह बंधने। नह्यति। नह्यते। ननाह। ननह्। नेहिथ।
नेहे। नद्धा। नत्स्यति। अनात्सीत्। रंज रागे। रज्यति। रज्यते। शप आक्रोशे। शप्यति। शप्यते। अथैकादश अनुदात्तेतः॥ पद गतौ। पद्यते। पेदे।
पत्ता। पद्यीत। पत्सीष्ट। चिण ते पदः। पदश्चिण् स्यात्तशब्दे परे। अपादि। अपत्सातां। अपत्सत। खिद दैन्ये। खिद्यते। चिखिदे॥
खेत्ता। अखित्त। विद सत्तायाम्॥ विद्यते। वेत्ता। बुध अवगमने। बुध्यते। बुबुधे। बोद्धा। भोत्स्यते। भुत्सीष्ट। अबोधि। अबुद्ध। अभुत्सातां। यु
प धसंप्रहारे। युध्यते। युयुधे। योद्धा। सिकृत्वा। अयुद्ध। कथं युध्यतीति। युधमिच्छतीति क्यच्। अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमि
ति वा। अनो रुध कामे। अनुरुध्यते। अण प्राणने। अण्यते। आणे। अणिता। अनेतिदंत्यातोयमित्येके। मन ज्ञाने। मन्यते। मेने। मंता॥
युज समाधौ। समाधिश्चित्तवृत्तिनिरोधः। अकर्मकः। युज्यते कः। युज्यते। योक्ता। सृज विसर्गे। अकर्मकः। संसृज्यते सरसिजैररुणां
शुभिन्नैः। ससृजिषे। स्रष्टा। स्रक्ष्यते। लिङ्सिचावितिकित्वान्न गुणः। नाप्यम्। सृक्षीष्ट। असृष्ट। असृक्षातां। लिश अल्पीभावे। लिश्यते
लेष्टा। लेक्ष्यते। लिक्षीष्ट॥ अलिक्षत। अलिक्षातां। आगणांताः परस्मैपदिनः। राधोऽकर्मकाद्वृद्धावेव। एवकारो भिन्नक्रमः। राधो अक

र्मकादेव श्यन्। उदाहरणमाह। वृद्धावितीति। यन्मह्यमपराध्यति। दुह्यतीत्यर्थः। विराध्यं तंक्षमेत कः। दुह्यंतं। राध्यत्योदनः। सिध्यती
त्यर्थः। कृष्णाय राध्यति। दैवं पर्यालोचयतीत्यर्थः। दैवस्य धात्वर्थे निर्भावाज्जीवेत्यादिवदकर्मकत्वं॥ रराध॥ रराधतुः। रराधिथ॥ राधो
हिंसायामित्येत्वाभ्यासलोपाविह न॥ हिंसार्थस्य सकर्मकत्वाद्दैवादिकत्वायोगात्॥ राद्धा॥ रात्स्यति। अयं स्वादिश्चुरादिश्च। व्यध ताड
ने। ग्रहिज्येति संप्रसारणं॥ विध्यति। विव्याध॥ विविधतुः। विव्यद्ध। विव्यधिथ। व्यद्धा। व्यत्स्यति। विध्येत्। विध्यात्। अव्यात्सीत्।
पुष पुष्टौ। पुष्यति। पुपोष। पुपोषिथ। पोष्टा। पोक्ष्यति। पुषादीत्यङ्। अपुषत्। शुष शोषणे। अशुषत्। तुष प्रीतौ। दुष वैकृत्ये।
श्लिष आलिंगने। शिश्लेष। शिश्लेषिथ। श्लेष्टा। श्लेक्ष्यति। श्लिषः। अस्मात्परस्यानिटः च्लेः क्सः स्यात्। पुषाद्यङोऽपवादः। ननु श्लिषः
पुरस्तादपवादन्यायात्। आलिंगने। श्लिषश्च्लेरालिंगन एव क्सो नान्यत्र। योगविभागसामर्थ्याच्छलिगुपधादित्यस्यापि अयं नियमः।
अश्लिक्षत्कन्यां देवदत्तः। आलिंगन एवेति किं। समश्लिषज्जतुकाष्ठं। अङ्। तत्यासत्वाविह श्लिषिः कर्मण्यप्यनालिंगने तु सिज्जे
व न तु क्सः। एकवचनेनियम्। आश्लेषि। आश्लिक्षातां। आश्लिक्षत। आश्लिषाः। आश्लिड्ढ्वं। शक विभाषितो मर्षणे। विभाषित

इत्युभयपदीत्यर्थः। शक्यति। शक्यते। इरिदंपुषस्तः। शशाक। शेकिथ। शशक्थ। शेके। शक्ता। शक्ष्यति। शक्ष्यते। अशकत्। अशक्त।
सेट्कोयमित्येके। तन्मते नानिट्कारिकासु लृदित्सठितः। शकिता। शकिष्यति। ञिष्विदा गात्रप्रक्षरणे। घर्मस्रुतावित्यर्थः। अयं ञीदिति न्यासका
रादयः। नेति न्यासकारहरदत्तादयः। स्विद्यति। सिष्वेद। सिष्वेदिथ। स्वेत्ता। अस्विदत्। क्रुध क्रोधे। क्रोद्धा। क्रोत्स्यति। क्षुध बुभुक्षायाम्। क्षोद्धा। कथं त
र्ह्यलमेषा क्षुधितस्येति। संपदादिक्विबंताचारकादित्वादितच्॥ इति माधवादयः। वस्तुतस्तु वसतिक्षुधोरिडितीड् वक्ष्यते। शुध शौचे। शुध्यति।
शुशोध। शोद्धा। षिधु संराद्धौ। उदित्पाठः प्रामादिकः। सिध्यति। सेद्धा। सेत्स्यति। असिधत्। रध हिंसासंराध्योः। रध्यति। रधिजभोरचि। नुम्। ररं
धतुः। रधादिभ्यश्च। वलाद्यार्धधातुकस्य वेट् स्यात्॥ ररंधिथ। ररद्ध। ररंधिव। रेध्व। रेध्म। नेड्वलि लिटि रधेः। लिड्वर्जे इटि रधेर्नुम् स्यान्न स्यात्॥
रधिता। रद्धा॥ रधिष्यति। रत्स्यति। अचि नुम्॥ अनिदितामिति नलोपः। अरधत्। णश अदर्शने॥ नश्यति। ननाश। नेशतुः। नेशिथ। मस्जिन
शोर्झलि। नुम् स्यात्। ननंष्ठ। नेशिव। नेश्व। नेशिम। नेश्म। नशिता। नंष्टा। नशिष्यति। नंक्ष्यति। नश्येत्। नश्यात्। अनशत्। प्रणश्यति॥ न
शेः षांतस्य। णत्वं न स्यात्। प्रनंष्टा। अंतग्रहणं भूतपूर्वप्रतिपत्त्यर्थं। प्रनंक्ष्यति। तृप प्रीणने। प्रीणनं तृप्तिस्तर्पणं च। नाग्निस्तृप्यति काष्ठानां
पितॄनतार्प्सीत्। इत्युभयत्र दर्शनात्॥ ततर्पिथ। ततर्प्थ॥ तत्रप्थ। तर्पिता। तर्प्ता। त्रप्ता। स्पृशमृशकृषतृपदृपां च्लेः सिज्वा॥ अतर्पीत्। अतार्प्सी

र्त्तिः। तत्फलं तु निष्ठायां नत्वं। पीङ् पाने। पीयते। माङ् माने। मायते। ईङ् गतौ। ईयते। अयांचक्रे। प्रीङ् प्रीतौ। सकर्मकः। प्रीयते। पिप्रिये। अथ परस्मैपदिनः
चत्वारः। शो तनूकरणे। ओतः श्यनि। लोपः स्यात्। श्यति। श्यतः। श्यन्ति। शशौ। शशतुः। शाता। शास्यति। विभाषा घ्राधेट्शाच्छासः। इति सिचो वा लुक्। लुगभा
वे यमरमेतीट्सकौ। अशात्। अशाताम्। अशुः। अशासीत्। अशासिष्टाम्। अशासिषुः। छो छेदने। छ्यति। षो अंतकर्मणि। स्यति। ससौ। अभिष्य
ति। अभ्यष्यत्। अभिससौ। दो अवखंडने। द्यति। ददौ। प्रणिदाता। देयात्। अदात्। अथात्मनेपदिनः पञ्चदश। जनी प्रादुर्भावे। ज्ञाजनोर्जा।
अनयोर्जादेशः स्याच्छिति। जायते। जज्ञे। गमहनेत्युपधालोपः। श्चुत्वम्। जज्ञाते। जज्ञिरे। जनिता। जनिष्यते। दीपजनेति वा चिण्। जनिवध्यो
श्च। अनयोरुपधाया वृद्धिर्न स्याच्चिणि ञ्णिति कृति च। चिणो लुक्। अजनि। अजनिष्ट। दीपी दीप्तौ। दीप्यते। दिदीपे। अदीपि। अदीपिष्ट। पूरी आप्या
यने। पूर्यते। अपूरि। अपूरिष्ट। तूरी गतित्वरणहिंसनयोः। तूर्यते। तुतूरे। धूरी गूरी हिंसागत्योः। धूर्यते। दुधूरे। गूर्यते। जुगूरे। घूरी जूरी हिंसा
वयोहान्योः। शूरी हिंसास्तंभनयोः। चूरी दाहे। तप ऐश्वर्ये। अयं धातुरैश्वर्ये वा तङ्श्यनौ लभते। अन्यदा तु शब्विकरणः परस्मैपदीत्यर्थः। केचि
त्तु वाग्रहणं वृतु धातुराद्यानयनमिच्छंति। तप्यते। तप्ता। तप्स्यते। पतेति व्यत्यासेन पाठांतरं। घुतधामानिधुतमत्यमानः। वृतु वर्तने। वृत्यते। पक्षां
तरे। वावृत्यते। ननो वावृत्यमाना सा रामशालां न्यविक्षत। इति भट्टिः। क्लिश उपतापे। क्लिश्यते। क्लेशिता। काशृ दीप्तौ। काश्यते। वाशृ शब्दे। वाश्य
ति

ते। पर्यास्थत। यसु प्रयत्ने। यसोऽनुपसर्गाद्वा। संयसश्च। श्यन्वा स्यात्। यस्यति। यसति। संयस्यति। संयसति। अनुपसर्गात्किं। प्रयस्यति। जसु मोक्षणे।
जस्यति। तसु उपक्षये। दसु च। तस्यति। अतसत्। दस्यति। अदसत्। वसु स्तंभे। वस्यति। ववास। ववसतुः। नशसदेत्येत्वाभ्यासलोपः निषेधः॥
वशादिरयमिति मतेतु। वेसतुः। वेसुः। व्युष विभागे। अयं दाहे पठितः। अर्थभेदेन त्वयं पुनः पठ्यते। अव्युषत्। ओष्ठ्यादिर्दन्त्यान्तोऽयं। प्युस इ
त्यन्ये। अयकार प्युसु इत्यपरे। प्लुष दाहे। अप्लुषत्। पूर्वत्र पाठः स्निजर्थ इत्याहुः। नद्धादिपाठेन गतार्थमिति स्वतन्त्रं। विस प्रेरणे। विस्यति। अवि
सत्। कुस संश्लेषणे। अकुसत्। बुस उत्सर्गे। मुस खंडने। मसी परिणामे। परिणामो विकारः। समी इत्येके। लुट विलोडने। उच समवाये। उच्यति
उवोच ऊचथुः। मा भवानुचत्॥ भृशु भ्रंशु अधः पतने। बभर्श। अभृशत्। अनिदितामिति न्लोपः। भ्रश्यति। बभ्रंश। बभ्रंशतुः। अभ्रशत्। वृश व
रणे। वृश्यति। अवृशत्। कृश तनूकरणे। कृश्यति। ञितृष पिपासायां॥ हृष तुष्टौ। श्यन्विकरणो भौवादिकाद्विशेषः। रुष रिष हिंसायां। तीषसहेति वेट्॥
रोषिता। रोष्टा। डिप क्षेपे। कुप क्रोधे। गुप व्याकुलत्वे। युप रुप लुप विमोहने। युप्यति। रुप्यति। लुप्यति। लोपिता। लुप्यति सेट्कः। अनिट्कारिकासु
लिपिसाहचर्यात्तौदिकस्यैव ग्रहणात्। लुभ गार्ध्ये। गार्ध्यमाकांक्षा। तीषसहेति वेट्। लोभिता॥ लोब्धा। लोभिष्यति। लुभ्येत्। लुभ्यात्॥ अलु
भत्॥ लुभादेरङ्करणात्त्वा लोभितेत्यपीत्याहुः। क्षुभ संचलने। क्षुभ्यति। णभ तुभ हिंसायाम्॥ क्षुभि नभि तुभि त्रयो द्युतादौ क्र्यादौ च प

ठ्यन्ते तेषां क्तादिवादङ् सिद्धः। क्यादित्वात्पक्षे श्नाप्यस्त्येव॥ उद्धपठस्तु श्यनर्थः। क्लिदू आर्द्रीभावे। क्लिद्यति। चिक्लेदिथ। चिक्लेत्थ। चिक्लिदिव। चिक्लिद्म।
चिक्लिद्म। क्लेदिता। क्लेत्ता। ञिमिदा स्नेहने। मिदेर्गुणः। इत्संज्ञकशाकारादौ प्रत्यये। मेद्यति। अमिदत्। दिवादिपाठादेवामिदादन्तु। अमेदिष्टेति सिद्धे इ
ह पाठो अमेदीदिति मा भूदित्येतदर्थं। घुतादिभ्यो बहिरेवात्मनेपदिषु पाठस्तु चिन्त्यः। ञिक्ष्विदा स्नेहनमोचनयोः। ऋधु वृद्धौ। आनर्द्ध। आर्द्धत्। गृधु अभिकां
क्षायां। अगृधत्। वृत्। पुषादयो दिवाद्यर्थाश्च वृत्ताः। केचित्तु पुषादिसमाप्त्यर्थमेव वृत्करणं दिवादिस्तु श्वादिवदाकृतिगणः। तेन क्षीयते मृग्यतीत्या
दिसिद्धिरित्याहुः॥ १३४॥ इति दिवादयः॥ षुञ् अभिषवे। अभिषवः पीडनं। स्नपनं स्नानं सुरायाः संधानं च। न त्वस्नाने ऽकर्मकः। स्वादिभ्यः श्नुः॥
सुनोति। सुनुतः। सुन्वन्ति। सुन्वः सुनुवः। सुन्वहे। सुनुवहे। सुषाव। सुषुवे। सोता। सुनु। सुनवानि। सुनवै। सुनुयात्। सूयात्। स्तुसुधूञ्भ्यः
इतीट्। असावीत्। आसोष्ट। अभिषुणोति। अभ्यषुणोत्। अभिसुषाव। सुनोतेः स्यसनोः। स्ये सनि च परे सुञः षो न स्यात्। विसोष्यति। षिञ् ब
धने। सिनोति। विसिनोति। सिषाय। सिष्ये। सेता। शिञ् निशाने। तालव्यादिः। शेता। डुमिञ् प्रक्षेपणे। मीनातिमिनोतीत्यात्वं। ममौ। ममिथ। मम
माथ। मिम्ये। माता। मीयात्। मासीष्ट। अमासीत्। अमासिष्टाम्। अमास्त। चिञ् चयने। प्रणिचिनोति। विभाषा चेः। अभ्यासात्परस्य चेः कुत्वं वा
स्यात्सनि लिटि च। प्रणिचिकाय। चिचाय। चिक्ये। चिच्ये। अचैषीत्। अचेष्ट। स्तृञ् आच्छादने। स्तृणोति। स्तृणुते। गुणोऽर्तीति गुणः। स्तर्यात्॥ कॄ

तश्च संयोगादेः। ऋदंतात्संयोगादेः परयोर्लिङ्सिचोरिड्वा स्यात्तङि। स्तरिषीष्ट। स्तृषीष्ट। अस्तरिष्ट। अस्तृत। वृञ्‌ वरणे। बभूथाततंथजगृभ्मववर्थेति नि
गमे। एषां वेदे इड्‌भावो निपात्यते। तेन भाषायां थलि इट्। ववरिथ। ववृव। ववृवहे। वरिता। वरीता॥ लिङ्सिचोरात्मनेपदेषु। वृङ्‌वृञ्भ्यां ऋदंताच्च परयोर्लि
ङ्सिचोरिड्वा स्यात्तङि। न तु लिङि। वृतो इटो लिङि दीर्घो न स्यात्। वरिषीष्ट। वृषीष्ट। अवारीत्। अवरिष्ट। अवरीष्ट। अवृत। धूञ्‌ कंपने। धुनोति। धु
नुते। अधोषीत्। अधोष्यत्। दीर्घो नोपयं। धूनोति। धूनुते। स्वरतिसूतीति वेट्। दुधुविथ। दुधोथ। क्ङिति लिटि श्र्युक इति निषेधं बाधित्वा क्रादित्वान्नि
यमान्नित्यमिट्। दुधुविव। स्तुस धूञ्भ्य इति नित्यमिट्। अधावीत्। अधविष्ट। अधोष्ट। अथ परस्मैपदिनः। टुदु उपतापे। दुनोति। हिगतौ वृद्धौ
च। हिनु मीना। उपसर्गस्थान्निमित्तात्परस्य एतयोर्नस्य णः स्यात्। प्रहिणोति। प्रहिनो मिङ्रंयुमरांञ्जः हेरचङि। अभ्यासात्परस्य हिनोतेर्हस्य कु
त्वं स्यान्न तु चङि। जिघाय। पृञ्‌ प्रीतौ। पृणोति। पर्ता। स्पृ प्रीतिपालनयोः। प्रीतिश्चलनयोरित्येके। चलनं जीवनमिति स्वामी। स्पृणोति। पस्पार। स्मृ
इत्येके। स्मृणोति। पृणोत्यादयस्त्रयो पि छंदसाइत्याङ्कः। आप्लृ व्याप्तौ। आप्नोति। आप्नुतः। आप्नुवन्ति। आप्नुवः। आप्ना। आप्नुहि। ऌदित्वा
दङ्। आपत्। शक्लृ शक्तौ। अशकत्। राध साध संसिद्धौ। राध्नोति। राधो हिंसायां। एत्वाभ्यासलोपोस्तः क्ङिति लिटि सेटि थलि च। अपरेधतुः।
रेधुः। रेधिथ। राद्धा। साध्नोति। साद्धा। असात्सीत्। असाद्धाम्॥ अथ द्वावनुदात्तेतौ। अशू व्याप्तौ संघाते च। अश्नुते। अश्नोतेश्च। दीर्घा ७६

अत्राशीव॥ अशृपत्‌॥ दृप हर्षमोहनयोः। मोहनं गर्वः। दृप्यति। इत्यादि। रधादिभ्यश्चेति वेट्। अयं वेदो वमर्थमतुदात्तत्ता॥ द्रुह जिघांसायां। वा द्रुहेति यः। पसे द्रोदा इति
दः। दुद्रोग्ध। दुद्रोढ। दुद्रोहिथ। द्रोहिता। द्रोग्धा। द्रोढा। द्रोहिष्यति। एकाच इति भष्। ध्रोक्ष्यति। दत्वयत्वयोस्तुल्यं रूपम्। अद्रुहत्। मुह वैचित्त्ये। मोह्यति। अ
मुहत्। ष्णुह उद्गिरणे। स्नुह्यति। सष्णोह। सष्णोहिथ। सष्णोग्ध। सष्णोढ॥ सष्णुहिव। सष्णुह्म। स्नोहिता। स्नोग्धा। स्नोढा। स्नोहिष्यति। स्नोक्ष्यति। अ
स्नुहत्। ष्णिह प्रीतौ। स्निह्यति। सिष्णेह॥ वृत्‌॥ रधादयः समाप्ता इत्यर्थः॥ पुषादयः स्मृ आगणांता इति सिद्धांतः। शमु उपशमे। शमामष्टानां दीर्घः श्यनि।
शमादीनामित्यर्थः। शणि शाम्यति। शेमथुः। शेमिथ। शमिता। अशमत्। तमु कांक्षायाम्। ताम्यति। तमिता। अतमत्। दमु उपशमे। उपशमिः इति ण्यंतस्य।
तेन सकर्मकोयं। न तु शामिवदकर्मकः। अदमत्। श्रमु तपसि खेदे च। श्राम्यति। अश्रमत्॥ भ्रमु अनवस्थाने। वा भ्राशेति श्यन्वा। तत्र कृते शमामष्टानामि
ति दीर्घः। भ्राम्यति। लुप्यतु॥ अभ्रमत्॥ शेषभ्वादिवत्॥ क्षमू सहने॥ क्षाम्यति। चक्षमिथ। चक्षंथ। चक्षमिव। चक्षण्व। चक्षमिम। चक्षण्म। क्षमिता
क्षंता। अयं न षित्। भ्वादिस्तु षित्। अषितः क्षाम्यतेः क्षांतिः। क्षमूषः क्षमतेः क्षमणो। क्लमु ग्लानौ। क्लाम्यति। क्लामति। शापा वक्त्य न्यापि। ष्ठिवुक्लम्य
म्वित्येव दीर्घे सिद्धे शमादिपाठो घितुणर्थः। अङ्। अक्लमत्॥ मदी हर्षे। माद्यति। अमदत्। शमादयोष्टौ गताः। असु क्षेपणे। अस्यति। आस॥ अ
सिता। अस्यतेस्थुक्। अङि परे। आङ्। आस्थत्॥ अस्यपुषादित्वादङि सिद्धे अस्यतिवक्तीति च न तं तङर्थं। तङ् तू पसर्गादस्यत्यूह्योरिति वक्ष्य

क्षीष्ट। अदिक्षत। अदिक्षातां। भ्रस्ज पाके। ग्रहिज्येति संप्रसारणं। सस्य श्चुत्वेन शः। शस्य जश्त्वेन जः। भृज्जति। भृज्जते। भ्रस्जो रोपधयोरम
न्यतरस्याम्॥ भ्रस्जो रेफस्योपधायाश्च स्थाने रमागमो वा स्यादार्धधातुके। मित्त्वादन्त्यादचः परः। स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः॥
बभर्जतुः। बभर्जिथ। बभर्ष्ठ। बभर्ज। रमभावे। बभ्रज्ज। बभ्रज्जतुः। बभ्रज्जिथ। स्कोरिति लोपः। व्रश्चेति षः। बभ्रष्ठ। बभ्रज्ज। भर्ष्टा। भ्रष्टा॥
भ्रक्ष्यति। भर्क्ष्यति। क्ङिति रमागमं बाधित्वा संप्रसारणं पूर्वविप्रतिषेधेन। भृज्ज्यात्। भृज्ज्यास्तां। भर्क्षीष्ट। भ्रक्षीष्ट। अभार्क्षीत्॥ अभ्रा
क्षीत्। अभर्ष्ट। अभ्रष्ट। क्षिप प्रेरणे॥ क्षिपति। क्षिपते। क्षेप्ता। अक्षैप्सीत्। अक्षिप्त। कृष विलेखने। कृषति। कृषते। क्रष्टा। कर्ष्टा। कृष्या
त्। कृक्षीष्ट। स्पृशमृशकृषेति सिज्वा। पक्षे क्सः। सिचि अम्वा। अक्राक्षीत्। अकार्क्षीत्। अकृक्षत्। तङि लिङ्सिचाविति कित्वादम्न अ
कृष्ट। अकृक्षातां। अकृक्षत। अकृक्षत्। अकृक्षातां। अकृक्षन्त॥ ऋषी गतौ। परस्मैपदी। ऋषति। आनर्ष। जुषी प्रीतिसेवनयोः॥ अयमात्म
नेपदिनश्चत्वारः॥ जुषते। ओविजी भयचलनयोः। प्रायेणायमुत्पूर्वः। उद्विजते। विजविट्। विजेः परस्येडादि प्रत्ययो वा ङिद्वत्। उद्विजिता जि
उद्विजिष्यते। ओलजी ओलस्जी व्रीडने। लजते। लेजे। लज्जते। ललज्जे। अथ परस्मैपदिनः। ओव्रश्चू छेदने। ग्रहिज्येति। वृश्चति। वव्रश्च।
व×जि×व्रश्चतुः। वव्रश्चिथ। वव्रष्ठ। लिट्यभ्यासस्येति संप्रसारणं। रेफस्य ऋकारः। उरत्। तस्याचः परस्मिन्निति स्थानिवद्भा

न संप्रसारणे संप्रसारणमिति वस्योत्वं न। व्रश्चिता। व्रष्टा। व्रश्चिष्यति। व्रक्ष्यति॥ वृश्च्यात्। अव्रश्चीत्॥ अव्राक्षीत्। व्यच व्याजीकरणे। विचति।
विव्याच। विविचतुः। व्यचिता। व्यचिष्यति। विच्यात्। अव्याचीत्। अव्यचीत्। व्यचेः कुटादित्वमनसीति तु नेह प्रवर्तते। अनसीति पर्युदासेन कृन्मा
त्रविषयत्वात्। उछि उंछे। उंछति। उछी विवासे। अपूर्व्याव्युच्छति। ऋछ गतीन्द्रियप्रलयमूर्तिभावेषु॥ ऋच्छत्यॄतामिति गुणः। द्विहल्ग्रहणस्या
स्यानेकहलुपलक्षणत्वान्नुट्। आनर्छ। आनर्छतुः। ऋच्छिता। मिछ उत्क्लेशे। उत्क्लेशः पीडा। मिच्छति। मिमिच्छ। अमिच्छीत्। जर्ज चर्च झर्झ परि
भाषणभर्त्सनयोः। त्वच संवरणे। तत्वाच। ऋच स्तुतौ। आनर्च। उब्ज आर्जवे। उज्झ उत्सर्गे। लुभ विमोहने। विमोहनमाकुलीकरणं। लुभति। लो
भिता। तीषसहेतीड्विकल्पः। लोब्धा। लोभिष्यति। रिफ कत्थनयुद्धनिंदाहिंसादानेषु। रिफति। रिरेफ। रिहेत्येके। [illegible] रिरिह
ति। तृप तृम्फ तृप्तौ। आद्यः प्रथमान्तः। द्वितीयो द्वितीयांतः। द्वावपि द्वितीयांतावित्यन्ये। तृपति। ततर्प। तर्पिता। स्पृशमृशेति सिज्विकल्पः। पोषा
दिकस्येव अऊपवादत्वात्। तेनात्र नित्यं सिच्। अतर्पीत्। तृम्फति। शस्य ङित्वादनिदितामिति नलोपे प्राप्ते। शे तृम्फादीनां नुम्वाच्यः। आदिश
ब्दः प्रकारे। तेनायं नकारानुषक्ताः स्तृम्फादयः। तृम्फति। ततृम्फ। तृफ्यात्। तुफ तुम्फ तुप तुम्प हिंसायां। तुपति। तुम्पति। तुफति। तुम्फति। दृप
दृम्फ उत्क्लेशे। प्रथमः प्रथमान्तः। द्वितीयान्त इत्यन्ये। दृपति। दृफति। दृम्फति। दृम्फति। ऋफ ऋम्फ हिंसायां। ऋफति। आनर्फ। ऋम्फति। ऋम्फ

फांचकार। गुफ गुंफ ग्रंथे। गुफति। जुगोफ। गुंफति। जुगुंफ। उभ उंभ पूरणे। उभति। उवोभ। उभंति। उभांचकार। शुभ शुंभ शोभार्थे। शुभति। शु
भति। दृभी ग्रंथे। दृभति। चृती हिंसाग्रंथनयोः। चर्तिता। सेसिचि कृतेति वेट्। चर्तिष्यति। चर्त्स्यति। अचर्तीत्। विध विधाने। विधति। वेधिता
जुड गतौ। तवर्ग पंचमांतमित्येके। जुडति। तवर्गप- इमेर ध्रंचिन्मरुतो जुनंति। मृड सुखने। मृडति। मर्डिता। पृड च। पृडति। पृण प्रीणने। पृणति
पपर्ण। वृण च। वृणति। मृण हिंसायां। तुण कौटिल्ये। तुतोण। पुण कर्मणि शुभे। पुणति। मुण प्रतिज्ञाने। कुण शब्दोपकरणयोः। शुन गतौ। द्रुण
हिंसागतिकौटिल्येषु। घुण घूर्ण भ्रमणे। षुर ऐश्वर्यदीप्त्योः। सुरति। सुषोर। आशिषि सूर्यात्। कुर शब्दे। कुरति। कूर्यात्। अत्र न भकुर्छुरामिति
निषेधेनधो। करोतेरेव तत्र ग्रहणादित्याहुः। खुर छेदने। मुर संवेष्टने। क्षुर विलेखने। घुर भीमार्थशब्दयोः। पुर अग्रगमने। वृहू उद्यमने। दंत्योष्ठ्या
दिः। पवर्गीयादिरित्यन्ये। तृहू स्तृहू स्तृंहू हिंसार्थाः। तृहति। ततर्ह। स्तृहति। तस्तर्ह। तर्हिता। तर्ढा। स्तर्हिता। स्तर्ढा। अतृंहीत्। अतार्क्षीत्।
अताढ्ढम्। इष इच्छायाम्। इषुगमियमां छः। इच्छति। एषिता। एष्टा। एषिष्यति। इष्यात्। ऐषीत्। मिष स्पर्धायाम्॥ मिषति। मेषिता। किल
श्वैत्यक्रीडनयोः। तिल स्नेहे। चिल वसने। चल विलसने। इल स्वप्नक्षेपणयोः। किल संवरणे। दंत्योष्ठ्यादिः। बिल भेदने। ओष्ठ्यादिः। णिल गहने
हिल भावकरणे। शिल षिल उंछे। मिल संश्लेषणे। लिख अक्षरविन्यासे। लिलेख। कुट कौटिल्ये। गाङ्कुटादिभ्य इति ङित्वं। चुकुटि ५८

रभ्यासावर्णात्परस्य नुट् स्यात्। आनशे। अशिता। अष्टा। अशिष्यते। अक्ष्यते। अशक्षीत। अशिषीष्ट। अक्षीष्ट। आशिष्ट। आष्ट। आक्षातां। ष्टि
घ आस्कंदने॥ स्तिघ्नुते। तिष्टिघे। स्तेघिते। आथागणांताः परस्मैपदिनः। तिक तिग च। तिक्नोति। तिग्नोति। षघ हिंसायां। सघ्नोति। ञिधृषा
प्रागल्भ्ये। धृष्णोति। दधर्ष। दंभु दंभने। दंभनं दंभः। दभ्नोति। ददंभ। श्रंथि ग्रंथि दंभि स्वंजीनां लिटः कित्वं वेति व्याकरणांतरमिहाप्याश्री
यत इत्युक्तं। अनिदितामिति न्लोपः। तस्याभीयत्वादसिद्धत्वेन एत्वाभ्यासलोपयोरप्राप्तौ। दंभेश्च। एत्वाभ्यासलोपौ वक्तव्यौ। देभतुः॥
ददंभतुः। इदं कित्वं पिदपिद्विषयकमिति सुधाकरादयः। तन्मते तिपि सिपि मिपि च ददंभ। देभ। देभिथ। देभेति रूपांतरं बोध्यं। अपिद्विषयक
मिति न्यासकारादिमते तु। ददंभ। ददंभिथ। ददंभेत्येव। दंभिता। दभ्यात्। ऋधु वृद्धौ। तृप प्रीणन इत्येके। क्षुभ्नादित्वाण्णत्वं न। तृप्नोति। छं
दसि। आगणांताधिकारोयं। अह व्याप्तौ। अह्नोति। दघ घातने पालने च। दघ्नोति। चमु भक्षणे। चम्नोति। रि क्षि चिरि जिरि दाश दृ हिंसायां॥
रिणोति। क्षिणोति। अयं भाषायामपीत्यन्ये। तं नन्त घ्नन्ति शरव्यभूतां क्षिणोति। इति रघुवंशे। ऋ क्षी इत्येक एवाजादिरित्यन्ये। ऋक्षिणो
ति। चिरिणोति। जिरिणोति। दाश्नोति। दृणोति। दृनु॥ ८॥ इति स्वादयः। तुद व्यथने॥ इतः षट् स्वरितेतः। तुदादिभ्यः शः। तुदति। तुदते॥
तुतोद। तुतुदे। तोत्ता। अतौत्सीत्॥ अतुत्त। णुद प्रेरणे। नुदति। नुदते। नुनोद। नुनुदे। नोत्ता। दिश अतिसर्जने। अतिसर्जनं दानं। देष्टा। दि

सि॰कौ॰ति

किरति। किरतः। किरंति। चकार। चकरतुः। करिता। करीता। कीर्यात्॥ किरतौ लवने। उपात्किरतेः॥ सुडागमः स्यात् छेदे॥ उपस्कि
रति। अड्भ्यासव्यवायेपि सुट्कात्पूर्वं इति वक्तव्यं। उपास्किरत्। उपचस्कार। हिंसायां प्रतेश्च। उपात्प्रतेश्च किरतेः सुट् स्या
द्धिंसायां। उपस्किरति। प्रतिस्किरति। गॄ निगरणे। अचि विभाषा। गिरते रेफस्य लत्वं वा स्यादजादौ। गिरति। गिलति।
जगार। जगाल। जगरिथ। जगलिथ। गरिता। गरीता। गलिता। गलीता। अथ द्वौ ङितौ। दृङ् आदरे। आद्रियते। आ
द्रियेते। आदद्रे। आदद्रिषे। आदर्ता। आदरिष्यते। आदृषीष्ट। आदृत। आदृषातां। धृङ् अवस्थाने। ध्रियते। अथ
परस्मैपदिनः षोडश। प्रछ ज्ञीप्सायां। पृच्छति। पप्रच्छ। पप्रच्छतुः। पप्रच्छिथ। पप्रष्ठ। प्रष्टा। प्रक्ष्यति। अप्राक्षीत्।
वृत्। किरादयो वृत्ताः। सृज विसर्गे। विभाषा सृजिदृशोः। ससर्जिथ। ससष्ठ। स्रष्टा। स्रक्ष्यति। सृजिदृशोर्झल्यम
किति। अमागमः। सृजेत्। सृज्यात्। अस्राक्षीत्। टुमस्जो शुद्धौ। मज्जति। ममज्ज। मस्जिनशोर्झलीति नुम्।
मस्जेरन्त्यात्पूर्वो नुम् वाच्यः। संयोगादिलोपः। ममङ्क्थ। ममज्जिथ। मङ्क्ता। मङ्क्ष्यति। अमाङ्क्षीत्। अमाङ्क्तां।

अमाङ्क्षुः॥ रुजो भंगे। रोक्ता। रोक्ष्यति। अरौक्षीत्। अरौक्तां। भुजो कौटिल्ये। रुजिवत्। छुप स्पर्शे। छोप्ता। अछौप्सीत्। रुश रिश हिंसा
यां॥ तालव्यांतौ। रोष्टा। रोक्ष्यति। रेष्टा। रेक्ष्यति। लिश गतौ। अलिक्षत्। स्पृश संस्पर्शने। स्प्रष्टा। स्प्रक्ष्यति। अस्प्राक्षीत्। अस्पार्क्षीत्। अ
स्पृक्षत्। विछ गतौ। गुपूधूपेत्यायः। आर्धधातुके वा। विछायति। विछायांचकार। विविछ। विश प्रवेशने। विशति। वेष्टा। मृश आमर्शने। आमर्शनं स्पर्शः।
अम्राक्षीत्। अमार्क्षीत्। अमृक्षत्। णुद प्रेरणे। कर्त्रभिप्रायेपि फले परस्मैपदार्थः पुनः पाठः। षद्लृ विशरणगत्यवसादनेषु। सीदतीत्यादि भ्वादि
वत्। इह पाठो लुम्विकल्पार्थः। सीदतो। सीदन्ति। ज्वलादिपाठस्तु णार्थः। सीदः। स्वार्थे राश्च॥ शद्लृ अनुदात्तः। शाम्लृ उदात्तः। शद्लृ शातने। स्वार्थेप
पुनः पाठः। शीयते इत्यादि भ्वादिवत्। शातातुनास्ति। शदेः शित इत्यात्मनेपदोक्तेः। अथ षट् स्वरितेतः। मिल संगमने। मिल संश्लेषणे
इति पठितस्य पुनः पाठः कर्त्रभिप्राये तङर्थः। मिलति। मिलते। मिमेल। मिमिले। मुच्लृ मोक्षणे। शे मुचादीनां। नुम् स्यात्। मुंचति। मुंचते। मोक्ता।
मुच्यात्। मुक्षीष्ट। अमुचत्। अमुक्त। अमुक्षातां। लुप्लृ छेदने। लुंपति। लुंपते। अलुपत्। अलुप्त। विद्लृ लाभे। विंदति। विंदते। विवेद। वि
विदे। व्याघ्रभूत्यादिमते सेट्कोयं। वेदिता। भाष्यमते तु अनिट्। वेत्ता। परिवेत्ता। परिवर्जने। ज्येष्ठं परित्यज्य दारानग्नींश्च लब्धवानित्यर्थः। [illegible]
चौ। लिप उपदेहे। उपदेहो वृद्धिः। लिम्पति। लिम्पते। लेप्ता। लिपिसिचिह्वश्च। तङि तु वा। अलिपत्। अलिपत। अलिप्त। षिच क्षरणे। सिंच
ति। सिंचते। असिचत्। असिचत। असिक्त। अभिषिंचति। अभ्यषिंचत्। अभिषिषेच। अथ त्रयः परस्मैपदिनः। कृती छेदने। कृ

तौ छेदने। कृन्तति। चकर्त्त। कर्त्तिता। कर्त्तिष्यति। कर्त्स्यति। अकर्त्तीत्। खिद परिघाते। खिंदति। चिखेद। खेत्ता। अयं दैन्ये दिवादौ रुधादौ च। पिश
अवयवे। पिंशति। पेशिता। अयं दीपनायामपि। त्वष्टा रूपाणि पिंशतु॥ इति मुचादयस्तुदादयश्च॥ रुधिर् आवरणे। नवस्वरितेतइरि
श्च॥ रुधादिभ्यः श्नम्। शपोपवादः। मित्वादन्त्यादचः परः। नित्यत्वादुणं बाधते। रुणद्धि। श्नसोरल्लोपः। णत्वस्यासिद्धत्वादनुस्वारः। परसव
र्णः। तस्यासिद्धत्वाण्णत्वं न। नपदान्तेति सूत्रेण अनुस्वारपरसवर्णयोः श्लोपो न स्थानिवत्॥ रुन्धः। रुन्धंति। रुन्धे। रोद्धा। रोत्स्यति। रोत्स्यते
रुणद्धु। रुन्धात्। रुंधि। रुणधानि। रुणधै। अरुणत्। अरुंधाम्। अरुंधन्। अरुणः। अरुणत्। अरुणधं। अरुधत्। अरौत्सीत्। अरुद्ध।
भिदिर् विदारणे। भिनत्ति। भिन्ते। भेत्ता। भेत्स्यति। भेत्स्यते। अभिनत्। अभिन्तां। अभिंदन्। अभिनत्। अभिनः। अभिन्तं। अभिन्त।
अभिनदं। अभिदत्। अभैत्सीत्। अभित्त। छिदिर् द्वैधीकरणे। अच्छिदत्। अच्छैत्सीत्। अछित्त। रिचिर् विरेचने। रिणक्ति। रिङ्क्ते। रि
रेच। रिरिचे। रेक्ता। अरिणक्। अरिचत्। अरैक्षीत्। अरिक्त। विचिर् पृथग्भावे। विनक्ति। विङ्क्ते। क्षुदिर् संपेषणे। क्षुणत्ति। क्षुन्ते। क्षोत्ता।
अक्षुदत्। अक्षौत्सीत्। अक्षुत्त। युजिर् योगे। युनक्ति। योक्ता। उच्छृदिर् दीप्तिदेवनयोः। छृणत्ति। छृन्ते। चच्छर्द। सेसिचीति वेट्। चच्छि
दिषे। चच्छृत्से। छर्दिता। छर्दिष्यति। छर्त्स्यति। अच्छृदत्। अच्छर्दीत्। अच्छर्दिष्ट। उतृदिर् हिंसानादरयोः। तृणत्तीत्यादि छृणत्तिव ५०

त्। तुकोट। तुकुट। कुटिता। पुट संश्लेषणे। कुड घनत्वे। घनत्वं सान्द्रता। चुकोड। कुडिता। कुड बाल्ये। पुड उत्सर्गे। घुट प्रतीघाते। तुड तोडने। तोडनं
भेदः। थुड स्थुड संवरणे। थुडति। तुथोड। पुस्फोड। खुड छुड इत्येके। स्फुर स्फुल संचलने। स्फुर स्फुरणे। स्फुल संचलने इत्येके। स्फुरति स्फुलत्योर्नि
र्निविभ्यः। षत्वं वा स्यात्। निःष्फुरति। निःस्फुरति। स्फर इत्येके। गोपधं केचित् पठंति। पस्फार। स्फुड चुड ब्रुड संवरणे। ब्रुड भ्रुड निमज्जन इत्येके।
गुरी उद्यमने। अनुदात्तेत्। गुरते। जुगुरे। गुरिता। णू स्तवने। दीर्घान्तः। परिणूतगुणोदयः। इतश्चस्वारः। परस्मैपदिनः। नुवति। अनुवीत्। धू वि
धूनने। धुवति। गु पुरीषोत्सर्गे। जुगुविथ। जुगुथ। गुता। गुष्यति॥ अगुषीत्। ह्रस्वादंगात्। अगुतां। अगुषुः। ध्रु गतिस्थैर्ययोः। ध्रुव इति पाठान्त
रं। आद्यस्य ध्रुवतीत्यादि गुवतिवत्। द्वितीयस्तु सेट्। दुध्रुविथ। ध्रुविता। ध्रुविष्यति। ध्रूयात्। अध्रुवीत्। अध्रुविष्टाम्। कूङ् शब्दे। दीर्घान्त
इति कैयटः। कुविता। अकुविष्ट। ह्रस्वांत इति न्यासकारः। कुविता। अकुत। इत्॥ कुटादयो वृत्ताः। पृङ् व्यायामे। प्रायेण व्याङ्पूर्वः॥ रिङ्।
इयङ्। व्याप्रियते। व्यापप्रे। व्यापप्राते। व्यापप्रिरे। व्यापरिष्यते। व्यापृत। व्यापृषातां। मृङ् प्राणत्यागे। म्रियतेर्लुङ्लिङोश्च। लुङ्लिङो
शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्र। ङित्त्वं स्वरार्थं। म्रियते। ममार। ममर्थ। मम्रिव। मर्तासि। मरिष्यति। मृषीष्ट। अमृत। अथ परस्मै
पदिनः। सम। रिपित। अंतरंगत्वादियङ्। रियति। पियति। रेता। पेता। धि धारणे। क्षि निवासगत्योः। षू प्रेरणे। सुवति। सविता। कॄ विक्षेपे।
य

दिकृञ्भ्य उः। तनोति। तनुतः। तन्वंति। तन्वः। तनुवः। तनुते। ततान। तेने। ततु। अतनीत्। अतानीत्। तनादिभ्यस्तथासोः। तनादेः सिचो वा
लुक् स्यात्तथासोः। थासा साहचर्यादेकवचनं तशब्दो गृह्यते। तेनेह न। स्वयमतनिष्ट। अतानिष्ट। अनुदात्तोपदेशेत्यनुनासिकलोपः। तङि। अतत।
अतनिष्ट। अतथाः। अतनिष्ठाः। षणु दाने। सनोति। सनुते। ये विभाषा। सायात्। सन्यात्। जनसनेत्यात्वं। असात। असनिष्ट। असाथाः। अ
सनिष्ठाः। क्षणु हिंसायां। क्षणोति॥ क्षणुते। ह्म्यन्तेति न वृद्धिः। अक्षणीत्। अक्षत। अक्षनिष्ट। अक्षथाः। अक्षणिष्ठाः। क्षिणु च। उप्रत्ययनिमि
त्तो लघूपधगुणः। संज्ञापूर्वको विधिरनित्य इति न भवतीत्यात्रेयादयः। भवत्येवेत्यन्ये। क्षिणोति। क्षेणोति। क्षेणितासि। क्षेणितासे। अक्षेणी
त्। अक्षित। अक्षेणिष्ट। ऋणु गतौ। ऋणोति। अर्णोति। अर्णुतः। अर्ण्वंति। आनर्ण। आनृणे। अर्णितासि। आर्णीत्। आर्त। आर्णिष्ट। आर्थाः।
आर्णिष्ठाः। तृणु अदने। तृणो। तर्णोति। तृणुते। तर्णुते। घृणु दीप्तौ। जघर्ण। जघृणे। अयं द्वावनुदात्तेतौ। वनु याचने। वनुते। ववने। नायं मते परस्मै
ही। वनोति। ववान। मनुते। मनु अवबोधने। मनुते॥ डुकृञ् करणे। करोति। अत उत्सार्वधातुके। कुरुते। कुरुतः। न भकुर्छुरामिति न दीर्घः।
कुर्वन्ति। नित्यं करोतेः। करोतेः प्रत्ययोकारस्य नित्यं लोपः स्यान्म्वोः परयोः। कुर्वः। चकर्थ। चकृव। कर्त्ता॥ करिष्यति। ये च। हलुउलोपः स्याद्यादौ
प्रत्यये परे। कुर्यात्। आशिषि। रिङ्शेति। क्रियात्। कृषीष्ट। अकार्षीत्। तनादिभ्य इति वा लुको भावे ह्रस्वादङ्गादिति सिचो लोपः। अकृत॥

अकृथाः। संपरिभ्यां करोतौ भूषणे। समवाये च। संपरिपूर्वस्य करोतेः सुट् स्याद्भूषणे संघाते चार्थे। संस्करोति। अलंकरोतीत्यर्थः। संस्कुर्वन्ति। संघी
भवन्तीत्यर्थः। संपूर्वस्य क्वचिदभूषणेपि सुट्। संस्कृतं भक्षा इति ज्ञापकात्। परिनिविभ्य इति षः। परिष्करोति। सिवादीनां वा। पर्यस्कार्षीत्। पर्य
कार्षीत्। उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु। उपात्कृञः सुट् स्यादेष्वर्थेषु चात्प्रागुक्तयोरर्थयोः। प्रतियत्नो गुणाधानं। विकृतमेव वैकृतं विका
रः। वाक्यस्याध्याहार आकांक्षितस्यैकदेशपूरणं। उपस्कृता कन्या। अलंकृतेत्यर्थः। उपस्कृतं भुंक्ते। विकृतमित्यर्थः। उपस्कृतं ब्रूते। वाक्याध्याहारेण ब्रूत
इत्यर्थः। सुट्कात्पूर्वः। अडभ्यासव्यवायेपि सुट्कात्। संचस्कार। कात्पूर्व इत्यादि भाष्ये प्रत्याख्यातं। तथाहि। पूर्वं धातुरुपसर्गेण युज्यते। अंतरंग
त्वात्। सुट्। ततो द्वित्वं। एवं च कृतस्य संयोगादेर्गुणः। संचस्करतुः। ह्रस्वभृस्वृनेकतो भारद्वाजस्येति सूत्रेण कृञोऽसुट इति वक्तव्यं। तेन सस्कृञ
स्वरस्येट्। संचस्करिथ। संचस्करिव। गुणोर्त्तीति सूत्रे नित्यं छन्दसीति सूत्रान्नित्यमित्यनुवर्त्तते। नित्यं ऋयः संयोगादिस्तस्येत्यर्थात्। सुटियु
योगेन। संस्क्रियात्। ऋतश्च संयोगादेर्लिङ्सिचोरिट्। एकाच उपदेशे इति सूत्राद् उपदेशे इत्यनुवर्त्य उपदेशे यः संयोगादिरिति व्याख्यानात्। संस्कृ
षीष्ट। समस्कृत। समस्कृषातां॥ इति तनादयः॥ डुक्रीञ् द्रव्यविनिमये। क्र्यादिभ्यः श्ना। क्रीणाति। ई हल्यघोः। क्रीणीतः। इत्वात्पूर्वं झोंतादेशः। परत्वा
न्नित्यत्वादंतरंगत्वाच्च। एवं झस्याद्भावः। ततः श्नाभ्यस्तयोरात इत्यालोपः। क्रीणंति। क्रीणीते। क्रीणाते। क्रीणते। चिक्राय। चिक्रियतुः। चिक्रयिथ।

चिक्रेथ। चिक्रियिव। चिक्रियिम। क्रेता। क्रेष्यति। क्रीयात्। क्रेषीष्ट। अक्रैषीत्। अक्रेष्ट। प्रीञ् तर्पणे कान्तौ च। कान्तिः कामना। प्रीणाति। प्रीणीते।
श्रीञ् पाके। मीञ् हिंसायां। हिनुमीना। प्रमीणाति। प्रमीणीतः। मीनातिमिनोतीत्येज्विषये आत्वं। ममौ। मिम्यतुः। ममिथ। ममाथ। मिम्ये।
माता। मास्यति। मासीष्ट। अमासीत्। अमासिष्टाम्। अमास्त। षिञ् बंधने। सिनाति। सिनीते। सिषाय। शिष्ये। सेता। स्कुञ् आप्रवणे। स्तं
भुस्तंभुस्कंभुस्तुंभुस्कुंभ्यः श्नुश्च। चात् श्ना। स्कुनोति। स्कुनुते। स्कुनाति। स्कुनीते। चुस्काव। चुस्कुवे। स्कोता। अस्कौषीत्। अस्कोष्ट। स्तंभा
दयश्चत्वारः। सौत्राः। सर्वे रोधनार्था इत्येके। माधवस्तु प्रथमतृतीयौ स्तंभनार्थौ। द्वितीयो निष्कोषणार्थः। चतुर्थो धारणार्थ इत्याह। सर्वे पर
स्मैपदिनः। न्लोपः। विष्टभ्नोति। विष्टभ्नाति। अवष्टभ्नोति। अवष्टभ्नाति। अवतष्टंभ। जृस्तंभित्यङ्वा। व्यष्टभत्। व्यष्टंभीत्। स्कुभ्नोति॥
स्तभ्नाति। वेस्कभ्नातेर्नित्यं। वेः परस्य स्कभ्नातेः सस्य षः स्यात्। विष्कभ्नोति। विष्कभ्नाति। स्कुभ्नोति। स्कुभ्नाति। हलः श्नः शानज्झौ। हलः परस्य
श्नः शानजादेशः स्याद्धौ परे। स्तभान। स्कभान। स्तुभान। स्कुभान। पक्षे स्तभ्नुहीत्यादि। युञ् बंधने। युनाति। युनीते। योता। क्नूञ् शब्दे
क्नूनाति। क्नूनीते। क्नविता। द्रूञ् हिंसायाम्। द्रूणाति। द्रूणीते। पूञ् पवने। प्वादीनां ह्रस्वः। शिति परे। पुनाति। पुनीते। लूञ् छेदने। लुनाति ५२

त्। कृतीवेष्टने। परस्मैपदी। कृणत्ति। आर्धधातुके तु कर्त्यादि तौदादिकवत्। ञिइन्धी दीप्तौ। त्रय आत्मनेपदिनः। श्नान्नलोपः। श्नमः परस्य न
स्य लोपः स्यात्। श्नसोरल्लोपः। इन्धे। इन्त्से। इन्धिता। इनधै। ऐन्ध। ऐन्धाः। खिद दैन्ये। खिन्ते। विद विचारणे। विन्ते। वेत्ता। अथ परस्मैपदिनः। शिष्लृ
विशेषणे। शिनष्टि। शिंष्टः। शिंषन्ति। शिशेषिथ। शेष्टा। शेक्ष्यति। हेर्धिः। जश्त्वम्। ष्टुत्वं। झरोझरीति वा डलोपः। अनुस्वारपरसवर्णौ। शिण्ढि। शिण्ढि
शिनषाणि। अशिनट्। लृदित्वादङ्। अशिषत्। पिष्लृ संचूर्णने। पिनष्टिस्माकुनंनुमा। शिपिवत्। भंजो आमर्दने। भनक्ति। बभंजिथ। बभङ्क्थ।
भङ्क्ता। भुज पालनाभ्यवहारयोः। भुनक्ति। भोक्ता। भोक्ष्यति। अभुनक्। तृह हिसि हिंसायां॥ तृणहइम्। तृहः श्नमि कृते इमागमः स्यात् हलादौ पि
ति। तृणेढि। तृण्ढः। तृंहन्ति। ततर्ह। तर्हिता। अतृणेट्। हिनस्ति दैत्य तेजांसि। जिहिंस। हिंसिता। अहिनत्। अहिंस्तां। अहिंसन्। अहिनः। अहिनत्॥
इदित्वात् हिंस्यात्। उन्दी क्लेदने। उनत्ति। उन्तः। उन्दन्ति। उदांचकार। औनत्। औन्तां। औन्दन्। औनत्। औनः। औनदम्। अंजू व्यक्तिम्रक्षणकान्ति
गतिषु। अनक्ति। अङ्क्तः। अञ्जन्ति। आनञ्जिथ। आनङ्क्थ। आङ्क्ता। अञ्जिता। अङ्ग्धि। अनजानि। आनक्। अंजेः सिचि। अंजेः सिचो नित्यमिट्
स्यात्। आंजीत्। तंचू संकोचने। तनक्ति। तङ्क्ता। तञ्चिता। ओविजी भयसंचलनयोः। विनक्ति। विङ्क्तः। विज इड् इति ङित्त्वं। विविजिथ। विजिता।
अविनक्। अविजीत्। वृजी वर्जने। वृणक्ति। वर्जिता। पृची संपर्के। पृणक्ति। पपर्च। इति रुधादयः॥ ॥अथ समस्तस्वरितेतः। तनु विस्तारे। तना

स्तः। ली श्लेषणे। विभाषा लीयतेरिति एज्विषये आत्वं वा। ललौ। लिलाय। लाता। लेता। व्ली वरणे। व्लिनाति। प्ली गतौ। वृत्। ल्वादयो वृत्ताः। घा
द्योपात्येके। ब्री वरणे। भ्री भये। भरण इत्येके। क्षीष् हिंसायां। एषां त्रयाणां ह्रस्वः केषांचिन्मते तु न। ज्ञा अवबोधने। ज्ञाजनोर्जा। जानाति। दी
र्घनिर्देशसामर्थ्यान्न ह्रस्वः। बंध बंधने। बध्नाति। बबंधिथ। बबंध। बंधा। बधारौ। भंत्स्यति। बधान। अभांत्सीत्। पूर्वत्रासिद्धमिति भ
षभावात्पूर्वं झलो झलीति सिज्लोपः। प्रत्ययलक्षणेन सस्मिन्प्रत्यये माश्रित्य भष्भावो न। प्रत्ययलक्षणं प्रति सिज्लोपस्यासिद्धत्वात्। अबाद्धां।
अभांत्सुः। वृङ् संभक्तौ। वृणीते। वव्रे। ववृषे। ववृढ्वे। वरिता। वरीता। अवरिष्ट। अवरीष्ट। अवृत। श्रंथ विमोचनप्रतिहर्षयोः। इतः परस्मै
पदिनः। श्रथ्नाति। श्रंथिग्रंथ्योर्ल्यादिना कित्व पक्षे एत्वाभ्यासलोपाविति वक्ष्याम इति हरदत्तादयः। श्रेथतुः। श्रेथुः। इदं कित्वं पिता
मपि नामपीति स्कंधाकर मते श्रेथिथ। अस्मिन्नपि पक्षे णलि। शश्राथ। उत्तमे तु शश्राथ शश्रथेति माधवः। तत्र मूलं मृग्यं। मंथ विलोडने। श्रं
थ ग्रंथ संदर्भौ। अर्थभेदाच्छ्रंथः पुनः पाठः। रूपं तूक्तं। कुंथ संश्लेषणे। संक्लेशन इत्येके। कुथ्नाति। चुकुंथ। कुथेति दुर्गः। चुकोथ। मृद क्षोदे। मृद्ना
ति। मृदान। मृड च। अयं सुखेपि। मृडं। मृड्नाति। गुध रोषे। गुध्नाति। कुष निष्कर्षे। कुष्णाति। कोषिता। निरः कुषः। निरः परात् कुषेर्वलादेरार्ध
धातुकस्येड्वा स्यात्। निष्कोषिता। निष्कोष्टा। निरकोषीत्। निरकुक्षत्। क्षुभ संचलने। क्षुभ्नादिषु च। क्षुभ्नाति। क्षुभ्नीतः। क्षोभिता। क्षुभा

न। णभ तुभ हिंसायां। नभ्नाति। तुभ्नाति। नभते। तोभते। इति शपि नभ्यति तुभ्यतीति श्यनि। क्लिशू विबाधने। श्नात्। इति श्रुतत्वान्निषेधः। क्लिश्ना
ति। क्लेशिता। क्लेष्टा। अक्लेशीत्। अक्लिक्षत्। अश भोजने। अश्नाति। आश। उध्रस उंछे। उकार इत्। ध्रस्नाति। उकारो धात्ववयव इत्येके। उध्र
सांचकार। इष आभीक्ष्ण्ये। पौनःपुन्यं भृशार्थो वा आभीक्ष्ण्यं। इष्णाति। एषिता। तीषसहेत्यत्र सहिना साहचर्यादिकारविकरणस्य तौदादिक
स्यैव इषेर्ग्रहणं न तु इष्यतीष्णात्योरित्याहुः। वस्तुतस्तु इष्णातेरपीड्विकल्प उचितः। तथा च वार्त्तिकं। इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः
इति। विष विप्रयोगे। विष्णाति। वेष्टा। प्रुष प्लुष स्नेहनसेचनपूरणेषु। प्रुष्णाति। प्लुष्णाति। उष पुष्टौ। पुष्णाति। पोषिता। मुष स्तेये। मो
षिता। खच भूतप्रादुर्भावे। भूतप्रादुर्भावोऽतिक्रांतोत्पत्तिः। खच्नाति। वांतोयमित्येके। च्छ्वोः शूडनुनासिके च। सनुकूच्छस्य वस्य च क्रमा
त् शऊठौ एतावादेशौ स्तोऽनुनासिके क्वौ झलादौ क्ङिति च। खौनाति। चखाव। खविता। शानचः परत्वादूठि कृते हलंतत्वाच्छानच्। खौ
नीहि। हिठ च। इत्वं। हिठ्णाति। ग्रह उपादाने। स्वरितेत्। ग्रहिज्या। गृह्णाति। गृह्णीते। ग्रहोलिटि दीर्घः। एकाचो ग्रहेर्विहितस्येटो दीर्घः स्या
न्न तु लिटि। ग्रहीता। लिटि तु जग्रहिष। गृह्णीयात्। गृह्यात्। ग्रहीषीष्ट। ह्म्यंतेति न वृद्धिः। अग्रहीत्। अग्रहीष्टां। अग्रहीष्ट। अग्रहीषातां।
इति क्र्यादयः॥ चुर स्तेये। सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्। एभ्यो णिच् स्यात्। चूर्णांतेभ्यः

सि॰कौ॰ति॰ प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धं। तेषामिह ग्रहणं प्रपंचार्थं। चुरादिभ्यस्तु स्वार्थे। पुगंतेति गुणः। सनाद्यंता इति धातुत्वं। तिप्शबादि। गुणायादेशौ।
चोरयति। णिचश्च। णिजंतादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले। चोरयते। चोरयामास। चोरयिता। णेरनिटि। चोर्यात्। चोरयिषीष्ट।
णिश्रीति चङ्। णौ चङ्युपधाया ह्रस्वः। द्वित्वं। हलादिः शेषः। दीर्घो लघोरित्यभ्यासदीर्घः। अचूचुरत्। अचूचुरत। चिति स्मृत्यां। चिन्तयति। अ
चिचिंतत्। चितेति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिंगं। तेन चिंत्यात्। चिंत्यते इत्यादौ न लोपः। चिंतति। चिंतेत्। एतच्च ज्ञापकं
सामान्यापेक्षमित्येके। अत एव कहलित्यत्र वृत्तिकृता जगणतुः जगणुरित्युदाहृतत्वात्। विशेषापेक्षमित्यपरे। अत एव आधृषाद्वेत्यस्य न वै
यर्थ्यं। यत्रि संकोचने। यंत्रयति। यंत्रेति पठितुं शक्यं। यत्तु इदित्करणं यंत्रतीति माधवेनोक्तं तच्चिंत्यं। एवं कुद्रि इत्यत्रापि। स्फुडि परिहा
से। स्फुंडयति। इदित्करणात्स्फुंडति। स्फुटीति पाठांतरं। स्फुटयति। स्फुटति। लक्ष दर्शनांकनयोः। कुद्रि अनृतभाषणे। कुंद्रयति। लड उपसे
वायां। लाडयति। मिदि स्नेहे। मिंदयति। ओलडि उत्क्षेपे। ओलंडयति। ओलंडति। ओकार इदित्येके। लंडयति। लंडति। उकारादिरयमित्यन्ये।
उलंडयति। जल अपवारणे। लज इत्येके। पीड अवगाहने। पीडयति। भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्यां। एषामुपधाया ह्रस्वो
वा स्याच्चङ्परे णौ। अपीपिडत्। अपिपीडत्। नट अवस्यंदने। अवस्यंदनं नाट्यं। श्रथ प्रयत्ने। प्रस्थान इत्येके। बध संयमने। बाधयति। बंधे ५४

लुनीते। स्तॄञ् आच्छादने। स्तृणाति। स्तृणीते। तस्तार। तस्तरतुः। ऋच्छत्यॄतामिति गुणः। स्तरिता। स्तरीता। स्तृणीयात्। स्तृणीत। आशिषि
स्तीर्यात्। लिङ्सिचोरिति वेट्। न लिङि इति दीर्घनिषेधः। स्तरिषीष्ट। उश्चेति कित्त्वं। स्तीर्षीष्ट। सिचि च परस्मैपदेषु इति न दीर्घः। अस्तारीत्। अस्तारि
ष्टां। अस्तरिष्ट। अस्तरीष्ट। अस्तीर्ष्ट। कॄञ् हिंसायां। कृणाति। कृणीते। चकार। चकर। वृञ् वरणे। वृणाति। वृणीते। ववार। ववरे। वरिता। वरी
ता। आशिषि। उदोष्ठ्यपूर्वस्य। वूर्यात्। वरिषीष्ट। वूर्षीष्ट। अवारीत्। अवारिष्टां। अवरिष्ट। अवरीष्ट। अवूर्ष्ट। धूञ् कंपने। धुनाति। धुनीते।
दुधविथ। दुधोथ। दुधविव। धोता। धविता। स्तुसुधूञ्भ्य इति इट्। अधावीत्। अधविष्ट। अधोष्ट। अथ वंध्यांत्याः परस्मैपदिनः। शॄ हिंसा
यां। शॄदॄप्रां वेति ह्रस्वपक्षे यण्। अन्यदा ऋच्छत्यॄतामिति गुणः। शश्रतुः। शशरतुः। श्र्युकः किति इति निषेधस्य क्रादिनियमेन बाधः। शशरि
व। शश्रिव। शरिता। शरीता। शृणीहि। शीर्यात्। अशारिष्टां। पॄ पालनपूरणयोः। पप्रतुः। पपरतुः। आशिषि। पूर्यात्। वॄ वरणे। भरण इत्येके।
भॄ भर्त्सने। भरण इत्येके। मॄ हिंसायां। मृणाति। ममार। दॄ विदारणे। दद्रतुः। ददरतुः। जॄ वयोहानौ। झॄ इत्येके। नॄ नये। कॄ हिंसायां। ऋ गतौ। ऋ र
णाति। अरांचकार। अरिता। अरीता। आर्णात्। आर्णीतां। ईर्यात्। आरारीत्। आरिष्टां। गॄ शब्दे। ज्या वयोहानौ। ग्रहिज्या। हलः। अंगावय
वाद्धलः परं यत्संप्रसारणं तदंतांगस्य दीर्घः स्यात्। इति दीर्घे कृते। प्वादीनां ह्रस्वः। जिनाति। जिज्यौ। जिज्यतुः। री गतिरेषणयोः। रेषणं वृकश

पूर्वः। विश्राणयति। तड आघाते। ताडयति। खड खडि कडि भेदने। खाडयति। खंडयति। कंडयति। कंडति। कुडि रक्षणे। गुडि वेष्टने। रक्षण इत्येके।
कुठि इत्यन्ये। अवकुंठयति। अवकुंठति। गुठि इत्यपरे। खुडि खंडने। वटि विभाजने। वडि इत्येके। मडि भूषायां हर्षे च। भडि कल्याणे। छर्द वमने।
पुस्त बुस्त आदरानादरयोः। चुद संचोदने। नक्क धक्क नाशने। गोपदेशात् लक्षणे प्रयुदास्तो यम्। ननक्कयति। चक्क चुक्क व्यथने। क्षल शौचकर्मणि
तल प्रतिष्ठायां। तुल उन्माने। तोलयति। अतूतुलत्। कथं तुलयति। तुलना इत्यादि। तुल्यार्थैरतुलोपमाभ्यामिति निपातनाद् उः तस्य तुलाशब्द
स्य सिद्धौ तन्तो गिन्तु। दुल उत्क्षेपणे। पुल महत्वे। चुल समुच्छ्राये। मूल रोहणे। कल विल क्षेपे। बिल भेदने। तिल स्नेहने। चल भृतौ। पाल रक्षणे।
लूष हिंसायां। शुल्ब माने। शूर्प च। चुट छेदने। मुट संचूर्णने। पडि पसि नाशने। पंडयति। पंडति। पंसयति। पंसति। व्रज मार्गसंस्कारग
त्योः। शुल्क अतिस्पर्शने। चपि गत्यां। चंपयति। चम्पति। क्षपि क्षांत्याम्। क्षंपयति। क्षंपति। छजि कृच्छ्रजीवने। श्वर्त गत्यां। श्वभ्र च। ज्ञप
मिच्च। अयं ज्ञाने ज्ञापने च वर्तते। मितां ह्रस्वः। मितामुपधाया ह्रस्वः स्याण्णौ परे। ज्ञपयति। यम च परिवेषणे। चात् मित्। परिवेषण
मिह वेष्टनं। न तु भोजनानां परिवेषणा॥ यमयति चंद्रं। परिवेष्टत इत्यर्थः। चह परिकल्कने। चहयति। अचीचहत्। कथादेर्वक्ष्यमाणस्य
तु अदंतत्वेनाग्लोपित्वाद्दीर्घसन्वद्भावौ न। अचचहत्। चप इत्येके। चपयति। रह त्यागे इत्येके। अरीरहत्। कथादेस्तु अररहत्। बल

प्राणने। बलयति। चिञ् चयने॥ निस्फुरोर्णौ॥ आत्वं वा स्यात्। अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ। एषां पुंकः स्याण्णौ। चपयति। चययति॥
चिक्करणसामर्थ्यादस्य णिज्विकल्पः। चयति। चयते। प्रणिचयति। प्रनिचयति। नान्ये मितोऽहेतौ। अहेतौ णिचि स्वार्थे ज्ञपादिभ्योऽन्ये मितो न
स्युः। तेन शमादीनाम मित्त्वं प्रयुक्तं मितं न। घट्ट चलने। मुस्त संघाते। खट्ट संवरणे। षट्ट स्फिट्ट चुबि हिंसायां। पूल संघाते। पूर्ण इत्येके। पुण इत्य
न्ये। पुंस अभिवर्द्धने। टकि बंधने। टंकति। धूस कांतिकरणे। दंत्यांतः मूर्धन्यांत इत्येके। तालव्यांत इत्यपरे। कीट वर्णे। चूर्ण संकोचने। पूज पूजा
यां। अर्क स्तवने। तपन इत्येके। शुठ आलस्ये। शुठि शोषणे। शुंठयति। शुंठति। जुड प्रेरणे। गज मार्ज शब्दार्थौ। गाजयति। मार्जयति। मर्च च। म
र्चयति। घृ प्रस्रवणे। स्रावण इत्येके। पचि विस्तारवचने। पंचयति। पंचति। पंच त इति। व्यक्तार्थस्य शापि गतं। तिज निशाने। तेजयति। कृत सं
शब्दने। उपधायाश्च। धातोरुपधाया ॠत इत् स्यात्। रपरत्वं। उपधायां चेति दीर्घः। कीर्तयति। उर्कीर्त्तत्। अचीकृतत्। अचिकीर्त्तत्। वर्द्धन छेद
न पूरणयोः। कुबि आच्छादने। कुंबयति। कुंबति। कुभि इत्येके। लुबि तुबि अदर्शने। अर्दन इत्येके। ह्रप व्यक्तायां वाचि। क्लृप इत्येके। चुटि छेदने।
इल प्रेरणे। एलयति। ऐलिलत्। म्रक्ष म्लेच्छने। म्लेच्छ अव्यक्तायां वाचि। ब्रूस बर्ह हिंसायां। केचिदिह गर्ज गर्द शब्दे। गर्ध अभिकांक्षायां। इ
ति पठंति। गुर्द पूर्वनिकेतने। जसि रक्षणे। मोक्षण इति केचित्। जंसयति। जंसति। ईड स्तुतौ। जसु हिंसायां। पिडि संघाते। रुष रोषे।

सि०कौ०ति० रूटइत्येके।डिप क्षेपे।ष्टुप समुच्छ्राये।आकुस्मादात्मनेपदिनः।कुस्मनाम्नो वेति वक्ष्यते।तमभिव्याप्येत्यर्थः।अकर्तृगामिफलार्थमिदं।चि
त संचेतने।चेतयति।अचीचितत्।दशि दंशने।दंशयते।अददंशत।इदित्वाण्णिजभावे।दंशति।आकुस्मीयमात्मनेपदं णिच्संनियोगेनैवे
तिव्याख्यातारः।नलोपे संजिसाहस्ययोस्तत्सादेरेवग्रहणं।दसि दर्शनदंशनयोः।दंसयते।दंसति।दसेत्यप्येके।डप डिप संघाते।तत्रि कुटुंब
धारणे।तंत्रयते।चांद्राः।धातुद्वयमिति मत्वा कुटुंबयते इत्युदाहरंति।मंत्रि गुप्तपरिभाषणे।स्पश ग्रहणसंश्लेषणयोः।तर्ज भर्त्स तर्जने।बस्त गं
ध अर्दने।बस्तयते।गंधयते।विष्क हिंसायां।हिष्केत्येके।निष्क परिमाणे।लल ईप्सायां।कूण संकोचने।तूण पूरणे।भ्रूण आशाविशंकयोः।शठ
श्लाघायां।यक्ष पूजायां।स्यम वितर्के।गूर उद्यमने।शम लक्ष आलोचने।नान्ये मित इति मित्वनिषेधः।शामयते।कुत्स अवक्षेपणे।त्रुट छेदने
कुट इत्येके।गल स्रवणे।भल आभंडने।कूट आप्रदाने।अवसादन इत्येके।कुट्ट प्रतापने।वंचु प्रलंभने।वृष शक्तिबंधने।शक्तिबंधनं प्रजन
नसामर्थ्यं।शक्तिसंबंधश्च।वर्षयते।मद तृप्तियोगे।दिवु परिकूजने।गृ विज्ञाने।गारयते।विद चेतनाख्याननिवासेषु।वेदयते।सत्तायां
६ विद्यते ज्ञाने वेत्ति विंते विचारणे।विंते विंदति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात्।मन स्तंभे।मानयते।यु जुगुप्सायां।यावयते।कुस्मना
म्नो वा।कुस्मेति धातुः।कुत्सितस्मयने वर्तते।कुस्मयते।अचुकुस्मत।अथवा कुस्मेति प्रातिपदिकं।ततो धात्वर्थे णिच्॥ ॥इत्याकुस्मीयाः॥ ५६

तिचंङः।वृ वरणे।दीर्घोच्चारणं णिचः पाक्षिकत्वे लिंगं।तङिसेद्दकत्वाय।एवं च वृणाति पिपर्तिभ्यां परितेत्यादिसिद्धावपि पारीति परतीत्या
दिसिद्धिः फलं।पारयति।परति।ऊर्ज बलप्राणनयोः।पक्ष परिग्रहे।वर्ण चूर्ण प्रेरणे।वर्ण वर्णन इत्येके।प्रथ प्रख्याने।प्राथयति।नान्ये मितो हे
ताविति वक्ष्यमाणत्वान्नास्य मित्वं।अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशां।एषामभ्यासस्याकारोऽतादेशः स्याच्चङ्परे णौ।इत्वापवादः।अपप्रथत्।
पृथ प्रक्षेपे।पर्थयति।उर्ऋत्।उपधाया ऋवर्णस्य स्थाने ऋत् स्याद्वा चङ्परे णौ।इररामपवादः।अपीपृथत्।अपपर्थत्।पथ इत्येके।पाथयति
षंब संबन्धे।संबयति।अससंबत्।शंब च।अशशंबत्।सांब इत्येके।भक्ष अदने।कुट्ट छेदनभर्त्सनयोः।पूरण इत्येके।कुट्टयति।पुट्ट चुट्ट अल्पी
भावे।अट्ट षुट्ट अनादरे।अट्टयति।अयं दोपधः।ष्टुत्वस्यासिद्धत्वान्नद्राः संयोगादय इति निषेधः।आट्टित्।लुंट स्तेये।लुंटयति।लुंटतीति तु ६
लुटि स्तेय इति भौवादिकस्य।शठ श्वठ असंस्कारगत्योः।श्वठि इत्येके।तुजि पिजि हिंसाबलादाननिकेतनेषु।तुंजयति।पिंजयति।इदित्करणात्तुंजति
पिंजति।तुज पिज इति केचित्।लजि लुजि इत्येके।पिस गतौ।पेसयति।पेशनीति तु शापि गतं।सान्त्व सामप्रयोगे।श्वल्क वल्क परिभाषणे।ष्णि
ह स्नेहने।स्फिट इत्येके।स्मिट अनादरे।अषोपदेशत्वान्न षः।असिस्मिटत्।स्मिङ् अनादर इत्येके।ङित्वस्यावयवे चरितार्थत्वाण्णिजन्तान्न
ङ्।स्माययते।श्लिष श्लेषणे।पथि गतौ।पन्थयति।पन्थतीति।पिच्छ कुट्टने।छदि संवरणे।छन्दयति।छन्दति।श्रण दाने।प्रायेणायं

मोदयतिसक्तूनसृतेन। त्रसधारणे। ग्रहणइत्येके। वारणइत्यन्ये। उध्रसउंछे। उकारोधात्ववयवइत्येके। नइत्यन्ये। ध्रासयति। उध्रासयति। मुच्प्रमोच
नेमोदनेच। वसस्नेहछेदापहरणेषु। चरसंशये। व्युसहने। हसनेचेत्येके। व्यावयति। व्युसेत्येके। व्योसयति। भुवोऽवकल्कने। अवकल्कनंमिश्
श्रीकरणमित्येके। चिंतनमित्यन्ये। भावयति। कृपेश्च। आस्वदः सकर्मकात्। स्वदिमभिव्याप्यसंभवत्कर्मभ्यएवणिच्। ग्रसग्रहणे। ग्रासयति। पु
लं। पुषधारणे। पोषयति। आभरणं। दलविदारणे। दालयति। पटपुटलुटतुजिमिजिपिजिलुजिभजिलघित्रसिपिसिकुसिदशिकुशिघ
टघटिदहिबर्हबल्हगुपधूपविछचीवपुथलोकलोचृणदकुपतर्कवृतुवृधुभाषार्थाः। पाटयति। पोटयति। लोटयति। तुंजयति। तुंजति
एवंपरेषां। घटयति। घंटयति। नाग्लोपिशास्वृदितां। णिच्यग्लोपिनः शास्तेर्ऋदितांचोपधायाह्रस्वोनस्यात्। त्वउपरेणो। अलुलोकत्
अलुलोचत्। वर्तयति। वर्द्धयति। उदित्वाद्वर्त्तति। वर्द्धति। रुटलजिअजिदसिभृशिरुशिशीकनटपुटिजिचिरघिलघिअहिरहिमहिच। लडि
तड। लन्ब। पूरीआप्यायने। ईदित्वंनिष्ठायामिण्निषेधाय॥ अतएवणिज्वा। पूरयति। रुजहिंसायां। ष्वदआस्वादने। स्वादइत्येके॥ असिष्व
दत्। दीर्घस्यतुअषोपदेशत्वात्। असिस्वदत्। आधृषाद्वा। इतउर्ध्वंविभाषितणिचः। धृषधातुमभिव्याप्य। युजपृचसंयमने। योजयति। योजति।
अयोजीत्। पर्चयति। पर्चति। पर्चिता। अपर्चीत्। अर्चपूजायां। षहमर्षणे। साहयति। सर्वायंनागः सहतिकलभेभ्यः परिभवं। ईरक्षे

पे। लीद्रवीकरणे॥ लाययति। लयति। लेता। वृजीवर्जने। वर्जयति। वर्जति। वृञ्आवरणे। वारयति। वरति। वरते। वरिता। वरीता। जृवयोहा
नो। जारयति। जरति। जरिता। जरीता। ज्रिच। ज्रायायति। ज्रयति। ज्रेता। रिचवियोजनसंपर्चनयोः। रेचयति। रेचति। रेक्ता। शिषअसर्वोप
योगे। शेषयति। शेषति। शेष्टा। अशिक्षत्। अयंविपूर्वोतिशये। तपदाहे। तापयति। तपति। तप्ता। तृपतृप्तौ। संदीपनइत्येके। तर्पयति। तर्पति
तर्पिता। छृदीसंदीपने। छर्दयति। छर्दति। छर्दिता। छर्दिष्यति। सेसिचीतिविकल्पोन। साहचर्यात्तत्त्वरोधादिकस्यैवग्रहणात्। दृपदृप
दपसंदीनइत्येके। दर्पयति। दृभीभये। दर्भयति। दर्भति। दर्भिता। दृभसंदर्भे। अयंतुदादावीदित्। श्रथमोक्षणेहिंसायामित्येके।
मीगतौ। माययति। मयति। मेता। ग्रंथबंधने। ग्रंथयति। ग्रंथति। शीकआमर्षणे। शीकत्र। अर्दहिंसायां। स्वरितेत्। अर्दयति। अर्द
अर्दते। हिसिहिंसायां। हिंसयति। हिंसति। हिनस्तीतिश्नमिगतं। अर्हपूजायां। आङःषदपद्यर्थे। आसादयति। आसीदति। पाक्षे
तिसीदादेशः। आसत्ता। आसात्सीत्। शुंधशौचकर्मणि। शुंधिता। अशुंधीत्। अशुंधिष्ट। छदअपवारणे। स्वरितेत्। जुषपरितर्क
णे। परितर्पणंमोहोहिंसावा। परितर्पणइत्येके। परितर्पणंपरिदृप्तिक्रिया। जोषयति। जोषति। प्रीतिसेवनयोःजुषतेइतितुदादौ।

सि॰कौ॰ति॰ धूञ्कंपने। णावित्यधिकृत्य। धूञ्प्रीञोर्नुग्वक्तव्यः। धूनयति। धवति। धवते। केचित्तु धूञ्प्रीञोःइति पठित्वा प्रीणातिसाहचर्याद्धूनाते
रेव नुकमाहुः। धावयति। अयं स्वादौ क्र्यादौ तुदादौ च। स्वादौ ह्रस्वश्च। तथा च कविरहस्ये। धूनोति चंपकवनानि धुनोत्यशोकं चूतं धुनोति धुव
ति स्फुटितातिमुक्तं। वायुर्विधूनयति चंपकपुष्परेणून् यत्कानने धवति चंदनमंजरीश्च॥ ३॥ प्रीञ् तर्पणे। प्रीणयति। धूञ्प्रीणोरिति ह
रदत्तोक्तपाठे तु। प्राययति। प्रयति। प्रयते। श्रंथ ग्रंथ संदर्भे। आप्लृ लंभने। आपयति। आपति। आपत्। आप्त। स्वरितेदयमित्येके॥
आपते। तनु श्रद्धोपकरणयोः। उपसर्गाच्च दैर्घ्ये। तानयति। वितानयति। तनति। वितनति। चन श्रद्धोपहननयोरित्येके। चानयति।
चनति। वद संदेशवचने। वादयति। स्वरितेत्। वदति। वदते। अनुदात्तेदित्येके। ववदतुः ववदिथ। ववदे। वद्यात्। वच परिभाषणे॥
वाचयति। वचति। वक्ता। अवाक्षीत्। मान पूजायां। मानयति। मानति। मानिता। विचारणे तु भौवादिको नित्यसन्नन्तः। स्तंभे मानयते
इत्याहुस्मीयाः। मन्यते मनुते इति दिवादौ तनादौ च। भू प्राप्तावात्मनेपदी। भावयते। भवते। णिच्संनियोगेनैवात्मनेपदमित्येके॥
भवति। गर्ह विनिंदने। मार्ग अन्वेषणे। कठि शोके। उत्पूर्वोयमुत्कंठायां। कंठत इत्यात्मनेपदी गतः। मृजू शौचालंकारयोः। मार्जयति। मा
र्जति। मार्जिता। मार्ष्टी। मृष तितिक्षायां। स्वरितेत्। मर्षयति। मर्षति। मर्षते। मृष्यति। मृष्यते। इति दिवादौ। सेचने तु शपि मर्षति। धृष ५९

वर्त्त अध्यने। बुक्क भषणे। शब्द उपसर्गादाविष्कारे च भाषणे। प्रतिशब्दयति। प्रतिश्रुतं माविष्करोतीत्यर्थः। अनुपसर्गाच्च। आविष्कार इत्येव। शब्दय
ति। कण निमीलने। काणयति। णौ चङ्युपधाया ह्रस्वः। काण्यादीनां वेति वक्तव्यं। अचीकणत्। अचकाणत्। जभि नाशने। जंभयति। जंभति
षूद क्षरणे। सूदयति। असूषुदत्। जसु ताडने। जासयति। जसति। पश बंधने। पाशयति। अम रोगे। आमयति। नान्ये मित इति निषेधः। अमन्
त्वादेशापि गतः। तस्माद्धेतुमण्णौ। आमयति। स्वार्थे। चट स्फुट भेदने। विकासे नाशयोः। स्फुटति। स्फोटते। इत्यन्ये। घट संघाते। घाटयति। हंत्या
र्थाश्च। न वगण्य मुक्ता अपि हंत्यर्थाः णिचं लभंत इत्यर्थः। दिवु मर्दने। उदित्वाद्देवनीत्यपि। अर्ज प्रतियत्ने। अयमर्थांतरेपि। घुषिर् विशब्दने॥
इति स्वेनैव विशब्दन इति निषेधाल्लिंगादनित्योऽस्य णिच्। घोषति। इरित्वाद्ङ्वा। अघुषत्। अघोषीत्। ण्यंतस्य तु अजूघुषत्। आङः क्रंदसातत्ये।
भौवादिकः क्रंदधातुः शब्दार्थ उक्तः। स एवाङ्पूर्वो णिचं लभते सातत्ये। आक्रंदयति। अन्ये तु। आङ्पूर्वो घुषिः क्रंदसातत्ये इत्याहुः। आघोषय
ति। लस शिल्पयोगे। तसि भूष अलंकरणे। अवतंसयति। अवतंसति। भूषयति। अर्ह पूजायां। ज्ञा नियोगे। आज्ञापयति। भज विश्राणने। शृधु
प्रसहने। अशशर्धत्। अशीशृधत्। यत निकारोपस्कारयोः। रक लग आस्वादने। रघ इत्येके। रग इत्यन्ये। अंचु विशेषणे। अंचयति। उदित्वाभि
इकल्पार्थे। अत एव विभाषितो णिच्। अंचयति। एवं शृधुजस्प्रभृतीनामपि बोध्यं। लिगि चित्रीकरणे। लिंगयति। लिंगति। मुद संसर्गे। मा

प्रसहने। धर्षयति। धृषति। इत्याधृषीयाः। अथादन्ताः। कथ वाक्यप्रबन्धे। अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः। कथयति। अल्लोपित्वाद्दीर्घसन्वद्भावौ
न। अचकथत्। वर ईप्सायां। वरयति। वारयतीतिगतं। गण संख्याने। गणयति। ई च गणः। गणेरभ्यासस्य ईत्स्यात् चादत्चङ्परेणौ। अजग
णत्। अजीगणत्। शठ श्वठ सम्यगवभाषणे। पट वट ग्रन्थे। रह त्यागे। अररहत्। स्तन गदी देवशब्दे। स्तनयति। गदयति। अजगदत्। पत
गतौ वा। वाणिजन्तः। वा अदन्त इत्येके। आद्ये पतयति। पतति। पतांचकार। अपपतत्। अपतीत्। द्वितीये पातयति। अपीपतत्। पष अनु
पसर्गात्। गतौ विलेख। पषयति। स्वर आक्षेपे। स्वरयति। रच प्रतियत्ने। रचयति। कल गतौ संख्याने च। चह परिकल्कने। परिकल्कनं दं
भः शाठ्यं च। मह पूजायां। महयति। महतीति गतं क्वापि। सार कृप श्रथ दौर्बल्ये। सारयति। कृपयति। श्रथयति। स्पृह ईप्सायां। भाम क्रो
धे। अबभामत्। सूच पैशुन्ये। सूचयति। अणोपदेशत्वान्न षः। असूसूचत्। खेट भक्षणे। तृतीयान्त इत्येके। खोट इत्यन्ये। क्षोट क्षेपे।
गोम उपलेपने। अजुगोमत्। कुमार क्रीडायां। अचुकुमारत्। शील उपधारणे। उपधारणमभ्यासः। साम सान्त्वप्रयोगे। अससामत्। सामसा
त्वने। इत्यनीतस्य तु असीषमत्। वेल कालोपदेशे। वेलयति। काल इति पृथग्धातुरित्येके। कालयति। पल्पूल लवनपवनयोः। वात सुखसे
वनयोः। प्रीतिसेवनयोरित्येके। वातयति। अववातत्। गवेष मार्गणे। अजगवेषत्। वास उपसेवायां। निवास आच्छादने। भाज पृथक्कर्मणि

सि॰कौ॰ति

सभाजप्रीतिदर्शनयोः। प्रीतिसेवनयोरित्यन्ये। सभाजयति। ऊनपरिहाणे। ऊनयति। ओः पुयण्ज्ञीतिसूत्रे पययोरितिवक्तव्येवर्ग
प्रत्याहारजग्रहोलिंगं। णिचिजत्र आदेशोनस्याद्द्वित्वेकार्येइति। यत्रद्विरुक्तोऽभ्यासोत्तरखंडस्यभाद्योन्नुनक्रियोयांपरिनिष्ठितेरूपे
वाजवर्णोलभ्यतेतत्रैवायंनिषेधः। ज्ञापकस्यसजातीयापेक्षत्वात्तेनाचिकीर्तदितिसिद्धं। प्रकृतेतुनशब्दस्यद्वित्वंनतउत्तरखंडेअ
ल्लोपः। औननत्। माभवानूननत् ध्वनशब्दे। अदध्वनत्। कूटपरितापे। परिदाहइत्यन्ये। संकेतग्रामकुणगुणचामंत्रणेचात्कू
टोपि। कूटयति। संकेतयति। ग्रामयति। कुणयति। गुणयति पाठांतरं। केतश्रवणेनिमंत्रणेच। केतयति। निकेतयति। कुणगुणचामं
त्रणे। चकारात्केतकुणसंकोचनइति। स्तेनचौर्ये। अतिस्तेनत्। आगर्वादात्मनेपदिनः। पदगतौ। पदयते। अपपदत्। गृहग्रहणे। गृह
यते। मृगअन्वेषणे। मृगयते। मृग्यतीतिकंड्वादिः कुहविस्मापने। शूरवीरविक्रांतौ। शूरयते। वीरयते। स्थूलपरिबृंहणे। स्थूलय
ते। अतुस्थूलत्। अर्थउपयाञ्चायां। अर्थयते। आर्तथत। सत्रसंतानक्रियायां। अससत्रत। अनेकाच्त्वान्नषोपदेशः। सिस
त्रयिषते। गर्वमाने। गर्वयते। अदंतत्वसामर्थ्याण्णिज्विकल्पः। धातोरंतउदात्तः लिपावमचफलं। एवमग्रेपि। इत्यागर्वीयाः
। सूत्रवेष्टने। सूत्रयति। असुसूत्रत्। मूत्रप्रस्रवणे। मूत्रयति। मूत्रति। रूक्षपारुष्ये। पारतीकर्मसमाप्तौ। अपपारत्। ५९

चित्रचित्रीकरणे। आलेख्यकरणादिष्वित्यर्थः। कदाचिद्दर्शने। चित्रेत्ययमद्भुतदर्शनेणिचंलभते। चित्रयति अंससमाघाते। वटविभाजने।
लजप्रकाशने। वटिलजित्येके। वंटयति। लंजयति। अदंतेषुपाठबलाद्दंतत्वेवृद्धिरित्यन्ये। वंटापयति। लंजापयति। शाकटायन
स्तुकथादीनांसर्वेषांउकमाह। तन्मतेकथापयति। गणापयतीत्यादि। मिश्रसंपर्के। संग्रामयुद्धे। अनुदात्तेत्। अकारप्रश्लेषात्।
असंसंग्रामत। स्तोमश्लाघायां। अतुस्तोमत्। छिद्रकर्णभेदने। करणसेदनइत्यन्ये। कर्णेतिधात्वंतरमित्यन्ये। अंधदृष्ट्युपघाते। उपसंहा
रइत्यन्ये। आंदधत्। दंडदंडनिपातने। अंकलक्षणेपदेच। आंचकत्। अंगच। आंजगत्। सुखदुःखतत्क्रियायां। रसआस्वादनेस्नेहनयोः
व्ययवित्तसमुत्सर्गे। अवव्ययत्। रूपरूपक्रियायां। रूपस्यदर्शनंकरणंवारूपक्रिया। छिद्रद्वैधीकरणे। अचिछिद्रत्॥ छदअपवारणेइ
त्येके। छदयति। लाभप्रेरणे। व्रणगात्रविचूर्णने। वर्णवर्णक्रियाविस्तारगुणवचनेषु। वर्णक्रियावर्णकरणं। स्वर्णंवर्णयति। कथांवर्णयति
विस्तृणातीत्यर्थः। हरिंवर्णयतिस्तौतीत्यर्थः बहुलमेतन्निदर्शनं। अदंतधातुनिर्देशोनमित्यर्थः। बाहुल्यकारन्येपिबोध्याः। तद्यथा
। पर्णहरितभावे। अपपर्णत्। विष्कदर्शने। जपप्रेरणे। वसनिवासे। तुत्थआवरणे। एवमांदोलयति। प्रेंखोलयति। विडंबयति। अवधीरयति

इत्यादि। अन्येतुदशगणीपाठेबहुलमित्याहुः। तेनापठितापिअंसौचलौकिकेवैदिकाबोध्याः। अपरेतुनवगणीपाठेभ्योपिकचित्स्वार्थेणिचु
रामोराज्यमचीकरदितियथेत्याहुः। चुरादिभ्यएवबहुलंणिजित्यर्थइत्यन्ये। सर्वेपक्षाप्राचायैस्थिताः। णिङ्गाविरसने। अंगवाचिनःप्रातिप अं
दिकान्निरसनेर्थेणिङ्स्यात्। हस्तौनिरस्यतिहस्तयते। पादयते। श्वेताश्वतरगालोडितगह्वरकाणामश्वतरेतकलोपश्च। श्वेतादीनांचतुर्णाम
श्वादयोलुप्यंतेणिङ्धात्वर्थे। श्वेताश्वमाचष्टेतेनातिक्रामतिवाश्वेतयते। अश्वतरमाचष्टेअश्वयते। गालोडितंवाचांविमर्शः तत्करोतिगालो
डयते। आगह्वरयते। केचित्तुणिचमेवानुवर्तयंतितन्मतेपरस्मैपदमपि। पुच्छादिषुधात्वर्थइत्येवसिद्धंणिजंतादेवबहुलवचनादात्मनेपद
मस्तु। मास्तुपुच्छभांडेतिणिङ्विधिः। सिद्धशब्दोग्रंथांतेमंगलार्थः। इतिचुरादिः॥ तत्प्रयोजकोहेतुश्च॥ कर्तुःप्रयोजकोहेतुसंज्ञःकर्तृसंज्ञश्चस्यादि
त्तिहेतुमतिच। प्रयोजकव्यापारेप्रेषणादौवाच्येधातोर्णिच्स्यात्। भवंतंप्रेरयतिभावयति। णिचश्चेतिकर्त्रगेफलेआत्मनेपदंभावयते। भावयांबभूव
ओःपुयण्ज्यपरे। सनिपरेयदंगंतदवयवाभ्यासोकारस्येत्त्वंस्यात्पवर्गयणजकारेष्ववर्णेपरेषुपरतः। असीभवत्। अपीपवत्। मूङ्। अमीमवत्।
अर्यीयवत्। अरीरवत्। अलीलवत्। अजीजवत्। स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनांवा। एषांमभ्यासोकारस्येत्त्वंवास्यात्सनिअवर्णे
परेधात्वक्षरेपरे। असिस्रवत्। असुस्रवत्। नाग्लोपिशास्वृदितां। इतिह्रस्वनिषेधः। अशशासत्। अडुढौकत्। अचीचकासत्। मतांतरे। अचकासत्॥ अ

ग्लोपी। तिस्फधातुप्रकरणे उदाहरिष्यते। ण्यंता णिच्। पूर्वविप्रतिषेधादपवादत्वाद्वा वृद्धिं बाधित्वा णिलोपः चोरयति। णौचङी। तिह्रस्वः। दीर्घोलघोः। नना
ग्लोपित्वादुयोरप्यसंभवः। ण्याकृतिनिर्देशात् अनूनुनेरत्। णौचसंश्चङोः॥ सन्परे चङ्परे च णौ श्वयतेः संप्रसारणं वा स्यात्। संप्रसारणं तदा
श्रयं च कार्यं बलवदिति वचनात्संप्रसारणं पूर्वरूपं। अशूशवत्। अलघुत्वान्न दीर्घः। अशिश्वयत्। स्वंसुसिवुसहां चङि। उपसर्गनि
मित्तादेषां सस्य षो न स्याच्चङि। अवातस्तंसत्। पर्यसीषिवत्। न्यसीषहत्। आसिटत्। आशिशत्। बहिरंगेणुपधाह्रस्वो द्वित्वात्प्रागेव॥
ओणेर्ऋदित्करणालिंगात्। माभवानिधिपत्। एजावेधतौ विधानान्न वृद्धिः। माभवान्नेदिधत्। नन्द इति नदरापां न द्वित्वं। औंदि
धेत्। आडुनुडत्। आर्चिचत्। उब्ज आर्जवे। उपदेशे दकारोपधः। भुजन्युब्जौ पाण्युपतापयोरिति सूत्रे निपातनाद्वस्य बः। सचांतरंगोपि द्वित्व
विषयेन न्द्राः इति निषेधाज्जिशब्दे द्वित्वे कृते प्रवर्तते। नतु ततः प्राक् दकारोच्चारणसामर्थ्यात्। औजिजत्। अजादेरित्येव नेह। अदद्दिय
त्। रभेरशब्लिटोः। रभेर्नुम्स्यादचि न तु शब्लिटोः। लभेश्च। आररंभत्। अललंभत्। हेरचङि इति सूत्रे चङि इत्युक्तेः कुत्वं न। अजीहय
त्। अस्मृदृत्वरप्रथम्रदस्तृस्पशां। असस्मरत्। अददरत्। तपरत्वसामर्थ्यादत्र लघोर्न दीर्घः। विभाषा वेष्टिचेष्ट्योः। अभ्यासस्य
अत्वं वा स्याच्चङ्परे णौ। अववेष्टत्। अविवेष्टत्। अचचेष्टत्। अचिचेष्टत्। भ्राजभासेत्यादिना वोपधाह्रस्वः। अबिभ्रजत्। ६१

अतितीरत्। पुट संसर्गे। पुटयति। धेक दर्शने इत्येके। अदिधेकत्। कत्र शैथिल्ये। कत्रयति। कत्रति। कर्तेत्यप्येके। कर्तयति। कर्तति। प्रातिपदि
काद्धात्वर्थे बहुलमिष्ठवच्च। प्रातिपदिकाद्धात्वर्थे णिच् स्यादिष्ठे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुब्लोपयणादिलोपप्रस्थस्फा
द्यादेशभसंज्ञास्तद्वणावपि स्युः। पटुमाचष्टे पटयति। परत्वाद्वृद्धौ सत्यां टिलोपः। अपीपटत्। णौचङीत्यत्र भाष्ये वृद्धेर्लोपो बलीयानिति
प स्थितं। अपटत्। तत्करोति तदाचष्टे। पूर्वस्य प्रपंचः करोत्याचष्टे इति धात्वर्थमात्रं णिजर्थः। लडर्थस्त्वविवक्षितः। तेनातिक्रामति। अश्वेना
तिक्रामति अश्वयति। हस्तिनातिक्रामति हस्तयति। धातुरूपं च। णिच् प्रकृति धातुरूपं प्रतिपद्यते। चशब्दोऽनुक्तसमुच्चयार्थः। तथा च वार्तिकं
आख्यानात्कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकमिति। कंसवधमाचष्टे कंसं घातयति। इह कंस हन् इति स्थि
ते। हनस्तोचिण्णलोः। हंतेस्तकारोंतादेशः स्याच्चिण्णल्वर्जे ञ्णितीति। ननु चांगसंज्ञा धातुसंज्ञा च कंसविशिष्टस्य प्राप्ता ततश्च अट्द्वित्व
योर्दोषः। किंच। कुत्वं तत्वेन स्यातां। धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्। सत्यं। प्रकृतिवच्चेति चकारो भिन्नक्रमः कारकं च।
चात्कार्यं। हेतुमणिचः प्रकृते हेत्वादेहेंतुमणौ यादृशं कारकं धातावनंतर्भूतं तद्वितीयान्तं यादृशं कार्यं कुत्वतत्वादि तदिहापीत्यर्थः।
कंसं मजीघतत्॥ कर्तृकरणाद्धात्वर्थे। कर्तुर्व्यापार्थं यत्करणं न तु न-राद्दिमात्रमित्यर्थः॥ असिनाहंति। असयति। चक्कदर्शनेवचि

पूजामधिगच्छतीत्यर्थः। इत्येनोवार्त्तिकात्मुल्लापस्यैते अभिसवतीत्यर्थः। बालमुल्लापयतेवंचयतीत्यर्थः। बिभेतेर्हेतुभये। बिभेतेरेत्वः आत्वंचास्या
त्त्रयोजकाद्भयंचेत्। भीस्म्योर्हेतुभये। आभ्यामात्मनेपदंचास्याद्धेतोश्चेद्भयस्मयौ। सूत्रेभययहणंधात्वर्थोपलक्षणं। मुंडोभापयते। भियो
हेतुभयेषुक्। भीइइतीकारः प्रश्लिष्यते ईकारांतस्यभियः षुक्स्याण्णौहेतुभये भीषयते। नित्यंस्मयते। स्मयतेरेचोनित्यमात्वंस्यात्णौहेतोः
स्मये। जटिलोविस्मापयते। हेतोश्चेद्भयस्मयावित्युक्तेर्नेह। कुंचिकयैनंभाययति। विस्माययति॥ कथंतर्हिविस्मापयन्निस्मितमात्म
वृत्तौविति। मनुष्यवाचेतिकरणाद्देवहितत्रस्मयः। अन्यथाज्ञानजपिस्यात्सत्यं। विस्माययन्नित्येवपाठ इतिसांप्रदायिकाः। यद्वाम
नुष्यवाक्ययोज्यकर्त्रीविस्मापयतेतया सिंहोविस्माययन्नितिण्यंताण्णौशतेतिव्याख्येयं। स्फायोवः। णौस्फावयति। शदेरगतौतः।
शदेर्णौत्तौतादेशः स्यान्नतुगतौ शातयति। गतौतुगाः शादयतिगोविंदः गमयन्तीत्यर्थः। रुहःपोन्यतरस्यां। णौ। रोपयति। रोहयति
क्रीङ्जीनांणौ। एषामेत्वआत्वंस्याणौ। क्रापयति। अध्यापयति। जापयति। णौचसंश्चङोः। सन्परेचङ्परेचणाविङोगाङ्वास्यात्। अ
ध्यजीगपत्। अध्यापिपत्। सिध्यतेरपारलौकिके। ऐहलौकिकेर्थेविद्यमानस्यसिध्यतेरेत्वआत्वंस्याणौ। अन्नंसाधयति। निष्पादय
तीत्यर्थः। अपारलौकिकेकिं। तापसः सिध्यति। तत्त्वंनिश्चिनोति। तंप्रेरयतिसेधयतितापसंतपः। प्रजनेवीयतेः। अस्यैत्वआत्वंवा

स्याणौप्रजनेर्थे। वापयति। वाययतिगाः पुरोवातः गर्भंग्राहयतीत्यर्थः। ऊदुपधायागोहः। गूहयति। दोषोणौ। दुषइतिरूवचं। दुष्यतेरुपधा
या ऊस्याणौ। दूषयति। वाचित्तविरागे। विरागोऽप्रीतता। चित्तंदूषयति। दोषयतिवाकामः। मितांह्रस्वः। घटादीनांज्ञपादीनांचमितउक्ताः। घट्य
ति। जनीजृष्जरयति। जनयति। जृणातेरुक्त जारयति। रंजेर्णौमृगरमणेनपोवक्तव्यः। मृगरमणमाखेटकः। रंजयतिमृगान्। मृगेति
किं। रंजयतिपक्षिणः। रमणात्अन्यत्रतुरंजयतिमृगान्। तृणादानेन। चुरादिषुज्ञपादिश्चित्र। चिस्फुरोर्णौ। चपयति। चययतीत्युक्त
त्के। चिनोतेरुक्त। चापयति। चाययति। स्फारयति। स्फोरयति। अपुस्फुरत्। अपस्फुरत्। उभौसाभ्यासस्य। साभ्यासस्यानित्तेरुभौनका आत्वंवास्यात्
रोणत्वंप्राप्नुतानिमित्तेसति। प्राणिणत्। णेगमिरबोधने। इण्णोगमिः स्याणौ। गमयति। बोधनेतुप्रत्याययति। इण्वदिकः। अधिगम
यति। हनस्तोचिणणलोः। होर्हंतेरितिकुत्वं। घातयति। इर्ष्ययति। ईर्ष्यतेस्तृतीयस्येतिवक्तव्यं। तृतीयव्यंजनस्यतृतीयएकाचइ
तिवार्थः। आद्येषकारस्यद्वित्वंवारयितुमिदं। द्वितीयेत्वजादेर्द्वितीयस्यस्यापवादत्वतयासन्नंतेप्रवर्त्तते। ऐर्ष्यियत्। द्वितीयव्या
ख्यानांणिजंताच्चङिवकारस्य अभ्यासेश्रूयतेहलादिशेषात्। द्वित्वंद्वितीयस्येव। तृतीयाभावेनप्रकृतवार्तिकाप्रवृत्तेः। निवृ
त्तप्रेषणाद्धातोर्हेतुमण्णोऽकर्मकेनतुल्योर्थः। तेनाप्रार्थयंतिशायनोत्थितंप्रियाइत्यादिसिद्धं। एवंसकर्मकेषुसर्वेषूह्यं॥ इतिण्यंतप्रक्रि

कौ० ति०

या॥ धातोः कर्मणः समानकर्तृकादिच्छायां वा। इषिकर्मण इषिणैककर्तृकाद्धातोः सन्प्रत्ययो वा स्यादिच्छायां। धातोर्विधेरिह सन आर्धधातुक
त्वं। सन्यतः। पठितुमिच्छति पिपठिषति। कर्मणः किं। गमनेनेच्छतीति करणान्माभूत्। समानकर्तृकात्किं। शिष्याः पठंत्वितीच्छति गु
रुः। वाग्रहणात्पक्षे वाक्यमपि। लुङ्सनोर्घस्लृ। एकाच इति नेट्। सस्यतलं। अत्तुमिच्छति जिघत्सति। ईर्ष्यतेस्तृतीयस्येति यिसनोर्द्वि
त्वं। ईर्ष्यियिषति। ईर्ष्यिषिषति। ईर्षीषिषति। रुदविदमुषग्रहिस्वपिप्रच्छः संश्च। एभ्यः संश्च क्त्वा च कित्तौ स्तः। रुरुदिषति। विविदि
षति। मुमुषिषति। सनिग्रहगुहोश्च। ग्रहेर्गुहेरुगन्ताच्च सन इट् न स्यात्। ग्रहिज्येति संप्रसारणं। सनः षत्वस्यासिद्धत्वाद्भष्भावः। जिघृ
क्षति। रुरुक्षति। किरश्च पंचभ्यः। कॄगॄदृङ्धृङ्प्रच्छ एभ्यः सन इट् स्यात्। पिपृच्छिषति।। चिकरिषति। जिगरिषति। जिगलि
षति। अत्रेटो दीर्घो नेष्टः। दिदरिषते। दिधरिषते। कथं मुद्दिधीर्षुः धीरिति। भौवादिकयोः धृङ्धृञोरिति गृहाण। इको झल्। इगन्ता त
झलादिः सन् कित्स्यात्। बुभूषति। दीङः दातुमिच्छति दिदीषते। एज्विषयत्वाभावान्मीनाति मिनोतीत्यात्वं न। अत एव सनि मीमे
ति सूत्रे माधातोः पृथग्मीग्रहणं कृतं। हलन्ताच्च। इक्समीपाद्धलः परो झलादिः सन् कित्स्यात्। गुहू जुघुक्षति। बिभित्सति। इकः किं।

यज

यियक्षते। झलः किं। विवर्धिषते। हल्ग्रहणं जातिपरं। तृन्हू। तितृक्षति। तितृंहिषति। अज्झनगमां सनि। अजन्तानां हन्तेरजादे ६२

अबभ्राजत्। काण्यादीनां वेति वक्तव्यं। ण्यंताः कणरणभणश्रणलुपहेठः काण्यादयः षड्ये उक्ताः। ह्वापि वाणि लोटि लोपयश्चत्वारो धिकाभ्यासे चा
णि लोटि अप्यन्यत्र इत्यद्धादशा।। अचीकणत्। अचकाणत्। स्वापेश्चङि। ण्यंतस्य स्वापेश्चङि संप्रसारणं स्यात्। असूषुपत्। शाच्छासाह्वाव्या
वेपां युक्। णौ। पुकोपवादः। शाययति। ह्वाययति। ह्वः संप्रसारणं। सन्परे चङ्परे च णौ ह्वः संप्रसारणं स्यात्। अजूहवत्। अजूहावत्।।
लोपः पिबतेरीच्चाभ्यासस्य। पिबतेरुपधायाः लोपः स्यात् अभ्यासस्य ई दंतादेशश्चङ्परे णौ। अपीप्यत्। अर्तिह्रीति पुक्। अर्पयति। ह्रेप
यति। क्नूपयति। रेपयति। यलोपः। क्नोपयति। क्ष्मापयति। स्थापयति। तिष्ठतेरित्। उपधाया इदादेशः स्यात् चङ्परे णौ।। अतिष्ठिपत्। जिघ्रतेर्वा।
अजिघ्रिपत्। अजिघ्रपत्। उर्ऋत्। अचीकृतत्। अचिकीर्तत्। अवीवृतत्। अववर्तत्। अमीमृजत्। अममार्जत्। पातेर्णौ लुग्वक्तव्यः। पुकोप
वादः। पालयति। वो विधूनने जुक्। पातेर्जुक् स्याण्णौ कंपेर्थे। वाजयति। कंपे किं। केशान्वापयति। विभाषा लीयतेः। लीलोर्नुग्लुकावन्यतरस्यां
स्नेहविपातने। लीयतेर्लातेश्च क्रमान्नुग्लुकावागमौ स्तो णौ स्नेहद्रवे। विलीनयति। विलाययति। विलालयति। विलापयति वा घृतं। लीङ्
इति ईकारप्रश्लेषादात्वपक्षे नुक्नु स्नेहद्रवे किं। लोहं विलापयति। विलापययति। प्रलंभनाभिभवपूजासु लियो नित्यमात्वमिति वाच्यं
लियः संमाननशालीनीकरणयोश्च। लीङ् लियोर्ण्यन्तयोरात्मनेपदं स्यात् अकर्तृगेऽपि फले पूजाभिभवयोः प्रलंभने चार्थे। जटाभिर्लापयते

यु
अंभ्यसगमामिति दीर्घ उत्वं

कौ० ति० हृग्यजातिपरमित्युक्तं। तेन सनः कित्वान्नलोपः। धिप्सति। धीप्सते। दिदंभिषति। शिश्रीषति। शिश्रयिषति। उदोष्ठ्यपूर्वस्य। सुस्तूर्षति। सि
ओः पुयण्जी स्वरिषति। सुस्वूर्षति। यियविषति। ऊर्णुनूषति। ऊर्णुनुविषति। ऊर्णुनविषति। नच परत्वाद्गुणा(वा)द्वित्वायोः सतोरभ्यासे उकारो न श्रूयेतेति वाच्यं
ति अभ्यासो द्विर्वचनेऽचीति रूपेणाद्वित्वे कर्तव्ये स्थानिरूपातिदेशोऽदेत्। आदेशनिषेधाद्वा। नच सन्नंतस्य द्वित्वं प्रति कार्यित्वान्निमित्तता कथमिति वाच्यं। का
कारस्येत्वं र्यमनुपजीव्य हि कार्यनिमित्ततयानाश्रीयते नेत्वनुपजीव्यन्नपि। नत्वेह सन्द्वित्वमनुपजीवति। बुभूर्षति। बिभरिषति। ज्ञपिः पुगंतो मित्संज्ञः पका
रांतश्चौरादिकः। इट् ऊभावे। इकोझलिति कित्वान्नगुणः। अज्झनेति दीर्घः परत्वाण्णिलोपेन बाध्यते। आज्ञपीत् इत्वे। ज्ञीप्सति। जिज्ञपयि
षति। अमित्वस्य जिज्ञापयिषति। जनसनेत्यात्वं। सिषासति। सिसनिषति। तनिपतिदरिद्रातिभ्यः सनो वा इड्वाच्यः। तनोतेर्विभाषा।
तितांसति अस्योपधाया दीर्घो वा स्याज्झलादौ सनि। तितंसति। तितनिषति। आशंकायां सन्वक्तव्यः। श्वा मुमूर्षति। कूलं पिपतिषति। सनि मीमाघु
रभलभशकपतपदामच इस्। एषामच इस्स्याज्झलादौ सनि। अभ्यासलोपः। स्कोरिति सलोपः। पित्सति। दिदरिद्रिषति। दिदरिद्रासति। डुमित्र
मीञ्। आभ्यां सन्युक्तदीर्घस्य मिनोतेरपि मारूपाविशेषादीस्। सः सीति तः। मित्सति। मित्सते। मामाने। मित्सति माङ्मेङोः मित्सते। दो
दाणो। दित्सति। देङ् दित्सते। डुदाञ् दित्सति। दित्सते। धेट्। धित्सति। धाञ् धित्सति। धित्सते। रिप्सते। शकॢ शिक्षति। शकिमर्षण इति दिवा

दिः। स्वरितेत्। शिक्षति। शिक्षते। पित्सते। राधो हिंसायां सनीस्वाच्यः। रित्सति। हिंसायां किं। आरिरात्सति। मुचोऽकर्मकस्य गुणो वा। सादौ सनि
अभ्यासलोपः। मोक्षते। मुमुक्षते वा वत्सः स्वयमेव। अकर्मकस्य किं। मुमुक्षति वत्सं कृष्णः। नवृद्भ्यश्चतुर्भ्यः। विवृत्सति। तङि तु विवर्तिषते। सेसिचीति वेट्।
निनर्तिषति। निनृत्सति। इट् सनि वा। वृङ्वृञ्भ्यामृदंताच्च सन इड्वा स्यात्। तितरिषति। तितरीषति। तितीर्षति। विवरिषति। विवरीषति। वुवूर्षति। वुवू
र्षते। दुधूर्षति। स्मिपूङ्रंज्वशां सनि। स्मिपूङ् ऋ अञ्जू अशू एभ्यः सनइट् स्यात्। सिस्मयिषते। पिपविषते। अरिरिषति। इह रिस इत्यस्य द्वित्वं। इस इति स
नोऽवयवः कार्यभागिति कार्यिणो निमित्तत्वायोगाद् द्विर्वचनेऽचीति न प्रवर्तते। अंजिजिषति। अशिशिषते। उभौ साभ्यासस्य। प्राणिणिषति। उंछेस्तकुत्वं।
पूर्वत्रासिद्धीयमद्वित्व इति न छाभ्यां सहितस्य रेफस्य द्वित्वं। हलादिः शेषः। उचिछिषति। निमित्तापाये नैमित्तिकस्याप्यपाय इति तु नित्यं। घोरिति सतुक्कस्य ग्रहणाज्ज्ञा
पकात्। सकृत्प्रवृत्त्यापतिवचनाद्वा। णौ च संश्चङोः रिति सूत्राभ्यां इङो गाङ् श्वयतेः संप्रसारणं च वा। अधिजिगापयिषति। अध्यापिपयिषति। शिश्वाययि
षति। शुशावयिषति। ङुः संप्रसारणं। जुहावयिषति। णौ द्वित्वात्प्रागेव आदेशेनेत्युक्तत्वादुकारवतो द्वित्वं। पुस्फारयिषति। बुभावयिषति। ओः पुयण्
परे। पिपावयिषति। बिभावयिषति। यियावयिषति। रिरावयिषति। लिलावयिषति। जिजावयिषति। पुयण्ज्ञि किं। नुनावयिषति। अपरे किं। बुभूष
ति। स्रवतीत्युत्वं वा। सिस्रावयिषति। सुस्रावयिषति इत्यादि। अपर इत्येव। शुश्रूषते। स्तौतिण्योरेव षण्यभ्यासात्। अभ्यासेणः परस्य स्तौति
ण्यंतयोरेव सस्य षः स्यात् षभूते सनि नान्यस्य। तुष्टूषति। द्युतिस्वाप्योरित्युक्तत्वं। सुष्वापयिषति। सिषाधयिषति। स्तौतिण्योः किं। सिसिक्षति।

कौ॰ ति॰ उपसर्गात्सुस्थादिष्वभ्यासेन चेति। परिषिषिक्षति। षणि किं। तिष्ठासति। रूपुक्षति। अभ्यासादित्युक्तेर्नेह निषेधः। इण्णुस्तीषिषति। इक्। अधीषि
षति। सः स्विदिस्वदिसहीनां च। अभ्यासेणः परस्य ण्यंतानामेवांसस्य स एव न षः। षणि परे। सिस्वेदयिषति। सिस्वादयिषति। सिसाहयिषति।। स्था
दिष्वेवाभ्यासस्येति नियमान्नेह। अभिसुसूषति। शेषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः सरूपप्रत्ययो नेष्टः सन्नंतान्न सनिष्यते। शैषिका
च्छैषिकः सरूपो नेति। तेन शालीये भवः इति वाक्यमेव। न तु छान्ताच्छः। सरूपः किं। आहिच्छत्रे भवः आहिच्छत्रीयः अणन्ताच्छः। तथा मत्वर्था
त्स्वरूपः। स धनवानस्यास्ति। इह मतुबंतान्मतुन्न। विरूपस्तु भवत्येव। दंडिमती शाला। सरूप इत्यनुपज्यते। अर्थद्वारा साहश्यं न स्वार्थः।।
तेनेच्छासन्नंतान्न सन्। स्वार्थसन्नंतात्तु स्यादेव। जुगुप्सिषते। मीमांसिषते। इति सन्प्रक्रिया।। धातोरेकाचो हलादेः क्रियासमभिहारे य
ङ्। पौनःपुन्यं भृशार्थश्च क्रियासमभिहारः तस्मिन्द्योत्ये यङ् स्यात्। गुणो यङ्लुकोः। अभ्यासस्य गुणः स्याद्यङि यङ्लुकि च। सना
द्यंता इति धातुत्वाल्लडादयः। ङित्वादात्मनेपदं। पुनः पुनरतिशयेन वा भवति बोभूयते। बोभूयांचक्रे। अबोभूयिष्ट। धातोः किं। आर्ध
धातुकत्वं यथा स्यात्। तेन बुवो वचिरित्यादि। एकाचः किं। पुनः पुनः जागर्ति। हलादेः किं। भृशमीक्षते। भृशं शोभते रोचते इत्यत्र यङ् नेति
द्ध भाष्यं। पौनःपुन्ये तु स्यादेव। रोरुच्यते। शोशुभ्यते। सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वाच्यः। आद्यास्त्रयश्चुरादयः अदंताः। सोसूच्य ६५

चिकीषति

त॰ ऽगमेश्च दीर्घः स्याज्झलादौ सनि। सन्लिटोर्जेः। जिगीषति। विभाषाचेः। चिचीषति। जिघांसति। सनि च।। इणो गमिः स्यात्सनि। बोधने तु
प्रतीषिषति। इण्वदिक्। अधिजिगमिषति। कर्मणि तङ्। परस्मैपदे धित्युक्ते नेट्। झलादौ सनीति दीर्घः। जिगांस्यते। अधिजिगांस्यते
समोगम्यृ अजादेशस्येत्युक्तेर्गच्छतेर्न दीर्घः। जिगंस्यते। सं जिगंसते। इङ्श्च। इङो गमिः स्यात्सनि। अधिजिगांसते। रलो व्युपधाद्धलादेः
च्छिभ्यामि संश्च। उश्च ऋश्च वौ। ते उपधे यस्य तस्माद्धलादे रलंतात्परौ क्त्वासनौ सेटौ वा कितौ स्तः। द्युतिस्वाप्योः संप्रसारणं। दिद्युतिषते। दिद्यो
तितङ् तिषते। रुरुचिषते। रुरोचिषते। लिलिखिषति। लिलेखिषति। रलः किं। दिदेविषति। व्युपधात्किं। विवर्तिषते। हलादेः किं। एषिषति षि
इह नित्यमपि द्वित्वं गुणेन बाध्यते। उपधाकार्यं हि द्वित्वात्प्रबलं। ओणेर्ऋदित्करणस्य सामान्यापेक्षज्ञापकत्वात्। सनीवंतर्धभ्रस्ज
दंभुश्रिस्वयूर्णुभरज्ञपिसनां। इवंतेभ्य ऋधादिभ्यश्च सनः इड्वा स्यात्। इडभावे। हलंताच्चेति कित्वं। छ्वोरिति वस्योठ्। यणादि। उ
त्वं। दुद्यूषति। दिदेविषति। स्तौतिण्योरिति वक्ष्यमाणनियमान्न षः। सुस्यूति। सिसेविषति। आप्ज्ञप्यृधामीत्। एषामच ईत्स्या
त्सादौ सनि। अत्र लोपोऽभ्यासस्य। सनि मीमेत्यारभ्य यदुक्तं तत्राभ्यासस्य लोपः स्यात्। आप्तुमिच्छति ईप्सति। अर्धितुमिच्छति ईर्त्सति
आर्दिधिषति। बिभ्रज्जिषति। बिभर्जिषति। बिभ्रक्षति। बिभर्क्षति। दंभ इच्च। दंभेरच इत्स्यात्सादौ सनि। अभ्यासलोपः। हलंताच्चेत्यत्र हलग्र

ष

कृ्यते। नीग्वंचुस्रंसुध्वंसुभ्रंसुकसपतपदस्कंदां। एषामभ्यासस्यनीगागमः स्याद्यङ्लुकोः। अकितः इत्यक्तेर्नदीर्घः लोपः। बनीवच्यते। सनीस्रस्य

६८ ते इत्यादि। नुगतोनुनासिकांतस्य। अनुनासिकांतस्यांगस्याभ्यासो दंतस्यनुक् स्यात्। नुकानुस्वारोलक्ष्यतेइत्यक्तं। यमूयम्यते। यंयम्यते॥

तपरत्वसामर्थ्यात्प्लुतपूर्वदीर्घस्यापिन। भामक्रोधे। बाभाम्यते। येविभाषा। जाजायते। जंजन्यते। हंतेर्हिंसायांयङिघ्नीभावोवाच्यः। जेघ्नीय

ते। हिंसायांकिं। जंघन्यते। जजन्यते। रीगृदुपधस्यच। ऋदुपधस्यधातोरभ्यासस्यरीगागमस्याद्यङ्लुकोः। वरीवृसते। ऋभ्रादिलान्लणः

ल नरीनृत्यते। जरीगृह्यते। उभयत्रलत्वं। चलीक्लृप्यते। रीगृत्वतइतिवक्तव्यं। वरीवृश्च्यते। परीपृच्छ्यते। स्वपिस्यमिव्येञांयङि। संप्रसारणंस्यात्।

सोषुप्यते। सेसिम्यते। वेवीयते। नवशः। वावश्यते। चायः की। चेकीयते। ईघ्राध्मोः। जेघ्रीयते। देध्मीयते। अयङिक्ङिति। शीङोयङादेशः

स्याद्यादौक्ङितिपरे। शाशय्यते। अभ्यासह्रस्वः॥ ततोगुणः। डोढौक्यते। तोत्रौक्यते। इतियङंतप्रक्रिया॥ यङोचिच। यङोःचप्रत्ययेलुक्स्या

च्चकारात्तंविनापिबहुलंलुक्स्यात्। अनैमित्तिकोयमंतरंगत्वादादौभवति। ततः प्रत्ययलक्षणेनयङंतत्वाद्द्वित्वं। अभ्यासकार्यं। धातु

त्वाल्लुडादयः। शेषात्कर्तरीतिपरस्मैपदं। अनुदात्तङितइतितुन। ङित्वस्यप्रत्ययाप्रत्यसाधारणत्वेनप्रत्ययलक्षणाप्रवृत्तेः। यत्रहिप्रत्य

यस्यासाधारणंरूपमाश्रीयतेतत्रैवतत्। अतएवस्कंदघस्रासादइत्यत्रअत्वसंतस्येतिदीर्घोन। येपिस्पर्धशीङादयोनुदात्तङितस्ते

ष्योपिन। अनुदात्तङित्तइत्यनुबंधनिर्देशात्। तत्रचश्तिपाशपेतिनिषेधात्। अतएवश्यनादयोनगणेननिर्देशात्। किंतुशबेव। चर्करीतंच

त्यदादौपाठाच्छपोलुक्। यङोवा। यङंतात्परस्यहलादेःपित्तःसार्वधातुकस्येड्वास्यात्। भूसुवोरितिगुणनिषेधोयङ्लुकिभाषायांन। बो

भुतेतिक्तेइतिछंदसिनिपातनात्। अतएवभाष्येयङ्लुग्भाषायामपिसिद्धः नचयङ्लुकिअप्राप्तएवगुणाभावोनिपात्यतेइतिवाच्यं॥ भ

वतिग्रहणेयङ्लुगंतस्याग्रहणात्। द्विःप्रयोगोद्विर्वचनंषाष्ठमितिसिद्धांतात्॥ बोभवीति। बोभोति। बोभूतः। बोभुवति। बोभवांचकार।

बोभविता। अबोभवीत्। अबोभोत्। अबोभूतां। अबोभुवुः॥ बोभूयात्। बोभूयातां। बोभूयास्तां। गातिस्थेतिसिचोलुक्। यङोवेतिईट्

पक्षेगुणंबाधित्वानित्यत्वाद्वुक्। अबोभूवीत्। अबोभोत्। अबोभूतां। अभ्यस्ताश्रयोजुस। नित्यत्वाद्वुक् अबोभुवुः। अबोभविष्यदित्या

दि॥ पापस्पर्धीति। पास्पर्धि। पास्पर्धः। पास्पर्धति। पापस्पर्त्सि। हुझल्भ्योहेर्धिः पापस्पर्धि। लङ्॥ अपास्पर्त्। अपास्पर्द्। सिपि

दश्चेतिरुत्वंपक्षेरोरि॥ अपास्पाः॥ गाधृ। जागाधि॥ जाघात्सि। आजाघात्। सिपिरुत्वपक्षे। अजाघाः। नाथृ। नानाल्ति। नानात्सि

दधा। दादधि। दादधः। दाधात्सि। अदाधत्। अदादध्वां। अदादधुः। अदाधः। अदाधत्। लुङि। अदादाधीत्। अदादधीत्। चोस्कुंदीति।

चोस्कुंन्ति॥ अचोस्कुंत्। अचोस्कुंत्तां। अचोस्कुंदुः। अमोमुदीः। अमोमोः। अमोमोत्॥ लुङि गुणः॥ अमोमोदीत्। चोकूर्दीति॥ लङ्-ति

तसेऽङ्लादनिदितामितिनलोपः

सि॰ ति॰ प।अचोकूर्त्।सिपूपक्षे।अचोकूः।अचोरवूः।अजोगूः॥चनीवंचीति।चनीवंक्ति।चनीचंक्तः।चनीवच्चति॥अचनीचंचीत्॥अचनीवन्।जंगमी
६७ ति।जंगंति।अनुदात्तोपदेशेत्यनुनासिकलोपः।जंगतः।जंग्मति।म्वोश्च।जगन्मि।जंगन्वः।एकाच्ग्रहणेकृतत्वान्नेण्निषेधः।जंगमित्ता।अनु
नासिकलोपस्याभीयत्वेनासिद्धत्वान्नहेर्लुक्।जंगहि।मोनोधातोः॥अजंगन्।अनुबंधनिर्देशान्नेरङ्॥ह्म्यंतेतिनवृद्धिः॥अजंगमीत्।
अजंगमिष्टां।हन्तेर्यङ्लुक्।अभ्यासाच्चेतिकुत्वं।यद्यपिहोहंतेरित्यनुवर्त्यविहितंतथापियङ्लुकिभवत्येवेतिन्यासकारः।श्तिपाशपेतिनि
षेधस्त्वनित्यः।गुणोयङ्लुकोरितिसामान्यापेक्षज्ञापकादितिभावः।जंघनीति।जंघंति।जंघतः।जंघ्नति।जंघनिता।श्तिपानिर्देशात्
अदेशेन।जंघहि।अजंघनीत्॥अजंघन्।जंघन्यात्।आशिषितु।वध्यात्।अवधीत्।अवधिष्टामित्यादि।चर्षादेशस्यद्वित्वंतुनभ
वति।स्थानिवत्त्वेनानभ्यासस्येतिनिषेधात्।तद्धिसमाधिनोकरणंधातोर्विशेषणं।बहुव्रीहिबलात्।आङ्पूर्वात्तुआङोयमहनेस्ता
त्मनेपदं।अजंघतेइत्यादि।उत्परस्येतितत्परत्वान्नगुणः।हलिचेतिदीर्घस्त्वस्यादेव।तस्यासिद्धत्वेनतपरत्वनिवर्त्यत्वायोगात्।चं
चूर्ति चंचुरीति चंचूर्तः चंचुरति अचंचुरीत् अचंचूः चंखनीति चखंति जनसनेत्यात्वं।चंखातः।गमहनेत्युपधालोपः चंख्नति चंखा
हि।चंखनानि।अचंखनीत्।अचंखन्।अचंखातां।अचंख्नुः।येविभाषा।चंखायात्।चंखन्यात्।अचंखनीत्।अचंखानीत् ६६

ते।सोसूच्यते मोमूत्र्यते।अनेकाच्कत्वेनअषोपदेशत्वात्षत्वंन।यस्यहलः।यस्येतिसंघातग्रहणं।हलःपरस्ययशब्दस्यलोपःस्यादार्धधातुके।आदेः
परस्य।अतोलोपः सोसूचांचक्रे।सोसूचिता।सोसूत्रिता।मोमूत्रिता।दीर्घोकितः।अकितोऽभ्यासस्यदीर्घःस्याद्यङियङ्लुकिच।अटाट्यते।यङि
च।अर्तेः संयोगादेश्चक्ङितोगुणःस्याद्यङि।यकारपररेफस्यनद्वित्वनिषेधः।अरार्यतेइतिभाष्योदाहरणात्।अरारिता।अशाशिता।ऊर्णोनूय
ते।बेभिद्यते।अल्लोपस्यस्थानिवत्त्वान्नोपधागुणः।बेभिदिता।नित्यंकौटिल्येगतौ।गत्यर्थात्कौटिल्येएवयङ्स्यान्नतुक्रियासमभिहारे।कुटि
लंव्रजतिवाव्रज्यते।लुपसदचरजपजभदहदशगृभ्योभावगर्हायां।एभ्योधात्वर्थगर्हायामेवयङ्स्यात्।गर्हितंलुंपतिलोलुप्यते।सास
द्यते।चरफलोश्च।अनयोरभ्यासस्यअतोनुकूस्याद्यङ्लुकोः।नुगित्यनेनानुस्वारोलक्ष्यते।सचपदांतवद्वाच्यः।वापदांतस्येतियथास्यात्॥
उत्परस्यातः।चरफलोरभ्यासात्परस्यातउत्स्याद्यङ्लुकोः।हलिचेतिदीर्घः।चञ्चूर्यते।चंचूर्यते।पम्फुल्यते।जपजभदहदशभंजपसां
च।एषामभ्यासस्यनुकस्याद्यङ्लुकोः।गर्हितंजपतिजंजप्यतेइत्यादि।ग्रोयङि।गिरतेरेफस्यलत्वंस्याद्यङि।गर्हितंगिलतिजेगिल्यते।घुमा
स्थेतीत्वंद्वित्वं।गुणः।देदीयते।पेपीयते।सेषीयते।विभाषाश्वेः।शोशूयते।शेश्वीयते।यङिच।सास्मर्यते।रीङृतः।चेक्रीयते।स्फुट्।संचे
स्क्रीयते।सिचोयङि।सिचोसस्यषोनस्याद्यङि।सेसिच्यते।नकवतेर्यङि।कवतेरभ्यासस्यचुत्वंनस्याद्यङि।कोकूयते।कौतिकुवसोस्कवो

सि०ति०र ॥ रपरत्वं। हलादिः शेषः। रुग्रिकौ चलुकि। रुग्रिकौ चेत्यभ्यासस्यासवर्णे इतीयङ्। अरर्ति। अरियर्ति। अररीति। अरीयरीति। अर्ऋतः। अरियृतः। अ्रि
अत्। यणि रुकोरोरीति लोपः। न च तस्मिन्कर्तव्ये यणः स्थानिवत्त्वं। पूर्वत्रासिद्धे तन्निषेधात्। आरर्ति। आरिअर्ति। लिङि। श्तिपा निर्देशा
न्न गुणोर्तीति गुणो न रिङ्। रलोपः दीर्घः। आरियात्। अरिआत्। गृहू ग्रहणे जर्गृहीति ३ जर्गाढि। २ जर्गृढः ३ जर्गृहति। अजर्घट्। २ गृह्णात्तेस्त
जायहीति। जाग्रहितसादौ ङिन्निमित्तं संप्रसारणं तस्य बहिरंगत्वेनासिद्धत्वाच्च रुगादयः जागृढः जागृहति। जाग्रहीषि। जाघ्रक्षि। लुटि
जायहिता। यहोलिटीति दीर्घस्तु न। तत्रैकाच इत्यनुवृत्तेः माधवस्तु दीर्घमाह तद्भाष्यादिविरुद्धं। जर्गृधीति ३ जर्गाधे ३ जर्गृधः जर्गृधति
जर्गृधीषि ३ जर्घोत्सि। अजर्गृधीत् इडभावे गुणः हल्ङ्याब्भ्यो दीर्घादिलोपः भष्भावः जस्त्वचर्त्वे अजर्घत्। अजर्गृधां अजागृधः। सिपि दश्चेति प
क्षे रुत्वे। अजर्घाः ३ अजर्गधीत्। अजर्गधिष्टां। पाप्रच्छीति। पाप्रष्टि। तसादौ ग्रहिज्येति संप्रसारणं न भवति श्तिपा निर्देशात्। च्छ्वोः शूड्
इति शः। व्रश्चेति षः। पाप्रष्ठः। पाप्रच्छति। पाप्रशिम। पापृच्छः। पाप्रश्मः। मकारवकारांतानामूठ्भाविनां यङ्लुकू नास्तीति च्छ्वोरिति सूत्रे भाष्ये
ध्वनितं कैय्यटेन स्पष्टीकृतं। इदं च च्छ्वोरिति यत्रोठ् तद्विषयकं। ज्वरत्वरेत्यूठ्भाविनोः स्रिविमव्योस्तु यङ्लुगस्त्येति न्याय्यं। माधवादि सं
मतं च। मव्य बंधने। अयं यांत ऊठ्भावी तेषृदेवृ देवने इत्यादयो वान्ताः हयगतौ जाहयीति। जाहति। जाहतः। जाहयति। जाहयसि। व
लि लोपेयवयोर्दीर्घः। जाहामि। जाहावः। जाहामः। हर्यगति कांत्योः। जाहर्यीति। जाहर्ति। जाहर्यति। लोटि। जाहर्हि। अजाहः। अजाहर्ता।

अजाहर्तां। अजाहतां। अजाहर्युः मव बंधने। ज्वरत्वरस्रिव्यविमवामुपधायाश्च। ज्वरादीनां मुपधावकारयोरूठ्स्यात्क्वौ झलादौ चानुनासिके
कादौ च प्रत्यये। अवक्विनीति नानुवर्तते। अवतेस्तु ज्वरत्वरेति निर्देशात् अनुनासिकग्रहणं चानुवर्तते। अवतेर्मनिन्प्रत्यये तस्य टि
लोपे ओमिति दर्शनात्। इडभावे ऊठि पितिगुणः। मामोति मामवीति मामूतः मामवति मामोषि मामोषि मामोमि मामावः मामूमः
मामोतु। मामूतात्। मामूहि। मामवानि। अमामोत्। अमामोः अमामवं २ अमामूवं अमामाव अमामूम। तुर्वी हिंसायां। तोतूर्वीति।
राल्लोपः। रेफात्परयोः च्छ्वोर्लोपः स्यात् क्वौ झलादावनुनासिकादौ च प्रत्यये इति वलोपः। पुगंतलघूपधस्य गुणः। न धातुलोप आर्धधातुके
धात्वंशलोपनिमित्ते आर्धधातुके परे इकः गुणवृद्धी न स्तः। इति नेह निषेधः। तिबादीनामनार्धधातुकत्वात्। तोतोर्ति। हलि चेति दीर्घः। तो
तूर्तः। तोतूर्वति। तोथोर्ति। दोदोर्ति। दोधोर्ति। मूर्छा मामोर्ति मोमूर्तः मोमूर्छति इत्यादि। आर्धधातुक इति विषयसप्तमी। तेन यङि विव
क्षिते अजेर्वी। वेवीयते। अस्य यङ्लुकू नास्ति। लुकापहारेण विषयत्वासंभवेन वीभावस्याप्रवृत्तेः। इति यङ्लुगंतप्रक्रिया ॥ सु
प आत्मनः क्यच्। इषिकर्मणः एषितुः संबंधिनः सुबंतादिच्छायामर्थे क्यच्प्रत्ययो वा स्यात्। धात्ववयवत्वात्सुपो लुक्। क्यचि च। अ
स्य ई स्यात्। आत्मनः पुत्रमिच्छति पुत्रीयति। वांतो यि प्रत्यये। गव्यति। नाव्यति। लोपः शाकल्यस्येति तु न। अपदांतत्वात्। तथाहि
नः क्ये। क्यचि क्यङि च नांतमेव पदं स्यान्नान्यत्। संनिपातपरिभाषया क्यचो यस्य लोपो न। गव्यां चकार। गव्यिता। नाव्यां चका

र । नारव्यित्ता । राज्लोपेः राजीयति । प्रत्ययोत्तरपदयोश्च । मपर्यंतस्येरेकार्थयोर्युष्मदस्मदोर्मोस्त्वमौस्तः प्रत्ययेउत्तरपदेच । त्वद्यति । मद्यति
एकार्थयोरित्येव । युष्मद्यति । अस्मद्यति । हलिच गीर्यति । पूर्यति । धातोरित्येव । नेह । दिवमिच्छति दिव्यति । इहपुरमिच्छती । पूर्यतीतिमा
धवोक्तं प्रत्युदाहरणंचिंत्यं । पूर्गिरोः साम्यात् ॥ दीव्यतीति दीर्घस्तु भाष्यः प्रामादिक एव । अद्स्यति । रीङृतः । कर्त्रीयति । क्यच्व्योश्च । गर्गीय
ति । वाच्यति । अकृत्सार्वधातुकयोर्दीर्घः । वायति । समिध्यति । क्यस्यविभाषा । हलः परयोः क्यच्क्यङोर्लोपोवास्यादार्धधातुके । आदेः परस्य । अतोलो
पः । तस्यस्थानिवत्वाल्लघूपधगुणोन । समिधित्ता । समिध्यित्ता । मांतप्रकृतिकात्कृदंताद्व्ययाच्च क्यन्न । किमिच्छति स्वरिच्छति । उदन्यति । ध
ना नायति अशनायोदन्यधनायाबुभुक्षापिपासागर्धेषु । क्यजंतानिपात्यंते । अशनायति । उदन्यति । धनायति । बुभुक्षादौ किं । अशनीयति ॥
उदकीयति । धनीयति । अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि च । एषांक्यचि परे सुगागमः स्यात् ॥ अश्ववृषयोर्मैथुनेच्छायां
त्रिंवउचा । वृ अश्वस्यतिगौः । क्षीरलवणयोर्लालसायां । क्षीरस्यतिबालः । लवणस्यतिउष्ट्रः । सर्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ
वस्यति ॥ दधिस्यति । मधुस्यति । मध्वस्यति । काम्यच्च । उक्तविषयेकाम्यच्स्यात् पुत्रमात्मनः इच्छति । पुत्रकाम्यति । पुत्रकाम्यित्ता । इहयस्यहल
इत्तिलोपोन । अनर्थकत्वात् । यस्येतिहिसंघातग्रहणमित्युक्तं । यशस्काम्यति । सर्पिष्काम्यति । मांताव्ययेभ्योप्ययंस्यादेव । किंकाम्य
ति । स्वः काम्यति । उपमानादाचारे । उपमानात्कर्मणः सुबंतादाचारेर्थे क्यच्स्यात् । पुत्रमिवाचरति पुत्रीयति । छात्रं । विष्णूयति ६८

उतोवृद्धिरित्यत्र नाभ्यस्तस्येत्यनुवृत्तेरुतोवृद्धिर्न । योयोति । योयवीति । अयोयोत् । योयुयात् । आशिषिदीर्घः योयूयात् । अयोयावी
त् । नोनवीति । नोनोति । जाहेति । जाहाति । ईहल्यघोः । जाहीतः । इहजहातेश्च । आत्वहो । लोपोयि घुमास्थेत्येलिङि इत्येते पंचापिनभवं
ति । श्तिपानिर्देशात् । जाहति । जाहासि । जाहेषि । जाहीथः जाहीथ जाहीहि । अजाहे त् । अजाहात् । अजाहीतां अजाहुः । जाहेयात् । आशिषि
जाहायात् । अजाहासीत् । अजाहासिष्टां । अजाहिष्यात् । लुकालुक्प्रत्ययलक्षणाभावात् स्वपिस्यमीत्यत्र न । रुदादिभ्यइतिगणनिर्दिष्टत्वादि
यन । सास्वपीति । सास्वप्ति । सास्वपतः । सास्वपति । असास्वपीत् । असास्वप् । सास्वप्यात् । आशिषितु । वचिस्वपीत्यत्र त्वे । सासुप्यात् । असा
स्वापीत् । असास्वपीत् । रुग्रिकौ च लुकि । ऋदुपधस्य धातोरभ्यासस्य रुक्रिकुरीकु एते आगमास्युः । यङ्लुकि । ऋतश्च । ऋदंतधातोर
पितथा । वर्वृत्तीति । वरिवृत्तीति । वरीवृत्तीति । वर्वर्ति । वर्वर्त्ति । वरिवर्त्ति । वरीवर्ति । वर्वृत्तः ३ वर्वृत्तति ३ वर्वर्तीमास ३ गणनिर्दिष्टत्वान्न
वृद्ध्यश्चतुर्भ्यइतिन । वर्वर्तिष्यति ३ अवर्वृतीत् ३ अवर्वर्त् ३ सिपिदश्चेतिरुत्वपक्षेरोरि । अवर्वाः ३ गणनिर्दिष्टत्वादङ्न । अवर्वर्तीत् ।
चर्करीति । चरिकरीति चरीकरीति । चर्कर्ति । चरिकर्त्ति । चरीकर्ति । चर्कृतः ३ चर्कृति ३ चर्करांचकार ३ चर्करिता ३ अचर्करीत् ३ अचर्कः ३
चर्क्रियात् ३ आशिषिरिङ् । चर्क्रियात् ३ अचर्करीत् ३ ऋतश्चेतितपरत्वान्नेह । कृविक्षेपे । चाकर्त्ति । तातर्त्ति तातर्तः तातीरति । तातो
र्हि । तातराणि । अतातरीत् । अतातः । अतातीर्त्तां । अतातरुः अतातारीत् अतातारिष्टामित्यादि । अर्त्तेर्यङ्लुकि हलेभ्यासस्योरदत्वं

सामर्थ्याद्विशेषणभूतमात्राकांतांशे एवभूतपूर्वगत्याश्रयणं नतु विशेष्यभूतत्वांशे चाल्दोषात् तु इति चेन्न नोपधायाइत्यकृतरार्थत्वात्। तेनच चर्मणामिति दीर्घाभावः सिद्ध इति दिक्॥ नु। नुटीतितुनोक्तं। उणादिनिष्पन्नानां दीनां व्युत्पन्नत्वरूपपक्षे। भृञो नुट् इति निष्पन्न भृंगशब्दे दीर्घापत्तेरिदमेव व्युत्पत्तिपक्षस्य ज्ञापकमिति दिक्॥ इदं नु आरंभेति प्रतीकमुपादाय यत्तु कर्तीनामित्यत्र षट्चतुर्भ्य इति नुट् इति संनिपातपरिभाषया अप्राप्ते सावकाशत्वमस्येति तन्न नह्येकमुदाहरणमित्युक्तन्यासेन कृतेनामीत्येव सिद्धे सामान्यस्य चारंभेत्यर्थात् एवं च नतिसृ चतसृ इत्यस्य करणेन लाघवमिति भावः इति लघुशब्देंदुशेखरे उक्तं॥ अपदांतस्य मूर्धन्यः॥ अपदांतस्य षइत्येव सिद्धे मूर्धन्यग्रहणं इणः षीध्वामित्यत्र ढविधानार्थं। रुषाभ्यामित्यत्र अनुदात्तार्थं चैवं तत्र णग्रहणं पदांतस्येनेति न कर्तव्यमिति भाष्ये स्पष्टं॥

भ

आङोनास्त्रियां। आङो नापुंसि इतितु नोक्तं। अमुना कुलेनेत्यत्र मुत्वस्यासिद्धत्वात् लुमतापत्तौ पुंस्त्वाभावेन नाभावाभावेन रूपासिद्धेः॥ नमुने इति निषेधस्तु न लुमि। नमु ग्रादेश इति वार्तिकविरोधाच्च। अतएव स्त्रग्रहणं ताह्णी इति वक्तव्ये तिनोक्तं। तथासति तंत्रेण निर्वाहेपि नकारानिर्देशोपि संभाव्येत। आगंतुकनोकरेणानस्यापि नेइति निर्देशेन तंत्रस्वीकारे त्वस्यं तज्ञानगौरवमिति तन्न किंचिल्लाघवमिति स्पष्टं भाष्ये॥ घेर्ङिति। स्रूपिचेत्यतः स्रूपीति वर्ततेतेन पद्धीति सिद्धं। नच घेर्ङीति स्त्रानकार्यं। ङकारादावित्यर्थः। प्रवाहचाइत्यत्र ङउयज्ञानामुपसंख्यानमित्यादुदेशस्य ङा इत्येव सिद्धे च तु शक्य इति वाच्यं। सत्यामित्यादाच स्याण्न घाइत्यस्यनापत्तेः अल्विधित्वेन स्थानिवत्वाभावादिति ग्रहणे तु अनुबंकार्यत्वात्स्थानिवत्वस्पष्टमेवेति दिक्॥

अनङ्सौ। सौर्ज्ञइत्येव न्यासेन सख्योत्यादिसिद्धिः अनङ्विधानं किमिति पूर्वपक्षः लाघवात्। अन्यतो ज्ञापनार्थं। तेन उशनसः संबुद्धौ अनङ् सिध्यतीति प्रांचः आङः॥ यद्यपि सोर्ङे इत्युक्तौ उशनाइत्यत्र सूत्रेणापि उ स्यात्। ततश्च उशने त्यत्र सर्वनामस्थाने चासंबुद्धावितिदीर्घः स्यात्। पुरुदंसेत्यत्र तु सांत महत इति दीर्घः स्यात्

तथापि संज्ञापूर्वको विधिरनित्य इत्यादंगवृत्तपरिभाषया ना समाधेयमिति तेषामाश
यः। संज्ञापूर्वक इत्यस्य भाष्यास्पष्टत्वादाह अंगवृत्तेति। परं तु तादृशन्यासे न
लाघवाभावोत्॥ सामर्थ्याद्विलोपकल्पने गौरवं च। तस्मादुशनसोनङ् संबु
द्धौ तद्वैकल्पिकत्वं चिंत्यमेव च भाष्यानुक्तत्वात् इति प्रामाणिका आहुः॥ पतिः समा
स एव। एवकारः इष्टतोवधारणार्थः। अन्यथा हि परिरेव नियमः संभाव्येत॥ अ
नत्विधौ धात्वादेरित्यादिज्ञापकानुसरणे तु निर्वाहः परं प्रतिपत्तिः ज्ञानं तद्गौरवं
स्यात्॥ ननु शेषोघ्यसखि पतौ त्ये च न्यासोस्तु किमनेन सूत्रेणेति चेन्न। समुदाय
स्य पतिरूपत्वाभावेन स्तु सखिनेतिवद् भूपतिनेत्यादौ समास एव नात्पर्येपि बहु
पूर्वके पतिशब्दे स्यापि घिसंज्ञा स्यात् बहुपतिनां इत्यपि प्रसज्येत। इष्टं तु यणघटित निष्टं
मेव। नापि सखिपतिसमास इति सूत्रितं बहुसख्येत्याद्यापत्तेः। अत एव पतिरि
ता वेवेति ना सूत्रितं। यस्येति च सूत्रे भाष्यरीत्या स्तु सखिना स्तु सना इत्यादौ ष्टसिध्या त
थान्यासस्य कर्तुमशक्यत्वादिति स्पष्टमेवेति दिक्॥

श्रीः। ह्रस्वनद्यापो नुट्। ह्रस्वनद्यापः इति पंचमी। आमि सर्वनाम्नः इत्यतः आमीति वर्तते। तच्च षष्ठ्या विपरि
णम्यते नामीति गते। ह्रस्वांतादिति। आमिति षष्ठी बहुवचनमेव न तु ङेरामादिति स्पष्टं भाष्ये॥ यत्
नुट् इति विभज्यते। तदर्थस्तु अंगात्परस्यामः नुडिति विधेयः। वातप्रम्यामित्यत्र दीर्घान्नुट् प्रसज्येत न
इति न च वाच्यं। दीर्घांताच्चेत्तर्हि नद्याप एवेति नियमाद्दीर्घे पुनर्दोषः। हलंताच्चेत् षट्चतुर्भ्यश्चेति
नियमाल्लिहां दुहामित्यादौ न दोषः एवं च ह्रस्वग्रहणं न कार्यमिति लाघवमिति तन्न। नद्यापश्च
स्यस्त्रीलिंगानां चेन्नद्याप एवेति नियमपरतया पिव्याख्यातुं शक्यत्वेन नदीवातप्रम्योर्ह्रस्वे
पि दृष्टत्वेन त्वदुक्तनियमे दृष्टतरप्रमाणाभावो न च मतीनामित्यादौ नुडनापत्तेः॥ नामि॥ नु
लोपः इत्यत दीर्घ अनुवर्तते। नन्वामीत्येवास्तु। नित्यत्वात्पूर्वं दीर्घेपि ह्रस्वांतान्नुडित्येन तत्सामर्थ्या
न इंदूनामित्यदोषः। न च नृ चेति दीर्घविकल्पान्नृणामित्यत्र तदुच्चरितार्थः। नृ न द्याप इत्येव सिद्धेः
तदुक्तं भाष्ये नैकमुदाहरणं योगारंभं प्रयोजयतीति तिसृणामित्यत्र षड्भ्य इत्यत्र त्रेरिय नुवृत्या सि
द्धमिति भाष्य एव स्पष्टं। एतेन कृतं नद्याप इति चतसृणां प्रियचतसृणामित्यत्र षट्चतुर्भ्य इति सि
द्धं। गौणे तदप्रवृत्तौ न मानं। बहुवचनं तु लाघवार्थं द्विवचने हि त्वदुभ्यामिति गुरुनिर्देशः स्यात्
यं नचेष्टुत पूर्वेण निर्वाहे पितदाश्रयणे पदांदतामित्याद्यावतिप्रसंग इति वाच्यं। ह्रस्वत्वं नाम मात्राकालिकं तत्र

क्रि॰ ति॰ कार्यं न। कृष्णइवाचरति कृष्णाति। अतोगुण इति शापासह पररूपं। अइवाचरति। अति। अतः। अंति। प्रत्ययग्रहणमपनीय अनेकाचइत्यक्ते
नाम्। औ। अतुः। उः। द्वित्वं। अतोगुणे इति प्राप्ते। अत आदेरिति दीर्घः। णल्। औ। वृद्धिः। अतुसादिषु तु आतो लोप इटि चेत्यालोपः॥ मा
लेवाचरति मालाति। लिंगविशिष्टपरिभाषया एकादेशस्य पूर्वांतत्वाद्वा क्विप्। मालांचकार। लुङि। अमालात् अत्र हल्ङ्या बिति लो
पोन। ङीसाहचर्यादापो पि सोरेव लोपविधानात्। इट्सकौ अमालासीत्। कविरिव कवयति। आशीर्लिङि। कवीयात्। सिचिवृद्धि
रित्यत्र धातोरित्यनुवर्त्य धातुरेव यो धातुरिति व्याख्यानात्। नामधातोर्न वृद्धिरिति केयटादयः। अकवयीत्। माधवस्तु नामः
धातोरपि वृद्धिमिच्छति। अकवायीत्। विरिव वयति। विवाय। विव्यतुः। अवयीत्। अवायीत्। श्रीरिव श्रयति। शिश्राय शि
श्रियतुः। पितेव पितरति। आशिषि रिङ्। पित्र्यात्। भूरिव भवति। अबभूवत् ... ति भुवो वुगिति भवतेरेव इति चन भवति॥
अभिव्यक्तत्वेन धातुपाठस्यैव तत्र ग्रहणात्। अभावीत्। बुभाव। दुरिव द्रवति। णिश्रीति चङ् न। अद्रावीत्। अनुनासिकस्य क्वि
झलोः क्ङिति। अनुनासिकांतस्योपधाया दीर्घः स्यात् क्वौ झलादौ क्ङिति। इदमिवाचरति। इदामति। राजेवाचरति। राजानति। पंथा
इव पथीनति। मथीनति। ऋभुक्षीणति। द्यौरिव देवाती तीति माधवः। अत्र दिवतीत्यकेचित्। कइयकति। चकाविति हरदत्तः। मा

धवस्तु। ण्यल्लोपाविति चन्नेत्या ... वृद्धिं बाधित्वा अतो लोपात् चक इति रूपमाह। स्वइव स्वति। सस्वौ। सस्वतुः। स्वामास। स्वांचकार।
तितरत्नाकरमेव। भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः। अभूततद्भावविषयेभ्यो भृशादिभ्यो भवत्यर्थे क्यङ् स्यात् हलंतानामेषां लोपश्च। अभृशो
भृशो भवति भृशायते। अच्वेरिति पर्युदासबलाद भूततद्भाव इति लभ्यं। तेनेह। घनीदिवा सुशाभि वेति। येरात्रौ भृशाः न क्षपादयः ते दिवा
कृशवंतीत्यर्थः। सुमनस्। अस्य सलोपः। सुमनायते। चुरादौ संग्राम युद्धे इति पठ्यते। तत्र संग्राम इति प्रातिपदिकं। तस्मात्तत्करोतीति
गे कृ णिच् सिद्धः। तत्संनियोगेन अनुबंध आसज्यते। युद्धे यो यं ग्राम शब्दस्तस्मात्केऽपि सामर्थ्यात् संग्राम शब्देन लब्धो विशिष्टपाठो ज्ञापयति। उपसर्ग
समानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक्क्रियत इति। तेन मनस शब्दात्स्यागट्। समनायत। उन्मनायते। उदमनाय
त। एवं चाघागत्भत। अवागाल्भिष्टेत्यादावपि अवेत्यस्य पृथक्करणं बोध्यं। ज्ञापकं च सजातीयविषयं। तेनयत्रोपसर्गसंकेलेसंरूपं श्रूयते
नतादेशेनापहतंतत्रैव पृथग्ग्रहणं इति। एवं च आऊ बः ओवः सङ्घाचर्य ओढापित्वा। अन्न उन्मनायन् अवगल्भ्येति वत् नल्यप्। ज्ञापकस्य वि
शेषविषयत्वे भाष्यवार्तिकं तज्ज्ञाप्यं च प्रमाणं। तथाहि। उस्योमाङ्क्ष्वाटः प्रतिषेधः। उसि ओमाङोश्च परयोः आटः पररूपं नेत्यर्थः। उ
स्रामेच्छत्। औस्रीयत्। ओंकारीयत्। औढियत्। आटश्चेतिच शब्देन पुनर्वृद्धि विधानादिदं सिद्धमिति पष्टेस्थितं। लोहितादिडाज्भ्यः क्य

सि॰ ति॰ षू। लोहितादिभ्योडाजंतात्त्वभवत्यर्थे क्यष् स्यात्। वा क्यषः। क्यषंतात्परस्मैपदं वा स्यात्। लोहितायते। लोहितायति। अत्र च्वेरित्यनुवृत्त्या अभूत
तद्भावविषयत्वं लभ्यं। तच्च लोहितशब्दस्यैव विशेषणं न तु डाचो ऽसंभवात्। नापि आदिशब्दग्राह्याणां तस्य प्रत्याख्यानात्। तथा च वार्तिके। लो
हितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणीति। न त्वेवं काम्यच्यवत्क्यषोपि ककारः श्रूयेत उच्चारणसामर्थ्यादिति वाच्यं। तस्यापि भाष्ये प्रत्याख्यानात्
पटपटायति। पटपटायते। कृभ्वस्तियोगं विनापि इह डाच्। डाजंतात्क्यषो विधानसामर्थ्यात्। यत्तु लोहितश्यामदुःखानि हर्षगर्वसुखानि च
मूर्छानिद्राकृपाधूमाः करुणा नित्यचर्मणी इति पठित्वा श्यामादिभ्योपि क्यषियत्पदद्वयमुदाहरंति तद्भाष्यवार्तिकविरुद्धं। तस्मात्तेभ्यः क्य
ङेव। श्यामायते। दुःखादयो वृत्तिविषये तद्वति वर्तंते। लिंगविशिष्टपरिभाषया लोहिनीशब्दादपि क्यष्। लोहिनीयति। लोहितीयते॥ क
ष्टाय क्रमणे। चतुर्थ्यंतात्कष्टशब्दादुत्साहेर्थे क्यङ् स्यात्। कष्टाय क्रमते कष्टायते। पापं कर्तुमुत्सहत इत्यर्थः। सत्रकक्षकृच्छ्रगहनेभ्यः कण्वचि
कीर्षायामिति वक्तव्यं। कण्वं पापं सत्रादयो वृत्तिविषये पापार्थास्तेभ्यो द्वितीयांतेभ्यः श्चिकीर्षायां क्यङ्। पापं चिकीर्षतीत्यस्वपदवि
हः सत्रायते। कक्षायते इत्यादि। कर्मणो रोमंथतपोभ्यां वर्तिचरोः। रोमंथतपोभ्यां कर्मभ्यां क्रमेण वर्तनायां चरणे चार्थे क्यङ् स्यात्। रोमं
थं वर्तयति रोमंथायते। हनुचलन इति वक्तव्यं। चर्वितस्याकृष्य पुनः चर्वण इत्यर्थः। नेह कीटो रोमंथं वर्तयति। अपानप्रदेशान्निःसृतं द्रव्यमि ७०

हूजं। अधिकरणाच्चेति वक्तव्यं॥ प्रासादीयति कुट्यां भिक्षुः। कुटीयति प्रासादे। कर्तुः क्यङ् सलोपश्च। उपमानात्कर्तुः सुबंतादाचारे
वा क्यङ् स्यात् सांतस्य कर्तृवाचकस्य लोपो वा स्यात्। क्यङ्लुकोः पक्षे वाक्यं। सांतस्य लोपस्तु क्यङ् संनियोगशिष्टः सन्नव्यवस्थितः। ओजसो क्य
ऽप्सरसो नित्यमितरेषां विभाषया। कृष्ण इवाचरति। कृष्णायते। ओजःशब्दो वृत्तिविषये तद्वति। ओजायते। अप्सरायते। यशायते। यश
स्यते। विद्वायते। विद्वस्यते। त्वद्यते। मद्यते। अनेकार्थत्वे तु। युष्मद्यते। अस्मद्यते। क्यङ्मानिनोश्च। कुमारीवाचरति। कुमारायते। ह
रिणीवाचरति हरितायते। गुर्वीव गुरूयते। सपत्नीव सपत्नायते। सपतीयते। सपत्नीयते। युवतिरिव युवायते। पट्वीमृद्व्याविव पट्वी
मृदूयते। न कोपधायाः। पाचिकायते। आचारेवगल्भक्लीबहोडेभ्यः क्विब्वा। वाग्रहणात् क्यङपि। अवगल्भादयः पचाद्यजंताः क्वि
पू संनियोगेनानुदात्तत्वमनुनासिकत्वं चाश्रित्य यस्य प्रतिज्ञायते। तेन तङ्। अवगल्भते। क्लीबते। होडते। भूतपूर्वादप्यनेकाच आम्
एतद्वार्तिकारंभसामर्थ्यात्। न चाचगल्भते इत्यादिसिद्धिस्तत्फलं। केवलानामेव आचारे वृत्तिसंभवात्। धातूनामनेकार्थत्वात्। अवगल्भां
चक्रे। क्लीबांचक्रे। होडांचक्रे। वार्तिके ऽवेत्युपसर्गपाठात्केवलादुपसर्गांतरविशिष्टाच्च क्यङ्वेति माधवादयः। तदूनेतिहूचितं। सर्वप्रा
प्रातिपदिकेभ्यः क्विब्वा वक्तव्यः। पूर्ववार्तिकं तु अनुबंधासंगार्थं। तत्र क्विबनूद्यते। प्रातिपदिकग्रहणादिह सुप इति न संबध्यते। तेन पद

यति। तत्संकेशाइत्येके। जटीभूताः केशाइत्यन्ये। पापमित्यपरे॥ मुंडादयः सत्यापेत्यत्रैव पठितुं युक्ताः। प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धे केषांचि
द्ग्रहणं सापेक्षेभ्योपि णिजर्थं॥ मुंडयति माणवकं। मिश्रयति अन्नं। श्लक्ष्णयति वस्त्रं। लवणयति व्यंजनं। मिमति। हलकलयोरल्पार्थे। सत्य
स्य आपुगर्थो। केषांचित्तु पंचार्थं। सत्यं करोत्याचष्टे वा। सत्यापयति। अर्थवेदयोरापुग्वक्तव्यः। अर्थापयति। वेदापयति। पाशं विमुंचति पाश
यति। रूपं पश्यति रूपयति। वीणयोपगायति उपवीणयति। तूलेनानुकुष्णाति अनुतूलयति तृणायं। भक्तेनानुघट्टयतीत्यर्थः। श्लोकैरु
पस्तौति उपश्लोकयति। सेनयाभियाति अभिषेणयति॥ उपसर्गात्सुनोतीति षः। अभ्यषेणयत्। प्राक्सितादिति षः। अभिषिषेणयि
षति। स्थादिष्वभ्यासेन चेति षः। लोमान्यनुमार्ष्टि अनुलोमयति। त्वचः संवरणे घः। त्वचं गृह्णाति त्वचयति। वर्मणा संनह्यति संवर्मयति। वर्णं गृ
ह्णाति वर्णयति। चूर्णैरवध्वंसते अवचूर्णयति। इष्ठवत्यातिदेशात्पुंवद्भावादयः। एनीमाचष्टे। एतयति। दरदमाचष्टे दारदयति। पृथुं प्रथयति
पृथोस्सत्यां पूर्ववाट्टिलोपः। अपिप्रथत्। अपपथत्। मृदुं म्रदयति। अमिम्रदत्। अममृदत्। भृशं कृशं दृढं। भ्रशयति। क्रशयति। द्रढयति। अ
बभ्रशत्। अचक्रशत्। अदद्रढत्॥ परिव्रढयति। पर्यवव्रढत्। ऊढिमाख्यत्। औजिढत्। ढत्वादीनामसिद्धत्वात् हतिशब्दस्य हि द्वित्वं पूर्वत्रा
सिद्धीयमद्वित्वे इति तु अनित्यमित्युक्तं। ढिइत्यस्य द्वित्वमित्यन्ये॥ औडिढत्। ऊढमाख्यत्। औजढत्। ओःपुयण्ज्यपरे इति वर्णग्रहणात् हारजग्रहो

लिंगं द्वित्वे कार्यं णावच आदेशो नेति उनत्तोयेषुक्तं। प्रकृत्यैकाच्। दंधिउको। स्थापयति॥ त्वामाचष्टे त्वापयति। मापयति। मपर्यंतस्य त्वमौ। परत्
वात्पूर्वं नित्यत्वाट्टिलोपः। वृद्धिः पुक्॥ त्वादयति। मादयति। इति तु न्याय्यं। अंतरंगत्वात्पररूपे कृते प्रकृत्यैकाजिति प्रकृतिभावात्। नच प्रकृति
भावो भाष्ये प्रत्याख्यात इति भ्रमितव्यं भाष्यस्य मेष्ठाद्युदाहरणविषये अन्यथासिद्धिपरत्वात्। युवामावां वा युष्मयति। अस्मयति। श्वानमा
चष्टे। शावयति। नस्तद्धिते इति टिलोपः। प्रकृतिभावस्तु नयेन नाप्राप्तिन्यायेन टेरित्यस्यैव बाधको हि सः। भत्वात्संप्रसारणं। अन्ये तु। न
स्तद्धिते इति नेह प्रवर्तते। इष्ठवदित्यस्य अतिदेशत्वात्। बह्मिष्ठ इत्यादौ परत्वाट्टेरित्यस्यैव प्रवृत्तेः। तेन शुनयतीति रूपमाहुः॥ विद्वांसमा
चष्टे। विदूयति। अंगवृत्तपरिभाषया संप्रसारणं नेत्येके। संप्रसारणे बह्म्यचादेशोच विदावयतीत्यन्ये। नित्यत्वाट्टिलोपात्प्राक् सं
प्रसारणं। अंतरंगत्वात्पूर्वरूपं। टिलोपः। विदयति इत्यपरे। उदंचमाचष्टे उदीचयति। उदैचिचत्॥ प्रत्यंचमाचष्टे प्रतीचयति। प्रत्यचि
चत्। श्वोसवर्णे इति प्रकृतिवद्भावपक्षे। प्रति अचिचत्। सम्यंचमाचष्टे समीचयति। सम्यचिचत्। समिअचिचत्। तिर्यंचमाचष्टे तिराय
यति। अंत्यष्टिलोपेनापहारेपि बहिरंगत्वेनासिद्धत्वात्तिरसस्तिरिः। असिद्धवदत्रेति चिणो लुक् न्यायेन प्रथमटिलोपोऽसिद्धः। अतः
पुनष्टिलोपो न। अंगवृत्तपरिभाषया वा। चङि अग्लोपित्वादुपधाह्रस्वो न। अतितिरायत्। सध्र्यंचमाचष्टे सध्र्याययति। अससध्रा
यत्। विष्वद्र्यंचं। अविविष्वद्रायत्। देवद्र्यंचं। अदिदेवद्रायत्। अदद्र्यंचं। अददद्रायत्। अमुमुयंचं। अमुमुआययति। चङि आ

कौ॰ति मुमुआयत्त। अदमुयञ्चं। अदमुआययति। अददमुआयत। मुवंभापयति। अबीभवत्त। ऊवं। अबुभवत। श्रियं। अशिश्रयत्त। गां। अ
जूगवत्त। रायं। अरीरयत्त। नावं। अनूनयत। स्वश्वं। स्वाशाश्वत्त। स्वः स्वयति। असस्वत्त। असिस्वत्त। बहून्भाचयति। बहयति। विस्यन्त्ये। स
ग्विणंस्त्रजयति। संज्ञापूर्वकत्वान्नवृद्धिः। श्रीमंती। श्रीमंतंवा। अशिश्रियत्त। श्रायंयति। पयस्विनीं। पयसयति। इहटिलोपेन। तदपवादस्य
लुकः प्रवृत्तत्वात्। स्थूलं। स्थवयति॥ दूरं दवयति। कथंतर्हि दूरयत्यवनेंतेचिवस्वतीति। दूरमततो। अयतेवादूरात्। दूरान्तंकुर्वतीत्यर्थः।
युवानंयवयति। कनयति। युवाल्पयोरितिवाकन्। अंतिकं। नेदयति। बाढंसाधयति। प्रशस्यं। प्रशास्ययति। इहश्रज्यौन। उपसर्गस्यप्र
यकृतेः। वृद्धं। ज्यापयति। वर्षयति। प्रियं। प्राययति। स्थिरं। स्थापयति। स्फिरंस्फापयति। उरुं वरयति। वारयति। बहुलं। बंहयति। गुरुं
गरयति। तृप्रंत्रपयति। दीर्घं। द्राघयति। वृंदारकं। वृंदयति॥ ॥ इतिनामधातुप्रक्रिया॥ ॥ कंड्वादिभ्योयक्। एभ्योधातुभ्योनित्यं
यक्स्यात्स्वार्थे। धातुभ्यः किं। प्रातिपदिकेभ्योमाभूत्। द्विधाहिकंड्वादयः धातवः प्रातिपदिकानिच। कंडूञ् गात्रविघर्षणे। कंडूयति। कं
डूयते। मंतुअपराधे रोषइत्येके। मंतूयति। चंडस्त्वामित्तमाह। मंतूयते। वल्गुपूजामाधुर्ययोः। वल्गूयति। असूउपतापे। असु। असूञ्इत्ये
के। असूयति। असूयति। असूयते। लेट् लोट् धौर्त्ये। पूर्वभावेस्वप्नेच। दीप्तावित्येके। लेट्यति। लोट्यति। लेटित्वा लोटित्वा। लेलादीतो। इरस्
इरञ्ईर्ष्यायां। इरस्यति। इरज्यति। हलिचेतिदीर्घः। ईर्यति। ईर्यति। उषसूप्रतीभावे। वेदधौर्त्ये स्वप्नेच। मेधा। आशुग्रहणे। मेधायति। ७२

हरोमंथः। तदश्नातीत्यर्थइतिकैयटः। वर्तुलंकरोतीत्यर्थइतिन्यासकारहरदत्तौ। तपसः परस्मैपदंच। तपश्चरतितपस्यति। बाष्पोष्मभ्यांमुद्वमने आभ्यां
कर्मभ्यांक्यङ्स्यात्। बाष्पमुद्वमति। बाष्पायते। उष्मायते। फेनाच्चेतिवक्तव्यं। फेनायते। शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे। एभ्यः कर्मभ्यः करोत्य
र्थेक्यङ्स्यात्। शब्दंकरोतिशब्दायते। पक्षेतत्करोतीतिणिजपीष्यतेइतिन्यासकारः शब्दयति। सुदिनसुदिननीहारेभ्यश्च। सुदिनायते। सुखादि
भ्यः कर्तृवेदनायां। सुखादिभ्यः कर्मभ्योवेदनायामर्थेक्यङ्स्याद्वेदनाकर्तुरेवचेत्सुखादीनिस्युः। सुखंवेदये। सुखायते कर्तृग्रहणंकिं। प
रस्यसुखंवेदयते। नमोवरिवश्चित्रङःक्यच्। करणेइत्यनुवर्तनेः क्रियाविशेषे। पूजायांपरिचर्यायामाश्चर्येच। नमस्यतिदेवान्। पूजयतीत्य
र्थः। वरिवस्यतिगुरून्। शुश्रूषतेइत्यर्थः। चित्रीयते विस्मयतेइत्यर्थः। विस्माययतेइत्यन्ये। पुच्छभांडचीवराण्णिङ्। पुच्छादुदसनेव्यसने
पर्यसनेच। विविधंविरुद्धंवोत्क्षेपणंव्यसनं। उत्पुच्छयते। विपुच्छयते। परिपुच्छयते। भांडात्समाचयने। संभांडयते। भांडानिसमाचिनो
तिराशीकरोतीत्यर्थः। समबभांडत्त। चीवरादर्जनेपरिधानेच। संचीवरयतेभिक्षुः। चीवराण्यर्जयति परिधत्तेवेत्यर्थः॥ मुंडमिश्रश्ल
क्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्योणिच्। कर्त्रर्थे। मुंडंकरोति। मुंडयति। व्रताद्भोजनतन्निवृत्त्योः। पयः शूद्रान्नंवाव्रतयति। वस्त्रात्समा
च्छादने। संवस्त्रयति। हल्यादिभ्योग्रहणे। हलिकल्योरदंतत्वंचनिपात्यते। हलिंकलिंचगृह्णाति। कलयति। महद्धलंहलिः। परत्वाद्वृद्धौस
त्यांमपिइष्टवद्भावेनागेवलुप्यते। अतः सन्वद्भावोदीर्घौन। अजहलत्। अचकलत्। कृतंगृह्णाति। कृतयति। तूस्तानि विहंतिवितूस्त

षति। यङ्‌णिच्‌सं‌न्नन्ताणिच्‌। बोभूययिषयति इतिप्रत्ययमाला। अनुदात्तङित आत्मनेपदं। आस्ते। शेते भावकर्मणोः बभूवे॥
अनुबभूवे। कर्तरिकर्मव्यतिहारे। क्रियाविनिमयेद्योत्ये कर्तर्यात्मनेपदंस्यात्। व्यतिलुनीते। अन्यस्य योग्यंलवनंकरोतीत्यर्थः।
श्नसोरल्लोपः व्यतिस्ते। व्यतिषाते। व्यतिषते। तासस्त्योर्लोपः। व्यतिसे धिच। व्यतिधे। हरति। व्यतिहे व्यतिसेत्यसे व्यत्यास्त व्यति
षीत। व्यतिराते २ व्यतिभाते व्यतिबभे २। नगतिहिंसार्थेभ्यः व्यतिगच्छंति। व्यतिघ्नंति। प्रतिषेधेहसादीनामुपसंख्यानं। हसादयोहस उपसं
प्रकाराः शब्दक्रियाः व्यतिहसंति व्यतिजल्पंति। हरतेरप्रतिषेधः। संप्रहरंतेराजानः इतरेतरान्योन्योपपदाच्च। परस्परोपपदा
च्चेतिवक्तव्यं। इतरेतरस्यान्योन्यस्यावापरस्परस्यवाव्यतिलुनंति। नेर्विशः। निविशते। परिव्यवेभ्यःक्रियः। अकर्त्रभिप्रायार्थमि
दं। परिक्रीणीते। विक्रीणीते। अवक्रीणीते। विपराभ्यांजेः। विजयते। पराजयते। आङोदोनास्यविहरणे। आङ्‌पूर्वाद्ददातेर्मुख
विकासादन्यत्रार्थेवर्तमानादात्मनेपदंस्यात्। विद्यामादत्ते। अनास्येतिकिं। मुखंव्याददाति। आस्यग्रहणमविवक्षितं। विपादिकां
व्याददाति। पादस्फोटोविपादिका। नदीकूलंव्याददाति। परांगकर्मकान्निषेधः। व्याददते पिपीलिकाः पतंगस्यमुखं। क्रीडोनुसंपरि
भ्यश्च। चादाङः अनुक्रीडते। संक्रीडते। परिक्रीडते। आक्रीडते अनोःकर्मप्रवचनीयान्न। उपसर्गेणसमासाहचर्यात्। माणवक
मनुक्रीडति। तेनसहेत्यर्थः। तृतीयार्थइत्यनोःकर्मप्रवचनीयत्वं। समोऽकूजने। संक्रीडते। कूजनेतुसंक्रीडंतिचक्रं। आगमेः

क्षमायां। ण्यंतस्येदंग्रहणं। आगमयस्वतावत्। मात्वरिष्ठाः इत्यर्थः। शिक्षेर्जिज्ञासायां। धनुषिशिक्षते। धनुर्विषयेज्ञानेशक्तोभवितुं
इच्छतीत्यर्थः॥ आशिषिनाथः। आशिष्येवेतिनियमार्थंवार्त्तिकमित्युक्तं। सर्पिषोनाथते। सर्पिर्मेस्यादित्याशास्त इत्यर्थः। कथंतर्हिनाथसे
किमुपतिंनभूभृतोमिति। नाधसइतिपाठ्यं। हरतेर्गतताच्छील्ये। गतंप्रकारः पैतृकमश्वाअनुहरंते। मातृकंगावः। पितुर्मातुश्चागतंप्रका
रंसततंपरिशीलयतीत्यर्थः। ताच्छील्येकिं। मातुरनुहरति। किरतेर्हर्षजीविकाकुलायकरणेष्वितिवाच्यं। हर्षादयोविषयाः। तत्रहर्षोविक्षेप
चतुष्पा स्यकारणं। इतरेफले। अपाच्चतुष्पाच्छकुनिष्वालेखने। अपात्किरतेःसुट् स्यात्। सुडपिहर्षादिष्वेववक्तव्यः। अपस्किरते। वृषोहृष्टः। कुक्कुटो
भक्षार्थी। श्वाआश्रयार्थीच। हर्षादिष्वितिकिं। अपकिरति। कुसुमं। इहतङ्‌सुटौन। हर्षादिमात्रविवक्षायांयद्यपितङ्‌प्राप्तः तथापि
सुडभावेनेष्यतेइत्याहुः। गजोपकिरति अंपः। आङिनुप्रच्छ्योः। आनुते। आपृच्छते। शपउपालंभे। आक्रोशार्थात्स्वरितेतोऽकर्तृगेपिफ
लेशापथरूपेऽर्थेआत्मनेपदंवक्तव्यमित्यर्थः। कृष्णायशपते। समवप्रविभ्यःस्थः। संतिष्ठते। स्थाध्वोरिच्च। समस्थित। समस्थिषातां
समास्थिषत। अवतिष्ठते। प्रतिष्ठते। वितिष्ठते। आङः प्रतिज्ञायामुपसंख्यानं। शब्दंनित्यमातिष्ठते। नित्यत्वेनप्रतिजानीतइत्यर्थः। प्रका
शनस्थेयाख्ययोश्च। गोपीकृष्णायतिष्ठते। आशयंप्रकाशयतीत्यर्थः। संशय्यकर्णादिषुतिष्ठतेयः कर्णादीन्निर्णेतृत्वेनाश्रय
तीत्यर्थः। उदोनूर्ध्वकर्मणि। मुक्तावुत्तिष्ठते। अनूर्ध्वेतिकिं। पीठादुत्तिष्ठति। ईहायामेव। नेह। ग्रामाच्छतमुत्तिष्ठति उपान्मंत्रकर

प

कौ०ति० णे। आग्नेय्याग्नीध्रमुपतिष्ठते। मंत्रकरणे किं। भर्त्तारमुपतिष्ठति यौवनेन। उपाद्देवपूजासंगतिकरणमित्रकरणपथिष्विति वाच्यं। आदित्य
मुपतिष्ठते। कथं तर्हि स्तुत्यसंस्कृतिभिरर्थ्याभिरुपतस्थे सरस्वतीति। देवतात्वारोपात्। नृपस्य देवतात्वाशंसात् वा। गंगायमुपतिष्ठ नामु
ते। उपश्लिष्यतीत्यर्थः। रथिकानुपतिष्ठते। मित्रीकरोतीत्यर्थः। पंथाः स्रुघ्नमुपतिष्ठते प्राप्नोतीत्यर्थः। वालिप्सायामिति वक्तव्यं॥
भिक्षुकः प्रभुमुपतिष्ठते। उपतिष्ठति वा। लिप्सयोपगच्छतीत्यर्थः। अकर्मकाच्च। उपतिष्ठतेरकर्मकादात्मनेपदं स्यात्। भोजने काले
उपतिष्ठते। सन्निहितो भवतीत्यर्थः। उद्विभ्यां तपः। अकर्मकादित्येव। उत्तपते। वितपते। दीप्यत इत्यर्थः। स्वांगकर्मकाच्चेति वक्तव्यं। स्वमंगं
स्वांगम् न त्वद्रवमिति परिभाषितम्। उत्तपते वितपते पाणिम्॥ नेह। सुवर्णमुत्तपति संतापयति विलापयति वेत्यर्थः। चैत्रो मैत्रस्य पा
णिमुत्तपति संतापयतीत्यर्थः। आङो यमहनः। आयच्छते। आहते। अकर्मकात्स्वांगकर्मकादित्येव। नेह। परस्य शिर आहंति। कथं त
र्हि आजघ्ने विषमलोचनस्य वक्षः इति भारविः। आहध्वं मा रघूत्तममिति भट्टिश्च। प्रमाद एवायमिति भागवृत्तिः। प्राप्येत्यध्याहारो वा। ल्य
ब्लोपे पंचमीति तु ल्यबंतं विनैव तदर्थावतिर्यत्र तद्विषयं भेत्तुमित्यादि तुमुन्नंताध्याहारो वास्तु समीपमेत्येति वा। आत्मनेपदेष्वन्य
तरस्यां। हनो वध एशो वा स्याल्लुङि। आवधिष्ट। आवधिषाताम्। हनः सिच्। कित्स्यात्। अनुनासिकलोपः। आहत। आहसाताम्। आ
हसत। यमो गंधने। सिच् कित्स्यात्। गंधनं सूचनं परदोषाविष्करणं। उदायत। गंधने इति किं। उदायंस्त पादं। आकृष्टवानित्यर्थः। समो गम्यृ

कुषुभ क्षेपे। कुषुभ्यति। मगध परिवेष्टने। नीचदास्य इत्यन्ये। तंतस पंपस दुःखे। सुख दुःख तत्क्रियायां। सुखयति। दुःखयति। सुखं दुःखं
चानुभवतीत्यर्थः। सपर पूजायां। अरर आराकर्मणि। भिषज चिकित्सायां। भिष्णज उपसेवायां। इषुध शरधारणे। चरण वरण गतौ। चु
रण गतौ। तुरण त्वरायां। भुरण धारणपोषणयोः। गद्गद वाक्स्खलने। एला केला खेला विलासे। इलेत्यन्ये। लेखा स्खलने च। अ
दंतोयमित्यन्ये। लेखायति। लिट अल्पकुत्सनयोः। लिट्यति। लाट जीवने। हृणीङ् रोषणे लज्जायां च। महीङ् पूजायां। महीयते। पू
जां लभत इत्यर्थः। रेखा श्लाघासादनयोः। द्रवस परितापपरिचरणयोः। तिरस् अंतर्धौ। अगद नीरोगत्वे। उरस बलार्थः। उरस्यति। ब
लवान् भवतीत्यर्थः। तरण गतौ। पयस प्रसृतौ। संभूयस प्रभूतभावे। अंबर संबर संभरणे। आकृतिगणोयं। इति कंड्वादयः॥ कंडूयतेः
सन्। सन्यङोरिति प्रथमस्यैकाचो द्वित्वे प्राप्ते। कंड्वादेस्तृतीयस्येति वाच्यं। कंडूयियिषति। स्यंजंतात्सन्। यथेष्टं नामधातुषु। आद्यानां
त्रयाणां अन्यतमस्य द्वित्वमित्यर्थः। अजादेस्त्वाद्येतरस्य। पुपुत्रीयिषति। पुतित्रीयिषति। पुत्रीयियिषति। अशिश्वीयिषति। अश्वीयियि
षति। नदराणां संयुक्तानामचः परस्य द्वित्वनिषेधः। इंद्रीयतेः सन्। नद्रिशब्दयिशब्दयोरन्यतरस्य द्वित्वं। इंदिद्रीयिषति। इंद्रीयियिषति।
चिन्द्रीयिषति। चंदिद्रीयिषति। चंद्रीयियिषति। प्रियमाख्यातुं मां चक्षाणं प्रेरयितुं चेच्छति। पिप्राययिषति। प्रायियिषति। उरुं विवा
रयिषति। वारिरयिषति। वारयियिषति। बाढं सिसाधयिषतीत्यादि रूपत्रयं। षत्वं तु नास्ति। यङः सन् ण्यंतात्सन्॥ बोभूयिषयि

।सि०कौ०ति० सहसाप्रवर्तते। एधोदकस्योपस्कुरुते। गुणमाधत्ते। गाथाः प्रकुरुते। प्रकथयतीत्यर्थः। शतं प्रकुरुते। धर्मार्थं नियुंक्ते। एषु किं। घटं करोति। अधेः
प्रसहने। प्रसहनं क्षमा। भिभवश्च। हर्षमर्षणेऽभिभवे चेति पाठात्। शत्रुमधिकुरुते। क्षमते इत्यर्थः। अभिभवतीति वा। वेः शब्दकर्मणः। स्वरा
न्विकुरुते। उच्चारयतीत्यर्थः। शब्दकर्मणः किं चित्तं विकरोति कामः। अकर्मकाच्च। वेः कृञ इत्येव। छात्रा विकुर्वते। विकारं लभंते इत्यर्थः। संमान
नोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः। अत्रोत्संजनं ज्ञानं विगणनं व्ययश्च नयतेर्वाच्याः। इतरे प्रयोगोपाधयः। तथाहि। शा
स्त्रे नयते। शास्त्रस्थं सिद्धांतं शिष्येभ्यः प्रापयतीत्यर्थः। तेन शिष्यसंमाननं फलितं। उत्संजने। दंडमुन्नयते। उत्क्षिपतीत्यर्थः। माणवकमुप
नयते इत्यर्थः। विधिनाऽत्मसमीपं प्रापयति। उपनयनपूर्वकेणाध्यापनेन हि उपनेतरि आचार्यत्वं क्रियते। ज्ञाने। तत्त्वं नयते। निश्चि
नोतीत्यर्थः। कर्मकरानुपनयते। भृतिदानेन स्वसमीपं प्रापयतीत्यर्थः। विगणनं ऋणादेर्निर्यातनं। करं विनयते। राज्ञे देयभागं परिशोध
यतीत्यर्थः॥ शतं विनयते। धर्मार्थं विनियुङ्क्ते इत्यर्थः। कर्तृस्थे चाशरीरे कर्मणि। नियः कर्तृस्थे कर्मणि यदात्मनेपदं प्राप्तं तच्छरी
रावयवभिन्ने एव स्यात्। सूत्रे शरीरशब्देन तदवयवो लक्ष्यते। क्रोधं विनयते। अपगमयति। तत्फलस्य चित्तप्रसादस्य कर्तृगतत्वात्। स्व
रितञित इत्येव सिद्धे नियमार्थमिदं। तेनेह न। गडुं विनयति। कथं तर्हि विगणय्य नयंति पौरुषं मितिः। कर्तृगामित्वाविवक्षायां भविष्यति
वृत्तिसर्गतायनेषु क्रमः। वृत्तिरप्रतिबंधः। ऋचि क्रमते बुद्धिः। न प्रतिहन्यत इत्यर्थः। सर्ग उत्साहः। अध्ययनाय क्रमते उत्सहते। क्रमंतेऽ

स्मिन् शास्त्राणि। स्फीतानि भवंतीत्यर्थः। उपपराभ्यां। वृत्त्यादिष्वाभ्यामेव क्रमेर्नत्वन्योपसर्गांतरपूर्वात्। उपक्रमते। पराक्रमते। नेह संक्रामति। आ
ङ उद्गमने। आक्रमते सूर्यः। उदयत इत्यर्थः। ज्योतिरुद्गमन इति वाच्यं नेह। आक्रामति धूमो हर्म्यतलात्। वेः पादविहरणे। साधु विक्रमते
वाजी पादविहरणे किं। विक्रामति संधिः। द्विधा भवति स्फुटतीत्यर्थः। प्रोपाभ्यां समर्थाभ्यां। समर्थौ तुल्यार्थौ। प्रक्रमस्यादित्वात् तत्रू
पं। प्रारंभे नयोस्तुल्यार्थता। प्रक्रमते उपक्रमते। समर्थाभ्यां किं। प्रक्रामति गच्छतीत्यर्थः। उपक्रामति। आगच्छतीत्यर्थः। अनुपस
र्गाद्वा। क्रामति क्रमते। अप्राप्तविभाषेयं वृत्त्यादौ नित्यमेव। अपह्नवे ज्ञः। शतमपजानीते। अपलपतीत्यर्थः। अकर्मकाच्च। सर्पिषो जा
नीते। सर्पिषा उपायेन प्रवर्तत इत्यर्थः। संप्रतिभ्यामनाध्याने। शतं संजानीते। अवेक्षत इत्यर्थः। शतं प्रतिजानीते। अंगीकरोतीत्यर्थः। आ
ध्यान इति योगो विभज्यते तत्सामर्थ्यादकर्मकाच्चेति प्राप्तिरपि वार्यते। मातरं मातुर्वा संजानाति कर्मणः शेषत्वविवक्षायां षष्ठी। भासनोप
संभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः। उपसंभाषोपमंत्रणे धातोर्वाच्ये इतरे प्रयोगोपाधयः। शास्त्रे वदते। भासमानो ब्रवीतीत्यर्थः
उपसंभाषोपसांत्वनं। भृत्यानुपवदते। सांत्वयतीत्यर्थः ज्ञाने शास्त्रे वदते। यत्ने क्षेत्रे वदते विमतौ क्षेत्रे विवदंत इत्यर्थः। उपमंत्रणमुपच्छं
दनं। उपवदते। प्रार्थयते इति। व्यक्तवाचां समुच्चारणे। मनुष्यादीनां संभूयोच्चारणे वदेरात्मनेपदं स्यात् ~~अनुवदते कठः कलापस्य~~ संप्रवदंते
ब्राह्मणाः। नेह। संप्रवदंति खगाः। अनोरकर्मकात्। व्यक्तवाग्विषयाद्वदेरनुपूर्वादकर्मकाद्वदेरात्मनेपदं स्यात् अनुवदते कठः कलापस्य

सि०नति० अकर्मकात्किं। उक्तमनुवदति। व्यक्तवाचां किं। अनुवदति। वीणा। विभाषा विप्रलापे। विरुद्धोक्तिरूपे व्यक्तवाचां समुच्चारणे उक्तं वा स्यात्॥ विप्रव
दंति। विप्रवदंते वा वैद्याः। अवाद्ग्रः। अवगिरते गृणातिस्त्ववपूर्वो न प्रयुज्यत एवेति भाष्यं। समः प्रतिज्ञाने। शब्दं नित्यं संगिरते। प्रतिजानीत इत्यर्थः
प्रतिज्ञाने किं। संगिरति ग्रासं। उदश्चरः सकर्मकात्। धर्ममुच्चरते। उल्लंघ्य गच्छतीत्यर्थः। सकर्मकात्किं। बाष्प उच्चरति। उपरिष्टाद्गच्छतीत्यर्थः। र
समस्तृतीयायुक्तात्। रथेन संचरते। दाणश्च सा चेच्चतुर्थ्यर्थे। संपूर्वाद्दाणस्तृतीयांतेन युक्तादुक्तं स्याच्चतृतीया चेच्चतुर्थ्यर्थे। दास्या संयच्छते का
मुकः। पूर्वसूत्रे समइति पष्ठी तेन सूत्रद्वयमिदं व्यवहितेपि प्रवर्तते। रथेन समुदाचरते। दास्या संप्रयच्छते। उपाद्यमः स्वकरणे। स्वकरणं स्वीकारः
भार्यामुपयच्छते। विभाषोपयमने। यमः सिचि किद्वा स्यात्। विवाहे रामः सीतामुपायत। उपायंस्त वा उदवोढेत्यर्थः। गंधनांगे। उपयमने तु पूर्व
विप्रतिषेधान्नित्यं कित्वं। ज्ञाश्रुस्मृदृशां सनः। सन्नंतानामेषां प्राग्वत्। धर्मं जिज्ञासते। शुश्रूषते। सुस्मूर्षते। दिदृक्षते। नानोर्ज्ञः। पुत्रमनुजि
ज्ञासति। पूर्वसूत्रस्यायं निषेधः। अनंतरस्येति न्यायात्। तेनेह न। सर्पिषोनुजिज्ञासते। सर्पिषा प्रवृत्तिमिच्छतीत्यर्थः। पूर्ववत्सनइति तङ्
अकर्मकाच्चेति केवलाद्विधानात्। प्रत्याङ्भ्यां श्रुवः स्वस्यकर्त्ता आभ्यां सन्नंताच्छ्रुव उक्तं न स्यात्। प्रतिशुश्रूषति। आशुश्रूषति। कर्मप्रवच
नीयात्तु स्यादेव। देवदत्तं प्रतिशुश्रूषते। शदेः शितः। म्रियतेर्लुङ्लिङोश्च। व्याख्यातं। पूर्ववत्सनः। सनः पूर्वो यो धातुस्तेन तुल्यं सन्नंतादप्या न
त्मनेपदं स्यात्। एदिधिषते। शिशयिषते। निविविक्षते। पूर्ववत्किं। बुभूषति। शदेरित्यादिसूत्रद्वये सनो नेत्यनुवर्त्य आ[illegible]यभेदेन व्या ७७

छिस्यां। अकर्मकाभ्यामित्येव। संगच्छते। वागमः। गमेष्ट परोक्षला दिलिङ्सिचौ किंतौ वा स्तः। संगसीष्ट। संगंसीष्ट। समगत। समगंस्त। समृच्छिष्य
ते। अकर्मकाभ्यां किं। ग्रामं संगच्छति। विदिप्रच्छिस्वरतीनामुपसंख्यानं। वेत्तेरेव ग्रहणं। संवित्ते। संविदाते। वेत्तेर्विभाषा। वेत्तेः परस्य[illegible]झादेश
स्यातो रुड्वा स्यात्। संविद्रते। संविदते। संपृच्छते। संस्वरते। अर्तिश्रुदृशिभ्यश्चेति वक्तव्यं। अर्तीति द्वयोर्ग्रहणं। अङ् विधौ तु इयर्तेरेवेत्युक्तं। मास
मृत। मा समृषातां। मा समृषतेति। समार्त। समार्षातां। समार्षतेति च। भ्वादेः इयर्तेस्तु मा समरत। मा समरेतां। मा समरंतेति। समारत। समारेतां।
समारंतेति च। संशृणुते। संपश्यते। अकर्मकादित्येव। अत एव रक्षां सीतेति। पुरापि संशृणुमहे इति मुरारिप्रयोगः प्रामादिक इत्याहुः। अध्याहा
रो वा इति कथयन्त्यः इति। अथास्मिन्नकर्मकाधिकारे हनिगम्यादीनां कथमकर्मकेति चेच्छृणु। धातोरर्थांतरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरवि
वक्षातः कर्मणोऽकर्मका क्रिया। वहति भारं। नदी वहति स्यंदत इत्यर्थः। जीवति। नृत्यति। प्रसिद्धेर्यथा मेघो वर्षति। कर्मणोऽविवक्षातो यथा। हि
तान्न यः संशृणुते स किंप्रभुः। उपसर्गादस्यत्यूह्योर्वेति वाच्यं। अकर्मकादिति निवृत्तं। बंधं निरस्यति। निरस्यते। समूहति। समूहते। उपसर्गाद्
ह्रस्व ऊहतेः। यादौ क्ङिति। ब्रह्म समुह्यात्। अग्निं समुह्य। निसमुपविभ्यो ह्वः। निह्वयते। स्पर्धायामाङः। कृष्णश्चाणूरमाह्वयते। स्पर्धायां किं। पुत्र
माह्वयति। गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः। गंधनं हिंसा। उत्कुरुते सूचयतीत्यर्थः। सूचनं हि प्राणवियोगा
नुकूलत्वाद्धिंसैव। अवक्षेपणं भर्त्सनं। श्येनो वर्तिकामुदाकुरुते। भर्त्सयत इत्यर्थः। हरिमुपकुरुते सेवत इत्यर्थः। परदारान्प्रकुरुते। तेषु

५४ पदंमिथ्याकारयते। स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः। मिथ्योपपदात्किं। पदंसकृदुकारयति। अभ्यासेकिं। सकृत्पदंमिथ्याकारयति। स्वरितञि

सि० कौ० रोहंतीति प्रथमकक्षाप्राग्वत्। ततः कर्मणएवहेतुत्वारोपाणिच्। दर्शयतिभवः। आरोहयतिहस्ती पश्यतआरोहतस्त्वप्रेरयतीत्यर्थः। ततोणिज्भ्यां
तत्प्रकृतिभ्यांच्च उपात्तयोर्द्वयोरपिप्रेरणयोस्त्यागे। दर्शयते। आरोहयते। इत्युदाहरणं अर्थःप्राग्वत्। अस्मिन्पक्षेद्वितीयकक्षायान्ततङ् स
मानक्रियात्वाभावाण्णिजर्थस्याधिक्यात्। अनाध्यानेकिं। स्मरतिवनगुल्मंकोकिलः। स्मरयतिवनगुल्मः। उत्कंठापूर्वकस्मृतेर्विषयोभवतीत्य
र्थः। भीस्म्योर्हेतुभये। व्याख्यातं। गृधिवंच्योःप्रलंभने। प्रतारणेऽर्थेण्यंताभ्यामाभ्यांप्राग्वत्। माणवकंगर्धयते वंचयतेवा। प्रलंभनेकिं। श्वानं
गर्धयति। अभिकांक्षामस्योत्पादयतीत्यर्थः। अहिंवंचयति। वर्जयतीत्यर्थः। लियःसंमाननशालीनीकरणयोश्च। व्याख्यातं। मिथ्योपपदा
त्कृञोभ्यासे। णेरित्येव। अपवदति। णिचश्च। कारयते। समुदाङ्भ्योयमोग्रंथे। अग्रंथइतिछेदः। व्रीहीन्संयच्छते। भारमुद्यच्छते। [illegible]वस्त्रं
मायच्छते। अग्रंथेकिं। उद्यच्छतिवेदं। अधिगंतुमुद्यमंकरोतीत्यर्थः। कर्त्रभिप्रायइत्येव। अनुपसर्गाज्ज्ञः। गांजानीते। अनुपसर्गात्किं। स्वर्गं
लोकंनप्रजानाति। कथंतर्हिसिद्धिः। इत्थंनृपःपूर्वमवालुलोचे ततोनुजज्ञेगमनंसुतस्येति। कर्मणिलिट्। नृपेणेतिविपरिणामः। विभाषोप
पदेनप्रतीयमाने। स्वरितञित्तइत्यादिपंचसूत्र्यायदात्मनेपदंविहितंतत्समीपोच्चारितेनपदेनक्रियाफलस्यकर्तृगामित्वेद्योतितेवा
स्यात्। स्वंयज्ञंयजति। यजतेवा स्वंकटंकरोति। कुरुतेवा। स्वंपुत्रमपवदति। अपवदतेवा। स्वंयज्ञंकारयति। कारयतेवा। स्वंज्ञीहिंसंय

३४॥ [illegible]

तःकर्त्रभिप्राये क्रियाफले [illegible]

छति। यच्छतेवा। स्वांगांजानाति जानीतेवा इत्यात्मनेपदं। शेषात्कर्तरिपरस्मैपदं। अत्र अनुपराभ्यांकृञः। कर्तृगेपिफलेगं
धनादौचपरस्मैपदार्थमिदं। अनुकरोति पराकरोति। कर्तरीत्येवभावकर्मणोर्मा भूत्। नन्वेवमपिकर्मकर्तरिप्रसंगः। कार्या
तिदेशपक्षस्यमुख्यतया कर्मवत्कर्मणेत्यात्मनेपदेन परेणास्यबाधात्। शास्त्रातिदेशपक्षेतुकर्तृकर्मेत्यतः शेषादित्यतश्चक
र्तृग्रहणद्वयमनुवर्त्य कर्तैवयः कर्त्तानतुकर्मकर्त्ता तत्रेतिव्याख्येयं। अभिप्रत्यतिभ्यःक्षिपः। क्षिपप्रेरणेस्वरितेत्। अभिक्षिपति।
प्राद्वहः। प्रवहति। परेर्मृषः। परिमृष्यति। योजादिकस्यपरिमर्षति। परेरितियोगंविभज्यवहेरपीतिकेचित्। व्याङ्परिभ्योरमः। विरम
ति। उपाच्च। यज्ञदत्तमुपरमति। उपरमयतीत्यर्थः। अंतर्भावितण्यर्थोयम्। विभाषाकर्मकात्। उपात्रमेरकर्मकात्परस्मैपदंवास्यात्
उपरमति। उपरमतेवा। निवर्ततइत्यर्थः। बुधयुधनशजनेङ्प्रुद्रुस्रुभ्योणेः। एभ्योण्यंतेभ्यःपरस्मैपदंस्यात्। णिचश्चेत्यस्यापवा
दः। बोधयतिपद्मं। योधयतिकाष्ठानि नाशयति। दुःखंजनयति सरवं अध्यापयति। प्रावयति प्रापयतीत्यर्थः द्रावयति। विलापयती
त्यर्थः। स्रावयति। स्यंदयतीत्यर्थः। निगरणचलनार्थेभ्यश्च। निगारयति। आशयति भोजयति चलयति कंपयति। अदेःप्रतिषेधः। आ
दयते देवदत्तेन। गतिबुद्धीतिकर्मत्वमादिखाद्योर्नेतिप्रतिषिद्धं। निगरणचलनेतिसूत्रेणप्राप्तस्यैवायंनिषेधः। शेषादित्यकर्त्रभिप्रा

येपरस्मैपदंस्यादेव।आदयस्त्वन्नंबटुना। अणावकर्मकाच्चित्तवत्कर्तृकात्। ण्यंतात्परस्मैपदंस्यात्। शेते कृष्णः तंगोपीशाययति। नपादम्याङ्य
माङ्यसपरिमुहरुचिनृतिवदवसः। एभ्योण्यंतेभ्यः परस्मैपदंन। पिबतेर्निगरणार्थः। इतरेचित्तवत्कर्तृकाः। अकर्मकाः। नृतिश्चलनार्थो
पित्तेनसूत्रद्वयेनप्राप्तिः। पाययते। दमयते। आयामयते। परिमोहयते। रोचयते। नर्तयते। वादयते। वासयते। धेटउपसंख्यानं। धापयेते
शिशुमेकंसमीची। अकर्त्रभिप्रायेशेषादितिपरस्मैपदंस्यादेव। वत्सान्पाययतिपयः। दमयंतीकमनीयतामदं। भिक्षावासयति। वाच्यपः
लोहितायति। लोहितायते। द्युद्भ्योलुङि। अद्युतत्। अद्योतिष्ट। वृद्भ्यःस्यसनोः। वर्त्स्यति। वर्तिष्यते। विवृत्सति। विवर्तिषते। लुटिचक्लृपः॥
कल्प्तासि। कल्पितासे। कल्प्स्यति। कल्पिष्यते। कल्प्स्यते। चिक्लृप्सति। चिकल्पिषते। चिक्लृप्सते। इतिपदव्यवस्था। अथभावकर्म
णोर्लडादयः। भावकर्मणोरितितङ्। सार्वधातुकेयक्। धातोर्यक्प्रत्ययः स्यात् भावकर्मवाचिनिसार्वधातुकेपरे। भावोभावना उत्पादना
क्रिया साचधात्वर्थत्वेनसकलधातुवाच्या। भावार्थकलकारेणानूद्यते। युष्मदस्मद्भ्यांसामानाधिकरण्याभावात्प्रथमपुरुषः। तिङ्वाच्यभा
वनायाः असत्वरूपेणोद्वित्वाद्यप्रतीतेर्नद्विवचनादि किंत्वेकवचनमेव। तस्यौत्सर्गिकत्वेन संख्यानपेक्षत्वात्। अनभिहितेकर्तरि
तृतीया। त्वयामयान्यैश्चभूयते। बभूवे। स्यसिच्सीयुट्तासिषुभावकर्मणोरुपदेशेऽज्झनग्रहदृशांवाचिण्वदिट्च। उपदेशेयोऽ ७९

स्त्वेयं। तेनेहन। शिशासति। मुमूर्षति। आम्प्रत्ययवत्कृञोनुप्रयोगस्य। एधांचक्रे। प्रोपाभ्यांयुजेरयज्ञपात्रेषु। प्रयुंक्ते। उपयुंक्ते। स्वराद्यंतोपसर्गा
दितिवक्तव्यं। उद्युंक्ते। वियुंक्ते। अयज्ञपात्रेषुकिं। द्वंद्वंन्यंचिपात्राणिप्रयुनक्ति। समःक्ष्णुवः। संक्ष्णुतेशस्त्रं। भुजोनवने। ओदनंभुंक्ते। अभ्यवहरती
त्यर्थः। बुभुजेपृथिवीपालः पृथिवीमेवकेवलं। वृद्धोजनोदुःखशतानिभुंक्ते। इहउपभोगोभुजेरर्थः। अनवनेकिं। महींभुनक्ति। णेरणौयत्कर्म
णौचेत्सकर्तानाध्याने। ण्यंतादात्मनेपदंस्यात्। अणौयाक्रियासैवचेण्यंतेनोच्यते। अणौयत्कर्मकारकंसचेण्णौकर्तास्यादनाध्याने। णिचश्चे
तिसिद्धेकर्त्रभिप्रायार्थमिदं। कर्त्रभिप्रायेतुविभाषोपपदेनेतिविकल्पेऽणावकर्मकादितिपरस्मैपदेनपरत्वात्प्राप्ते। पूर्वविप्रतिषेधेनेदमेवेष्य
ते। कर्तृस्थभावकाः कर्तृस्थक्रियाश्चोदाहरणं। तथाहि। पश्यंतिभवंभक्ताः। चाक्षुषज्ञानविषयंकुर्वंतीत्यर्थः। प्रेरणांशत्यागे पश्यतिभ
वः। विषयोभवतीत्यर्थः। ततोहेतुमण्णिच्। दर्शयंतिभवंभक्ताः। पश्यंतीत्यर्थः। पुनर्ण्यर्थस्याविवक्षायां। दर्शयतेभवः। इहप्रथमतृतीययोरवस्थ
योर्द्वितीयचतुर्थ्योश्चतुल्योऽर्थः। तत्रतृतीयकक्षायांनतङ्। क्रियासाम्येप्यणौकर्मकारकस्यणौकर्तृत्वाभावात्। चतुर्थ्यांतुतङ्। द्वितीयामाद
यक्रियासाम्यात्। प्रथमायांकर्मणोभवस्येहकर्तृत्वाच्च। एवमारोहयतेहस्तीत्यप्युदाहरणं। आरोहंतिहस्तिनंहस्तिपकाः। न्यग्भावयंतीत्य
त्यर्थः। ततआरोहतिहस्ती न्यग्भवतीत्यर्थः ततोणिच्। आरोहयंति। आरोहंतीत्यर्थः। ततआरोहयते। न्यग्भवतीत्यर्थः। यद्यपश्यंत्यारो

सि॰ कौ॰ ति तुवृत्तेरुक्तत्वान्नेहगुणः। संक्षियत्ते। अनिदितामितिनलोपः। स्रस्यते। इदित्त्वान्न। ध्वस्यते। संप्रसारणं। इज्यते। अयङ्‌यिक्ङिति। शय्यते। तनोतेर्यकि। आकारांतादेशोवास्यात्। तायते। तन्यते। येविभाषा। जायते। जन्यते। तपोनुतापेच। तपश्च्लेश्चिण्नस्यात् कर्मकर्तरि। अनुतापेच। अन्वतप्त। पापेन पापं कृतंत्वेनाप्याहत्तइत्यर्थः। कर्मणिलुङ्। यद्वा पापेनपुंसाकर्त्रा। अशोचिइत्यर्थः। घुमास्थेतीत्वं। दीयते। धीयते। आदेच इत्यत्र शितीतिकर्मधारयादित्संज्ञकशकारादेर्निषेधः। एशआदित्वाभावात्तस्मिन्नात्वं। जग्ले। आतोयुक्चिण्कृतोः। आदंतानांयुगागमः स्याच्चिणि ञ्णितिकृतिच। दायिता। दाता। दायिषीष्ट। दासीष्ट। अदायि। अदायिषातां। अदिषातां। अधायिषातां। अधिषातां। अग्लायिषातां। अग्लासातां। हन्यते। अचिणलोरित्युक्तेर्हनस्तोन होहंतेरितिकुत्वं। घानिता। हंता। घानिष्यते। हनिष्यते। आशीर्लिङि। वधादेशस्यापिचादश्चिण्वद्भावः। आर्धधातुके सीयुटीतिविशेषविहितत्वात्। घानिषीष्ट। पक्षेवधीषीष्ट। अघानि। अघानिषातां। अहसातां। पक्षेवधादेशः। अवधि। अवधिषातां। अघानिष्यत। अहनिष्यत। नचस्यादिषुचिण्वदित्यतिदेशाद्वधादेशः स्यादितिवाच्यं। अंगस्येत्यधिकारादांगस्यैवातिदेशात्। गृह्यते। चिण्वदिटोदीर्घत्वं प्रकृतस्यवलादिलक्षणस्यैवेटो ग्रहोलिटीत्यनेनदीर्घविधानात्। ग्राहिता। ग्रहीता। ग्राहिष्यते। ग्रहीष्यते। ग्राहिषीष्ट। ग्रहीषीष्ट। अग्राहि। अग्राहिषातां। अग्रहीषातां। दृश्यते। अदर्शि। अदर्शिषातां। सिचः कित्वादम्। अदृक्षातां। गिरतेर्लुङि। ध्वमित्यत्र परत्वादिटं बाधित्वा चिण्वदिडेवोपतिष्ठते इति केचित्। अगारिध्वं। द्वितीयेलि

टि वृतोवेतिवादीर्घः। अगरीध्वं। अगरिध्वं। एषांत्रयाणांलत्वंढत्वांढ्वित्वत्रयं चेति पंचवैकल्पिकानि। इत्थंषण्णवतिः। लिङ्सिचोविकल्पादिड्भावेउश्चेतिकित्वं इत्वंरपरत्वं हलिचेतिदीर्घः। इणः षीध्वमितिनित्यंढत्वं। अगीर्ढ्वं। द्रुमादीनांद्वित्वविकल्पो अष्टौ उक्तषण्णवत्यासह संकलनेउक्तासंख्येति। ऋदुद्दीर्घःश्चिण्वदिटोलत्वंढत्वांढ्वित्वविकंतथा। इत्यष्टानांविकल्पेनन्वतुर्भिरधिकंशतं। हेतुमण्यंतात्कर्मणिलः यकृणिलोपः शम्यतेमोहोमुकुंदेन। चिण्णमुलोर्दीर्घोन्यतरस्यां। चिणपरेणमुल्परेच णौमितामुपधायादीर्घोवास्यात्। प्रकृतेमितांह्रस्वएचतुनचिस्थितः। ण्यंतानोह्रस्वविकल्पासिद्धेः। दीर्घविधौहिणिचोलोपेनस्थानिवदितिदीर्घः सिध्यति। ह्रस्वविधौस्थानिवत्त्वंदुर्वारं। भाष्येतुपूर्वत्रासिद्धेनस्थानिवदित्यवष्टभ्यद्विर्वचनसवर्णानुस्वारदीर्घजश्चरःमत्याख्याताः। णाविनिजातिपरोनिर्देशः दीर्घग्रहणंचेहमास्त्वितितदाशयः। शामिता। शमिता। शामयिता। शमिष्यते। शामिष्यते। शामयिष्यते। यङंतादिणिचु। शंशम्यते। शंशमिता। शंशामिता। यङ्‌लुगंतादिणिच्यप्येवं। भाष्यमतेतु यङंतात् चिण्वदिटिदीर्घोनास्तीतिविशेषः। ण्यंतत्वाभावे। शम्यतेमुनिना। नोदात्तोपदेशस्यमांतस्यानाचमेः। उपधायावृद्धिर्नस्यात् चिणिञ्णितिकृतिच। अशमि। अदमि। उदात्तोपदेशस्येतिकिं। अगामि। मांतस्यकिं। अवादि। अनाचमेकिं। आचामि। अनाचमिकमिचमीनामितिवक्तव्यं। चिणिआयादयइतिणिङभावे। अकामि। णिङणिचोरप्येवं। अवामि। वधहिंसायां। हलंतः। जनिवध्योश्चेतिनवृद्धिः। अवधि। जागर्तेर्विचिण्णल्ङित्स्वितिप्रतिषेधेन गुणः। अजागारि। भंजेश्चि

सि॰कौ॰ चिणि। नलोपाचास्यात्। अभाजि। अभंजि। विभाषाचिणमुलोः। लभेर्नुमागमोवास्यात्। अलंभि। अलाभि। व्यवस्थितविकल्पत्वात्प्रादेर्नि
त्यंनुम्। प्रालंभि। द्विकर्मकाणांतु गौणकर्मणिदुह्यादेः। प्रधानेनीहृकृष्वहां। बुद्धिभक्षार्थयोः शब्दकर्मणांचनिजेच्छया प्रयोज्यकर्मण्य
न्येषांण्यंतानांलादयोमताः। गौर्दुह्यतेपयः। अजाग्राममनीयतेह्रियतेकृष्यते। उह्यतेवोध्यतेमाणवकंधर्मः। माणवकोधर्ममितिवा। प्रा
श्यतेऽमृतंदेवान्देवाऽइतिवा। अध्याप्यतेविधिर्वेदंवेदोवा। देवदत्तोग्रामंगम्यते। अकर्मकाणांकालादिकर्मकाणांकर्मणिभावेचल
कारइष्यते। मासोमासंवा। आस्यते देवदत्तेन। णिजंतात्तु प्रयोज्येप्रत्ययः। मासमास्यतेमाणवकः॥ इतिभावकर्मप्रक्रिया॥ यदासौक
र्मातिशयंद्योतयितुंकर्तृव्यापारोनविवक्ष्यते। तदाकारकांतराण्यपिकर्तृसंज्ञांलभंते। स्वपारे स्वतंत्रत्वात्। तेनपूर्वकरणत्वादिसत्वे
पिसंप्रतिकर्तृत्वात्कर्तरिलकारः। साध्वसिश्छिनत्तिकाष्ठानि। पचंति। स्थालीपचति। कर्मणस्तुकर्तृत्वविवक्षायां प्राक्सकर्मका
अपिप्रायेणाकर्मकाः। तेभ्योभावेकर्तरिचलकाराः॥ पच्यतेओदनेन। भिद्यतेकाष्ठेन। कर्तरित्तु। कर्मवत्कर्मणातुल्यक्रियः। कर्मस्थ
याक्रिययातुल्यक्रियः कर्ताकर्मवत्स्यात्। कार्यातिदेशोयं। तेनयगात्मनेपदचिण्चिण्वदिटः स्युः। कर्तुरभिहितत्वात्प्रथमा। पच्यतेओ
दनः। भिद्यतेकाष्ठं। अपाचि। अभेदि। ननुभावेलकारेकर्तुर्द्वितीयास्यात्। अस्मादतिदेशादितिचेन्न। लकारवाच्यएवकर्ताकर्मवत्। लिङ्या
शिष्यङ्इतिद्विलकारकाल्लुइत्यनुवृत्तेः। भावेप्रत्ययेचकर्तुर्लकारेणानुपस्थितेः। अतएवकृत्यक्तखलर्थाः। कर्मकर्तरिनभवंति। ८१

तदंतानांहनादीनां चचिणि चांगकार्यंवास्यात्स्यादिषुपरेषु। भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च। अयमिट्चिण्वद्भावसन्नियो
गशिष्टत्वात्तदभावेनइहार्धधातुकइत्यधिकृत्तत्वंसीयुटोविशेषणंनान्येषामव्यभिचारात्। चिण्वद्भावाद्वृद्धिः। भाविता। भविता। भाविष्यते
भा भविष्यते। भूयतां। अभूयत। भूयेत। भाविषीष्ट। भविषीष्ट। चिण्वद्भावकर्मणोः। च्लेश्चिण्स्याद्भावकर्मवाचिनितशब्देपरे। अभावि। अभाविष्यत
अभविष्यत। तिङोक्तत्वात्कर्मणिनद्वितीया। अनुभूयते। आनंदश्चैत्रेण। त्वयामयाच। अनुभूयेते अनुभूयंते। त्वमनुभूयसे। अहमनुभूये
अन्वभावि। अन्वभाविषातां। अन्वभविषातां। णिलोपः। भाव्यते। भावयांचक्रे। भावयांबभूवे। भावयामासे। इहतशब्दस्य एशिइट् एत्वेकृतेहन
एतीतिहत्वं। तासिसाहचर्यादस्तेरपि स्यतिष्ठे। इत्यादेसार्वधातुकेएवएतिहत्वप्रवृत्तेरित्याहुः। भाविता। चिण्वदिट्। आभीयत्वेनासिद्ध
त्वाण्णिलोपः। पक्षेभावयिता। भाविष्यते। भावयिष्यते। भाव्यतां। अभाव्यत। भाव्येत। भाविषीष्ट। भावयिषीष्ट। अभावि। अभाविषातां। अभाव
यिषातां। बुभूष्यते। बुभूषांचक्रे। बुभूषिता। बुभूषिष्यते। बोभूय्यते। यङ्लुगंतात्तु। बोभूयते। बोभूयांचक्रे। बोभाविता। बोभविता। अकृत्सार्वेति
दीर्घः। स्तूयतेविष्णुः। तुष्टुवे। स्ताविता। स्तोता। स्ताविष्यते। स्तोष्यते। अस्तावि। अस्ताविषातां। अस्तोषातां। गुणोर्तीतिगुणः। अर्यते। स्मर्यते।
सस्मरे। परत्वान्नित्यत्वाच्चगुणेरपरेकृतेऽजंतत्वाभावेप्युपदेशग्रहणाच्चिण्वदिट्। आरिता। अर्ता। स्मारिता। स्मर्ता। गुणोर्तीत्यत्रनित्यग्रहणा

नेपदात्। भूषावाचिनां किरादीनां सन्नन्तानां च यक्चिणौ न। चिण्वदिट् च नेत्यर्थः। अलंकुरुते कन्या। अलमकृत। अवकिरते हस्ती। अवाकीर्ष्ट
गिरते। अगीर्ष्ट। आद्रियते। आदृत। किरादिः कदाद्यंतर्गणः॥ चिकीर्षते कटः। अचिकीर्ष्ट। इच्छायाः कर्तृस्थत्वेपि करोतिक्रियापेक्ष
मिह कर्मस्थक्रियात्वं। नरुधः। अस्माच्चेच्चिण् न। अवारुद्ध गौः। कर्मकर्तरीत्येव॥ अवारोधि गौर्गोपेन। तपस्तपःकर्मकस्यैव। कृतो
कर्मवत्स्यात्। विध्यर्थमिदं। एवकारस्त्वन्यथर्थ एवेति वृत्त्यनुसारिणः। तप्यते तपस्तापसः। अर्जयतीत्यर्थः। तपोनुतापे चेति चिण्निषे
धात्सिच्। अतप्त तपः। कर्मकस्येति किं। उत्तपति सुवर्णं सुवर्णकारः। न दुहस्नुनमां यक्चिणौ। प्रस्नुते। प्रास्नाविष्ट। प्रास्नोष्ट नमते
दंडः। अनंस्त। अन्तर्भावितण्यर्थोत्र नमिः। यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानं। कारयते। अचीकरत। उच्छ्रयते दण्डः। उ
दशिश्रियत्त। चिण्वदिट् तु स्यादेव। कारिष्यते। उच्छ्रायिष्यते। ब्रूते कथा। अवोचत। भारद्वाजीयाः पठंति। णिश्रंथिग्रंथिब्रूञात्मनेपदाक
र्मकाणामुपसंख्यानं। पुच्छमुदस्यति। उत्पुच्छयते गौः। अन्तर्भावितण्यर्थतायां उत्पुच्छयते गां पुनः कर्तृत्वविवक्षायां उत्पुच्छयते गौः।
उदपुपुच्छत। यक्चिणोः प्रतिषेधाच्छयङ्गौ। श्रंथिग्रंथ्योराधृषीयत्वाण्णिजभावपक्षे ग्रहणं। ग्रंथति ग्रंथं। श्रंथति मेखलां देवदत्तः।
ग्रंथते ग्रंथः। अग्रंथिष्ट। श्रंथते। अश्रंथिष्ट। क्रैयादिकयोस्तु श्रथ्नाति। ग्रथ्नीते स्वयमेव। विकुर्वते सैंधवाः। वल्गंतीत्यर्थः। वेः श
ब्दकर्मणः कर्मकाच्चेति तङ्। अन्तर्भावितण्यर्थस्य पुनः प्रेषणत्यागे विकुर्वते सैंधवाः। व्यकारिष्ट। व्यकारिषातां। व्यकारिषत। व्यकृ

त। व्यकृषातां। व्यकृषत। कुषिरजोः प्राचां श्यन्परस्मैपदं च। अनयोः कर्मकर्तरि नित्यं यक्। किंतु श्यन्। परस्मैपदं च। आत्मनेपदापवादः। कुष्य
ति। कुष्यते। रज्यति। रज्यते। वस्त्रं। यगविषये नास्य प्रवृत्तिः। कोषीष्ट। रंक्षीष्ट॥ इति कर्मकर्तृप्रक्रिया॥ ॥अभिज्ञावचने लृट्॥ स्मृतिबो
धित्युपपदे भूतानद्यतने धातोर्लृट् स्यात्॥ लङोपवादः। स्मरसि कृष्ण गोकुले वत्स्यामः। एवं बुध्यसे। चेतयसे इत्यादियोगेपि तेषामपि प्रक
रणवशेन स्मृत्यर्थवृत्तिसंभवात्॥ नयदि। यद्योगे उक्तं न। अभिजानासि कृष्ण यद्वने अभुंज्महि॥ विभाषा साकांक्षे॥ उक्तविषये लृड्वा स्यात्॥
लक्ष्यलक्षणभावेन साकांक्षश्चेद्धात्वर्थः। स्मरसि कृष्ण वने वत्स्यामः। तत्र गाश्चारयिष्यामः। वासो लक्षणं चारणं लक्ष्यं। पक्षे लङ्। यद्
योगेपि नयदीति बाधित्वा परत्वादिह विकल्पः॥ परोक्षे लिट्। चकार। उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यं। सुप्तोहं किल विललाप। बहु जगद
पुरस्तात्तस्य मत्ता किलाहं। अत्यंतापह्नवे लिड्वक्तव्यः। कलिंगेष्ववात्सीः। नाहं कलिंगान् जगाम। हशश्वतोर्लङ् च। अनयोरुपपदयोर्लिड्वि
षये लङ् स्यात् चाल्लिट्। इतिहाकरोच्चकार वा। शश्वदकरोच्चकार वा। प्रश्ने चासन्नकाले। प्रष्टव्यः प्रश्नः। आसन्नकाले पृच्छ्यमानेर्थे लिड्
विषये लङ्लिटौ स्तः। अगच्छत् किं। जगाम किं। अनासन्ने तु। कंसं जघान किं। लट् स्मे। लिटोपवादः। यजति स्म युधिष्ठिरः। अपरोक्षे च। भूतान
द्यतने लट् स्यात् स्मयोगे। एवं स्म पिता ब्रवीति। ननौ पृष्टप्रतिवचने। अनद्यतनपरोक्ष इति निवृत्तं। भूते लट् स्यात्। अकार्षीः किं। ननु करोमि किं
भोः। नन्वोर्विभाषा॥ अकार्षीः किं। न करोमि। नाकार्षं। अहं नु करोमि। अहं न्वकार्षं। पुरि लुङ् चास्मे। अनद्यतनग्रहणं मंडूकप्लुत्यानुवर्त्तते।

कौ० ति० पुराशब्दयोगे भूतानद्यतने विभाषा लुङ् चा लुट्। न तु स्मयोगे। पक्षे यथाप्राप्तं। वसन्तीह पुरा छात्राः। अवात्सुः। अवसन्। ऊषुर्वा। अस्मे किं। यजस्म
पुरा भविष्यतीत्यत्र वर्तमाने। यावत्पुरा निपातयोर्लट्। यावद्भुङ्क्ते। पुरा भुङ्क्ते। निपातावेतौ। निश्चयं द्योतयतः। निपातयोः किं। यावद्दास्यते।
तावद्भोक्ष्यते। करणभूतया पुरायास्यति। विभाषा कदाकर्ह्योः। भविष्यति लट् स्यात्। कदा कर्हि वा भुङ्क्ते। भोक्ष्यते। भोक्ता वा। किंवृत्ते लिप्सा-
यां। भविष्यल्लट् वा स्यात्। कं कतरं। कं कतमं वा। भोजयसि। भोजयिष्यसि। भोजयितासि वा। लिप्सायां किं। कः पाटलिपुत्रं गमिष्यति। लि-
प्स्यमानसिद्धौ च। लिप्स्यमानेनान्नादिना स्वर्गादेः सिद्धौ गम्यमानायां भविष्यति लड्वा स्यात्। योऽन्नं ददाति। दास्यति। दाता वा। सः स्वर्गं याति
यास्यति याता वा। लोडर्थलक्षणे च। लोडर्थः प्रैषादिर्लक्ष्यते येन तस्मिन्नर्थे वर्तमानाद्धातोर्भविष्यति लड्वा स्यात्। कृष्णश्चेद्भुङ्क्ते त्वं गाश्चारय॥
पक्षे लुङ्लृटौ। लिङ् चोर्ध्वमौहूर्तिके। ऊर्ध्वं मुहूर्ताद्भवः ऊर्ध्वमौहूर्तिकः। निपातनात्समासः। उत्तरपदवृद्धिश्च। ऊर्ध्वमौहूर्तिके भविष्यति
लोडर्थलक्षणे वर्तमानाद्धातोर्लिङ् लटौ स्तः। मुहूर्तादुपरि उपाध्यायश्चेदागच्छेत्। आगच्छति वा। आगमिष्यति। आगन्ता वा। अथ त्वं छ-
न्दोऽधीष्व। वर्तमानसामीप्ये वर्तमानवद्वा। समीपमेव सामीप्यं स्वार्थे ष्यञ्। वर्तमाने लडित्यारभ्य उणादयो बहुलमिति यावत्। येनोपा-
धिना प्रत्यया उक्तास्ते तथैव वर्तमानसमीपे भूते भविष्यति च वा स्युः। कदागतोसि। अयमागच्छामि। अयमागमं वा। कदा गमिष्यसि
एष आगच्छामि। गमिष्यामि वा। आशंसायां भूतवच्च। वर्तमानसामीप्ये इति नानुवर्तते। भविष्यति काले भूतवत् वर्तमानवच्च प्रत्यया वा ८३

किंतु भाव एव। भेत्तव्यं कुसूलेन। ननु पचिभिद्योः कर्मस्था क्रिया विक्लित्तिर्द्वैधीभवनं च। सैवेदानीं कर्तृस्थेति न तत्तुल्या। सत्यं। कर्मत्वकर्तृत्वा-
वस्थाभेदोपाधिकं तत्समानाधिकरणक्रियाया भेदमाश्रित्य व्यवहारः। कर्मणेति किं। करणाधिकरणाभ्यां तुल्यक्रिये पूर्वोक्ते साध्वसिरि-
त्यादौ माभूत्। किंच कर्तृस्थक्रियेभ्यो माभूत्। गच्छति ग्रामः। आरोहति हस्ती। अधिगच्छति शास्त्रार्थः। स्मरति। श्रद्दधाति वा। यत्र कर्मणि क्रि-
ना यया कृतो विशेषो दृश्यते। यथा पक्वेषु तंडुलेषु। यथा छिन्नेषु काष्ठेषु। तत्र कर्मस्था क्रिया। नेतरत्र। नहि पक्वापक्वतंडुलेष्विव गतागतग्रामे-
षु वैलक्षण्यमुपलभ्यते। करोतिरुत्पादनार्थः। उत्पत्तिश्च कर्मस्था तेन कारिष्यते घटः इत्यादि। यत्नार्थत्वे तु नेतत्सिध्येत्। ज्ञानेच्छादिवद्यत्न-
स्य कर्तृस्थत्वात्। एतेनानुव्यवस्यमानः अर्थ इति व्याख्यातं। कर्तृस्थत्वेन यगभावश्चिण्निवृत्ते। आलोपेन्त्ररूपसिद्धेः। ताच्छील्यादावयं
चानश्न त्वात्मनेपदं। सकर्मकाणां प्रतिषेधो वक्तव्यः। अन्योन्यं स्पृशतः। अजा ग्रामं नयति। दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यं। न
दुहस्नुनमां यक्चिणौ। एषां कर्मकर्तरि यक्चिणौ न स्तः। दुहेरनेन यक एव निषेधः। चिण् तु विकल्पिष्यते। शपो लुक्। गौः पयो दुग्धे। अचः
कर्मकर्तरि। अजंतात् चिण् वा स्यात् कर्मकर्तरि तशब्दे परे। अकारि। अकृत। दुहश्च। अदोहि। पक्षे क्सः। लुग्वेति पक्षे लुक्। अदुग्ध। अधु-
क्षत। उदुंबरः फलं पच्यते। सृजियुज्योः श्यंस्तु। अनयोः सकर्मकयोः कर्ता बहुलं कर्मवत्। यगपवादः श्यन् चान्यत् स्यादित्यर्थः॥ सृजेः श्रद्धो-
पपन्ने कर्तर्येवेति वाच्यं। सृज्यते स्रजं भक्तः। श्रद्धया निष्पादयतीत्यर्थः। असर्जि। युज्यते ब्रह्मचारी योगं। भूषाकर्मकिरादीनां चात्म-

सि०ति० योरितिछेदः। उताप्योरित्यतः प्राग्भूते लिङ्निमित्ते लृङ् इत्यधिक्रियते पूर्वसूत्रंतु उताप्योरित्यादौ प्रवर्त्तते इति विवेकः। गर्हायांलडपिजा
त्वोः। आप्यायोगे लट् स्यात्कालत्रये गर्हायां। लुङादीन्येरत्वादयंबाधते। अपिजायांत्यजसिजातुगणिकामाधत्से। गर्हितमेतत्। विभा
कथमिलिङ्। गर्हायामित्येव कालत्रये लिङ् चात्लृङ्। कथंधर्मंत्यजेः। त्यजसिवा। पक्षे कालत्रये लकाराः। अत्रभविष्यति नित्यंलृङ्। भूते
वा। कथंनामतत्रभवान्धर्मंमत्यक्षत्। किंवृत्ते लिङ्लृटौ। गर्हायामित्येव। भविभाषानानुवर्त्तते कः कतरः कतमोवाहरिंनिंदेत्॥
निंदिष्यतिवा। लृङ् प्राग्वत्॥ अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि। गर्हायामितिनिवृत्तं। अनवक्लृप्तिरसंभावना। अमर्षोऽक्षमा। न संभा
वयामि। नमर्षयेवाभवान्हरिंनिंदेत्। निंदिष्यति। कः कतरः कतमोवाहरिंनिंदेत्। निंदिष्यतिवा लृङ् प्राग्वत्। किंकिलास्त्यर्थेषुल्
ट्। अनवक्लृप्त्यमर्षयोरित्येतत् गर्हायांचेतियावदनुवर्त्तते। किंकिलेतिसमुदायः क्रोधद्योतकः उपपदं अस्त्यर्थाः अस्तिभवति
विद्यतः। लिङोपवादः। नश्रद्दधे। नमर्षयेवा। किंकिलत्वंशूद्रान्नंभोक्ष्यसे अस्तिभवति विद्यतेवा। शूद्रींगमिष्यसि। अत्र लृङ् न
जातुयदोर्लिङ्। यदायद्योरुपसंख्यानं। लृटोपवादः। जातु यत्। यदायदिवात्वादृशोहरिंनिंदेत्। नावकल्पयामि। नमर्षयामि
लृङ् प्राग्वत्। यच्चयत्रयोः। यच्चयत्रवात्वमेवंकुर्याः। नश्रद्दधामि नमर्षयामि। गर्हायांच। अनवक्लृप्त्यमर्षयोरितिनिवृत्तं। यच्चयत्रयोर्यो
गेगर्हायांलिङेवस्यात्। यच्चयत्रवात्वंशूद्रंयाजयेः। अन्याय्यंमेतत्। चित्रीकरणेच। यच्चयत्रवात्वंशूद्रंयाजयेः। आश्चर्यमेतत्। शेषेल

उयदो। यच्चयत्राभ्यामन्यस्मिन्नुपपदेचित्रीकरणेगम्येधातोर्लृट् स्यात्। आश्चर्यमंधोनामकृष्णंद्रक्ष्यति। अयदोर्किं। आश्चर्यंयदिसोऽ
धीयीत। उताप्योः समर्थयोर्लिङ्। बाढमित्यर्थे ऽनयोस्तुल्यार्थता। उतअपिवाहन्यादघंहरिः। समर्थयोः किं। उतदण्डः पतिष्यति।
अपिधास्यतिद्वारं प्रश्नः प्रच्छदनं चगम्यते। इतः प्रभृतिलिङ्निमित्ते क्रियातिपत्तौ भूतेपिनित्योल्लृङ्। कामप्रवेदनेकच्चिति। स्वाभिप्राया
विष्करणेगम्यमानेलिङ् स्यान्नतुकच्चिति। कामोमेभुंजीतभवान्। अकच्चितीतिकिं। कच्चिज्जीवति। संभावनेलमितिचेत्सिद्धाप्रयोगे॥
अलमर्थोक्त्रियोदिः संभावनमिति अलमिति इतिचप्रथमायासप्तम्याचविपरिणम्यते। संभावनेऽर्थेलिङ् स्यात्तच्चेत्संभावनमलमि
ति। अलमितिसिद्धाप्रयोगेसति। अपिगिरिंशिरसाभिंद्यात्। सिद्धाप्रयोगेकिं। अलंकृष्णोहस्तिनंहनिष्यति। विभाषाधातौसंभावनव
चनेऽयदि। पूर्वसूत्रमनुवर्त्तते। संभावनेऽर्थेधातावुपपदेलिङ् वास्यात् नतुयच्छब्दे पूर्वेणनित्येप्राप्तेवचनं। संभावयामि। भुंजीत
भोक्ष्यतेवाभवान्। अयदिकिं। संभावयामियद्भुंजीथास्त्वं। हेतुहेतुमतोर्लिङ्। वास्यात्। कृष्णंनमेच्चेत्सुखंयायात्। कृष्णंनंस्यतिचेत्सु
खंयास्यति। भविष्यत्येवेष्यत्ते। नेहहंतीति पलायते। इच्छार्थेषुलिङ्लोटौ। इच्छामिभुंजीत भुंक्तांवाभवान्। एवंकामयते। प्रार्थयते इत्या
न दियोगेबोध्यं। कामप्रवेदनइतिचक्तव्यं नेहइच्छन्करोति। लिङ्। समानकर्तृकेषुइच्छार्थेषुउपपदेषुलिङ् स्यात्। भुंजीयेतीच्छति।
इच्छार्थेभ्योविभाषावर्तमाने। लिङ् स्यात्पक्षे लट्। इच्छेत्। इच्छति। कामयेत। कामयते। विधिनिमंत्रणेतिलिङ्। विधौ। यजेत। निमं

तिङ्नां

सि० कौ०

८५

उत्तरार्धं

141

15(B)

निमंत्रणे। इह भुंजीत भवान्। आमंत्रणे इहासीत। अधीष्टे पुत्रमध्यापयेद्भवान्। संप्रश्ने किं भो वेदमधीयीय उत तर्कं। प्रार्थने भोजनं
लभेय। एवं लोट्। प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च। प्रैषो विधिः अतिसर्गः कामाचारानुज्ञा। भवता यष्टव्यं भवान् यजतां चकारेण लोटो
नुकर्षणं। प्राप्तकालार्थे। लिङ् चोर्ध्वमौहूर्तिके। प्रैषादयो नुवर्तंते। मुहूर्तादूर्ध्वं यजेत। यजतां। यष्टव्यं। स्मे लोट्। पूर्वसूत्रस्य विषये
लिङः कृत्यानां चापवादः। ऊर्ध्वं मुहूर्तात् यजतां स्म। अधीष्टे च। स्मे उपपदे धीष्टे लोट् स्यात्। वत्स स्म अध्यापय। लिङ् यदि। यच्छब्दो
पपदे कालसमयवेलासु च लिङ् स्यात्। कालः समयो वेला वा यद्भुंजीत भवान्। अर्हे कृत्यतृचश्च। चा लिङ्। त्वं कन्यां वहेः। श
कि लिङ् च। शक्तो लिङ् स्याच्चात्कृत्याः। भारं त्वं वहेः। माङि लुङ्। मा कार्षीः। कथं मा भवतु। मा भविष्यतीति। नायं माङ् किंतु माशब्दः।
धातुसंबंधे प्रत्ययाः। धात्वर्थानां संबंधे यत्र काले प्रत्ययाः उक्तास्ततो ऽन्यत्रापि स्युः। तिङ्न्तवाच्याः क्रियायाः प्राधान्यात्तदनुरोधेन गुण
भूतक्रियावाचिभ्यः प्रत्ययाः। वसन्ददर्श। भूते लट्। अतीतवासकर्तृकं तर्कं दर्शनमर्थः। सोमयाज्यस्य पुत्रो भविता। सोमेन यक्ष्यमा
णो यः पुत्रः स तत्कर्तृकं भवनं। क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः। पौनःपुन्ये भृशार्थे च द्योत्ये लोट् स्यात्तस्य च हि
स्वौ स्तः। पुरुषैकवचनसंज्ञौ तु नानयोरिति दिश्यते हिस्वविधानसामर्थ्यात्। तेन सकलपुरुषवचनविषये परस्मैपदिभ्यो हिः। क
र्तरि आत्मनेपदिभ्यः [illegible] स्वो भावकर्मकर्तृषु। समुच्चये सामान्यतरस्यां। अनेकक्रियासमुच्चये द्योत्ये प्राग्युक्तं वा
× तिङामपवादः। तौ च हिस्वौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्तः। तिङ्संज्ञौ च। तध्वमोर्विषये तु हिस्वौ वा स्तः॥ ८२

स्फाराशंसायां। देवश्चेद्वर्षीत। वर्षति। वर्षिष्यति। धान्यमवाप्स्म। वपाम। वप्स्यामो वा। सामान्यातिदेशे विशेषानतिदेशः। तेन लङ्लिटो
न। क्षिप्रवचने लृट्। क्षिप्रपर्याये उपपदे पूर्वविषये लृट् स्यात्। वृष्टिश्चेत्क्षिप्रं माशु त्वरितं वा यास्यति शीघ्रं वप्स्यामः। नेति वक्तव्ये लृड्ग्र
हणं लुटोपि विषये यथा स्यात्। श्वः शीघ्रं वप्स्यामः। आशंसावचने लिङ्। आशंसावाचिन्युपपदे भविष्यति लिङ् स्यात्। नभूतवत्। गुरुश्चे
दुपेयादाशंसे युक्तोधीयीय। आशंसे क्षिप्रमधीयीय। नानद्यतनवत्क्रियाप्रबंधसामीप्ययोः। क्रियायाः सातत्ये सामीप्ये च लङ्लुटौ
न। यावज्जीवमन्नमदात्। दास्यति वा। सामीप्यं तुल्यजातीयेनाव्यवधानं। येयं पौर्णमास्यतिक्रांता तस्यामग्नीनाधीत। सोमेनायष्ट। ये
यममावास्यागामिनी तस्यामग्नीनाधास्यते। सोमेन यक्ष्यते। भविष्यति मर्यादावचनेवरस्मिन्। भविष्यति काले मर्यादोक्तावरस्मिन्प्रवि
भागे नद्यतनवच्च। योयमध्वा गंतव्य आपाटलिपुत्रात्तस्य यदवरं कौशांब्यास्तत्र सक्तून्पास्यामः। कालविभागे चानहोरात्राणां। पूर्वसूत्रं
सर्वमनुवर्तते। अहोरात्रसंबंधिविभागे प्रतिषेधार्थमिदं। योगविभाग उत्तरार्थः। योयं संवत्सर आगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता
अध्येष्यामहे। अनहोरात्राणां किं। योयं मासः आगामी तस्य योऽवरः पंचदशरात्रस्तत्राध्येतास्महे। परस्मिन्विभाषा। अवरस्मिन्नुक्तं पू
र्वसूत्रद्वयमनुवर्तते। अप्राप्तविभाषेयं। योयं संवत्सर आगामी तस्य यत्परमाग्रहायण्यास्तत्राध्येष्यामहे। अध्येतास्महे। लिङ्निमित्ते ल
ती ङ् क्रियातिपत्तौ। भविष्यत्येव। सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत्। भूते च। पूर्वसूत्रं संपूर्णमनुवर्तते। वोताप्योः। वा आ उता

८७

141
15(b)

कुल पत्र
सं:-
२२२ है

॥ इति उत्तरार्धे तिउन्नं समाप्तम् ॥

८७.

स्यात्। यथाविध्यनुप्रयोगः पूर्वस्मिन्। आद्ये लोड्विधाने लोट्प्रकृतिभूत एव धातुरनुप्रयोज्यः। समुच्चये सामान्यवचनस्य। समुच्चये लोड्विधौ च
सामान्यार्थस्य धातोरनुप्रयोगः स्यात्। अनुप्रयोगाद्यथायथं लङादयः तिबादयश्च। ततः संख्याकालयोः पुरुषविशेषार्थस्य चाभिव्यक्तिः॥
क्रियासमभिहारे द्वे वाच्ये। याहि याहीति याति। पुनः पुनरतिशयेन वा यानं ह्यतस्यार्थः। एककर्तृकं वर्त्तमानं यानं यातीत्यस्य। इतिशब्दस्तु अ
भेदेनान्वये तात्पर्यग्राहयति। एवं। यातः। यांति। यासि। याथः। याथ। यात यातेति युयं याथ। याहि याहीत्यायासीत्। यास्यति वा। अधीष्वाधी
ष्वेत्यधीते। ध्वं विषये। पक्षे अधीध्वमधीध्वमिति यूयं मधीध्वे। समुच्चये तु सक्तून्पिब धानाः खादेत्यभ्यवहरति। अन्नं भुंक्ष्व दधिकमास्वाद
स्वेत्यभ्यवहरते। तध्वमोस्तु पिबत खादतेत्यभ्यवहरथ। भुंग्ध्वं आस्वादध्वमिति अभ्यवहरध्वे। पक्षे हि स्वौ। अत्र समुच्चीयमानविशेषाणांम
नुप्रयोगार्थेन सामान्येनाभेदान्वयः। पक्षे सक्तून्पिबति। धानाः खादति। अन्नं भुंक्ते। दधिकमास्वादते। एतेन पुरीमवस्कंद लुनीहि नंदनं
मुषाण रत्नानि हरामरांगनाः। विग्रह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्निशं दिवः इति व्याख्यातं। अवस्कंदनलवनादि रूपा भूता
क नद्यतनपरोक्षा एककर्तृका आस्वास्थ्यक्रियेत्यर्थात्। इह पुनः पुनरवस्कंदेत्यादिरर्थ इति तु व्याख्यानं भ्रममूलकमेव। द्वितीयसूत्रे क्रियासमभि
हार इत्यस्यानुवृत्तेः। लोडंतस्य द्वित्वापत्तेश्च। पुरीमवस्कंदेत्यादि मध्यमपुरुषैकवचनमित्यपि केषांचिद्भ्रम एव। धुंष्वचनसंज्ञे तु इह नेत्युक्त ८६
त्वात्॥ इति लकारार्थप्रक्रिया॥ इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धांतकौमुद्यां उत्तरार्धे तिङंतं समाप्तं॥ शक १७७६ आनंदनामसंवत्सरे समाप्तं॥

देशाः॥ दिशायो मध्यमपदिशं॥ क्लीबेव्ययंत्वपदिशं दिशोर्मध्येविदिक्स्त्रियामित्यमरः॥ तृतीयासप्तम्योर्बहुलं॥
अदंतादव्ययीभावात्तृतीयासप्तम्योर्बहुलममभावस्स्यात्॥ अपदिशं। अपदिशेन। अपदिशे॥ बहुलग्रहणा
त्सुमद्रमुन्मत्तगंगमित्यादौ सप्तम्यानित्यममभावः॥ विभक्त्यादेरयमर्थः॥ विभक्त्यर्थादिषु वर्त्तमानम
व्ययं सुबंतेन सह समस्यते सोऽव्ययीभावः॥ विभक्तौ तावत् हरौ इत्यधिहरि सप्तम्यर्थस्यैवात्र द्योतकोऽधिः।
धिः॥ हरि ङि अधि इत्यलौकिकं विग्रहवाक्यं॥ अत्र निपातेनाभिहितेप्यधिकरणे वचनसामर्थ्यात्सप्तमी॥
अव्ययीभावश्च॥ अयं नपुंसकं स्यात्॥ ह्रस्वो नपुंसके प्रातिपदिकस्य॥ गोपायतीति गाः पातीति वा गो
स्व पाः तस्मिन्नित्यधिगोपं। समीपे। कृष्णस्य समीपमुपकृष्णं॥ समया ग्रामं निकषा लंकां॥ आराद्वनादित्यत्र
तुनाव्ययीभावः॥ अभितः परितः अन्याराद् इति द्वितीयापंचम्यो विधानसामर्थ्यात्॥ मद्राणां समृद्धिः॥ सुम णां
द्रं॥ यवनानां व्यृद्धिः॥ दुर्यवनं॥ विगतानां समृद्धिः व्यृद्धिः॥ मक्षिकाणामभावो निर्मक्षिकं॥ हिमस्यात्ययोऽतिहि

मं ॥ अत्ययो ध्वं । सा निद्रा संप्रति न युज्यत इत्य[illegible] निद्रं हरिशब्दस्य प्रकाश इति हरि ॥ विष्णोः पश्चादनुवि
ष्णु ॥ प श्चाछब्दस्य तु नायं समासः ॥ ततः पश्चात्तत्रस्य तद्इति भाष्यप्रयोगात् ॥ योग्यता वीप्सापदार्था
नतिवृत्ति सादृश्यानि यथार्थाः ॥ अनुरूपं रूपस्य योग्यमित्यर्थः ॥ अर्थमर्थं प्रति प्रत्यर्थं प्रतिशब्दस्य वी
प्सायां ॥ कर्मप्रवचनीयसंज्ञाविधानसामर्थ्यात्तद्योगे द्वितीयागर्भं वाक्यमपि । शक्तिमनतिक्रम्य
यथाशक्ति ॥ हरेः सादृश्यं सहरि ॥ वक्ष्यमाणेन सहस्य सः ॥ ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं ॥ चक्रेण
युगपदिति विग्रहे ॥ अव्ययीभावे चाकाले ॥ सहस्य सः स्यादव्ययीभावे न तु काले सचक्रं ॥ काले तु हस
पूर्वाह्णं ॥ सदृशः सख्या ससखि ॥ यथार्थत्वे नैव सिद्धे पुनः सादृश्यग्रहणं गुणभूतेऽपि सादृश्ये यथा स्या
दित्येवमर्थं ॥ क्षत्राणां संपत्तिः सक्षत्रं ॥ ऋद्धेराधिक्यं समृद्धिः ॥ अनुरूप आत्मभावः संपत्तिरिति भेदः ॥
तृणमप्यपरित्यज्य सतृणमत्ति ॥ साकल्येनेत्यर्थः ॥ न चात्र तृणभक्षणे तात्पर्यं ॥ अन्ते अग्निग्रंथपर्यंत
मधीते साग्नि ॥ यथासादृश्ये ॥ असादृश्ये एव यथाशब्दः समस्यते तेनेह न ॥ यथा हरिस्तथा हरः ॥

सिधांत · ॥६८॥ भावा

उपचर्मं ॥ नदीपौर्णमास्याग्रहायणीभ्यः ॥ वाटच् ॥ उपनदं ॥ उपनदि ॥ उपपौर्णमासं उपपौर्णमासि ॥ समास उपाग्रहायणं । उपाग्रहायणि १
झयः ॥ झयंताद्व्ययीं ह्वा ॥ उपसमिधं ॥ उपसमित् ॥ गिरेश्च सेनकस्य ॥ गिर्यंताद्व्ययीभावा ह्वा ॥
सेनकग्रहणं पूजार्थं ॥ उपगिरं ॥ उपगिरि ॥ इत्यव्ययीभावः ॥ तत्पुरुषः ॥ अधिकारोयं ॥ प्राग्बहुव्रीहेः ॥ द्विगुश्च
द्विगुरपि तत्पुरुषसंज्ञः स्यात् ॥ इदं सूत्रं त्यक्तुं शक्यं ॥ संख्या पूर्वो द्विगुरिति पठित्वा चकारबलेन संज्ञाद्व
यसमावेशस्य सुवचत्वात् ॥ समासांतः प्रयोजनं ॥ पंचराजं ॥ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्ताप
न्नैः ॥ द्वितीयांतं श्रितादिप्रकृतिकैः सुबंतैः सह वा समस्यते ॥ स तत्पुरुषः ॥ कृष्णंश्रितः ॥ कृष्णश्रितः ॥ दुःखा
तीतः ॥ गम्यादीनामुपसंख्यानं ॥ ग्रामंगमी ॥ ग्रामगमी ॥ अन्नंबुभुक्षुः ॥ स्वयंक्तेन ॥ द्वितीयेति न संब अन्नबुभुक्षुः
ध्यते योग्यत्वात् ॥ स्वयंकृतस्यापत्यं स्वायंकृतिः ॥ खट्वाक्षेपे ॥ खट्वाप्रकृतिकं द्वितीयांतं क्तांतप्रकृतिके
न सुबंतेन समस्यते निंदायां ॥ खट्वारूढो जाल्मः ॥ नित्यसमासोयं ॥ नहि वाक्येन निंदा गम्यते ॥ सा
॥६८॥

४+ विभाषापपरिबहिरंचवः पंचम्या ॥ अन्ययोगेविभज्यते ॥

हरेरुपमानत्वं यथाशब्दो द्योतयति ॥ तेन सादृश्ये इति वा यथार्थ इति वा प्राप्तं निषिध्यते ॥ यावदवधारणे ॥
यावंतः श्लोकास्तावंतो च्युतप्रणामाः यावच्छ्लोकं ॥ सुप्प्रतिना मात्रार्थे ॥ शाकस्य लेशः शाकप्रति ॥ मात्रार्थे
किं ॥ वृक्षं वृक्षं प्रति विद्योतते विद्युत् ॥ अक्षशलाकासंख्याः परिणा ॥ द्यूतव्यवहारे पराजये एवायं स
समन मासः ॥ अक्षेण विपरीतं वृत्तं अक्षपरि ॥ शलाकापरि ॥ एकपरि ॥ विभाषा ॥ अधिकारोयं ॥ एतत्सामर्थ्यादेव
न प्राचीनानां नित्यसमासत्वं ॥ सुप्सुपेति तु नित्यं समासः ॥ अव्ययमित्यादि समासविधानात् ज्ञापका
त् ॥ अपपरिबहिरंचवः पंचम्या ॥ अपविष्णु ॥ संसारः ॥ अपविष्णोः ॥ परिविष्णु ॥ परिविष्णोः ॥ बहि
प्राग्वनम् र्वनं ॥ बहिर्वनात् ॥ प्राग्वनात् ॥ आङ्मर्यादाभिविध्योः ॥ एतयोराङ् पंचम्यंतेन वा समस्यते सोव्ययी
॥६८॥ भावः ॥ आमुक्ति संसारः ॥ आमुक्तेः ॥ आबालं हरिभक्तिः ॥ आबालेभ्यः ॥ लक्षणेनाभिप्रती आभिमुख्ये
॥ आभिमुख्यद्योतकावभिप्रती चिह्नवाचिना सह वा प्राग्वत् ॥ अभ्यग्नि शलभाः पतंति ॥ अग्निमभि ॥ प्र

त्यग्नि ।अग्निंप्रति॥ अनुर्यत्समया ॥ यं पदार्थं समया तेन लक्षणभूतेनानुः समस्यते सोऽव्ययीभावः॥ अ
नुवनमशनिर्गतः। वनस्य समीपं गत इत्यर्थः॥ यस्य चायामः॥ यस्य दैर्घ्यमनुनाद्योत्यते तेन लक्षणभूतेना
नुः समस्यते॥ अनुगंगं ।वाराणसी॥ गंगाया अनु। गंगादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः॥ तिष्ठद्गुप्रभृतीनि
च॥ एतानि निपात्यंते॥ तिष्ठंति गावो यस्मिन्काले स तिष्ठद्गु दोहनकालः॥ आयतीगवं ।इह शत्रादेशः पुं
वद्भावविरहः समासांतश्च निपात्यते इत्यादि॥ पारेमध्ये षष्ठ्या वा॥ पारमध्यशब्दौ षष्ठ्यंतेन सह वा सम
स्येते॥ एदंतत्वं चानयोर्निपात्यते॥ पक्षे षष्ठीतत्पुरुषः। पारेगंगादानय। गंगापारात्॥ मध्येगंगात्॥ गंगामध्या
त्॥ महाविकल्पेन वाक्यमपि गंगायाः पारात्। गंगाया मध्यात्॥ संख्या वंश्येन॥ वंशो द्विधा वि
द्यया जन्मना च॥ तत्र भवो वंश्यः तद्वाचिना सह संख्या समस्यते॥ द्वौ मुनी वंश्यौ द्विमुनि॥ व्याकरण
व स्य त्रिमुनि॥ विद्यातद्वतामभेदविवक्षायां त्रिमुनि व्याकरणं एकविंशति भारद्वाजं॥ नदीभिश्च॥ नदीभिः६७॥

संख्या प्राग्वत्॥ समाहारे चायमिष्यते॥ सप्तगंगं द्वियमुनं॥ अन्यपदार्थे च संज्ञायां॥ अन्यपदार्थे विद्य
मानं सुबंतं नदीभिः सह नित्यं समस्यते संज्ञायां॥ विभाषाधिकारेपि वाक्येन संज्ञानवगमादिह नित्यसमासः॥
उन्मत्तगंगं॥ नामदेशः॥ लोहितगंगं॥ समासांताः इत्यधिकृत्य॥ अव्ययीभावे शरत्प्रभृतिभ्यः॥ शरदादि
भ्यष्टच् स्यात्समासांतोऽव्ययीभावे। शरदः समीपमुपशरदं॥ प्रतिविपाशं॥ शरद् विपाश्। अनस्। मनस्।
उपानह्। दिव्। हिमवत्॥ अनडुह्। दृश्। दिश्। विश्। चेतस्। चतुर्। त्यद्। तद्। यद्। कियत्॥ जराया जरस्च॥ उप
जरसं॥ प्रतिपरसमनुभ्योऽक्ष्णः॥ यस्येति च॥ प्रत्यक्षं॥ अक्ष्णः परमिति विग्रहे समासांतविधानसा
मर्थ्यादव्ययीभावः॥ परोक्षे लिडिति निपातनात् परस्यौकारादेशः॥ परोक्षं॥ परोक्षा क्रियेत्यादि त्व
र्श आद्यचि समक्षं॥ अन्वक्षं॥ अनश्च॥ अन्नंतादव्ययीभावाट्टच् स्यात्॥ नस्तद्धिते॥ नांतस्य भस्य टेर्लोपः
स्यात्तद्धिते उपराजं॥ अध्यात्मं॥ नपुंसकादन्यतरस्यां॥ अन्नंतं यत्क्लीबं तदंतादव्ययीभावाट्टज्वा॥ उपचर्म

नद्युक्तं किं ॥ दात्रेणलूनवान इत्यादौ समासो न ॥

सिधांत

क

समास

॥६९॥ काष्ठैः पचतितरां ॥ कृत्यैरधिकार्थवचने ॥ स्तुतिनिंदाफलमर्थवा
स्यापि ग्रहणं ॥ नखनिर्भिन्नः ॥ कृतात्किं ॥ काष्ठैः पचतितरां ॥ कृत्यैरधिकार्थवचने ॥ स्तुतिनिंदाफलमर्थवा
दवचनमधिकार्थवचनं ॥ तत्र कर्त्तरिकरणे च तृतीया कृत्यैः सह प्राग्वत् ॥ काकपेया नदी ॥ वातछेद्यं तृणं ॥ अ
न्नेनव्यंजनं ॥ संस्कारकद्रव्यवाचकं तृतीयांतमन्नेन प्राग्वत् ॥ दध्ना ओदनः ॥ दध्योदनः ॥ इहांतर्भूतोपसेक
क्रियाद्वारासामर्थ्यं ॥ भक्ष्येणमिश्रीकरणं ॥ गुडेनधानाः ॥ गुडधानाः ॥ मिश्रणक्रियाद्वारासामर्थ्यं ॥ चतुर्थी
तदर्थार्थबलिहितसुखरक्षितैः ॥ चतुर्थ्यंतार्थाय यत्तद्वाचिना अर्थादिभिश्च चतुर्थ्यंतं वा प्राग्वत् ॥ तदर्थेनप्र
कृतिविकृतिभावएव बलिरक्षितग्रहणात् ज्ञापकात् ॥ यूपायदारु यूपदारु ॥ नेह ॥ रंधनायस्थाली ॥ अश्व
घासादयस्तु षष्ठीसमासः ॥ अर्थेन नित्यसमासो विशेष्यलिंगताचेति वक्तव्यं ॥ द्विजायायं द्विजार्थः सूपः ॥ द्वि
जार्थायवागूः ॥ द्विजार्थं पयः ॥ भूतबलिः ॥ गोहितं ॥ गोसुखं ॥ गोरक्षितं ॥ पंचमीभयेन ॥ चोराद्भयं चो ॥६९॥
रभयं ॥ भयभीतभीतिभीभिरितिवाच्यं ॥ वृकभीतः ॥ अपेतापोढमुक्तपतितापत्रस्तैरल्पशः ॥ एतैः स
हाल्पं पंचम्यंतं समस्यते ॥ सतू सुरुषः ॥ सुखापेतः ॥ कल्पनापोढः ॥ चक्रमुक्तः ॥ स्वर्गपतितः ॥ तरं

गापत्रस्तः ॥ अल्पशः किं ॥ प्रासादात्पतितः ॥ स्तोकांतिकदूरार्थकृच्छ्राणि क्तेन ॥ स्तोकान्मुक्तः ॥ अ
अल्पान्मुक्तः ॥ अंतिकादागतः ॥ अभ्याशादागतः ॥ दूरादागतः ॥ विप्रकृष्टादागतः ॥ कृच्छ्रादागतः ॥ पंच
म्याः स्तोकादिभ्य इत्यलुक् षष्ठी ॥ राज्ञः पुरुषो राजपुरुषः ॥ याजकादिभिश्च ॥ एभिः षष्ठ्यंतं समस्यते ॥
तृजकाभ्यां कर्त्तरी सस्य प्रतिप्रसवोयं ब्राह्मणयाजकः ॥ देवपूजकः ॥ गुणात्तरेण तरलोपश्चेतिवक्तव्यं ॥ बु
तरबंतं यद्गुणवाचि तेन समासः ॥ न निर्धारण इति पूरण गुणे ति च निषेधस्य प्रतिप्रसवोयं ॥ सर्वेषां श्वेततरः ॥
सर्वश्वेतः ॥ सर्वेषां महत्तरः ॥ सर्वमहान् ॥ कृद्योगा च षष्ठी समस्यत इति वाच्यं ॥ इध्मव्रश्चनः ॥ न निर्धा
रणे ॥ निर्धारणे या षष्ठी सा न समस्यते ॥ नृणां द्विजः श्रेष्ठः ॥ प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यं ॥ सर्पि
षोज्ञानं ॥ पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन ॥ पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते ॥
गु पूरणे सतां षष्ठः ॥ गुणे ॥ काकस्य कार्ष्ण्यं ॥ ब्राह्मणस्य शुक्लाः ॥ यदा प्रकरणादिना दंता इति विशेष्यं ज्ञातं तदेद
मुदाहरणं ॥ अनित्योयं गुणेन निषेधः संज्ञाप्रमाणत्वादिस्यादिनिर्देशात् ॥ तेनार्थगौरवं बुद्धिमांद्यमित्यादि

र्थ मास शक्त्सानन्तु॥१

सिर्ध॥स्कूहिलार्थस्त्तस्यर्थाः॥फलानां स्कूहितः॥तृतीयासःस्तु स्यादेव॥स्वरे विशेषः॥सतू द्विजस्य
कुर्वन्॥कुर्वाणोवा॥किंकरइत्यर्थः॥अव्ययं॥ब्राह्मणस्यकृत्वा॥पूर्वोत्तरसाहचर्यात् कृदव्ययमेवगृह्यते॥
तेनतदुपरीत्यादिसिधमितिरक्षितः॥तव्यब्राह्मणस्यकर्त्तव्यं॥तव्यतोभवत्येव॥स्वकर्त्तव्यंस्वरभेदः॥समा
नाधिकरणे॥तक्षकस्यसर्पस्य॥विशेषणसमासस्त्विहबहुलग्रहणात्समध्यति॥गोधेनोरित्यादिषु
पोटायुवतीत्यादिनं॥विभक्त्यंतरेचरितार्थानां परत्वाद्बाधकः षष्ठीसमासः प्राप्तःसोप्यनेनबाध्यते॥
क्तेनचपूजायां॥मतिबुधीतिसूत्रेण विहितायः क्तस्तदंतेनषष्ठीनसमस्यते॥राज्ञांमतो॥बुधःपूजितोवा॥
राजपूजितइत्यादौतु भूतेक्तांतेन सहतृतीयातस्यसमासः॥अधिकरणवाचिनाच॥क्तेनषष्ठीनसमस्यते॥
इदमेषामासितंगतं भुक्तं वा॥कर्मणिच॥उभयप्राप्तौ कर्मणीतियाषष्ठीसानसमस्यते॥आश्चर्यं
गवांदोहोगोपेन॥तृजकाभ्यां कर्त्तरि॥कर्त्रर्थतृज्जकाभ्यां षष्ठ्यानसमासः॥अपांस्रष्टा॥वज्रस्यभर्त्ता ॥८०॥
ओदनस्यपाचकः॥कर्त्तरिकिं॥इक्षूणांभक्षणमिक्षुभक्षिकापत्यर्थभर्तृशब्दस्ययाजकादित्वात्समा

सः॥साभिकृतं॥कालाः॥क्तेनेत्येव॥अनत्यंतसंयोगार्थंवचनं॥मासंप्रमितःप्रतिपच्चंद्रः॥मासंप[illegible]छे
चुमारधवा॥अत्यंतसंयोगेच॥कालाइत्येव॥अक्तांतार्थंवचनं॥मुहूर्त्तं सुखं मुहूर्त्तसुखं॥तृतीया
तत्कृतार्थेनगुणवचनेन॥तत्कृतेतिलुप्ततृतीयाकं॥तृतीयांतं तृतीयांतार्थकृतगुणवचनेनार्थशब्देन
चसहप्राग्वत्॥शंकुलयाखंडः शंकुलाखंडः॥धान्येनार्थो धान्यार्थः॥तत्कृतेतिकिं॥अक्ष्णाकाणः॥पू
र्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः॥तृतीयांतमेतैःप्राग्वत्॥मासपूर्वः॥मातृसदृशः॥पितृस
मः॥ऊनार्थे॥माषोनं॥कार्षापणं॥माषविकलं॥वाक्कलहः॥आचारनिपुणः॥गुडमिश्रः॥आचारश्लक्ष्णः
मिश्रग्रहणेसोपसर्गस्यापिग्रहणं॥मिश्रंचानुपसर्गमसंधावित्यत्रानुपसर्गग्रहणात्॥गुडसंमि
श्राःधानाः॥अवरस्योपसंख्यानं॥मासेनावरोमासावरः॥कर्तृकरणेकृताबहुलं॥कर्त्तरिकरणेच
तृतीयाबहुलंप्राग्वत्॥हरिणात्रातोहरित्रातः॥नखैर्भिन्नोनखभिन्नः॥कृद्ग्रहणेगतिकारकपूर्वस्य
कृदंतेन

॥८३॥ साधारणधर्मस्य प्रयोगेऽसति विशेष्यस्य पूर्वनिपातार्थं सूत्रं ॥ पुरुषव्याघ्रः ॥ नृसोमः ॥ व्याघ्रादिराकृतिगणः ॥ सामान्याप्र
योगे किं ॥ पुरुषो व्याघ्र इव शूरः ॥ विशेषणं विशेष्येण बहुलं ॥ भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्वत् ॥
नीलमुत्पलं नीलोत्पलं ॥ बहुलग्रहणात्क्वचिन्नित्यं ॥ कृष्णसर्पः ॥ क्वचिन्न ॥ रामो जामदग्न्यः ॥ पूर्वापरप्रथमच
रमजघन्यसमानमध्यममध्यमवीराश्च ॥ पूर्वनिपातनियमार्थमिदं ॥ पूर्ववैयाकरणः ॥ अपराध्यापकः ॥ अ
परस्यार्द्धे पश्चभावो वक्तव्यः ॥ अपरश्चासावर्द्धश्च पश्चार्द्धः ॥ क[illegible]थमैकवीर इति ॥ पूर्वकाले केति बाधित्वा
परत्वादनेन समासे वीरैक इति हि स्यात् ॥ बाहुलकाद्वा विध्यति ॥ श्रेण्यादयः कृतादिभिः ॥ श्रेण्यादिषु च्व्यर्थ
वचनं कर्तव्यं ॥ अश्रेणयः श्रेणयः कृताः श्रेणिकृताः ॥ क्तेन नञ्विशिष्टेनानञ् ॥ कृतं च तदकृतं च कृताकृतं ॥
शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसंख्यानं ॥ शाकः प्रियः पार्थिवः शाकपार्थिवः देवब्राह्मणः ॥
सन्महत्परमोत्तमोत्कृ[illegible]ष्टाः पूज्यमानैः ॥ सद्वैद्यः ॥ वक्ष्यमाणेन महत आकारः ॥ महावैयाकरणः ॥ पूज्य ८३
मानैः किं ॥ उत्कृष्टो गौः ॥ पंकादुद्धृत इत्यर्थः ॥ वृन्दारकनागकुंजरैः पूज्यमानं ॥ गोवृन्दारकः ॥ व्याघ्रादेराकृ
तिगणत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनं ॥ कतरकतमौ जातिपरिप्रश्ने ॥ कतरकठः कतमकलापः ॥

गोत्रं च चरणैः सह इति जातित्वं ॥ किं क्षेपे ॥ कुत्सितो राजा किंराजा यो न रक्षति ॥ पोटायुवतिस्तोककतिपयगृष्टिधेनु
वशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ॥ ॥ तत्पुरुषः समानाधिकरणः कर्मधारयः ॥ पुंवत्कर्मधा
रयजातीयदेशीयेषु ॥ कर्मधारये जातीयदेशीययोश्च परतो भाषितपुंस्कात्परऊङभावो यस्मिंस्तथाभूतं पूर्वं
पुंवत् ॥ पूर[illegible]णीप्रियादिष्वप्राप्तः पुंवद्भावो विधीयते ॥ महानवमी ॥ कृष्णचतुर्दशी ॥ महाप्रिया ॥ तथा कोपधा
देः प्रतिषिद्धः पुंवद्भावः कर्मधारयादौ प्रतिप्रसूयते ॥ पाचकस्त्री ॥ दत्तभार्या ॥ पंचमभार्या ॥ स्रौघ्नभार्या ॥ सु
केशभार्या ॥ ब्राह्मणभार्या ॥ एवं पाचकजातीया ॥ पाचकदेशीयेत्यादि ॥ इभपोटा ॥ पोटा स्त्रीपुंसलक्षणा ॥ इभ
युवतिः ॥ अग्निस्तोकः ॥ उदश्वित्कतिपयं ॥ गृष्टिः सकृत्प्रसूता ॥ गोगृष्टिः ॥ धेनुर्नवसूतिका ॥ गोधेनुः ॥ वशा वंध्या ॥
गोवशा ॥ वेहद्गर्भघातिनी ॥ गोवेहत् ॥ बष्कयणी तरुणवत्सा ॥ गोबष्कयणी ॥ कठप्रवक्ता ॥ कठश्रोत्रियः ॥ कठा
ध्यापकः ॥ कठधूर्तः ॥ प्रशंसावचनैश्च ॥ एतैः सह जातिः प्राग्वत् ॥ गोमतल्लिका ॥ गोमचर्चिका ॥ गोप्रकां
डं गवोद्धः ॥ गोतल्लजः ॥ प्रशस्ता गौरित्यर्थः ॥ [illegible] मत ल्लिकादयो निस्वयतलिंगाः ॥ न तु विशेष्यनि[illegible]घ्नाः ॥

जातिः किं ॥ कुमारीमतल्लिका ॥ युवा खलतिपलितवलिनजरतीभिः ॥ पूर्वनिपातनियमार्थमिदं सूत्रं लिंगविशि
ष्टपरिभाषया युवतिशब्दोपि समस्यते ॥ युवा खलतिः युवखलतिः युवतिः खलती युवखलती ॥ युवजरती
युवस्यामेव जरतीधर्मोपलंभेन तद्रूपारोपात् सामानाधिकरण्यं ॥ कृत्यतुल्याख्या अजात्या ॥ भोज्योष्णं तुल्य
श्वेतः ॥ सदृशश्वेतः ॥ अजात्या किं ॥ भोज्य ओदनः ॥ प्रतिषेधसामर्थ्याद्विशेषणसमासोपि न ॥ वर्णो वर्णेन ॥ समा
नाधिकरणेन सह प्राग्वत् ॥ कृष्णसारंगः ॥ कडाराः कर्मधारये ॥ कडारादयः शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः ॥ क
डारजैमिनिः ॥ जैमिनिकडारः ॥ कुमारः श्रमणादिभिः ॥ कुमारीश्रमणा ॥ कुमारश्रमणा ॥ इह गणे श्रमणा प्रव्र
जिता गर्भिणीत्यादयः स्त्रीलिंगाः पठ्यंते ॥ लिंगविशिष्टपरिभाषाया एतदेव ज्ञापकं बोध्यं ॥ चतुष्पादो गर्भिण्या ॥
चतुष्पाज्जातिवाचिनो गर्भिणीशब्देन सह प्राग्वत् ॥ गोगर्भिणी ॥ मयूरव्यंसकादयश्च ॥ एते निपात्यंते ॥
मयूरव्यंसको मयूर व्यंसकः ॥ व्यंसको धूर्तः ॥ उद क् अवाक् उच्चावचं ॥ निश्चितं प्रचितं निश्चप्रचं ना ७४
स्ति किंचन यस्या किंचनः ॥ आख्यातमाख्यातेन क्रियासातत्ये ॥ अश्नीतपिबतेत्येवं सततं यत्राभिधीय

प्रियशब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः ॥ तेन शालाशब्दे आकार उदात्तः ॥ पूर्वशालाप्रियः ॥ दिक्समाहारो नास्य
याः नभिधानात् ॥ संख्यायास्तद्धितार्थे षण्णां मातॄणामपत्यं ॥ षाण्मातुरः ॥ पंच गावो धनं यस्येति त्रिपदे बहुव्री
हाववांतरतत्पुरुषस्य विकल्पे प्राप्ते ॥ द्वंद्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनं ॥ गोरतद्धितलुकि ॥ गो
नात् तत्पुरुषात् टच् स्यात् समासांतो न तु तद्धितलुकि ॥ पंचगवधनः ॥ पंचानां गवां समाहारः ॥ संख्यापूर्वो द्वि
गुः ॥ तद्धितार्थेत्यत्रोक्तः संख्यापूर्वो द्विगुः स्यात् ॥ द्विगुरेकवचनं ॥ द्विग्वर्थः समाहार एकवत् ॥ स नपुं
सकमिति नपुंसकत्वं पंचगवं ॥ कुत्सितानि कुत्सनैः ॥ कुत्स्यमानि कुत्सनैः सह प्राग्वत् ॥ वैयाकरणखसूचिः
मीमांसकदुर्दुरूढः ॥ पापाणके कुत्सितैः ॥ पूर्वसूत्रापवादः ॥ पापनापितः ॥ अणकुलालः ॥ उपमानानि सामा रू
न्यवचनैः ॥ घनश्यामः इह पूर्वपदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्य
ते ॥ पूर्वनिपातनियमार्थं सूत्रं ॥ उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ॥ उपमेयं व्याघ्रादिभिः सह प्राग्व

त्याः॥ नमुंचतीतिनमुचिः॥ नकुलमस्य॥ नखमस्य॥ नस्त्रीपुमान्॥ स्त्रीपुंसयोः पुंसकभावो निपातनात्॥ नक्षरती
तिनक्षत्रं॥ क्षीयतेः क्षरतेर्वा क्षत्रमिति निपात्यते॥ नक्रामतीति नक्रः॥ क्रमेर्डः॥ नअकमस्मिन्निति नाकः॥ नगोऽप्राणिष्वन्य
तरस्यां॥ नगइत्यत्र नञ् प्रकृत्या नगाः अगाः पर्वताः॥ अप्राणिषु किं॥ अगोवृषलः शीतेन॥ नित्यं क्रीडेत्यतो नित्य
मित्यनुवर्त्तमाने॥ कुगतिप्रादयः॥ एते समर्थेन नित्यं समस्यते॥ कुत्सितः पुरुषः कुपुरुषः॥ गतिश्चेत्यनुवर्त्तमाने॥
ऊर्यादिच्विडाचश्च॥ एते क्रियायोगे गतिसंज्ञाः स्युः॥ ऊरीकृत्य॥ शु क्लीकृत्य॥ पटपटाकृत्य॥ कारिकाशब्दस्यो
पसंख्यानं॥ कारिका क्रिया॥ कारिकाकृत्य॥ अनुकरणंचानितिपरं॥ खाट्कृत्य॥ अनितिपरं किं॥ खाडितिकृत्वा
निरष्ठीवत्॥ आदरानादरयोः सदसती॥ सत्कृत्य॥ असत्कृत्य॥ भूषणेऽलं॥ अलंकृत्य॥ भूषणे किं॥ अलंकृत्वौद
नंगतः पर्याप्तमित्यर्थः॥ अनुकरणमित्यादित्रिसूत्री स्वभावात्कृ[illegible]विषया॥ अंतरपरिग्रहे॥ अंतर्हत्य॥ मध्येहत्वे
त्यर्थः॥ अपरिग्रहे किं॥ अंतर्हत्वा गतः॥ हतं परिगृहीत्वेत्यर्थः॥ कणेमनसी श्रद्धाप्रतीघाते॥ कणेहत्य पयः पिबति॥
मनोहत्य॥ कणेशब्दः सप्तमीप्रतिरूपको निपातः॥ गत अभिलाषातिशय एव वर्त्तते॥ मनःशब्दोऽप्यत्रैव॥ पुरोऽव्ययं॥ पु
रस्कृत्य॥ अस्तं च॥ अस्तमिति मांतमव्ययं गतिसंज्ञं स्यात्॥ अस्तंगत्य॥ अच्छगत्यर्थवदेषु॥ अव्ययमित्येव॥ ८५

स्र

स्तः

अच्छगत्य॥ अच्छोद्य॥ अभिमुखंगत्वा उक्त्वा चेत्यर्थः॥ अव्ययं किं॥ जलमच्छं गच्छति॥ अदोऽनुपदेशे॥ अदःकृ
पर त्यादःकृतं॥ परंप्रत्युपदेशे प्रत्युदाहरणं॥ तिरोऽन्तर्धौ॥ तिरोभूय॥ विभाषा कृञि॥ तिरःकृत्य॥ तिरस्कृत्य॥ ति
रःकृत्वा॥ उपाजेऽन्वाजे॥ एतौ कृञि वा गतिसंज्ञौ॥ उपाजेकृत्य॥ उपाजे कृत्वा॥ अन्वाजेकृत्य॥ अन्वाजेकृत्वा॥
दुर्बलस्य बलमाधायेत्यर्थः॥ साक्षात्प्रभृतीनि च॥ कृञि वा गतिसंज्ञानि स्युः॥ च्व्यर्थ इति वाच्यं॥ साक्षा
त्कृत्य॥ साक्षात्कृत्वा॥ लवणंकृत्य लवणंकृत्वा॥ मांतत्वं निपातनात्॥ अनत्याधाने उरसिमनसी॥ उरसिकृ
त्य उरसिकृत्वा॥ अभ्युपगम्येत्यर्थः॥ मनसिकृत्य॥ मनसिकृत्वा निश्चित्येत्यर्थः॥ अत्याधानमुपश्लेषः॥ तत्र
न उरसिकृत्वा पाणिं शेते॥ मध्येपदेनिवचने च॥ एते कृञि गतिसंज्ञा वा स्युरनत्याधाने॥ मध्येकृत्य॥ मध्ये
कृत्वा॥ निवचनेकृत्य॥ वाचं नियम्येत्यर्थः॥ नित्यं हस्ते पाणावुपयमने॥ कृञि॥ उपयमनं विवाहः॥ स्वी
कारमात्रमित्यन्ये॥ हस्तेकृत्य॥ प्राध्वंबंधने॥ प्राध्वमित्यव्ययं॥ प्राध्वंकृत्य॥ बंधनेनानुकूलं कृत्वेत्यर्थः
प्रार्थनादिनात्वानुकूल्यकरणे प्राध्वंकृत्वा॥ जीविकोपनिषदावौपम्ये॥ जीविकामिवकृत्वा जीविकाकृत्य॥
उपनिषदमिवकृत्य उपनिषत्कृ
पाणौकृत्य॥

औपम्येकिं ॥ जी विकांस्त्वा ॥ प्रादिग्रहणमगत्यर्थं ॥ सुपुरुषः ॥ अत्रवार्त्तिकानि । प्रादयोगताद्यर्थेप्रथमसमास
या । प्रगतआचार्यःप्राचार्यः ॥ अत्यादयः क्रांताद्यर्थे द्वितीयया ॥ अतिक्रांतोमालामतिमालः ॥ अवादयः
क्रुष्टाद्यर्थेतृतीयया ॥ अवक्रुष्टः कोकिलयावकोकिलः ॥ पर्यादयोग्लानाद्यर्थेचतुर्थ्या ॥ ॥ परिग्ला
नोध्ययनाय पर्यध्ययनः ॥ निरादयः क्रांताद्यर्थेपंचम्या ॥ । निष्क्रांतः कौशांब्याः ॥ निःकौशांबिः ॥ कर्मप्र
वचनीयानांप्रतिषेधः ॥ वृक्षंप्रति ॥ तत्रोपपदंसप्तमीस्थं ॥ सप्तम्यंतेपदेकर्म्मणीत्यादौवाच्यत्वेनस्थि
तंकुंभादि तद्वाचकंपदमुपपदसंज्ञंस्यात् ॥ तस्मिंश्चसत्येववक्ष्यमाणःप्रत्ययःस्यात् ॥ उपपदमति
ङ् । उपपदंसुबंतंसमर्थेननित्यंसमस्यते तिङंतश्चसमासः ॥ कुंभंकरोतीतिकुंभकारः ॥ इह कुंभअसद्कारइ
त्यलौकिकंप्रक्रियावाक्यं । अतिङ् किं माभवानभूत् ॥ माङिलुङितिसप्तमीनिर्देशात् ॥ माङउपपदं । अति
ङ्ग्रहणंज्ञापयति ॥ सुपेत्येतन्नेहानुवर्त्ततइति ॥ पूर्वसूत्रेपिगतिग्रहणंपृथक्कृतिङ्ग्रहणंतत्रापुरुष ७६॥
ते ॥ सुपेत्तिचनिवृत्तं ॥ गतिकारकोपपदानांकृद्भिःसहसमासवचनंप्रक्सुबुत्पत्तेरितिसिध्यं ॥ व्याघ्री ॥ अ

× ईषदित्ययंशब्दोऽकृदंतेनसैस्यते ॥ ५
म
म

तसाअश्नीतपिबता प्पचतभृज्जता ॥ खादत्तमोदता ॥ एहीडादयोऽन्यपदार्थे ॥ एहीडइतियस्मिन्कर्मणिलदेहीडं ॥
एहियवं ऽघरकोष्ठात् उत्सृजदेहीतियस्यां क्रियायां साऽधरोत्सृजा ऽ धमविधमा ॥ असातत्याथर्भिहपाठः ॥
जहिकर्मणाबहुलमाभीक्ष्ण्येकर्त्तारंचाभिदधाति ॥ ॥ जहीत्येतत्कर्मणाबहुलंसमस्यते ॥ आभीक्ष्ण्येगम्येसमा
सेनचेत्कर्त्ताभिधीयतइत्यर्थः ॥ जहिजोडः ॥ जहिस्तंबः ॥ नास्तिकुतोपिभयंयस्यसोऽकुतोभयः ॥ अन्योराजा
राजांतरं ॥ चिदेवचिन्मात्रं ॥ ईषदकृता ॥ ईषत्पिंगलः ॥ ईषद्गुणवचनेनेतिवाच्यं ॥ ईषद्रक्तं ॥ नञ् ॥ सुपाप्राग्व
त् ॥ नलोपोनञः ॥ नञोनस्यलोपउत्तरपदे ॥ अब्राह्मणः ॥ तस्मान्नुडचि ॥ लुप्तनकारान्नञउत्तरपदस्याजादे
र्नुडागमःस्यात् ॥ अनश्वः ॥ अर्थाभावेअव्ययीभावेनसहायंविकल्प्यते ॥ रक्षोहागमलघ्वसंदेहाःप्रयोजनमिति ॥
अदुग्धायामसंहितमितिचभाष्यवार्त्तिकप्रयोगात् ॥ तेनानुपलब्धिरविवादाऽविघ्नमित्यादिसिध्यं ॥ नैकोपस्तिङिक्षेऽोन
पे ॥ अपचसिलुंजा ॥ नैकधेत्यादौतुनशब्देनसहसुप्सुपेतिसमासः ॥ नभ्राण्नपानवेदानासत्यानमुचिनकुल
नखनपुंसकनक्षत्रनक्रनाकेषुप्रकृत्या ॥ पाद्धितिसूत्रेतःविदाइत्यसुन्नतः ॥ नसत्याअसत्याः ॥ न असत्यानास